श्रीदयाशिवार्थश्रीरामनिधिग्रन्थमालायाः

द्वितीयं पुष्पम्

अष्टाङ्गहृदयसंहितायाः

उत्तरं तन्त्रम्

श्रीमद् [illegible] विरचितया [illegible]

श्रीस्वामि-लक्ष्मीराम निधि ग्रन्थमाला ।

द्वितीयं पुष्पम् ।

अष्टाङ्गहृदय संहिताया-

उत्तरं तन्त्रम् ।

श्रीमत् शिवदाससेन विरचितया तत्त्वबोध व्याख्यायोपेतम् ।

श्रीमज् ज्योतिषचन्द्र सरस्वती महोदयै-

र्निबद्धेनोपोद्घातेन सम्वलितम् ।

कलकत्ता श्रेष्ठीटावसथेन-सरस्वत्युपनामकेन

श्रीज्योतिषचन्द्र देवशर्म्मणा सम्पादितम् ।

श्रीस्वामि-लक्ष्मीरामनिधि मन्त्रिणा एम, ए, इत्युपाधिधारिणा आगरा

विश्वविद्यालयरेजिष्ट्रर पदमधिकुर्वता पण्डित श्यामसुन्दर-

शर्म्मणा प्रकाशितम् ।


शकाब्दे १८६४ इं १९४२

प्रथमावृत्तिः

मूल्यं सार्द्धं रूप्यकत्रयम्

Published by Pandit Shyamsundar Sarma M. A.
Registrar Agra University
Secretary Swami Lakshmiram Trust.

Printed by Pramatha Nath Manna
Sreekrishna Printing Works
27B, Grey Street Calcutta.



जयपुरराज्यनिवासिनः स्वर्गताः आयुर्वेदमार्तण्डाः
चिकित्सकचूडामणयः श्रीलक्ष्मीरामस्वामि महोदयाः ।

उपोद्घातः ।

इयं हि विश्वविश्रुतशिवदाससेनमहोदयरचिता ऽष्टाङ्गहृदयस्योत्तरतन्त्रस्य तत्त्वबोधनाम्नी टीका प्रकाश्यते सुधीजनगणमनोविनोदाय। भारतीय वैद्यानां समाजे टीकाकृद्रूपेण महाभागस्य शिवदासस्य परिचयः सर्व्वत्रैव वर्त्तते। स्वल्पा-एव तादृक्षाः पण्डिता वर्त्तन्ते यैः खलु तन्निवद्धा चक्रपाणिदत्त प्रणीतस्य चिकित्सा-संग्रहस्य द्रव्यगुणसंग्रहस्य वा टीका नावलोकिता। टीकाद्वय मिदं पूर्णतया सर्व्वत्रैव मुद्रितं लभ्यते, बहुशो मुद्रितत्वेनास्य टीकाद्वयस्य सर्व्वत्रैव बहुलः प्रचारः संवृत्तः। चरकसंहिताया अपि खण्डिता कतिपयाध्यायानां टीकाऽप्यद्यत्वे कुत्र कुत्राप्युपलभ्यते। परमस्माकं दौर्भाग्यान्न खलु सा पूर्णतयोपलभ्यते न वासौ मुद्रिताऽप्यास्ते। एतावानेव परिचयस्तस्य वङ्गीयटीकाकृतः निखिले भारते वर्षे वर्त्तते। नाद्यापि कोऽपि कुत्रापि जानाति यत् स खलु महाभागोऽष्टाङ्गहृदयस्यापि टीकाप्रणयने प्रयत्नवानासीदिति। न खल्वद्यत्वे कुत्रापि तस्य लिखितटीकाग्रन्थस्य लवोऽपि वर्त्तत इति ज्ञायते।

भगवत्याः प्रसादतोऽष्टाङ्गहृदयस्य कोऽपि शिवदास रचितष्टीकाग्रन्थो मदीये हस्ते आपतितः। आकरग्रन्थोऽयं दैर्घ्येण सपादविंशत्यङ्गुलमितः प्रस्थतः प्रायः पञ्चाङ्गुल-मितः। पत्रसंख्या चास्य चतुर्द्दशाधिक शतद्वयम्। पत्रस्योभयतो लेखनान्-मूलतः पृष्ठसंख्या अष्टाविंशत्यधिकचतुःशतमिता स्यात्। प्रतिपृष्ठन्तु पञ्च पङ्क्तयो वर्त्तन्ते। ग्रन्थोऽयं ताड़ीपत्रे अष्टचत्वारिंशदुत्तर चतुर्द्दशशकाब्दे श्रीमज्जगन्नाथ शर्म्मणा प्राच्यवङ्गीयाक्षरेण लिखितः इति ग्रन्थान्तिमपंक्तित-उपलभ्यते। अतोऽस्य लेखनसमयोऽपि षोड़शाधिक शतचतुष्टयात् पूर्वतन इति ज्ञायते। कालोऽसौ शिवदास कालस्य नेदिष्ठ एव। पुनरस्माद् ग्रन्थादवगम्यते टीकायाश्चास्या नाम 'अष्टाङ्गहृदय तत्त्वबोध' इति।

साम्प्रतं कोऽसौ शिवदाससेनः कश्चास्याविर्भावकाल इति विचार्य्यते। अयं खलु जातितो वैद्यः। वङ्गदेशान्तर्गतः राजसाहीमण्डलान्तःपाति मालञ्चिका ग्रामवास्तव्यश्चासीदिति द्रव्यगुणादि टीकाग्रन्थस्य समाप्तिवाक्यान्निश्चीयते। अद्यत्वेऽपि राजसाही मण्डले 'मालञ्ची' इति कोऽपि ग्रामो वर्त्तते स एव शिवदास - कथिता मालञ्चिकेत्यनुमीयते। आदर्शग्रन्थश्चासौ तत्समीपवर्त्तिनः 'नाटोरस्य'

राजवैद्यानामावसथे 'वैद्यवेलघरियाख्य' ग्रामे समधिगत इति प्रमाणमिदं द्रढ़यति।

समाप्तिवाक्ये टीकाकृत आविर्भाव कालोऽपि निर्द्दिष्ट आस्ते। परं श्लोकस्यास्य पाठे द्रव्यगुण टीका लेखकानां मुद्रकाणां वा प्रमादात् कालनिर्णयो दुष्करो जातः। सर्व्वत्रैव मुद्रित पुस्तके—

"योऽन्तरङ्ग पदवीं दुरावापां छत्रमप्यतुल कीर्त्तिरवाप।
गौड़भूमिपति रर्व्वाक् साहात् तत्सुतस्य कृतिनः कृतिरेषा॥"

इत्येवं श्लोको दृश्यते। अत्र कोऽयं गौड़भूमिपति रर्व्वाक् साहः इत्यत्र प्रायः सर्व्वएव विभ्रान्ता आसन्। केऽपि विद्वांस स्तं कमपि माण्डलिकमार्य्यराजमिति प्रतिपिपादयिषन्ति। (१) न खल्वार्य्याणामुपाधिः 'साह' इति कुत्रापि श्रुतपूर्व्व इति सिद्धान्तोऽसावसमीचीनत्वेन प्रतिभाति। परन्त्वेतेन तस्य महम्मदीयत्वमेव प्रतिभाति। आदर्शपुस्तकेऽस्मिन् उपर्य्युक्त श्लोकस्य यथायथ पाठदर्शनादद्यत्वे तस्य कालनिर्णयः सुगम एवाभूत्। अत्र तु स्पष्टतया "गौड़भूमिपतिवार्व्वक साहात्" इति पाठो दृश्यते।(२) अतो गौड़ाधीशस्य वार्व्वकसाहस्य राजत्वकाल एव शिवदासस्याविर्भावोऽभूदिति निश्चीयते। वार्व्वकसाहस्तु वङ्गाधीशः पाठाननरपति रितिहासप्रसिद्धएव। 'ष्टुयार्ट' महोदयस्य वङ्गीये इतिहासे तस्य राजत्वकालस्तु १४५७ खीष्टीयाव्दात् १४७४ खीष्टीयाब्दं यावदिति निर्द्दिष्टमास्ते। *शिवदासस्तु तस्य भिषग्वरस्यान्तरङ्गोपाधिकस्यानन्तसेनस्य तनुजः। अतस्तस्य समयः वार्व्वकसाह राजत्व कालस्यान्तिमे भागे भवितुमर्हति। अतएवादर्शपुस्तकमिदमस्य शिवदासकालस्य पञ्चाशद् वर्षाभ्यन्तरमेव लिखितमिति लेखकोऽयं जगन्नाथ शर्म्मा तस्य शिष्यश्रेणीय एव सम्भाव्यते। परस्तात् टीकाग्रन्थस्यास्य बहुलप्रचारो नाभवदितीदमेकमेव हस्तलिखितं पुस्तकमृते नान्यत्र किमप्यादर्शपुस्तकं लभ्यत इति विचारयामः।

साम्प्रत मष्टाङ्गहृदयस्य कर्त्तुः परिचयोऽपि किञ्चिद्विचार्य्यते। न खलु अष्टाङ्गहृदये कुत्रापि ग्रन्थकृतां नामोल्लेखो अष्टाङ्गसंग्रहवद् दृश्यते। अधुना मुद्रिताष्टाङ्गहृदयस्य प्रत्यध्यायान्ते यः खलु "इति श्रीवैद्यपति सिंहगुप्तसुनु वागभट विरचितायाम्" इति पाठो दृश्यते स च ग्रन्थकृता लिखितो नवेति अस्ति महान् संशयावकाशः। इतः पूर्व्वं महामहोपाध्यायेन स्वर्गत विजयरत्नसेन महोदयेन तथा जीवानन्द

(१) निर्णयसागर मुद्रितायां चरक संहितायां द्वितीयावृत्ते रुपोद्घातस्य पञ्चदश पृष्ठा द्रष्टव्या।

(२) खनिम पृष्ठस्याविकलं चित्र मत्रैव मुद्रितमास्ते।

विद्यासागर भट्टाचार्य्येण कुण्टेमहोदयेन च सम्पादितेऽष्टाङ्गहृदयग्रन्थे प्रत्यध्यायमेवं पाठो नोपलभ्यत इति तेषामप्याकरग्रन्थे तथा पाठो नासीदित्यनुमीयते। इत्येवं संशयितस्यैव वाक्यस्य बलाद् अष्टाङ्गहृदयस्यापि कर्त्ता वागभट नामेति सिद्धान्तः समीचीनो नवेति सुधिभिः प्राग् विभाव्यम्। ततष्टीकाकाराणां ग्रन्थकारनामोल्लेखे 'वाग्भट' इत्युल्लेखाद् वागभटोऽस्य नाम उपाधिर्वेति संशयः। एतदतिरिक्तो विचारो नाद्यत्वे सम्भवति।

अयमेव हृदयकर्त्ताऽष्टाङ्गसंग्रहकर्त्तापीति निर्णयः समीचीनो नवेति परीक्षितुं युज्यते। अत्र केचिदायुर्व्वेदधुरन्धराः (१) ग्रन्थद्वयस्य कर्त्ता अभिन्न एवेति प्रतिपिपादयिषन्ति। तत्र ते या हि युक्तयः प्रदर्शिता स्ता एवादौ परीक्षामहे। ता एता युक्तयः—

(१) उभयोर्ग्रन्थयोर्भाषा सादृश्यम्

(२) तयोश्च पितृनामसादृश्यम्

(३) क्वचिदपि न तयोर्मतभेदश्च

(४) एकत्वे च हृदयकारस्य स्पष्टोक्तिः

(५) हृदयकारेण चरकसुश्रुतवचनानि भाषां परिवर्त्त्य गृहीतानि पुनः संग्रहश्लोका अविकृत्यैव सर्व्वत्र परिगृहीताश्च

(६) उभयोष्टीकाकाराश्चापि ग्रन्थकारैकत्वं समर्थयन्तीति।

क्रमश एतासां युक्तीनां समीचीनत्वं परीक्ष्यते।

(१) न खलु ग्रन्थयोर्भाषासादृश्ये एकग्रन्थकारत्वं भवितुमर्हति। चरकवाचस्पतिमिश्रयोरपि भाषासादृश्यं दृश्यते। पुनः प्राचामायुर्वेदग्रन्थकाराणां निरङ्कुशमितरग्रन्थवचनोद्धारः सर्व्वत्रैवोपलभ्यते। सिद्धयोगकारेण वृन्देनाविकलं माधवकरस्य गदचिकित्साया वचनानि सात्मीकृतानि, तस्यापि चक्रपाणिदत्तेनेति न खलु तेषामेकत्वं केऽपि वक्तुमर्हन्ति। चरकसुश्रुतयोरपि श्लोकाः संग्रहकारेण हृदयकारेणचाविकृत्योद्धृताः। किञ्च तयोरविकलोद्धारादृते आद्योपान्तं ग्रन्थमालोचयन्तः सर्व्व एव ज्ञातुमर्हन्ति संग्रहकाराद् हृदयकारस्य नानाछन्दः-

(१) प्रथम हेतुत्रयं म:म: गणनाथ सेन कृत प्रत्यक्षशारीरोपद्घाते ५५ पृष्ठे द्रष्टव्यम्। चतुर्थपञ्चमौ हेतू पण्डितवर्य्य श्रीमद् यादवजी सम्पादिते निर्णयसागर मुद्रिते चरके उपोद्घातांशे चतुर्द्दश पृष्ठायां द्रष्टव्यौ। षष्ठहेतुस्तु निर्णयसागर मुद्रिताष्टाङ्गहृदये वाग्भटविमर्श इत्यभिधेये निबन्धे द्रष्टव्यः।

प्रयोगचातुर्य्या ज्ञानालङ्कारभूषिता श्लोकाश्च भूयस्तरं कवित्वं वर्त्तत इति। न खल्वेतद् दृष्टान्तपरम्पराभिः स्पष्टीकर्त्तव्यम्, उभयोः ऋतुचर्य्याध्यायं निपुणमालोचयन् सर्व्व एव ज्ञातुं शक्नोति। तत्र हृदयकारस्य भाषाच्छटा संग्रहकाराद् हृदयग्राहिण्यपि विषय सौष्ठवन्तु हृदयात् संग्रहे अधिकतरेण लक्ष्यत इति।

(२) संग्रहग्रन्थे ग्रन्थकृत्परिचयः कण्ठत उक्त आस्ते (१) तत्रैव वाग्भटनाम्ना सिंहगुप्तसूनुः सिन्धुदेशोद्भवो वाग्भटनामधरो ग्रन्थकर्त्तेति ज्ञायते। एकग्रन्थकारत्वे नूनमस्य श्लोकस्यावृत्तिः हृदयग्रन्थेऽप्यास्यत। नतु तत्तथा। वर्त्तमानमुद्रितेषु केषुचिद् हृदयग्रन्थेषु अध्यायसमाप्तिवाक्ये सिंहगुप्तपुत्रत्वे ख्यापितेऽपि न खलु सर्व्वेष्वेव एवमध्यायसमाप्तिवाक्यं दृश्यते। प्रायः प्रथममुद्रितयोः हृदयग्रन्थयो मुंद्रणकाले तदादर्शपुस्तकेषु मुम्बइप्रदेशावसथेन कुण्टे महोदयेन वह्नीयेन च महामहोपाध्याय विजयरत्न सेन महोदयेन च प्रत्यध्यायमेवं समाप्तिवाक्यं न दृष्ट मिति तन्मुद्रितग्रन्थदर्शनात् सर्व्वं एवानुमातुं शक्नुयात्। एवं परिस्थिती वाक्येऽस्मिन् नामसादृश्यात् पितृनामापि लेखककल्पितमित्यनुमानं नासङ्गतं स्यात्। किञ्च मूले न कुत्रापि हृदयग्रन्थे ग्रन्थकृत परिचयो वर्त्तते। एकग्रन्थकारत्वे नूनं तथा कर्त्तव्य मासीत्। समासतो लिखेत्विषुग्रंन्थकारः श्लोकमिमं तत्याजेति तर्कोऽसमीचीन एव। हृदयकारोहि संग्रहग्रन्थात् स्वकीयग्रन्थस्योत्कर्षं प्रतिपिपादयिषन् बहूत्सानवान्तरश्लोकान् रचयित्वा ग्रन्थकलेवर मतिमानं कृतवान्। परिचय श्लोकयोरभावे हेतु रवश्य मेकत्व-वादिभिर्वक्तव्यः।

(३) तयोर्मतभेदस्तु बहुत्र दृश्यते आलोचनश्रमान् परिजिहीर्षूणां कृते तेषु कतिचिद्वोल्लिख्यन्ते, आशास्यते च तैः खलु विद्वद्भि रायोपान्तमालोचिते ग्रन्थद्वये असंख्येया मतभेदा आविष्क्रीयेरन्। वयन्तु प्रायः मुद्राकं शारीरस्थानमेवालोच्य एतान् भेदानवदयामः। त एते :—

अष्टाङ्ग संग्रहे	अष्टाङ्ग हृदये
(क) "तस्यां षोडश वर्षायां पञ्चविंशतिवर्षः पुमान् पुत्रार्थं प्रयतेत।" इति (शां १ अ॑)	"पूर्णं षोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।" इति (शां १ अ॑) गर्भोत्पादने पुरुषस्य वयोभेदः।

(१) अष्टाङ्ग संग्रहे उत्तरतन्त्रे ५० अध्याये द्रष्टव्यम्।

अष्टाङ्ग संग्रहे	अष्टाङ्ग हृदये
(ख) (प्रसवात्परं) "बुभुक्षिताञ्च पञ्चकोलचूर्णेन * * * युक्तामहः परिणामिनीम् यथासात्म्यं स्नेहमात्रां पाययेत्।" इति (शां २)	"सूतिका क्षुद्वती तैलाद् घृताद्वा महतीं पिबेत्। पञ्चकोलकिनीं मात्रामनु चोष्णं गुडोदकम्॥" इति (शां १) गुडोदकानुपाने मतभेदः। तत्र संग्रहकार श्चरकमतानुवादी हृदयकारस्तु सुश्रुतोक्तं योगद्वयमेकीकृत्याह इति मतभेदः।
(ग) "तेषु सप्तसु प्रतिबद्धानि कोष्ठाङ्गानि यकृत्प्लीहफुप्फुसोण्डुक वृकान्त्रादीनि।" इति	"कोष्ठाङ्गानि श्रितान्येषु हृदयं क्लोमफुप्फुसम्। यकृत प्लीहोण्डुकं वृक्कौ नाभि डिम्भान्त्रवस्तयः।" इत्यत्र 'डिम्भ' इति कोष्ठाङ्गं न कुत्रापि संग्रहे चरक सुश्रुतयो र्वोपलभ्यते। इति मतभेदः।
(घ) सन्धिवर्णने—"स्नायुपेशीशिराश्रितैस्तु सहस्रद्वयम्।" इति	"* * * सन्धीनाञ्च शतद्वयम्। दशोत्तरं सहस्रेद्वे निजगादात्रिनन्दनः॥" इति हृदयकारस्त्वशालेयमतं प्रादर्शयत्, परमेतादृशी अस्थिसन्धीनां सहस्रद्वयसंख्या कुत्राप्यात्रेयशासने चरकसंहितायां उपलभ्यते। संग्रहकारस्तु स्पष्टतः स्नाय्वादि सन्धीनां सहस्रद्वय माह नत्वस्थिसन्धीना मिति मतभेदः।
(ङ) अष्टाङ्ग संग्रहकारः सुश्रुत मनुसृत्य चतुर्व्विधं रक्तवाहिन्यश्चतस्र एव शिराः प्राह।	हृदयकारस्तु 'संसृष्टं लिङ्ग सङ्करे' (अं ३) इत्याद्युक्त्वा शिराणां रक्तानाञ्च सप्तविधत्वमाह।
(च) "अन्ये पुनराचक्षते दोषधातुमल सन्निपातजनितोऽन्तरुष्मा यथानिर्दिष्टाधिष्ठान कर्म्मोग्निरिति"। इति (शां ६)	"दोषधातुमलादीना मुष्मेत्यात्रेयशासनम्" इति (शां ३) इत्युक्त्वा संग्रहादतिरिच्य मतमिद मात्रेय शासनमित्याह।

(छ) "तस्मान् मांसाद्याश्रयतो मर्म्माणि पञ्चधा भिद्यन्ते" इति (शां ७)	"बाहुल्येन तु निर्द्देशः षोढ़ैवं मर्म्म-कल्पना।" इति षड्विध मर्मनिर्द्देशान् मतभेदः।
(ज) "जिह्वाघ्राणाक्षिश्रोत्रसन्तर्पणीनां शिराणां सन्निपातः" इति (शां ७)	"जिह्वाक्षिनासिकाश्रोत्रखचतुष्टय-सङ्गमे। तालुन्यास्यानि चत्वारि स्रोत-साम्" * * ॥ इति (शां ४) इति शृङ्गाटक मर्म्म वर्णने सुश्रुतानुसारिणः संग्रहकारस्य मतं न्यक्कृत्य धमनीमर्म्म-त्वेन निर्देशात् शिरापदं हित्वा स्रोतसा-मित्याह।
(झ) एकादश मांसमर्म्माणि, एकचत्वारिंश च्छिरामर्माणि, सप्तविंशतिः स्नावमर्माणि, अष्टावस्थिमर्माणि, विंशतिः सन्धिमर्म्माणि इति (शां ७)	मांसजानि दश, अस्थिन्यष्टौ, स्नाव-मर्माणि त्रयोविंशतिः, सप्तविंशत् शिराश्रयाः, नव धमनीमर्माणि, विंशतिः सन्धौ इति मर्म संख्यायां स्पष्टतः मत-भेदो वर्त्तते।
(ञ) "शुष्कमेयेष्विदं मानं द्विगुणं तद्द्रवार्द्रयोः।" इति (कल्प ८)	"द्विगुणं योजयेदार्द्रं कुड़वादि तथा द्रवम्।" इति (कल्प ६)

इतः परस्तात् हृदयकार एव संग्रहकारात् स्वस्य पार्थक्यं स्पष्टतः प्रादर्शयदिति प्रदर्श्य विरमामः। यदुक्तं तत्र—

"मांसमर्म गुदोऽन्येषां स्नाव्नि कक्षाधरौ तथा।
अपस्तम्भावपाङ्गौच धमनीस्थं न तैः स्मृतम्॥" इति (शां ४।४५)

सुश्रुतमतानुवादिना संग्रहकारेण गुदो मांसमर्मेत्युक्तम्। यदुक्तं तत्र "तल-हृदयेन्द्रवस्ति-गुद-स्तनरोहितानि एकादश मांसमर्माणि" इति (शां ७) एवं संग्रहकारेणापि धमनीमर्म न स्मृतम् इति संग्रहकारस्य हृदयकारादन्यत्वं तच्छब्दाभिधेयत्वञ्च हृदयकारेणैव निर्दिष्ट मिति तयोः पार्थक्यं सूच्यते। एवं परिस्थितावत्र मतभेदमपश्यता मायुर्व्वेदनिष्णातानामनवधानतैवापराध्यतीति वक्तुमुत्सह इति दिक्।

४। संग्रहकाराद् हृदयकारस्यान्यत्वे तस्य सुस्पष्टोक्तिमभिधाय यानि खल

हृदयवचनानि एकत्वापादकानीति कृत्वा विवादिभि रुल्लिखितानि तानि परीक्षामहे। ते च श्लोकाः—

"विपुला मलविज्ञान महामुनि मतानुगम्।
महासागरगम्भीर संग्रहार्थोपलक्षणम्॥"

"अष्टाङ्ग वैद्यक महोदधि मन्थनेन योऽष्टाङ्ग संग्रहमहामृतराशि राप्तः।
तस्मादनल्पफल मल्पसमुद्यमानां प्रीत्यर्थ मेतदुदितं पृथगेव तन्त्रम्॥"

"एतत् पठन् संग्रहबोधशक्तः स्वभ्यस्तकर्म्मा भिषगप्रकम्प्यः।
आकम्पयत्यन्य विशाल तन्त्र कृताभियोगान् यदि तन्न चित्रम्॥"

इति (उं ४०)

कथमेतैः श्लोकैर्ग्रन्थकारयो रेकत्वं प्रतिपिपादयिषन्ति ते विवादिन स्तन्न जाने, परमेतैः संग्रह ग्रन्थस्य प्राग्भावित्वं वैद्यसमाजेषुच प्रतिष्ठितत्वमेव सूचयतः। सति महासागर गम्भीरेऽमृतराशिकल्पेऽष्टाङ्गसंग्रहे ग्रन्थकारस्य हृदयरचना निष्फला भवितुमर्हतीत्याशंक्य तस्य तान्युक्तानि वचनानि शोभन्ते। न हि स्वकीयैकग्रन्थाद-परस्योत्कर्ष ख्यापनसमीहा विपश्चितां भवितु मर्हति! प्रथमे श्लोके महासागरगम्भीर-संग्रहार्थोपलक्षण मित्युक्त्वाऽष्टाङ्गसंग्रहस्य विशेषेणोपादेयत्वमुक्त्वा तस्यैव सर्व्वान् विषयान् अनेन ग्रन्थेन सूचयतीति अस्य ग्रन्थस्याप्युपादेयता माह। पुनर्जनाना-मुपादेयतमे संग्रहे वर्त्तमाने किमस्य पृथक् तन्त्रकरणे प्रयोजनमिति ततोऽपि किञ्चिद् वैशिष्ट्य प्रदर्शनाय पुनः श्लोकान्तरमाह अष्टाङ्गेत्यादि। अस्य हृदयस्य लघुकायत्वा-दल्पसमुद्यमानां कण्ठस्थकरणे सुगमतया परिश्रमविमुखा स्तत्र प्रीतिमावहन्ति अतएव स्वल्पपरिश्रमेणैव संग्रहपाठफललाभादत्र तस्मादादरातिशय्यं भविष्यतीत्युक्त्वा हृदयकारः संग्रहाद् हृदयस्योत्कर्षतामेव ख्यापयति। ग्रन्थकारै-कत्वे नैवं भवितुमर्हति नवा स्वकीयग्रन्थस्य अमृतराशित्वख्यापनमपि युज्यते। पुनरपि तृतीये श्लोके संग्रहग्रन्थस्यैव गुणगरिमाप्रचारेण तस्य हृदयसृष्टेर्बहुतिथेः प्रागेव वैद्यसमाजे प्रथितिरासीदिति सूच्यते। न खलु स्तोकेन कालेन तदात्वे गतागत्यसुकरे मुद्रायन्त्रादिविहीने काले ग्रन्थस्य प्रसिद्धिर्भवितुमर्हति। एवं परिस्थितौ हृदयकाराद् बहुतिथात् कालात् प्रागेव संग्रहकारस्याविर्भावः समीचीनतां गच्छति।

५। संग्रहकारेण बहुत्र चरकसुश्रुतयोर्वचन मविकृत्यैव परिगृहीतं तान्यपि हृदयकारेण। यत्र तु परिवर्त्य लिखितमास्ते तत्र संग्रहकारस्यैव कृतित्वं न तु

हृदयकारस्य। कुत्रचिद्वा संग्रहकारेणान्यथा पठितमपि हृदयकारेणाविकलं पठितम्। स्वल्पेन दृष्टान्तेनैतत् प्रदर्शयामः। सुश्रुतस्तु कल्पितान् योगान् तुष्टुपु रिदमाह यथा—

"एष आगम सिद्धत्वात्तथैव फलदर्शनात्।
मन्त्रवत् संप्रयोक्तव्यो न मोमांस्यः कथञ्चन ॥" इति (चि २)

संग्रहकारस्त्विमं किञ्चित् परिवर्त्य स्वतन्त्रं स्तौति यथा—

"एतदागम सिद्धत्वात् प्रत्यक्षफलदर्शनात्।
प्रयोज्यं मन्त्रवत्तन्त्रं तन्त्रज्ञानविशारदैः ॥" इति (उं ५०)

हृदयकारस्तु सुश्रुतोक्तं श्लोकं प्रायोऽविकृत्यैव पठति यथा—

"इदमागम सिद्धत्वात् प्रत्यक्ष फल दर्शनात्।
मन्त्रवत् संप्रयोक्तव्यं न मीमांस्यं कथञ्चन ॥" इति (उं ४०)

अरुणस्तु स्वतन्त्रवर्णन मिदं वचनमाह शिवदासस्तु भेषजस्तवनमिति। भेषजस्तवनन्त्वप्राकरणिकत्वान्न शोभते। पुनस्तन्त्रस्तुत्यर्थं संग्रहधृतवचनं हृदय-वचनात् सारसिकतरमिति सर्व्वं एवावबोद्धुं शक्नोति। अनेनकेनोदाहरणेन हृदयकारस्य संग्रहकारात् पार्थक्यं स्वल्पशक्तिमत्त्वञ्चेति सिद्धान्तयितुं न्याय्यम्।

६। अथ संग्रहहृदययो ष्टीकाकृतोऽपि तयो रैक्यं समर्थयन्ति नवेति विचारयामः। तत्र टीकाकाराः सर्व्वं एव तन्त्रकारतोऽर्व्वाचीनाः। न खलु प्रसिद्धि-मनाप्ते ग्रन्थे टीकां कर्त्तुं कस्यचित् प्रवृत्तिर्भवति इति तेषा मयुक्तियुक्तं मूल-विरोधि वा वचनं न प्रमाणत्वेन ग्रहीतुं युज्यते। नन्विन्दुस्तु वाग्भटशिष्यः अत-स्तद्वचनं सर्व्वथा प्रमाणं भवितुमर्हतीति चेन्न। इन्दुस्तु वाग्भटशिष्य इत्यत्र—

"लम्ब श्मश्रु कलापमम्बुजनिभच्छायाद्युतिं वैद्यकान्
अन्तेवासिन इन्दुजेज्जटमुखान् अध्यापयन्तं सदा।
आगुल्फामल कञ्चुकाञ्चितदरा लक्ष्योपवीतोज्ज्वलत्-
कण्ठस्थागुरुसारमञ्जितदृशं ध्याये दृढं वाग्भटम् ॥" इति

इति केषाञ्चिद् वाग्भटभक्तानां वचनं किम्वदन्तीमात्रं न खलु प्रमाणत्वेन ग्रहीतुं युक्तं भवति। सत्यपि प्रमाणत्वेन गृहीते तस्य हृदयकार शिष्यत्वमेव युज्यते। न हि तस्य टीकाग्रन्थे कुत्रापि परिचयो गुरोर्वा नाम वर्त्तते। पुनस्तस्य संग्रहकार शिष्यत्वे टीकाप्रारम्भे 'सोऽयं वाहटनामा शास्त्रकारः' इत्याचार्यपदविहीनं अवज्ञानसूचकं वाक्यं स नालेखिष्यत्। परन्तु यत्र यत्र तेन हृदयकारस्योल्लेखः कृत स्तत्र तत्र आचार्य्यपदे-

नैव निर्द्देशः कृतः (१)। अतस्तस्य संग्रहकार समकालीनत्वं प्रमाणत्वेन ग्रहीतुं युज्यते न वेति सुधीभिर्विभाव्यम्। पुन र्हृदयटीकाकृतः शिवदासादयोऽन्येऽपि डल्वणादयः संग्रहकारं वृद्धमित्युक्त्वा तयोः पार्थक्यमेव जगदुः।

अथ विवादिनां तर्केष्वसमीचीनतां प्रदर्श्य संग्रहहृदयकारयोः पार्थक्ये हेतून् प्रदर्शयामः। हृदयकारः वाग्भटनामा नवेति महान् संशय आपद्यते कुत्रापि हृदये तथाऽनुल्लेखात्। संग्रहकारस्तु स्वपरिचयो विस्तरशः प्रदत्तवानेव। तस्य गुरोर्नाम पितृनामावासस्थानञ्च सम्यक् कीर्त्तितं तेन (२) परं विचित्रमेवैतत् यत् स एव ग्रन्थकारः समासत स्तन्त्रं विवक्षु स्तानेव श्लोकान् परिजहौ ; पुनः संग्रहतो वैशिष्ट्य प्रदर्शनाय स्वतन्त्रकीर्त्तिख्यापनाय च बहूनवान्तरान् श्लोकान् विरचय्य ग्रन्थकलेवरं निरर्थकं वर्द्धितवान्।

अष्टाङ्गसंग्रहे रसायनाध्याये (उं ४९ अं) कुक्कुटी कञ्चकी पलाण्ड्वादीनां बहुधा कल्पो निवेदितः। हृदये त्वेतेषां तदात्वेऽव्यवहारात् ते कल्पाः परित्यक्ताः। दृष्ट्वैतन् सर्व्वं एवानुमातुं शक्नुवन्ति यत् हृदयकारः संग्रहकाराद् बहुतिथेरर्व्वाचीन-इति। अतएव तस्मिन्नेवाध्याये परित्यक्तानां कल्पानां प्राप्त्यादिकष्टत्वं युगा-ननुरूपत्वञ्च कण्ठत आह तद् यथा—

उक्तानि शक्यानिफलान्वितानि युगानुरूपाणि रसायनानि।
महानुशंसीन्यपि चापराणि प्राप्त्यादिकष्टानि न कीर्त्तितानि ॥
इति (उं ३९ अं)

संग्रहकारस्तु बहुशः शकनरपतीनामुल्लेखं कृतवान्। तत्र शकनारीणामपि वर्णनं दृष्ट्वा तदात्वे भारतेऽस्मिन् शकानां प्राबल्यं विशेषत आसीदित्यनूमीयते। यदुक्तं संग्रहे—

---

(१) "तथा आचार्य्य एव हृदये केवलं महत्याः प्रतिषेधं करोति" इति (शां २ अं)
"तथा आचार्य्येणैव युक्त्या सम्यग् हृदये कथितम्।" इति (चिं ५ अं)
इन्दु टीकायां द्रष्टव्यम्।

(२) "भिषग्वरोवाग्भट इत्यमून्मे पितामहो नामधरोऽस्मि यस्य।
सुतोऽभवत्तस्य च सिंहगुप्तस्तस्याप्यहंसिन्धुषु लब्धजन्मा ॥
समधिगम्य गुरोरवलोकिताद् गुरुतराच्च पितुः प्रतिभां मया।
सुबहुभेषजशास्त्रविलोचनात् सुविहितोऽङ्गविभागविनिर्णयः ॥"
इति (उं ५० अं)

"रसोनानन्तरं प्रायः पलाण्डुः परमौषधम् ।
साक्षादिव स्थितं यत्र शकाधिपति जीवितम् ॥
यस्योपयोगेन शकाङ्गनानां लावण्य सारादिविनिर्मितानाम् ।
कपोलकान्त्या विजितः शशाङ्को रसातलं गच्छति निर्व्विदेव ॥" इति (उ॰ ४९अ॰)

शकाधिपत्यादेव पलाण्डुभोजनं सुबहुप्रचारितमासीदित्यपि संग्रहकार वचनादुपलभ्यते। तद् यथा—

"अप्याहारे शीलितो दीर्घरात्रं वल्यश्चक्षुष्यस्तर्पणः स्थैर्य्यकारी ।
तेस्तैर्योगैः सेवितोऽयं पलाण्डु स्तांस्तानातङ्कान् मेहिनामुच्छिनत्ति ॥" इति ।

हृदयग्रन्थे तु पलाण्डुकल्पः सर्व्वथा परित्यक्तः। न खल्वेषः प्रामादि कष्टात, परन्तु युगाननुरूपत्वेनैवेति वक्तव्यम्। शकाधिपत्यलोपाद् वर्णाश्रमधर्म्मिणां धर्म्मशास्त्रानुसारेण द्विजातीनामभक्ष्यत्वात् पलाण्डुभोजनं निषिद्ध मासीदीति युगाननुरूपत्वं प्रतीयते। एवं परिस्थितौ तयोर्ग्रन्थकारयोः समकालीनत्वमेकत्वं वा न सम्भवति ।

पुनरप्युभयोर्ग्रन्थयोः सम्यगालोचितयोः स्पष्टं प्रतिभाति यद्, यत्किञ्चित् संग्रहकारादतिरिक्तं हृदयकारेण संगृहीतं प्रायस्तत् सर्व्वमेवार्षवाक्यविरुद्धं युक्तिविरुद्धञ्चेति। एकेनैवोदाहरणेन तत् स्पष्टीभविष्यति। तत्र गर्भाधान काले पुरुषस्य वयोभेदः। पुरुषस्य हि पूर्णे पञ्चविंशतिवर्षे पूर्णाङ्गत्वं भवति अतस्ततो न्यूने वयसि गर्भाधान मयौक्तिकम्, अतएव सुश्रुत आह—

"ऊनषोड्श वर्षायामप्राप्तपञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते ॥
जातो वा न चिरं जीवेत् जीवेद्वादुर्बलेन्द्रियः ॥"

इत्यार्षवाक्यस्य विरोधः हृदये स्पष्टत उपलभ्यते न तु संग्रहे। हृदयकारस्तु विंशवर्षेण पुंसा आहिताद् गर्भाद् "वीर्य्यवन्तं सुतंसूते" इत्याह। अतो हृदयकार समये तथैव देशप्रथासीदिति तस्य तथार्षविधानविरुद्धं विधानं सम्भवेत् एवं संग्रहकारस्तु आर्षवचनविरुद्धं किञ्चिदपि तत्र न लेखितुं प्रतिज्ञातवान्। यदुक्तं तत्र—

न मात्रामात्र मप्यत्र किञ्चिदागम वर्जितम् ।
तेऽर्थाः स ग्रन्थबन्धश्च संक्षेपाय क्रमोऽन्यथा ॥ इति (सू॰ १ अ॰)

हृदयकारस्तु सर्व्वत्रार्षमतं नानुवदतिस्मेति प्रतिज्ञावाक्ये प्रायइत्युक्तवान् यथा—

तेभ्योतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः ।
क्रियतेऽष्टाङ्गहृदयं नातिसंक्षेप विस्तरम् ॥ इति (सू॰ १ अ॰)

किञ्च मन्वादि समये पुरुषस्य त्रिंशद्वर्ष एवोद्वाहकालः ततः परस्तात् पञ्चविंशतिवर्षो गर्भाधानकालो दृश्यते। हृदयकार काले गर्भाधानकालस्य विंशतिवर्षात्मकत्वेनोद्वाहकालस्य ततोऽप्यल्पीयस्त्वं निर्णीयते। एवं परिस्थितौ हृदयकारस्यार्व्वाचीनत्वं नूनं स्वीकर्त्तव्यम्।

ननु हृदयकारस्तु चरकसुश्रुतयोरनार्षत्वं प्रत्यपादयद् यदुक्तं तत्र—

"ऋषि प्रणीते प्रीतिश्चेन् मुक्त्वा चरकसुश्रुतौ ।
भेड़ाद्याः किं न पठ्यन्ते तस्माद् ग्राह्यं सुभाषितम् ॥ इति (उ॰ ४० अ॰)

तट्टीकाकारोऽरुणस्तु तमेवार्थं समर्थयति "चरकसुश्रुतवदनार्षमपीदं गुणवत्त्वान् मतिमद्भिर्ग्राह्यमेव" इत्युक्त्या। इत्येवं वचनं तत् कदर्थयन्तः केचिद् व्यवस्यन्ति।(१) न तत् समीचीनत्वेन मन्यन्तेऽन्ये। मूले हि वचनेऽस्मिन् स्पष्टतः चरक-सुश्रुत-भेड़ादीनामृषिप्रणीतत्वं वर्त्तते। परन्तु सुभाषितत्वेनैव तत्र चरकसुश्रुतयोर्ग्राह्यत्वं भेलादीनाञ्चासुभाषितत्वेनाग्राह्यत्वप्रतिपादनमेव मुख्यः कल्पः इति तेन वचनेन सर्व्वएवाववोद्धुं शक्नुवन्ति। टीकाकृदरुणदत्तोऽपि तथैव समर्थयामास। न हि तस्य तेन वाक्येन विवादिनः स्वार्थः प्रतिपादितः। तत्र अनार्षमपीदं तन्त्रमष्टाङ्गहृदयाख्यं गुणवत्त्वाच्चरकसुश्रुतवन् मतिमद्भिर्ग्राह्यमित्येवमन्वयो युज्यते। न त्वनार्षमितिपदेन चरकसुश्रुतवदित्यस्य सम्बन्धो भवितुमर्हति मूल विरोधात्। मूले तु चरकसुश्रुतभेलादीनामृषिप्रणीतत्वं स्पष्टत उक्तम्। अत्र हि सुभाषितवक्तृत्वेनैव यथा चरकसुश्रुतयोर्ग्राह्यत्वं न खलु मुनिप्रणीतत्वेनैव, तथैव अमुनिप्रणीतत्वेऽपि अष्टाङ्गहृदयस्य सुभाषितत्वेन जनताभिः ग्राह्यत्वं स्यादिति मूलवचनस्य तात्पर्य्यं ज्ञातव्यं विपश्चिता।

पुनरपि संग्रहग्रन्थमेव समस्याल्पमेधसां भिषजामुपचिकीर्षुं हृदयकारो बहुत्र सप्रयोजनमपि विषयमनुल्लिख्य पाठकाना मल्पज्ञत्वे हेतुरभवत्। इतएव प्रायः सर्व्वत्रैव हृदयटीकाकाराः संग्रहपाठानुद्धृत्य सामञ्जस्यं कर्त्तुं समीहाञ्चक्रु रिति

(१) म: म: गणनाथ सेन कृते प्रत्यक्षशारीरोपद्घाते ६ पृष्ठे द्रष्टव्यम्।

निपुण मालोचयन्तः सर्व्वंएवावबोद्धुं शक्नुवन्ति। दृष्टान्तेनैकेन तत् प्रतिपिपादयिषामः। बहुत्र नाडीस्वेदेन क्रियोपदेशः हृदये अस्ति – तद् यथा –

"नाड्योष्ठं स्वेदयेद्दुग्धसिद्धैरेरण्डपल्लवैः।" इति (उं २२।५) परन्तु हृदये न कुत्रापि नाड़ीस्वेदविधिर्वर्त्तते। एवं शारीरस्थाने बहून् विषयान् विहाय संक्षेपकरणेन "संग्रहार्थोपलक्षणम्" "तस्मादनल्प फलम्" "संग्रहबोधशक्तः" इत्यादि संग्रहग्रन्थ तुलनं सुष्ठैव भवति। इत्युभयोः शक्तिभेदोऽनुमेयः।

अष्टाङ्गहृदयकारस्याविर्भाव कालेऽपि बहुधा विप्रतिपद्यन्ते विपश्चितः। तत्र केचित् डाः होर्णले प्रमुखाः पाश्चात्यविदुषः तस्य कालः खीष्टीयाब्दस्य नवम शतक इति प्रत्यपिपादयिषन्। तैरेव माधवकरस्य कालः सप्तमे शतक एव निर्दिष्टः। विदितवेदितव्यास्तु नात्र सम्मतिं यच्छन्ति। माधवकरस्य हि रुग्विनिश्चये बहुल सत्स्वपि तदर्थबोधकेषु चरकसुश्रुत वचनेषु अष्टाङ्गहृदयस्यैव वचनान्युद्धृतानि। अतो नूनं माधवकर समये अष्टाङ्गहृदयं बहुलप्रचारितं सुप्रथितञ्चासीत्। न खलु तदात्वे गमनागमनासुकरे काले अन्तिमतः शताब्दीद्वयन्यूनेन कालेन पञ्चनदप्रदेशाद् वङ्गे प्रथितिमाप्तुं कोऽपि ग्रन्थः समर्थः स्यात्। अतो माधवकराद् द्विशतवर्षात्ततोऽधिकाद्वा कालात् प्राक्तमोऽसौ हृदयकार इत्यत्र नास्ति संशयावकाशः। अतो माधवकरस्य कालस्य सप्तम शतके स्वीकृतेऽप्यष्टाङ्गहृदयस्य कालः पञ्चम शतक स्तत् पूर्व्वो वा भवितुमर्हति।

संग्रहकारस्तु हृदयकाराद् भिन्नः प्राक्तमश्चेति प्रागेव प्रतिपादितम्। तत्र शकनरपतेः शकनारीणाञ्च बहुश उल्लेखात् तदात्वे भारतेऽस्मिन् शकाधिपत्यमासीदित्यनुमीयते। न खलु हर्षवर्द्धनात् परस्तात् शकानामाधिपत्य मखासोदित्यैतिहासिकः समयः। स एव शकान् विजित्य शकारिरित्युपाधिरवाप। अतएव कश्चिदब्दः शकाब्देत्यभिधेयः भारतेऽस्मिन् प्रचरति। एवं परिस्थितौ संग्रहकारस्य समयः खीष्टीयाब्दात पूर्व्वमेव भवितुमर्हति।

टीकेयं मदन्तिके हृदयग्रन्थस्योत्तरतन्त्रस्यैव वर्त्तते। शिवदासेन कृत्स्नस्याष्टाङ्गहृदयस्य टीका प्रणीता न वेति नाद्यत्वे विचारयितुं शक्यते। यतः कुत्रापि तस्येतरस्थानानां टीका नोपलभ्यते। परमस्मिन्नादर्शपुस्तके प्रथमतो नमस्कारसूत्रं दृष्ट्वा अंशस्यास्यैव टीका तेन प्रणीतेति विचारः समीचीनतया प्रतिभाति। तदिदं सूत्रम् –

"शिवदासः पदाम्भोजं पित्रोर्भैरव्यनन्तयोः।
स्थानमुत्तरतन्त्राख्यं व्याचिख्यासुः प्रणम्यति॥" इति।

नमस्कार सूत्रेणैतेन एतदपि ज्ञायते स खलु महाभागः उत्तरतन्त्राख्यं स्थानमेव व्याचिख्यासुरभवदिति। पुनरस्य मातुर्नामानेन वचनेनोपलभ्यते भैरवीति। टीकास्वस्य कुत्रापि तस्य मातुर्नामापि न दृश्यते।

टीकेयमरुणदत्तीयाया अर्व्वाचीना बहुल तन्मतोद्धारान्निर्णीयते। पुनरनया वाग्भटनामान स्त्रय एव ग्रन्थकारा आसन्निति च ज्ञायते वृद्धमध्यवाग्भटयोः पुनः पुनरुल्लेखात्(१)। तयोरुद्धृतानि वचनान्यपि हृदये नोपलभ्यन्ते। नवा मध्यवाग्भटवचनानि सर्व्वथा संग्रहवचनान्यनुवदन्ति इति कृत्वा हृदयकारवाग्भटात तयोः पृथगस्तित्वं ज्ञायते। मध्यवाग्भटाख्यस्य न साम्प्रतमस्तित्व मुपलभ्यत इति तन्निर्णये सुधियः एव प्रमाणम्।

अत्र चरकस्योत्तरतन्त्रस्यापि किमपि वचनमुद्धृतमास्ते तद्यथा –

"चरकोत्तरतन्त्रेऽप्युक्तम् –

'बहुवक्त्रगतिं ज्ञात्वा प्रपूर्य्य गुड़सिक्थकैः।
दहेत् पूर्व्वविधानेन कषायैः क्षीरिवृक्षजैः॥" इति (२)

श्लोकोऽयं शल्यतन्त्रोक्तं, न खलु साम्प्रतं मुद्रिते चरके कुत्रापि नाड़ीव्रणचिकित्साऽभिहिता दृश्यते अतश्चरकस्यापि किमप्युत्तरतन्त्रमासीदित्यनुमीयते। पुनश्चरकसिद्धिस्थानस्यान्तिमेऽध्यायेऽद्यत्वेऽपि कश्चित् श्लोको दृश्यते तद् यथा –

"तस्मादेताः प्रवक्ष्यन्ते विस्तरेणोत्तरे पुनः।
तत्त्वज्ञानार्थमस्यैव तन्त्रस्य गुणदोषतः॥" इति

वचनेनानेन पुनरुत्तरे तन्त्रे तन्त्रयुक्तिकमध्यायं वक्तुं प्रतिजानीते। श्लोकोऽयं सहस्रवर्षात् प्रागपि ग्रन्थेऽस्मिन्नासीदिति चक्रटीकायां व्याख्यानाज् ज्ञायते। यद्यपि चक्रेण पाठोऽयमनार्षं इत्याह यथा – "तस्मादेता इत्यादिकं श्लोकमुत्तरतन्त्रे तन्त्रयुक्तिप्रतिपादकं पठन्ति तच्चानार्षं वृद्धा वदन्ति अग्निवेशतन्त्रे उत्तरतन्त्रस्यैवानार्षत्वात" इति तथापि शिवदासोद्धृत वचनेन सिद्धिस्थानवचनं प्रमाणत्वेन ग्रहीतुं युज्यत इति प्रतिभाति। चक्रपाणि स्तु अप्राप्तिनिबन्धनाच्चरकोत्तरतन्त्रस्यानार्षत्वं जगौ। एवं परिस्थितौ चरकस्योत्तर तन्त्रे सन्दिहानानां वृद्धानां तत्र संशयावकाशो वर्त्तते नवेति सुधीभिर्विचार्य्यम्।

---

(१) ग्रन्थस्यास्य १६४, १६८, १७२, १७४, १७५, १७६ १८१ संख्यकायां पृष्ठायां मध्यवाग्भटस्य, १७०, १७१ इत्यादि पृष्ठायाञ्च वृद्धवाग्भटस्य नामोनि द्रष्टव्यानि।

(२) ग्रन्थस्यास्य १७१ पृष्ठायां द्रष्टव्यम्।

आदर्शपुस्तकमिदं मदीयसतीर्थस्याग्रजकल्पस्य नाटोरराजवैद्यस्य श्रीप्रमथनाथ राय महोदयस्य सकाशादधिगतम् । ग्रन्थस्यास्य मुद्रणार्थं पुस्तकमिदं यथेप्सितं-व्यवहारायानुमति प्रदानात्तस्य परमनुग्रहं स्मरामि ।

पुनर्मदीय परमसुहृदा बोम्बाई प्रवासिना आचार्य्यपादेन श्रीमद् यादव शर्म्मणा मुद्रणव्ययसंग्रहार्थं जयपुरस्थ स्वामि-लक्ष्मीरामनिधि-सदस्याः अनुकूलयिताः, अतस्तस्यैव प्रधानतः यत्नप्रयं पुस्तकमिदं मायुर्व्वेदजगति प्रचारितमिति स खलु महाभागो विशेषतो धन्यवादार्ह आयुर्व्वेदज्ञानाम् ।

ग्रन्थ संशोधने न मे तादृशः प्रयत्नोऽभवत् । नहि बहेऽष्टाङ्गहृदयस्य हस्तलिखितं पुस्तकं सुगमतया प्राप्यते । पुनरत्र स्वल्पादेव दिवसात प्राक् निर्णय-सागरमुद्रायन्त्रालयाद् यत् खलु अष्टाङ्गहृदयस्य षष्ठं संस्करणं प्रकाशितं, तत्रैव पण्डितवर्य्येण हरिशास्त्रि पड़ारकर वैद्येन नितरां श्रमान् स्वीकृत्य बहुबहुतरान् हस्तलिखितान् मुद्रितांश्च ग्रन्थानालोच्य संशोधित मेतद्ग्रन्थं मन्ये निरवशेषतः । तदेवानुसृत्य संशोधितोऽयं ग्रन्थो मया । तथापि यत्र यत्र अरुणादिसम्मत-पाठेऽपि शिवदासस्य पाठोऽन्यथादृष्ट स्तत्र तत्रैव मूले शिवदाससम्मतः पाठ एव मुद्रितोऽस्मिन् ग्रन्थे । अपर पाठस्य च विवरण मध टीप्पन्यां निवेदितम् । कुत्र कुत्र वा टीप्पन्यां पाठानां समीचीनासमीचीनताऽपि विचारिता मया विदुषा-मालोचनसौकर्य्याय । तत्रैव निर्णयसागरमुद्रिते ग्रन्थे विस्तरशः पाठान्तर-मुल्लिखित मास्त इति नात्र पुनस्तस्यैवावृत्तिः समीचीनतया मतास्माभिः । अत-स्तन् मुद्रणे नात्र प्रयासः कृतः । पाठान्तरजिज्ञासुभिः निर्णय-सागर मुद्रितः षष्ठसंस्करणीयो ग्रन्थो द्रष्टव्यः ।


पुनरत्र पाठकेभ्यः साञ्जलिबन्धं निवेद्यते न खलु मे ग्रन्थसम्पादने पण्डित-वर्य्याणां यादवजी महोदयानां सदृशं कृतित्वं वर्त्तते इति मुद्राकर प्रमादान् मदीय बुद्धिवैधुर्य्याद्वा बहुत्र याः खलु त्रुटिविच्युतयो मे परिलक्षिता भवेयुस्ता नूनं संशोधयितव्याः स्वविद्यावत्तया तैं रिति विस्तरेणालम् ।

४०।२ ए ग्रे ष्ट्रीट,
कलकत्ता
शकाब्दाः १८६४।१९४२ ई

आयुर्व्वेदज्ञानां सेवकः
श्रीज्योतिषचन्द्र सरस्वती:



कलिकाता ग्रेष्ट्रीटावसथः—
श्रीज्योतिषचन्द्र सरस्वती ।



आदर्शं पुस्तकस्यान्तिमपृष्ठायाः प्रतिकृतिः ।

शुद्धिपत्रम् ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
५	१०	श्रृङ्गोत्थान्	शृङ्गोत्थान्
१९	१९	स्त्रावोर्द्ध	स्त्रावोर्ध्वं
२०	४	मूर्द्धं	मूर्ध्वं
२१	७	श्रवदिति	श्वानवदिति
२४	२	रिष्टौत्पत्ति-	रिष्टोत्पत्ति-
२८	२५	देवतार्चादि	देवताराद्धि
३४	२३	तित्तालावु	तिक्तालावु
३६	५	गुड़ानित्ति	गुड़ानिति
३९	१	रोधघ्र	रोध्रञ्च
४१	६	सर्ववाधि	सर्वव्याधि
५३	२२	भूल	मूल
५३	२५	मूव्वां	मूर्व्वां
५५	३	ज्ञेयं	ज्ञेयम्
५५	१७	कारञ्च	कारञ्ज
७३	२४	काष्म्र्यं	काश्मर्यं
७५	१७	सौन्धव	सैन्धव
७८	१९	कुरषट	कुरुण्ट
८०	२७	क्षीर्य्यादि	क्षीरादि
९०	१४	संमर्ग	संसर्ग
१०२	२	दद्याच्छ्राव्ये	दद्यात्स्राव्ये
१०९	८	वर्त्तियज्या	वर्त्तिर्योज्या
१०९	१६	वि म	विद्रुमः
११२	२१	कृष्णवर्ण्ञ्च	कृष्णवर्णञ्च
११२	२२	परिस्करणाय	परिष्करणाय
११४	१	वि दः	विशदः
११७	२६	मक्षिकम्	मधिकम्
१२०	२२	ससेन्धैवम्	ससैन्धवम्
१२१	९	त्रिवृद्वृतैः	त्रिवृद्घृतैः

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१२१	१७	मृत्र	मूत्र
१४०	१८	जलजम्मा	जलजन्मा
१४५	२१	ताल्ह	ताल्हु
१४८	९	सक्नुन्	सक्तून्
१४९	२४	गर्दैंगुदम्	गर्दैंगुदम्
१५४	१०	दाल्यन्य	दाल्यन्त
१५९	२७	अमृजेति	असृजेति
१७७	१०	करहाटजैः	करघाटजैः
१८७	१०	मूर्ध्नि	मूर्ध्नि
२०७	३	गुग्गुलल्व	गुग्गुल्व
२१३	२२	किञ्चित्तं	किञ्चित्त्वङ्
२१४	१६	ताभ्यमुत्-	ताभ्यामुत्-
२१६	१५	सर्वंव्रता	सर्वंव्रणां
२४६	६	अस्यऽपुंसः	अस्यपुंसः
२४८	९	गम्यग्	सम्यग्
२५०	८	हिमाह्लेति	हिमाह्वेति
२५४	१४	अवक्रा	अवक्त्रा
२७७	९	गुह्मरोग	गुह्यरोग
२६८	२६	गुह्याशृक (?)	गुह्यासृक्
२७६	१३	निष्क्रमनार्थं	निष्क्रमणार्थं
२८३	८	पर्णिभिः	पर्णोभिः
२९०	१३	मूर्ध्निति	भूध्नींति
३१४	१४	लोह्ति	लोहिता
३२५	१४	वाग्भ	वाग्भट
३३६	६	शिलापसंक्षुद्यट्टे	शिलापट्टे संक्षुद्य
३४४	१९	पाणितं	पाणितलं
३४६	१०	प्पल्यो	पिप्पल्यो
३५१	१६	आलोच्य	आलोड्य

सूचोपत्रम् ।

अष्टाङ्गहृदयम् ।

उत्तरतन्त्रम् । (१)

—०—

प्रथमोऽध्यायः ।

ओं नमो गणपतये ।

शिवदासः पदाम्भोजं पित्रोर्भैरव्यनन्तयोः ।
स्थानमुत्तरतन्त्राख्यं व्याचिख्यासुः प्रणम्यति ॥

पारिशेष्यादुत्तरं तन्त्रमभिधीयते। उत्तरं श्रेष्ठं तन्त्रमुत्तरतन्त्रं श्रेष्ठत्वञ्च कौमारभृत्याद्यङ्गसप्तकरूप-बह्वर्थाभिधायकत्वाद् विद्याद् उत्तरं पश्चिमं तन्त्रमिति। तथाहि सुश्रुतो "बह्वर्थसंग्रहाच्छ्रेष्ठमुत्तरञ्चापि पश्चिमम्" इति। पश्चिमत्वञ्च पश्चादभिधानात्। तत्र कायबालग्रहेत्यादौ (सू १ अं) कायचिकित्सायाः पूर्वमुद्दिष्टत्वात् कायचिकित्सां पूर्वमभिधाय तदनन्तरोद्दिष्टं कौमारभृत्यमनन्तरं सूच्यते अथात इत्यादि।

अथातो बालोपचरणीयमध्यायं व्याख्यास्यामः—
इति ह स्माहुरात्रेयादयो महर्षयः ॥

जातमात्रं विशोध्योल्वाद् बालं सैन्धवसर्पिषा ।
प्रसूतिक्लेशितं चानु बलातैलेन सेचयेत् ॥ १ ॥

उल्वो बालस्य मुखकण्ठगतः कफः। ल्यब्लोपे पञ्चमीयं. तेन सैन्धवयुक्तेन सर्पिषा उल्वमपनीय बालं विशोध्य निर्मलीकृत्य अनन्तरं वातव्याध्युक्तेन बलातैलेन सेचयेत्, प्रसूतिक्लेशितमिति प्रसूतिकालीनयोनियन्त्रणपीडनादिजन्यक्लेशाभिभूतम्।

अश्मनोर्वादनं चास्य कर्णमूले समाचरेत् ।
अथास्य दक्षिणे कर्णे मन्त्रमुच्चारयेदिमम् ॥ २ ॥

---

(१) अरुणस्तु उत्तरस्थानमिति पठति ।

अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि स जीव (१) शरदां शतम् ॥ ३ ॥
शतायुः शतवर्षोऽसि दीर्घमायुरवाप्नुहि ।
नक्षत्राणि दिशो रात्रिरहश्च त्वाभिरक्षतु ॥ ४ ॥

अश्मनोर्वादनमिति—अश्मखण्डद्वयसंघर्षणजन्यः शब्दः ।

स्वस्थीभूतस्य नाभिश्च सुत्रेण चतुरंगुलात् ।
बद्ध्वोद्र्ध्वं वर्द्धयित्वा च ग्रीवायामवसञ्जयेत् ॥ ५ ॥
नाभिश्च कुष्ठतैलेन सेचयेत् स्नपयेदनु ।
क्षीरिवृक्षकषायेण सर्वगन्धोदकेन वा ॥
कोष्णेन तप्तरजततपनीयनिमज्जनैः ॥ ६ ॥

नाड़ीच्छेद विधिमाह स्वस्थीभूतस्येत्यादि । नाड़ीमिति नाभिसम्बद्धां नाड़ीं चतुरङ्गुलादूर्द्ध्वं वर्धयित्वा छित्त्वा सूत्रेण बद्ध्वा बालस्य ग्रीवायाम् अवसञ्जयेद् बध्नीयात् । वर्धयित्वेति 'वर्ध' छेदनपूरणयोरित्यस्य रूपम् । कुष्ठतैलेनेति कुष्ठकल्कसिद्धेन तैलेन । क्षीरिणो वटोदुम्बरादयः । सर्वगन्धोदकेनेति—"चातुर्जातक कर्पूरकक्कोलागुरुसिह्लकम् । लवङ्गसहितञ्चेति सर्वगन्धं विनिर्दिशेद्" इति । अन्ये तु सर्वगन्धशब्देन 'एलादिगणम्' आहुः ॥

ततो दक्षिणतर्जन्या तालून्नाम्याऽवगुण्ठयेत् । (२)
शिरसि स्नेहपिचुना प्राश्यं चास्य प्रयोजयेत् ॥ ७ ॥
हरेणुमात्रं मेधायुर्बलार्थमभिमन्त्रितम् ।
ऐन्द्री-ब्राह्मी-वचा-शङ्खपुष्पी-कल्कं घृतं मधु ॥ ८ ॥
चामीकर-वचा-ब्राह्मी-ताप्य (३) पथ्या रजीकृताः ।
लिह्यान्मधुघृतोपेता हेमधात्रीरजोऽथवा ॥ ९ ॥

तत इत्यादि । उन्नाम्य उत्तोल्य, प्राश्यमिति लेह्यम्, हरेणुमात्रमिति रक्तिमात्रं कलायप्रमाणं वा, ऐन्द्री गोरक्षकर्कटी । चामीकरेत्यादि द्वितीयो योगः । चामीकरमिति मारितपुटितसुवर्णचूर्णः । वाप्यस्थाने ताप्येति न पाठः "कुष्ठं वचाभयाब्राह्मी

(१) सञ्जीवेति पाठः । (२) उन्नम्येत्यरुण: । (३) ताप्येति पाठः ।

कनकं क्षौद्रसर्पिषा" इति तन्त्रान्तरसंवादात्। हेमधात्रीरजोऽथवेति तृतीयो योगः ॥

गर्भाम्भः सैन्धववता सर्पिषा वामयेत्ततः ।
प्राजापत्येन विधिना जातकर्माणि कारयेत् ॥ १० ॥

गर्भाम्भ इति । सैन्धववता सर्पिषा गर्भाम्भो वामयेत् । प्राजापत्यो विधिस्तु वेदोक्तः । जातकर्म्माणीति जातमात्रे सुते वेदोक्तानि कर्म्माणि जातकर्म्माणि ।

सिराणां हृदयस्थानां विवृतत्वात् प्रसूतितः ।
तृतीयेऽन्हि चतुर्थे वा स्त्रीणां स्तन्यं प्रवर्त्तते ॥ ११ ॥
प्रथमे दिवसे तस्मात्त्रिकालं मधुसर्पिषी ।
अनन्तामिश्रिते मन्त्रपाविते प्राशयेच्छिशुम् ॥ १२ ॥

सिराणा मित्यादि । प्रसूतितः प्रसूतिमारभ्य तृतीयेऽह्नि चतुर्थेऽह्नि वा हृदयस्थानां सिराणां विवृतत्वात् स्त्रीणां स्तन्यं प्रवर्तते । तस्माद्धेतोः प्रथमे दिवसे शिशुं त्रिकालं मधुसर्पिषी प्राशयेत् । अनन्तामिश्रिते इति अनन्ता दूर्वेति डल्लणः । मन्त्रपाविते इति वैदिक मन्त्रेण पवित्रीकृते ।

द्वितीये लक्ष्मणासिद्धं तृतीये च घृतं ततः ।
प्राङ्निषिद्धस्तनस्यास्य तत्पाणितलसम्मितम् ।
स्तन्यानुपानं द्वौ कालौ नवनीतं प्रयोजयेत् ॥ १३ ॥
मातुरेव पिबेत् स्तन्यं तत्परं देहवृद्धये ।
स्तन्यधात्र्यावुभे कार्ये तदसम्पदि वत्सले ॥ १४ ॥
अव्यङ्गे ब्रह्मचारिण्यौ वर्णप्रकृतितः समे ।
नीरुजे मध्यवयसौ जीवद्वत्से न लोलुपे ॥
हिताहारविहारेण यत्नादुपचरेच्च ते ॥ १५ ॥
शुक्क्रोधलङ्घनायासाः स्तन्यनाशस्य हेतवः ।
स्तन्यस्य साधुवर्ज्यानि मद्यान्यानूपजा रसाः ।
क्षीरं क्षीरिणश्चौषध्यः शोकादेश्च विपर्ययः ॥ १६ ॥
क्लिष्टाहारभुक्तायाः क्षुधितायाः विचेतसः ।
प्रदुष्टधातोर्गर्भिण्याः स्तन्यं रोगकरं शिशोः ॥ १७ ॥

स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत्।
ह्रस्वेन पञ्चमूलेन स्थिरया वा सितायुतम् ॥ १८ ॥

प्रागित्यादि। प्राक् प्रथमे दिवसे निषिद्धं स्तन्यं यस्य ईदृशस्य बालस्य पाणितलेन बालस्यैव पाणितलेन सम्मितं नवनीतं द्वौ कालाविति सायं प्रातश्च प्रयोजयेत्। तद्सम्पदीति मातृस्तन्यासम्पत्तौ। अव्यङ्गे न अङ्गहीने। वर्ण-प्रकृतितः समे इति समानवर्णां तुल्यजातीया मित्यर्थः प्रकृतिः स्वभावः। स्तन्यस्येति अत्रापि हेतव इति सम्बध्यते। क्षीरिण्य औषध्य इति क्षीरिण्यो दुग्धिकाकलम्बिका-द्यो दृश्यमानक्षीराः। शोकादेश्च विपर्ययो हर्षादिः। विरुद्धाहारभुक्ताया इति भुक्तविरुद्धाहाराया इत्यर्थः। विचेतस इति चित्तविकारयुक्तायाः। तद्गुण-मिति संस्काराल्लघूकृतम्। तमेव संस्कार माह मूलैरिति। बृहत्याद्यै र्मूलै-रिति स्वल्पपञ्चमूलेन, स्थिराभ्यामिति शालपर्णी पृश्निपर्णीभ्याम्।

षष्ठीं निशां विशेषेण कृतरक्षाबलिक्रियाः।
जागृयुर्बान्धवास्तस्य दधतः परमां मुदम् ॥ १९ ॥
दशमे दिवसे पूर्णे विधिभिः स्वकुलोचितैः।
कारयेत् सूतिकोत्थानं नाम बालस्य चार्चितम् ॥ २० ॥
बिभ्रतोऽङ्गैर्मनोह्लालरोचनागुरुचन्दनम्।
नक्षत्रदेवतायुक्तं बान्धवं वा समाक्षरम् ॥ २१ ॥

षष्ठीमित्यादि। षष्ठनिशायां मातृकाभिभवो बालानां प्रायो भवतीति लोक-प्रसिद्धिः। नक्षत्रदेवतायुक्तमिति कुमारजन्मनक्षत्रस्य या देवता ज्योतिःशास्त्रे प्रोक्ता तन्नाम कर्त्तव्यमित्यर्थः। बान्धवमिति बन्धुभि र्वृत्तं बान्धवम्, समाक्षर-मित्यनुत्रावचाक्षरम्।

ततः प्रकृतिभेदोक्तरूपैरायुःपरीक्षणम्।

प्रकृतिभेदोक्तरूपैरिति प्रकृतिभेदकथनप्रसङ्गे शारीरे यानि लक्षणान्युक्तानि तै रायुषः परीक्षणं कुर्यादित्यर्थः।

प्रागुदक्शिरसः कुर्यात् बालस्य ज्ञानवान भिषक् ॥ २२ ॥
शुचिधौतोपधानानि निर्बलीनि मृदूनि च।
शय्यास्तरणवासांसि रक्षोघ्नै र्धूपितानि च ॥ २३ ॥

काको विशस्तः शस्तश्च धूपने त्रिवृतान्वितः ॥ २४ ॥
जीवत्खड्गादिशृङ्गोत्थान् सदा बालः शुभान् मणीन् ।
धारयेदौषधी रिष्या (१) ब्राह्मयैन्द्री जीवकादिकाः ॥ २५ ॥
हस्ताभ्यां ग्रीवया मूर्ध्ना विशेषात् सततं वचाम् ।
आयुर्मेधा-स्मृति-स्वास्थ्य-करीं रक्षोभिरक्षिणीम् ॥ २६ ॥
पञ्चमे मासि पुण्येऽन्हि धरण्यामुपवेशयेत् ।
षष्ठेऽन्नप्राशनं मासि क्रमात्तत्र प्रयोजयेत् ॥ २७ ॥

शुचीनि मलमूत्राद्यनुपहतानि उपधानमुत्तरच्छदः गण्डुकोवा । निर्बलीनि इति बलीशून्यानि असंकुचितानीत्यर्थः । रक्षोघ्नैरिति सर्षपगुग्गुलुवचादिभिः, विशस्त इति मारितः, त्रिवृतं स्नेहत्रयम् । जीवत् खड्गादिश्रृङ्गोत्थान् इति आदिशब्देनात्र रुरुगजगवयवृषभाणां ग्रहणम् । जीवन्तो ये खड्गादय स्तेषां श्रृङ्गाग्राणि गृहीत्वा तेषु मणीन् स्थापयित्वा मणीन् धारयेदित्यर्थः* । इष्या इति अथर्वविद्ब्राह्मणानामनुमताः । चरकेऽप्युक्तं यानि चान्यान्यपि ब्राह्मणा ब्रूयुरथर्ववेदविद इति (शां ८ अं) ।

षट्सप्तमाष्टमासेषु नीरुजस्य शुभेऽहनि ।
कर्णौ हिमागमे विध्येत् धात्र्यङ्कस्थस्य सान्त्वयन् ॥ २८ ॥
प्राग् दक्षिणं कुमारस्य भिषग् वामं तु योषितः ।
दक्षिणेन दधत् सूचीं पालीमन्येन पाणिना ॥ २९ ॥
मध्यतः कर्णपीठस्य किञ्चिद् गण्डाश्रयं प्रति ।
जरायुमात्रप्रच्छन्ने रविरश्म्यवभासिते ॥ ३० ॥
धृतस्य निश्चलं सम्यगलक्तकरसाङ्किते ।
विध्येद्दैवकृते छिद्रे सकृदेवर्जु लाघवात् ॥ ३१ ॥

---

(१) ऐष्येत्यरुणः ।

* मणयश्च धारणीयाः कुमारस्य खड्गरुरुगवय वृषभाणां जीवतामेव दक्षिणेभ्यो विषाणेभ्योऽ-
(चरकं शां ८ अं)
ग्राणि गृहीतानि स्युः । इति चक्रधृतः जतुकर्णे च रुरुखड्गादीनां जीवतां दक्षिणश्रृङ्गाग्राणि निकृत्तानि धारयेत् । पाठः ।

नोर्द्ध्वं न पार्श्वतो नाधः शिरास्तत्र हि संश्रिताः ।
कालिका मर्मरी रक्ता तद्व्यधाद् रागरुग्ज्वराः ।
सशोफदाहसंरम्भमन्यास्तम्भापतानकाः ॥ ३२ ॥
तेषां यथामयं कुर्याद् विभज्याशु चिकित्सितम् ॥ ३३ ॥
स्थाने व्यधान्न रुधिरं न रुग्रागादिसम्भवः ॥ ३४ ॥
स्नेहाक्तं सूच्यनुस्युतं सूत्रं चानु निधापयेत् ।
आमतैलेन सिञ्चेच्च बहलां तद्वदारया ॥ ३५ ॥
विध्येत् पालीं हितभुजः सञ्चार्याऽथ स्थवीयसी ।
वर्त्तिस्त्र्यहात्ततो रूढं वर्द्धयेत शनैः शनैः ॥ ३६ ॥

बालस्य कर्णव्यधविधिमाह षट् सप्तेत्यादि । षष्ठे सप्तमेऽष्टमे वा मासीत्यर्थः । कर्णव्यधप्रकारमाह धात्र्यङ्कस्थस्येत्यादि । दैवकृते छिद्रे इति दैवेन कर्णव्यधार्थं कृतेऽवकाशे इत्यर्थः । तच्च कथं ज्ञातव्यमित्यत आह मध्यतः कर्णपीठेत्यादि । कर्णपीठस्येति कर्णपालेः, किञ्चिद् गण्डाश्रयं प्रतीति-किञ्चिद् गण्डाश्रयसमीपे । जरायुमात्रप्रच्छन्ने इति जरायु रमरा तत् प्रमाणेन मध्यभागेन प्रच्छन्ने आच्छादिते, रविरश्म्यवभासिते इति सूर्य्यालोकदृश्यमान-प्रतनु-प्रदेशरूपे । ऋजिवति-विध्येदिति-क्रियाया विशेषणम् । लाघवादिति शैघ्र्येण । नोर्द्ध्वमित्यादि । उक्तरूपछिद्रस्य नोर्द्ध्वं न पार्श्वे नाप्यधः इत्यर्थः । ऊर्ध्वादिषु कुतो न विध्येदित्याह शिरा इति । तत्रेत्यूर्द्ध्वादिषु प्रदेशेषु । कालिकेत्यादि ऊर्द्ध्वं कालिका पार्श्वे मर्मरी अधोभागे रक्तेति । तद्व्यधाद् रागरुग्ज्वरा इति तत्र कालिकाव्यधाद् रागरुग्ज्वरशोफदाहाः स्युः । मर्मरीव्यधात् संरम्भः स्यात्, संरम्भो ग्रन्थिरूपः शोथः । रक्ताव्यधान्-मन्यास्तम्भादयः । दैवकृते छिद्रव्यधे यल्लिङ्गं भवति तदाह स्थानेत्यादि । स्थानमुक्तरूपदैवकृतच्छिद्रम् । सूच्यनुस्यूतमिति स्नेहाक्तं सूत्रं सूचीरन्ध्रमध्ये निधाय तया सूच्या कर्णव्यधं विधाय तदेव सूत्रं कर्णच्छिद्रे बद्ध्वा स्थापयेदित्यर्थः । आमतैलम् अभिनवतिलतैलम् । बहलामित्यादि बहलां घनां कष्टपालिं पुनः आरया आराख्येन शस्त्रेण विध्येत् । एतेन पूर्वोक्ते सूचीव्यधः प्रतनु प्रदेशे योग्यः । सुश्रुतेऽप्युक्तं "प्रतनुकं सूच्या बहलं मारयेति" (सू २३ अ) । तद्वदिति दैवकृते छिद्रे । हितभुजः इत्यादि त्र्यहादित्यत्र वीप्सा बोध्या तेन त्र्यहात् त्र्यहात् स्थवीयसी स्थूलतरा वर्तिः कर्णव्यधविवरे सञ्चार्य्या । रूढमिति रूढव्रणकर्णपालिम् ।

अथैनं जातदशनं क्रमेणापनयेत् स्तनात् ।
पूर्व्वोक्तं योजयेत् क्षीरमन्नञ्च लघु बृंहणम् ॥ ३७ ॥
पियाल-मज्ज मधुक-मधु-लाजासितोपलैः ।
अपस्तनस्य संयोज्यः प्रीणनो मोदकः शिशोः ॥ ३८ ॥
दीपनो बालबिल्वैलाशर्करालाजशक्तुभिः ।
संग्राही धातकीपुष्प-शर्करा-लाज-तर्पणैः ॥ ३९ ॥

पूर्वोक्तं योजयेत् क्षीरमिति छागक्षीरादिकं न केवलमन्नं योजयेत्, किन्तर्हि पियालमज्जादि सितोपलान्तञ्च योजयेत् । अपस्तनस्येति-त्यक्तस्तनस्य । बालबिल्वादिभिः कृतो मोदको योज्यः । मोदकान्तरमाह संग्राहीत्यादि लाज-तर्पणैरिति लाजकृतशक्तुभिः लाजतर्पण इति पाठे तर्पणो मन्थः ।

रोगांश्चास्य जयेत्सौम्यैर्भेषजैरविषादकैः ।
अन्यत्रात्ययिकाद् व्याधेर्विरेकं सुतरां त्यजेत् ॥ ४० ॥
त्रासयेन्नाविधेयं तं त्रस्तं गृह्णन्ति हि ग्रहाः ।
वस्त्रवातात्परस्पर्शात् पालयेल्लङ्घनाच्च तम् ॥ ४१ ॥

अविधेयमित्यनायत्तम् । वस्त्रवातादिति वस्त्राञ्चलवातात्, परस्पर्शादिति धात्र्यादिव्यतिरिक्तजनस्पर्शात् शत्रुजनस्पर्शादिति वा । आतपस्पर्शादित्यपि पाठः सुश्रुतेऽपि "नोष्णमारुतवर्षेष्वित्युक्तम् (शां १० अं)। लङ्घनं चरणेन बालस्योल्लङ्घनं तस्मात् ।

ब्राह्मी-सिद्धार्थक-वचा-सारिवा-कुष्ठ-सैन्धवैः ।
सकणैः साधितं पीतं वाङ्मेधास्मृतिकृद् घृतम् ॥
आयुष्यं पाप्मरक्षोघ्नं भूतोन्मादनिवर्हणम् ॥ ४२ ॥

ब्राह्मीसिद्धार्थकेत्यादौ सिद्धार्थः श्वेतसर्षपः सारिवा अनन्तमूलम् । सकणैरिति पिप्पलीसहितैः ।

त्रिफलालक्ष्मणानन्ता समङ्गासारिवा वचा ।
ब्राह्मी पाठा द्विबृहती द्विस्थिरा द्विपुनर्णवम् ॥ ४३ ॥

सहदेवा रवेर्वल्ली पयस्या गिरिकर्णिका ।
तोयकुम्भे पचेदेतत् पलार्द्धं (१) पादशेषितम् ॥ ४४ ॥
तेन कौन्ती वचाकुष्ठ कृष्णासर्षपसैन्धवैः ।
नीरुक्-सरूप-वत्सायाः संयुक्तं पयसा च गोः ॥ ४५ ॥
पुष्ययोगे घृतप्रस्थं सहेमशकलं शृतम् ।
पानाभ्यञ्जनतो मेधास्मृत्यायुःपुष्टिबुद्धिदम् ॥
रक्षोघ्नञ्च विषघ्नञ्च सारस्वतमिदं घृतम् ॥ ४६ ॥*

त्रिफलेत्यादौ लक्ष्मणा स्वनामख्याता, अनन्ता अनन्तमूलम्, समङ्गा वराहक्रान्ता, शारिवा श्यामालता। द्विस्थिरेति शालपर्णीपृश्निपर्ण्यौच, रवेर्वल्ली मण्डूकपर्णी, "मण्डूकपर्णी मण्डूकी वरमादित्यवल्ल्यपि" इति निर्घण्टः ( )। पयस्या विदारीकन्दः, गिरिकर्णिका अपराजिता, तोयकुम्भ इति तोयद्रोणे। एतत् पलार्धमिति त्रिफलादिकं प्रत्येकं पलार्धमित्यर्थः। तेनेति पादशेषकषायेण, कौन्ती रेणुकः, क्षीरमत्र घृतसमम्, सहेमशकलं शृतमिति सुवर्णखण्डेन सह शृत मित्यर्थः। अयं योगः प्राचीन बहुषु पुस्तकेषु न दृश्यते।

वचेन्दुलेखा-मण्डूकी-शङ्खपुष्पी-शतावरी ।
ब्रह्मसोमामृताब्राह्मीः कल्कीकृत्य पलांशिकाः ॥ ४७ ॥
अष्टाङ्गं विपचेत्सर्पिः प्रस्थं क्षीरं चतुर्गुणम् ।
तत्पीतं धन्यमायुष्यं वाङ्मेधास्मृतिबुद्धिकृत् ॥ ४८ ॥

वचेत्यादौ इन्दुलेखा सोमराजी, मण्डूकी मण्डूकपर्णी, ब्रह्मसोमा ब्रह्मसुवर्चला।

अजाक्षीराभयाव्योषपाठोग्राशिग्रुसैन्धवैः ।
सिद्धं सारस्वतं सर्पिर्वाङ्मेधास्मृतिवन्हिकृत् ॥ ४९ ॥
वचामृता-वरी(२)-पथ्या-शङ्खिनी-वेल्ल-नागरैः ।
अपामार्गेण च घृतं साधितं पूर्व्ववद्गुणैः ॥ ५० ॥

---

* अयं शिवदासनिर्दिष्टः पाठः कुत्राप्यनापि मुद्रितपुस्तके न दृश्यते। नवा अरुणादिना व्याख्यातः। अष्टाङ्गसंग्रहे अयं पाठो वर्त्तते इन्दुना व्याख्यातश्च।

(१) ह: वाग्भटे पलांशमिति पाठ:।

(२) शठीति पाठ:।

अजाक्षीरेत्यादौ अजाक्षीरं घृताच्चतुर्गुणम्, उग्रा वचा। वचेत्यादौ वरी शतावरी, वेल्लो विडङ्गः ।

हेम-श्वेतवचा-कुष्ठमर्कपुष्पी सकाञ्चना ।
हेममत्स्याक्षकः शङ्खः कैटर्यः कनकं वचा ॥ ४१ ॥
चत्वार एते पादोक्ताः प्राश्या मधुघृतप्लुताः ।
वर्षं लीढा वपुर्मेधाबलवर्णकराः शुभाः ॥ ४२ ॥

हेमेत्यादौ मारित-पुटित-सुवर्णचूर्णम् । एवं वक्ष्यमाण योगत्रयेऽपि, मत्स्याक्षको गण्डदुर्वा, शङ्खी शङ्खपुष्पी, कैटर्यं कट्फलम् ।

वचा-यष्ट्याह्व-सिन्धूत्थ-पथ्या-नागर-दीप्यकैः ।
शुद्धयते वाग्हविर्लीढैः सकुष्ठ-कणा-जीरकैः ॥ ४३ ॥

इति श्रीमद्वाग्भट विरचिताया मष्टाङ्गहृदयसंहितायाम्
उत्तरतन्त्रे बालोपचरणीयो नाम प्रथमोऽध्यायः ॥

वचेत्यादौ दीप्यको यमानी ।

(इति श्रीशिवदासेनकृत अष्टाङ्गहृदयतत्त्वबोधे)
उत्तरे प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

अथातो बालामयप्रतिषेधं व्याख्यास्यामः

इतिहस्माहुः आत्रेयादयो महर्षयः ॥

त्रिविधः कथितोबालः क्षीरान्नोभयवर्तनः ।

स्वास्थ्यं ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसम्भवः ॥ १ ॥

यदद्भिरेकतां याति न च दोषैरधिष्ठितम् ।

तद्विशुद्धं पयो—

उक्तेन क्रमानुसारेणैव बालोपचारानन्तरं बालामय-प्रतिषेध उच्यते। एवं वक्ष्यमाणेष्वप्यध्यायेषु सङ्गतिर्बोध्या। ताभ्यामिति क्षीरान्नाभ्याम्, एकतामिति एकीभावम्, सुश्रुतेऽपि "अप्सु न्यस्तमेकीभावं गच्छती"त्युक्तम् (शां १० अ॑)। दोषैरिति वक्ष्यमाण-दोषलक्षणैः ।

वाताद्दुष्टं तु प्लवतेऽम्भसि ।

कषायं फेनिलं रूक्षं वर्चोमूत्रविबन्धकृत् ॥ २ ॥

पित्तादुष्णाम्लकटुकं पीतराज्यप्सु दाहकृत् ।

कफात्सलवणं सान्द्रं जले मज्जति पिच्छिलम् ॥ ३ ॥

संसृष्टलिङ्गं संसर्गात् त्रिलिङ्गं सान्निपातिकम् ।

यथास्वलिङ्गांस्तद्व्याधीन् जनयत्युपयोजितम् ॥ ४ ॥

तान्येव लक्षणान्याह वातादित्यादि। पीतराज्यप्स्विति अप्सु न्यस्तं पीतराजियुक्तं भवतीत्यर्थः ।

शिशोस्तीक्ष्णामतीक्ष्णाञ्च रोदनाल्लक्षयेद्रुजम् ॥ ५ ॥

सो यं स्पृशेद् भृशं देशं यत्र च स्पर्शनात्तमः ।

तत्र विद्याद्रुजं मूर्ध्नि रुजं चाक्षिनिमीलनात् ॥ ६ ॥

हृदि जिह्वौष्ठदशनश्वासमुष्टिनिपीड़ितैः ।

कोष्ठे विबन्धवमथुस्तनदंशान्त्रकूजनैः ॥ ७ ॥

आध्मान-पृष्ठनमन-जठरोन्नमनैरपि ।
वस्तौ गुह्ये च विण्मूत्रसङ्गत्रासदिगीक्षणैः ॥ ८ ॥

स्पर्शनाक्षम इति स्पर्शासहः ।

अथ धाव्याः क्रियां कुर्याद्यथादोषं यथामयम् ॥ ६ ॥
तत्र वातात्मके स्तन्ये दशमूलं त्र्यहं पिबेत् ।
अथवाग्नि-वचा-पाठा-कटुका-कुष्ट-दीप्यकम् ।
सभार्गी-दारु-सरल-वृश्चिकाली-कणोषणम् ॥ १० ॥
ततः पिबेदन्यतमं वातव्याधिहरं घृतम् ।
बस्तिकर्म ततः कुर्यात् स्वेदादींश्चानिलापहान् ॥ ११ ॥
रास्नाजमोदा-सरल-देवदारु-रजोऽन्वितम् ।
बालो लिह्याद् घृतं तैर्वा विपक्वं ससितोपलम् ॥ १२ ॥

ततः पिवेदन्यतममिति तत इति तेषु अग्निवचादिषु मध्ये एकतमं पिबेत् तथा वातव्याधिहितं घृतञ्च पिबेत् । तैर्वेति रास्नादिभिः ।

पित्तदुष्टेऽमृता-भीरु-पटोली-निम्ब-चन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा ससारिबम् ॥ १३ ॥
अथवा त्रिफला-मुस्त-भूनिम्ब-कटुरोहिणीः ।
सारिवादिं पटोलादिं पद्मकादिं तथा गणम् ॥ १४ ॥
घृतान्येभिश्च सिद्धानि पित्तघ्नञ्च विरेचनम् ।
शीतांश्चाभ्यङ्गलेपादीन् युञ्ज्यात्—
श्लेष्मात्मके पुनः ॥ १५ ॥
यष्ट्याह्व-सैन्धव-युतं कुमारं पाययेद् घृतम् ।
सिन्धूत्थपिप्पलीमद्वा पिष्टैः क्षौद्रयुतैरथ ॥ १६ ॥
राठपुष्पैः स्तनौ लिम्पेच्छिशोश्च दशनच्छदौ ।
सुखमेवं वमेद्बालस्तीक्ष्णैर्धात्रीं तु वामयेत् ॥ १७ ॥
अथाचरितसंसर्गी मुस्तादिं क्वथितं पिबेत् ।
तद्वत्तगर-पृथ्वीका-सुरदारु-कलिङ्गकान् ।
अथवातिविषा-मुस्त-षड्ग्रन्था-पञ्चकोलकम् ॥ १८ ॥

राठपुष्पैरिति मदनपुष्पैः। तीक्ष्णैरिति वमनद्रव्यैः। आचरितसंसर्गीति आचरित पेयादिक्रमः। मुस्तादिमिति मुस्तवचाग्निद्विनिशेत्यादिनोक्तं गणम्। तद्वदिति क्वाथताम्, पृथ्वीका कृष्णजीरकः।

स्तन्ये विदोषमलिने दुर्गन्ध्यामं जलोपमम्।
विबद्धमच्छं विच्छिन्नं फेनिलं चोपवेक्ष्यते ॥ १९ ॥
शकृन्नानाव्यथावर्णं मूत्रं पीतं सितं घनम्।
ज्वरारोचकतृट्, छर्दि शुष्कोद्गारविजृम्भिकाः ॥ २० ॥
अङ्गभङ्गोऽङ्गविक्षेपः कूजनं वेपथुर्भ्रमः।
घ्राणाक्षिमुखपाकाद्या जायन्तेऽन्येऽपि तं गदम्।
क्षीरालसकमित्याहुरत्ययं चातिदारुणम् ॥ २१ ॥

स्तन्य इत्यादौ पीते सतीति शेषः। तं गदं क्षीरालसकसंज्ञया अत्यय-संज्ञया चाहुः

तत्राशु धात्रा बालश्च वमनेनोपपादयेत् ॥ २२ ॥
विहितायाश्च संसर्ग्यां वचादिं योजयद्गणम्।
निशादिं वाथवा माद्रीपाठातिक्ताघनामयान् ॥ २३ ॥
पाठाशुण्ठ्यामृतातिक्ततिक्तादेवाह्वसारिवाः।
समुस्तमूर्वेन्द्रयवाः स्तन्यदोषहराः परम् ॥ २४ ॥

निशादिमिति हरिद्रादिगणम्। माद्री अतिविषा घनामयानित्यत्र कणामया-निति क्वचित् पठ्यते। पाठेत्यादौ तिक्तो भूनिम्बः, तिक्ता कटुकी।

अनुबन्धे यथाव्याधि प्रतिकुर्वीत कालवित् ॥ २५ ॥
दन्तोद्भेदश्च रोगाणां सर्वेषामपि कारणम्।
विशेषाज्ज्वर-विड्भेद-कास-च्छर्दि-शिरोरुजाम्।
अतिस्यन्दस्य (१) पोथक्या विसर्पस्य च जायते ॥ २६ ॥
पृष्ठभङ्गे विडालानां बर्हिणाञ्च शिखोद्गमे।
दन्तोद्भवे च बालानां नहि किञ्चिन्न दूयते ॥ २७ ॥

(१) अभिष्यन्दस्येति पाठः।

यथादोषं यथारोगं यथोद्रेकं यथाशयम् ।
विभज्य देशकालादींस्तत्र योज्यं भिषग्जितम् ॥ २८ ॥

अनुबन्ध इत्युपद्रवे। अतिस्पन्दस्य पोथक्या इति पोथकी वर्त्मरोगविज्ञाने वक्ष्यमाणलक्षणा।

त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च यत् ।
अतस्तदेव भैषज्यं मात्रा त्वस्य कनीयसी ॥ २९ ॥
सौकुमार्याल्पकायत्वात्सर्वान्नानुपसेवनात् ।
स्निग्धा एव सदा बाला घृतक्षीरनिषेवणात् ।
सद्य स्तान् वमनं तस्मात्पाययेन्मतिमान् मृदु ॥ ३० ॥
स्तन्यस्य तृप्तं बामयेत् क्षीर-क्षीरान्न-सेविनम् ।
पीतवन्तं तनुं पेयामन्नादं घृतसंयुताम् ॥ ३१ ॥
वस्तिं साध्ये विरेकेन मर्शनं प्रतिमर्शनम् ।
युञ्ज्याद्विरेचनादींस्तु धात्र्या एव यथोदितान् ॥ ३२ ॥
मूर्वा-व्योष-वरा-कोल-जम्बुत्वग्-दारु-सर्षपाः ।
सपाठा मधुना लीढाः स्तन्यदोषहराः परम् ॥ ३३ ॥

मात्रात्वस्य कनीयसी इत्यत्र हेतुमाह सौकुमार्य्येत्यादि। बालानां वमने कर्तव्ये स्नेहनं न कार्य्यमित्याह स्निग्धा एवेत्यादि। क्षीरक्षीरान्नसेविनमिति क्षीरसेविनं क्षीरान्नसेविनञ्चेत्यर्थः। वस्तिमित्यादि विरेकेण साध्ये व्याधौ वस्तिं युञ्ज्यात्, मर्शेन साध्ये व्याधौ प्रतिमर्शनं युञ्ज्यात्। मर्शप्रतिमर्शौ नस्यभेदौ सूत्रस्थानीयोक्तौ ज्ञेयौ। धात्र्या एवेति नतु बालस्य।

दन्तपालीं समधुना चूर्णेन प्रतिसारयेत् ।
पिप्पल्या धातकीपुष्प-धात्रीफलकृतेन वा ॥ ३४ ॥
लाव-तित्तिर-वल्लुर-रजः पुष्परसाप्लुतम् ।
द्रुतं करोति बालानां दन्तकेसरवन्मुखम् ॥ ३५ ॥
वचा-द्विबृहती-पाठा-कटुकातिविषा-घनैः ।
मधुरैश्च घृतं सिद्धं सिद्धं दशनजन्मनि ॥ ३६ ॥

दन्तोत्थानामौषधमाह दन्दपालीमित्यादि। पिप्पल्याश्चूर्णेन धातक्यादिकृतचूर्णेन वेत्यर्थः। लावतित्तिरिसम्बन्धि वल्लूरं शुष्कमांसम्। मधुरैश्चेति जीवनीयैः।

रजनी-दारु-सरल-श्रेयसी-बृहतीद्वयम्।
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥ ३७ ॥
ग्रहणीदीपनं श्रेष्ठं मारुतस्यानुलोमनम्।
अतीसार-ज्वर-श्वास-कामला-पाण्डु-कास-नुत्।
बालस्य सर्वरोगेषु पूजितं बलवर्णदम् ॥ ३८ ॥

रजनीत्यादौ श्रेयसी गजपिप्पली।

समङ्गा-धातकी-रोध्र-कुटन्नट-बलाह्वयैः।
महासहा-क्षुद्रसहा-मुद्ग बिल्वशलाटुभिः ॥ ३९ ॥
सकार्पासीफलैस्तोये साधितैः साधितं घृतम्।
क्षीरमस्तुयुतं हन्ति शीघ्रं दन्तोद्भवोद्भवान्।
विविधानामयानेतद्वृद्धकाश्यपनिर्मितम् ॥ ४० ॥
दन्तोद्भवेषु रोगेषु न बालमतियन्त्रयेत्।
स्वयमप्युपशाम्यन्ति जातदन्तस्य यद्गदाः ॥ ४१ ॥

समङ्गेत्यादौ कुटन्नटं कैवर्तमुस्तकं, बलाद्वयं सितपीतभेदात्, महासहा माषपर्णी, क्षुद्रसहा मुद्गपर्णी, कार्पासी वनकार्पासी एषां क्वाथो घृताच्चतुर्गुणः। क्षीरमस्तुनी च तथा, "चतुष्प्रभृति यत्र स्यु र्द्रव्याणि स्नेह संविधौ। तत्र स्नेह समान्याहु रर्वाक् च स्याच्चतुर्गुणम्" इति वचनात्।

अत्यहःस्वप्न-शीताम्बु-श्लैष्मिकस्तन्य-सेविनः।
शिशोः कफेन रुद्धेषु स्रोतःसु रसवाहिषु ॥ ४२ ॥
अरोचकः प्रतिश्यायो ज्वरः कासश्च जायते।
कुमारः शुष्यति ततः स्निग्धशुक्लमुखेक्षणः ॥ ४३ ॥
सैन्धव-व्योष-शार्ङ्गेष्टा-पाठा-गिरि-कदम्बकान्।
शुष्यतो मधुसर्पिर्भ्यामरुच्यादिषु योजयेत् ॥ ४४ ॥

अशोक-रोहिणीयुक्तं पञ्चकोलञ्च चूर्णितम् ।
बदरी-धातकी-धात्री-चूर्णं वा सर्पिषा प्लुतम् ॥ ४५ ॥
स्थिरा-वचा-द्विबृहती-काकोली-पिप्पली-नतैः ।
निचुलोत्पल-वर्षाभू-भार्गी-मुस्तैश्च कार्षिकैः ।
सिद्धं प्रस्थार्द्धमाज्यस्य स्रोतसां शोधनं परम् ॥ ४६ ॥

सैन्धवेत्यादि । शार्ङ्गेष्टा गुञ्जामूलम्, गिरिकदम्बो वृहत्कदम्बः । अशोक-रोहिणीत्यादि अशोकरोहिणी कटुरोहिणी सर्पिषा द्रुतमित्यत्रापि सम्बध्यते । स्थिरेत्यादौ निचुल इज्जलः । प्रस्थार्द्धमिति षोडशपलानि । चतुर्गुणमत्र जलं बोध्यम् ।

सिंहाश्वगन्धा-सुरस-कणागर्भञ्च तद्गुणम् ॥ ४७ ॥
यष्ट्याह्व-पिप्पली-रोध्र-पद्मकोत्पल-चन्दनैः ।
तालीश-सारिवाभ्याञ्च साधितं शोषजिद्घृतम् ॥ ४८ ॥

सिंहाश्वगन्धेत्यादौ सिंही कण्टकारी, सुरसः पर्णाशः, कणा पिप्पली, एषां कल्कः तद्गुणमिति पूर्वोक्तघृतगुणम् ।

शृङ्गी-मधूलिका-भार्गी-पिप्पली-देवदारुभिः ।
अश्वगन्धा-द्विकाकोली-रास्नर्षभक-जीवकैः ॥ ४९ ॥
सूर्पपर्णी-विडङ्गैश्च कल्कितैः साधितं घृतम् ।
शशोत्तमाङ्गनिर्यूहे शुष्यतः पुष्टिकृत् परम् ॥ ५० ॥

शृङ्गीत्यादौ मधूलिका मूर्वा, सूर्पपर्णी मुद्गपर्णी माषपर्णी वा (च) ।

वचा-वयस्था-तगर-कायस्था-चोरकैः शृतम् ।
बस्तमूत्रसुराभ्याञ्च तैलमभ्यञ्जने हितम् ॥ ५१ ॥
लाक्षारससमं तैलप्रस्थं मस्तुचतुर्गुणम् ।
अश्वगन्धा-निशा-दारु-कौन्ती-कुष्ठाब्द-चन्दनैः ॥ ५२ ॥
समूर्वा-रोहिणी-रास्ना-शताह्वा-मधुकैः समैः ।
सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिदम् ॥ ५३ ॥

बल्यं ज्वरक्षयोन्मादश्वासापस्मारवातनुत्।
यक्षराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते ॥ ५४ ॥

वचेत्यादौ वयस्था क्षीरकाकोली, कायस्था निर्गुण्डी। लाक्षेत्यादौ निशा हरिद्रा, दार्विति देवदारु, कौन्ती रेणुकः।

मधुनातिविषा-शृङ्गी-पिप्पलीर्लेहयेच्छिशुम्।
एकां वाऽतिविषां कासज्वरच्छर्दिरुपद्रुतम् ॥ ५५ ॥

मधुनेत्यादौ कासजरछर्दिरुपद्रुतमिति छर्दिसा, शब्दोऽयं सान्तः।

पीतं पीतं वमति यः स्तन्यं तं मधुसर्पिषा।
द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत् ॥ ५६ ॥

पीत मित्यादि द्विवार्ताकी वृहतीद्वयम्, (१) ** यं योग इति कश्चित्। अन्येतु योगद्वयमाहुः, उक्तं हि तन्त्रान्तरे "पीत्वा यो वमति स्वन्यं भृशं तं मधुसर्पिषा। कोलीफलरसं यद्वा पञ्चकोलं प्रलेहयेद्" इति।

पिप्पली-पञ्चलवण-कृमिजित् पारिभद्रकम्।
तद्वल्लिह्याद्—

पिप्पलीमित्यादौ तद्वल्लिह्यादिति मधुसर्पिषेत्यर्थः।

अथ व्योषं मर्सी वा रोमचर्मणाम्।
लाभतः शल्यकश्वाविद्गोधर्ष्य(२)शिखिजन्मनाम् ॥ ५७ ॥

अथेत्यादि योगान्तरम्। शल्यकादिजन्मनां रोमचर्म्मणां मसीत्यन्वयः। लाभत इति यथालाभम्। श्वावित् सेज्जकभेदः। ऋष्यो हरिणः।

खदिराऽर्जुन-तालीश-कुष्ठ-चन्दनजे रसे।
सक्षीरं साधितं सर्पिर्वमथुं विनियच्छति ॥ ५८ ॥

खदिरेत्यादौ स्यन्दनस्तिनिशः एषां रसः क्वाथः सच घृतात्त्रिगुणः क्षीरन्तु घृतसमम्। अत्रान्तरे हनुमूलाश्रित इत्यादि श्लोकद्वयं क्वचित् पुस्तके दृश्यते तच्च टीकाकृद्भिर्न धृतं नवा तथाविधमाकर पुस्तके तिष्ठतीति ॥

---

(१) टीका पुस्तकेऽत्र त्रिचतुरक्षराणि त्रुटितानि। "एकोऽयं" इति भवितुमर्हति।
(२) ऋष्येति पाठः।

[हनुमूलाश्रितो वायुर्दन्तदेशास्थिगोचरः ।
यदा शिशोः प्रकुपितो नोत्तिष्ठन्ति तदा द्विजाः ॥ १ ॥
रुक्षाशिनो वातिकस्य बालयत्यनिलः शिराः ।
हन्वाश्रयाः प्रसुप्तस्य दन्तैः शब्दं करोत्यतः ॥ २ ॥]
सदन्तो जायते यस्तु दन्ताः प्राग् यस्य चोत्तराः ।
कुर्वीत तस्मिन्नुत्पाते शान्तिं तत्र द्विजातये ।
दद्यात् सदक्षिणां बाले नैगमेषञ्च पूजयेत् ॥ ५६ ॥

सदन्तइत्यादौ उत्तरा ऊर्ध्वपालिस्थाः शान्तिमित्यथर्ववेदोक्तस्वस्त्ययनम् । नैगमेषो ग्रहविशेषः ।

तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् ।
तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते ॥ ६० ॥
तालुपातःस्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम् ।
तृडास्यकण्ठ्वक्षिरुजा ग्रीवादुर्धरता वमिः ॥ ६१ ॥

तालुकण्टकमाह तालुमांस इत्यादि, अस्यैव लक्षणं तालुपात इत्यादि । तालुपात इति अस्य (आख्या) न्तरे तालुनोऽधःपातः । कृच्छ्रात् पानमिति स्तन्यस्येति शेषः ।

तत्रोत्क्षिप्य यवक्षारक्षौद्राभ्यां प्रतिसारयेत् ।
तालु तद्वत् कणा-शुण्ठी-गोशकृद्रस-सैन्धवैः ॥ ६२ ॥
शृङ्गवेर-निशा-भृङ्गं कल्कितं वटपल्लवैः ।
बद्ध्वा गोशकृता लिप्तं कुकूले स्वेदयेत्ततः ।
रसेन लिम्पेत्ताल्वास्यं नेत्रे च परिषेचयेत् ॥ ६३ ॥
हरीतकी-वचा-कुष्ठकल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥ ६४ ॥

तत्रेत्यादिना तालुकण्टकचिकित्सा माह । तालु उत्क्षिप्य उत्तोल्य यवक्षारक्षौद्राभ्यां प्रतिसारयेदित्यर्थः । तद्वदित्यादि कणाशुण्ठीगोशकृद्रससैन्धवैः तद्वदिति

प्रतिसारयेदित्यर्थः। शृङ्गवेरेत्यादि वटपल्लवैर्बद्धेति योज्यम्। कुकूल इति तुष-करीषाग्नौ। रसेनेति स्विन्नशृङ्गवेरादिकल्करसेन।

मलोपलेपात् स्वेदाद् वा गुदे रक्तकफोद्भवः।
ताम्रो व्रणोऽन्तःकण्डुमान् जायते भूयुर्पद्रवः॥ ६५॥
केचित्तं मातृकादोषं वदन्त्यन्येऽपि पूतनम्।
पृष्ठारूगुदकुट्टञ्च केचिच्च तमनामिकम्॥ ६६॥

अहिपूतनमाह (मलेत्यादि)।

तत्र धात्र्याः पयः शोध्यं पित्तश्लेष्महरौषधैः। ६७॥
शृतशीतञ्च शीताम्बुयुक्तमन्तरपानकम्।
सक्षौद्रतार्क्ष्यशैलेन व्रणं तेन च लेपयेत्॥ ६८॥
त्रिफला-बदरी-प्लक्षत्वक्-क्वाथ-परिषेचितम्।
कासीस-रोचना-तुत्थ-मनोह्वाल-रसाञ्जनैः॥ ६९॥
लेपयेदम्लपिष्टैर्वा चूर्णितैर्वाऽवचूर्णयेत्।
सुश्लक्ष्णैरथवा यष्टी-शङ्ख-सौवीरकाञ्जनैः॥ ७०॥
सारिवा-शङ्खनाभिभ्यामसनस्य त्वचाऽथवा।
रागकण्डूत्कटे कुर्याद् रक्तस्रावं जलौकसा।
सर्व्वञ्च पित्तव्रणजिच्छस्यते गुदकुट्टके॥ ७१॥

तत्रेत्यादि तत्र अहिपूतनके धात्र्याः पयः शोध्यं क्षीरशोधनौषधैरितिशेषः। तथा पित्तश्लेष्महरौषधैः सिद्धमन्तरापानकं कषायपानं देयम्। तथा सक्षौद्रतार्क्ष्य-शैलेन समधुरसाञ्जनेन युक्तं शीताम्बु च देयम्। व्रणस्तेन च लेपयेदिति सक्षौद्र-तार्क्ष्यशैलेनेत्यर्थः। त्रिफलेत्यादि आलं हरितालम्, अम्लपिष्टैरिति काञ्जिकपिष्टैः। शङ्खः शङ्खनाभिः। गुदकुट्टके अहिपूतने।

पाठा-वेल्ल-द्विरजनी-मुस्त-भार्गीपुनर्नवैः।
सबिल्वत्र्युषणैः सर्पिस्त्रिकालीयुतैः शृतम्।
लिहानो मात्रया रोगैर्मुच्यते मृत्तिकोद्भवैः॥ ७२॥

पाठेत्यादौ वेल्लो विडङ्गः। मृत्तिकोद्भवैः मृत्तिकाभक्षणजन्यैः।

व्याधेर्यद् यस्य भैषज्यं स्तनस्तेन प्रलेपितः ।
स्थितो मुहूर्त्तं धौतोऽनु पीतस्तंतं जयेद्गदम् ॥ ७३ ॥

इति श्रीमद् वाग्भट विरचितायामष्टाङ्गहृदय संहितायाम्
उत्तरतन्त्रे बालामय प्रतिषेधो नाम द्वितीयोऽध्यायः ॥

औषधभक्षणासमर्थे बाले यथा भेषजं प्रयोज्यं तदाह व्याधेरित्यादि ।

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे)
उत्तरे तन्त्रे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

अथातो बालग्रहप्रतिषेधं व्याख्यास्यामः
इति हस्माहुः आत्रेयादयो महर्षयः ॥ १ ॥
पुरा गुहस्य रक्षार्थं निर्मिताः शूलपाणिना ।
मनुष्यविग्रहाः पञ्च सप्त स्त्रीविग्रहा ग्रहाः ॥ २ ॥
स्कन्दो विशाखो मेषास्यः श्वग्रहः पितृसंज्ञितः ।
शकुनिः पूतना शीतपूतना दृष्टिपूतना ।
मुखमण्डतिका तद्वद् रेवती शुष्करेवती ॥ ३ ॥

श्वग्रह इति तालव्यशकारः क्रोशनं श्वानवच्छुनीति वक्ष्यमाण दर्शनात् । १—३

तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः ॥ ४ ॥
सामान्यरूपमुत्त्रास-जृम्भाभ्रूक्षेप-दीनताः ।
फेनस्रावोर्ध्वदृष्ट्योष्ठ-दन्तदंश-प्रजागराः ॥ ५ ॥
रोदनं कूजनं स्तन्यविद्वेषः स्वरवैकृतम् ।
नखैरकस्मात् परितः स्वधात्र्यङ्गविलेखनम् ॥ ६ ॥

ग्रहावेशस्य पूर्वरूपमाह तेषामित्यादि। सामान्यरूपमित्यादिना विलेखन-मित्यन्तेन सामान्यरूपमाह। स्वधात्र्यङ्गविलेखनमिति स्वाङ्गविलेखनं धात्र्यङ्ग-विलेखनञ्च । ४—६

तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः ।
हतैकपक्षः स्तब्धाङ्गः सस्वेदो नतकन्धरः ॥ ७ ॥
दन्तखादी स्तनद्वेषी त्रस्यन् रोदिति विस्वरः ।
वक्रवक्त्रो वमेल्लालां भृशमूर्द्ध्वं निरीक्षते ॥ ८ ॥
वसासृग्गन्धिरुद्विग्नो बद्धमुष्टिशकृच्छिशुः ।
चलितैकाक्षिगण्डभ्रूः संरक्तोभयलोचनः ।
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम् ॥ ९ ॥

तत्रेत्यादिना स्कन्दग्रहगृहीतस्य बालस्य लक्षण माह । वसा मांसस्नेहः । ७—९

संज्ञानाशो मुहुः केशलुञ्चनं कन्धरानतिः ।
विनम्य जृम्भमाणस्य शकृन्मूत्रप्रवर्तनम् ॥ १० ॥
फेनोद्वमन-मूर्द्धक्षा-हस्त भ्रू-पाद-नर्त्तनम् ।
स्तनस्वजिह्वासन्दंश-संरम्भ-ज्वर-जागराः ।
पूयशोणितगन्धश्च स्कन्दापस्मारलक्षणम् ॥ ११ ॥

संज्ञानाश इत्यादिना विशाखलक्षणमाह । विनम्य नम्रीभूय जृम्भमानस्य, स्तनस्य स्वजिह्वायाश्च संदंशः । संरम्भ आरभटो । स्कन्दापस्मारो विशाखस्यैव नामान्तरम् । १०।११

आध्मानं पाणिपादास्यस्यन्दनं (१) फेननिर्गमः ।
तृण्मुष्टिबन्धातीसार-स्वरदैन्य-विवर्णताः ॥ १२ ॥
कूजनं स्तननं छर्दिः कास-हिक्का-प्रजागराः ।
ओष्ठदंशाङ्गसङ्कोचस्तम्भबस्ताङ्गगन्धताः ॥ १३ ॥
ऊर्द्ध्वं निरीक्ष्य हसनं मध्ये विनमनं ज्वरः ।
मूर्च्छैकनेत्रशोफश्च नैगमेषग्रहाकृतिः ॥ १४ ॥

मेषाख्यस्य नैगमेषापरनामधेयस्य लक्षणमाह आध्मानमित्यादि । पाणिपादस्य स्यन्दनं स्वेदस्रुतिः स्पन्दनमिति पाठे किञ्चिच्चलनम् । स्वरदैन्यमिति दीन-

(१) स्पन्दनमितिपाठः ।

स्वरत्वम् । कूजन मिति कुन्थनम् । स्तननमिति चीत्कारशब्दः । बस्तइछाग-स्तस्येवाङ्गगन्धो यस्य । १२—१४

कम्पो हृषितरोमत्वं स्वेदश्चक्षुर्निमीलनम् ।
बहिरायामनं जिह्वादंशोऽन्तः कण्ठकूजनम् ।
वाहानां(१)विट्सगन्धत्वं क्रोशनं श्वानवच्छुनि ॥ १५ ॥

कम्प इत्यादिना श्वग्रहमाह । बहिरायमनं पृष्ठदेशे विनमनम् । वाहानां तुरागाणां विट् पुरीषं तेन समानगन्धता । श्ववदिति कुक्कुरस्येव क्रोशनं शब्दः । शुनीति श्वग्रहे । १५

रोमहर्षो मुहुस्त्रासः सहसा रोदनं ज्वरः ।
कासातिसार-वमथु-जृम्भा-तृट्-शवगन्धताः ॥ १६ ॥
अङ्गेष्वाक्षेपविक्षेपः शोष-स्तम्भ-विवर्णता ।
मुष्टिबन्धः स्रुतिश्चाक्ष्णो बालस्य स्युः पितृग्रहे ॥ १७ ॥

रोमहर्ष इत्यादिना पितृग्रहलक्षणमाह, आक्षेप आकुञ्चनम्, विक्षेपो विस्तारः । १६।१७

स्रस्ताङ्गत्वमतीसारो जिह्वातालुगले व्रणाः ।
स्फोटाः सदाहरुक्पाकाः सन्धिषु स्युः पुनः पुनः ॥ १८ ॥
निश्यह्नि प्रविलीयन्ते पाको वक्त्रे गुदेऽपि वा ।
भयं शकुनिगन्धत्वं ज्वरश्च शकुनिग्रहे ॥ १९ ॥

स्रस्ताङ्गत्वमित्यादिना शकुनिग्रहलक्षण माह—सन्धिषु च स्फोटा निशि स्युः अह्नि प्रविलीयन्ते । शकुनिगन्धित्वमित्यत्र शकुनिशब्देन जलचरा मांसादाश्च पक्षिणः उच्यन्ते विस्रगन्धित्वात् । उक्तं हि तन्त्रान्तरे—

"सस्रावदाहपाकाढ्यै श्रितः स्फोटै र्भयान्वितः ।
स्रस्ताङ्गो विस्रगन्धः स्यात् शकुन्या पीडितः शिशुः ॥ इति
(हिरण्याख्ये तन्त्रे) । १८—१९

---

(१) धावनमितिपाठः ।

पूतनायां वमिः कम्पस्तन्द्रा रात्रौ प्रजागरः ।
हिक्काध्मानं शकृद्भेदः पिपासामूत्रनिग्रहः ।
स्रस्तहृष्टाङ्गरोमत्वं काकवत् पूतिगन्धता ॥ २० ॥

पूतनायामित्यादि । स्रस्तहृष्टाङ्गरोमत्वमिति स्रस्ताङ्गत्वं हृष्टरोमत्वञ्चेत्यर्थः ।२०

शीतपूतनया कम्पो रोदनं तिर्य्यगीक्षणम् ।
तृष्णान्त्रकूजोऽतीसारो वसावद् विस्रगन्धता ।
पार्श्वस्यैकस्य शीतत्वमुष्णत्वमपरस्य च ॥ २१ ॥

ीतपूतनयेत्यादि शीतपूतनालक्षणम् । २१

अन्धपूतनया छर्दिर्ज्वरः कासोऽल्पवह्निता ।
वर्चसो भेद-वैवर्ण्य-दौर्गन्ध्यान्यङ्गशोषणम् ॥ २२ ॥
दृष्टिसादोऽतिरुक् कण्डू-पोथकीजन्म-शूनताः ।
हिक्कोद्वेग-स्तनद्वेष-वैवर्ण्य-स्वरतीक्ष्णताः ।
वेपथुमत्स्यगन्धित्वमथवा साम्लगन्धिता ॥ २३ ॥

अन्धपूतनयेत्यादिना दृष्टिपूतनाया लक्षणमाह । अन्धपूतनेति दृष्टिपूतनाया-एव नामान्तरम् । पोथकी वर्त्मरोगविज्ञाने वक्ष्यमाणलक्षणा । स्वरतीक्ष्णता उद्वेजकस्वरत्वम् । साम्लगन्धितेति काञ्जिकसमानगन्धता । २२।२३

मुखमण्डितया पाणिपादास्य रमणीयता ।
सिराभिरसिताभाभिराचितोदरता ज्वरः ।
अरोचकोऽङ्गग्लपनं गोमूत्रसमगन्धता ॥ २४ ॥

मुखमण्डितयेत्यादौ पाणिपादास्यस्य रमणीयता प्रसन्नवर्णत्वम् तन्त्रान्तरेऽपि "प्रसन्नवदन" इत्युक्तम् । २४

रेवत्यां श्यावनीलत्वं कर्णनासाक्षिमर्दनम् ।
कास-हिक्काक्षिविक्षेप-वक्रवक्त्रत्वरक्तताः ।
वस्तगन्धो ज्वरः शोषः पुरीषं हरितं द्रवम् ॥ २५ ॥

रेवत्यादौ श्यावनीलत्वमिति नखादीनां श्यावत्वं नीलत्वं वा, अक्षिविक्षेपो अक्ष्णोश्चालनम् । २५

जायते शुष्करेवत्यां क्रमात् सर्वाङ्गसंक्षयः ॥ २६ ॥
केशशातोऽन्नविद्वेषः स्वरदैन्यं विवर्णता ।
रोदनं गृध्रगन्धित्वं दीर्घकालानुवर्त्तनम् ॥ २७ ॥

जायत इत्यादिना दीर्घकालानुवर्तनमित्यन्तेन शुष्करेवतीलक्षणमाह । सर्वाङ्गसंक्षय इति सर्वेषामङ्गानां क्षीणतेत्यर्थः । २६—२७

उदरे ग्रन्थयो वृत्ता यस्य नानाविधं शकृत् ।
जिह्वाया निम्नता मध्ये श्यावं तालु च तं त्यजेत् ॥ २८ ॥
भुञ्जानोऽन्नं बहुविधं यो बालः परिहीयते ।
तृष्णागृहीतःक्षामाक्षो हन्ति तं शुष्करेवती ॥ २९ ॥

उदर इत्यादिना असाध्य लक्षणमाह । २८।२९

हिंसाऽरत्यर्च्चनाकाङ्क्षा ग्रहग्रहणकारणम् ॥ ३० ॥

किमर्थं पुन र्ग्रहा बालानाविशन्तीत्याह हिंसेत्यादि । रतिः क्रीडा हिंसाद्याकाङ्क्षया ग्रहा बालान् गृह्णन्तीत्यर्थः । ३०

तत्र हिंसात्मके बालो महान् वा स्रुतनासिकः ।
क्षतजिह्वः क्वणेद् बाढमसुखी साश्रुलोचनः ॥ ३१ ॥
दुर्वर्णो क्षीणवदनः (१) पूतिगन्धिश्च जायते ।
क्षामो मूत्रपुरीषं स्वं मृद्नाति न जुगुप्सते ॥ ३२ ॥
हस्तौ चोद्यम्य संरब्धो हन्त्यात्मानं तथा परम् ।
तद्वच्च शस्त्रकाष्ठाद्यैरग्निं वा दीप्तमाविशेत् ॥ ३३ ॥
अप्सु मज्जेत् पतेत् कूपे कुर्य्यादन्यच्च तद्विधम् ।
तृड्दाहमोहान् पूयस्य छर्दनञ्च प्रवर्त्तयेत् ।
रक्तञ्च सर्वमार्गेभ्यो रिष्टोत्पत्तिश्च तं त्यजेत् ॥ ३४ ॥

एषां लक्षणमाह तत्रेत्यादि । हिंसात्मके हिंसास्वभावे । बाल इति स्तनन्धयः । महान् इत्यन्नादः । क्वणेदित्यारावं कुर्य्यात् बाढमित्यतिशयेन । दुर्वर्ण इति विवर्णः, क्षीणवदन इति म्लानवदनः । दुर्बलो हीनवचन इत्यपि

(१) दुर्बलो हीनवचन इति वा पाठः ।

पाठान्तरम्। क्षामइति क्षीणः, संरब्ध इति क्रुद्धः। तद्वच्च शस्त्रकाष्ठाद्यैरिति शस्त्रादिभिरात्मानमपरञ्च हन्तीत्यर्थः। रिष्टौत्पत्तिमिति रिष्टस्योत्पत्तिर्यत्र ।३१—३४

रहः स्त्री-रति-संलाप गन्ध-स्रग्-भूषणप्रियः ।
हृष्टः शान्तश्च दुःसाध्यो रतिकामेन पीड़ितः ॥ ३५ ॥

रतिकामेन ग्रहेण गृहीतस्य लक्षणमाह रह इत्यादि। रहो निर्जने स्त्रीरतिप्रियः स्त्रीसम्भाषाप्रियश्च। ३५

दीनः परिमृशेद्व वक्त्रं शुष्कोष्ठगलतालुकः ।
शङ्कितं वीक्षते रौति ध्यायत्यायाति दीनताम् ॥ ३६ ॥
अन्नमन्नाभिलाषेऽपि दत्तं नाति बुभुक्षते ।
गृहीतं बलिकामेन तं विद्यात् सुखसाधनम् ॥ ३७ ॥

दीन इत्यादि बलिकामलक्षणम्। दीनो दुःखितः सन् वक्त्रं परिमृशेत् स्पृशेत्, ध्यायति जिह्मायते। दीनता मिति क्षामताम्। ३६।३७

हन्तुकामं जयेद्व होमैः सिद्धमन्त्रप्रवर्तितैः ।
इतरौ तु यथाकामं रतिबल्यादिदानतः ॥ ३८ ॥

एषां चिकित्सामाह हन्तुकाममित्यादि। यद्यप्ययमसाध्य उक्तः होमो बलवच्छक्तिकत्वादसाध्यमपि साधयतीत्यर्थः। इतरामिति रत्यर्चनकामौ। यथा काममिति रतिकामं रतिदानेन बलिकामं बलिदानेनेत्यर्थः। ३८

अथ साध्यग्रहं बालं विविक्ते शरणे स्थितम् ।
त्रिरह्नः सिक्तसंमृष्टे सदा सन्निहितानले ॥ ३९ ॥
विकीर्णभूति-कुसुम-पत्र-वीजान्नसर्षपे ।
रक्षोघ्न-तैल-ज्वलित-प्रदीप-हत-पाप्मनि ॥ ४० ॥
व्यवाय-मद्य-पिशित-निवृत्त-परिचारके ।
पुराणसर्पिषाऽभ्यक्तं परिषिक्तं सुखाम्बुना ॥ ४१ ॥
साधितेन बला-निम्ब वैजयन्ती-नृपद्रुमैः ।
पारिभद्रक-कटङ्ग-जम्बू-बरुण-कट्तृणैः ॥ ४२ ॥

कपीतवङ्काऽपामार्गपाटलामधुशिग्रुभिः ।
काकजङ्घा-महाश्वेता-कपित्थ-क्षीरिपादपैः ॥ ४३ ॥
सकदम्ब-करञ्जैश्च धूपं स्नातस्य चाऽहरेत् ।
द्वीपि-व्याघ्राहि-सिंहर्क्ष-चर्मभिर्घृतमिश्रितैः ॥ ४४ ॥

अथेत्यादि पूते निर्भये वा शरणे इति गृहे । लिरद्धइति अह्नस्त्रीन् वारान् जलेन सिक्ते तथा सम्मार्जन्या संमृष्टे च । विकीर्णेत्यादौ भूतिर्मन्त्राभिमन्त्रिता ध्वनिः गन्धतृणमित्यन्ये । पत्रम् अश्वत्थपत्रतुलसीपत्रादि । बीजं कार्पासादीनाम् अन्नं यवतण्डुलतिलादि । रक्षोघ्नतैलं सर्षपतैलम् । व्यवायादिभ्यो निवृत्ता परिचारका यत्र । साधितेनेत्यादि सुखाम्बुविशेषणम् । बलादिभिः कदम्बान्तैः साधितेनेत्यर्थः । वैजयन्ती गणिकारिकेत्यरुणः, जयन्तीत्यन्ये । नृपद्रुम आरग्वधः । कट्वङ्गः श्योनाकः वरुणो वरुणवृक्षः, कपोतवंकं ब्रह्मसुवर्चला, मधुशिग्रुः रक्तशोभाञ्जनः, काकजङ्घा गुञ्जा, महाश्वेता कटभी, क्षीरिपादपा वटोदुम्बरादयः । धूपं स्नातस्य चाहरेदिति उक्तरूपसुखाम्बुस्नातस्य द्वीपिचर्म्मभिर्धूपम् आहरेत् । द्वीपी चित्रव्याघ्रः । ३९—४४

पूती-दशाङ्ग-सिद्धार्थ-वचा-भल्लात-दीप्यकैः ।
सकुष्टैः सघृतैर्धूपः सर्वग्रहविमोक्षणः ॥ ४५ ॥

धूपान्तरमाह पूतीत्यादि । पूती पूतीकरञ्जः । दशाङ्गीति "वचा हिङ्गु विडङ्गानि सैन्धवं गजपिप्पली । पाठा प्रतिविषा व्योषं दशाङ्गी परिकीर्त्तिता ।" इत्यरुणः । ४५

सर्षपा निम्बपत्राणि मूलमश्वखुरा वचा ।
भूर्जपत्रं घृतं धूपः सर्वग्रहनिवारणः ॥ ४६ ॥

सर्षपा इत्यादौ अश्वखुरा श्वेतापराजिता । धूप इत्यनन्तरं एभिरिति शेषः । ४६

गोश्टङ्ग-लोम-बालाहि-निर्मोक-वृषदंश-विट् ।
निम्बपत्राज्य-कटुका मदनं बृहतीद्वयम् ॥ ४७ ॥
कार्पासास्थि-यव-च्छाग-रोम-देवाह्व-सर्षपम् ।
मयूरपत्र-श्रीवासं तुषकेशं सरामठम् ॥ ४८ ॥

मृद्भाण्डे बस्तमूत्रेण भावितं श्लक्ष्णचूर्णितम् ।
धूपनार्थं हितं सर्वभूतेषु विषमे ज्वरे ॥ ४६ ॥

गोश्रृङ्गेत्यादि ।(१) गोशब्दस्य श्रृङ्गलोमबालानि सवस्कानि । वृषदंशो विड़ालः, मयूरपत्रं मयूरपक्षम्, श्रीवासो नवनीतखोटिः । ४७—४९

अनन्ताऽम्रास्थि-तगरं मरिचं मधुरो गणः ।
श्रृगालविन्ना मुस्ता च कल्कितैस्तैर्घृतं पचेत् ।
दशमूलरसक्षीरं युक्तं तद् ग्रहजित् परम् ॥ ५० ॥

अनन्तेत्यादिना घृतान्याह । अनन्ता अनन्तमूली, श्रृगालविन्ना पृश्निपर्णी-भेदः । दशमूलरसो घृतात्त्रिगुणः क्षीरं घृतसममिति । ५०

रास्नाद्व्यंशुमती-वृद्ध-पञ्चमूल-बचा-घनात् ।
काथे सर्पिः पचेत् पिष्टैः सारिवा-व्योष-चित्रकैः ।
पाठा-बिड़ङ्ग मधुक-पयस्या-हिङ्गु-दारुभिः ॥ ५१ ॥
सग्रन्थिकैः सेन्द्रयवैः शिशोस्तत् सततं हितम् ।
सर्वरोगग्रहहरं दीपनं बलवर्णदम् ॥ ५२ ॥

रास्नेत्यादौ द्व्यंशुमती अंशुमतीद्वयं शालपर्णी पृष्णिपर्णी च ज्योतिष्मतीत्यन्ये । वृद्ध पञ्चमूलं महत्पञ्चमूलं, घनो मुस्तकः । पयस्या क्षीरकाकोली, ग्रन्थिकं पिप्पली-मूलम् । ५१—५२

सारिवा-सुरभी-ब्राह्मी-शङ्खिनी-कृष्ण-सर्षपैः ।
वचाऽश्वगन्धा-सुरसा-युक्तैः सर्पिर्विपाचयेत् ।
तन्नाशयेद् ग्रहान् सर्वान् पानेनाभ्यञ्जनेन च ॥ ५३ ॥

सारिवेत्यादौ, सुरभिः शल्लकी, सुरसा पर्णाशः । ५३

घृतानि भूतविद्यायां वक्ष्यन्ते यानि तानि च ।
युञ्ज्यात्तथा बलिं होमं स्नपनं मन्त्रतन्त्रवित् ॥ ५४ ॥

घृतानीत्यादौ ग्रहान् नाशयेयु रिति पूर्वोक्तं सम्बध्यते । अत्रान्तरे हस्तमात्र-

(१) धूपोऽयमरुणसम्मते मुद्रितपुस्तके ग्रहापहघृतचयादनन्तरं पठ्यते शिवदासस्त धूप-सामान्यादत्रै वाहेति समीचीन मिदं प्रतिभाति ।

मित्यादिः समस्ता बालकग्रहा इत्यन्तो ग्रन्थ स्तदाकरपुस्तकेषु नास्ति। तथा अरुणेन च न धृत इति कृत्वा मयापि न व्याख्यातः। युञ्ज्यादित्यादि। मन्त्रतन्त्रविदिति मन्त्रशास्त्रवित्। ५४

पूतीकरञ्जत्वक्पत्रं क्षीरिभ्यो बर्बरादपि।
तुम्बी-विशाला-रलुका-शमी-बिल्व-कपित्थकाः।
उत्क्वाथ्य तोयं तद्रात्रौ बालानां स्नपनं शिवम् ॥ ५५ ॥

बर्ब्बरो बावरीति नाम्ना ख्यातः सुगन्धिः शाकभेदः। तद्रात्राविति यस्मिन् दिने भूतावेशो जातस्तद्रात्रावित्यर्थः। ५५

अनुबन्धान् यथाकृच्छ्रं ग्रहापायेऽप्युपद्रवान्।
बालामयनिषेधोक्तभेषजैः समुपाचरेत् ॥ ५६ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम्
उत्तरतन्त्रे बालग्रह प्रतिषेधो नाम तृतीयोऽध्यायः ॥

समाप्तञ्च कौमारभृत्यमिति।

अनुबन्धानित्यादि। ग्रहावेश कालीना ये ज्वरादय उपद्रवा ग्रहापाये सत्यपि अनुबन्धरूपतया तिष्ठन्ति तानित्यर्थः। ५६

इति (श्रीशिवदास सेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे तृतीयाध्यायः।
समाप्तञ्च कौमारभृत्यमिति।

चतुर्थोऽध्यायः।

अथातो भूतविज्ञानं व्याख्यास्यामः

इति हस्माहुः आत्रेयादयो महर्षयः ॥ १ ॥

इदानीं भूतविद्यामाह अथात इत्यादि। भूतानि विज्ञायन्ते येनाध्यायेन स भूतविज्ञानः। १

लक्षयेत् ज्ञान-विज्ञान-वाक्-चेष्टा-बल-पौरुषम्।

पुरुषेऽपौरुषं यत्र तत्र भूतग्रहं वदेत् ॥ २ ॥

तत्र भूतसामान्यलक्षणमाह लक्षयेत्यादि। यत्र पुरुषे ज्ञानादिकमपौरुषमित्यमानुषं लक्षयेत् तत्र पुरुषे भूतग्रहं वदेत्। ज्ञानं शास्त्रज्ञानं विज्ञानं शिल्पज्ञानं किंवा ज्ञानं शास्त्रं विज्ञानं तदर्थनिश्चयः। पौरुषं पराक्रमः। २

भूतस्य रूपप्रकृतिभाषगत्यादि चेष्टितैः।

यस्यानुकारं कुरुते तेनाविष्टं तमादिशेत्

सोऽष्टादशविधो देवदानवादिविभेदतः ॥ ३ ॥

संक्षेपेण विशिष्टलिङ्गमाह भूतस्येत्यादि। यस्य भूतस्य देवादेरनुकारं रूपप्रकृत्यादिभिः यः पुरुषः कुरुते तं पुरुषं तेन भूतेनाविष्टमादिशेत्। स भूतो देवदानवादि भेदेनाष्टादशविधो भवति। आदि शब्देन वक्ष्यमाणानां गन्धर्व्वादीनां ग्रहणम्। ३

हेतुस्तदनुषक्तौ तु सद्यः पूर्वकृतोऽथवा।

प्रज्ञापराधः सुतरां तेन कामादिजन्मना ॥ ४ ॥

लुप्तधर्मव्रताचारः पूज्यानप्यतिवर्तते।

तं तथा भिन्नमर्यादं पापमात्मोपघातिनम्।

देवाद्योऽप्यनुघ्नन्ति ग्रहाश्छिद्रप्रहारिणः ॥ ५ ॥

छिद्रं पापक्रियारम्भः पाकोऽनिष्टस्य कर्मणः।

एकस्य शून्ये ऽवस्थानं श्मशानादिषु वा निशि ॥ ६ ॥

दिग्वासस्त्वं गुरोर्निन्दा रतेरविधिसेवनम्।

अशुचेर्देवतार्चादिपरसूतकसङ्करः ॥ ७ ॥

होममन्त्रबलीज्यानां विगुणं परिकर्म च ।
समासाद्दिनचर्यादिप्रोक्ताचारव्यतिक्रमः ॥ ८ ॥

हेतुरित्यादि । तेषां भूतानामनुषक्तौ अनुषङ्गे । सच इति तत्कालकृतः पूर्व्वजन्मकृतो वा प्रज्ञापराधो हेतुः । सुतरामित्यादि तेन कामक्रोधादिजन्मना प्रज्ञापराधेन सुतरां लुप्तधर्म्मव्रताचारः सन् पूज्यानप्यतिवर्त्तते अभिभवति । छिद्रे अवसरे प्रहर्त्तुं हिंसितुं शील' येषाम् । किन्तच्छिद्रमित्याह छिद्र मित्यादि । पाकोऽनिष्टस्य कर्म्मण इति—पूर्व्वजन्मकृतस्य पापकर्म्मणः परिणामकाल इत्यर्थः । एकस्येत्येकाकिनः । श्मशानादिष्वादिशब्दाच्चतुष्पथोपवनादीनां ग्रहणम् । दिग्वासस्त्वमिति नग्नत्वम् । रतेरिति मैथुनस्य अविधिसेवनम् अमावास्या-पौर्णमास्यादिषु तथा रजस्वलादीनाञ्च सेवनमित्यर्थः । अशुचेर्देवताराद्धिरिति—अपवित्रीभूय देवतापूजेत्यर्थः । परसूतक-सङ्कर इति—परशब्देन निजज्ञातिभ्यो भिन्न उच्यते, तस्य सूतकेन सूतकाशौचेन सङ्करः संश्लेषः । विगुणं परिकर्म्मेति—होमादिविपरीत मुपकरणम् । व्यतिक्रम उल्लङ्घनम् । ४—८

गृह्णन्ति शुक्लप्रतिपत्त्रयोदश्योः सुरा नरम् ।
शुक्लत्रयोदशी-कृष्णद्वादश्योर्दानवा ग्रहाः ॥ ६ ॥
गन्धर्वास्तु चतुर्दश्यां द्वादश्याञ्चोरगाः पुनः ।
पञ्चम्यां शुक्लासप्तम्येकादश्योस्तु धनेश्वराः ॥ १० ॥
शुक्लाष्ट-पञ्चमी-पूर्णमासीषु ब्रह्मराक्षसाः ।
कृष्णे रक्षःपिशाचाद्या नवद्वादशपर्वसु ॥ ११ ॥
दशामावास्ययोरष्टनवम्योः पितरोऽपरे ।
गुरुवृद्धादयः प्रायः कालं सन्ध्यासु लक्षयेत् ॥ १२ ॥

देवादीनां ग्रहणकाल माह गृह्णन्तीत्यादि । द्वादश्याञ्च गन्धर्व्वा इत्यन्वयः । उरगाः पुनः पञ्चम्याम् । धनेश्वरा यक्षाः शुक्लसप्तम्येकादश्योर्गृह्णन्ति । शुक्लाष्टपञ्चमीत्यादि शुक्लाष्टमी-शुक्लपञ्चमी-पौर्णमासीष्वित्यर्थः । कृष्ण इत्यादि—कृष्णपक्षीय नवमी द्वादशी पर्व्वस्वित्यर्थः । पर्व्व शब्देन पञ्चदश्युच्यते ।(१) दशम्यां

(१) विष्णुपुराणे पञ्च पर्व्वाण्याह—तद्यथा—
"चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥" इति

तथामावास्यायाञ्च पितरो गृह्णन्ति। अपरे इत्यनुक्ता ये गुरुवृद्धादयो ग्रहास्ते अष्टमीनवम्योर्गृह्णन्ति। प्रायः काल सन्ध्यासु लक्षयेदिति—येषु येषु तिथिषु देवादिभिर्ग्रहण मुक्तं तेषु तेषु तिथिषु प्रायो बाहुल्येन सन्ध्यासु काल सन्ध्याया यः काल स्तद्भागरूपं ग्रहणकालतया जानीयात्। एतच्च ग्रहग्रहणकालोपदर्शनं तेषु तेषु कालेषु तेभ्यो बलिदानार्थम्। ९—१२

फुल्लपद्मोपममुखं सौम्यदृष्टिमकोपनम्।
अल्पवाक्-स्वेदविण्मूत्रं भोजनानभिलाषिणम् ॥ १३ ॥
देवद्विजातिपरमं शुचिसंस्कृतवादिनम्।
मीलयन्तं चिरान्नेत्रे सुरभिं वरदायिनम् ॥ १४ ॥
शुक्लमाल्याम्बरसरिच्छैलोच्चभवनप्रियम्।
अनिद्रमप्रधृष्यञ्च विद्याद्देवशीकृतम् ॥ १५ ॥

फुल्लपद्मोपममुखमित्यादिना देवग्रहगृहीतस्य लक्षणमाह। देवद्विजातिपरममिति—देवब्राह्मणानुरक्तम्। मीलयन्तं चिरान्नेत्रे इति चिरेण निमेषं कुर्वाणमित्यर्थः। १३—१५

जिह्मदृष्टिं दुरात्मानं गुरु-देव-द्विज-द्विषम्।
निर्भयं मानिनं शूरं क्रोधनं व्यवसायिनम् ॥ १६ ॥
रुद्रः स्कन्दो विशाखोऽहमिन्द्रोऽहमिति वादिनम्।
सुरामांसरुचिं विद्यात् दैत्यग्रहगृहीतकम् ॥ १७ ॥

जिह्मदृष्टिमित्यादि दानवगृहीतलक्षणम्। दुरात्मानमिति दुष्टान्तःकरणम्। १६।१७

स्वाचारं सुरभिं हृष्टं गीतनर्तनकारिणम्।
स्नानोद्यानरुचिं रक्तवस्त्रमाल्यानुलेपनम्।
शृङ्गारलीलाभिरतं गन्धर्वाध्युषितं वदेत् ॥ १८ ॥

स्वाचारमित्यादि गन्धर्व्वगृहीत लक्षणम्। १८

रक्ताक्षं क्रोधनं स्तब्धदृष्टिं वक्रगतिं चलम्।
श्वसन्तमनिशं जिह्वालालिनं सृक्कणीलिहम् ॥ १९ ॥

प्रियदुग्धगुडस्नानमधोवदनशायिनम् ।
उरगाधिष्ठितं विद्यात्त्रस्यन्तश्चातपत्रतः ॥ २० ॥

रक्ताक्षमित्यादि सर्पग्रह-गृहीत-लक्षणम् । सृक्कणीलिहमिति— सृक्कण्यावोष्ठप्रान्तौ लिहन्तीति सृक्वर्णालिहः । अतएव निर्देशात् सृक्वणीशब्द ईकारान्तोऽप्यस्तीति ज्ञेयम् । १९।२०

विप्लुतत्रस्तरक्ताक्षं शुभगन्धं सुतेजसम् ।
प्रिय-नृत्य-कथा-गीत-स्नान-माल्यानुलेपनम् ॥ २१ ॥
मत्स्यमांसरुचिं हृष्टं तुष्टं बलिनमव्ययम् ।
चलिताग्रकरं कस्मै किं ददामीति वादिनम् ॥ २२ ॥
रहस्यभाषिणं वैद्यद्विजातिपरिभाविनम् ।
अल्परोषं द्रुतगतिं विद्याद्यक्षगृहीतकम् ॥ २३ ॥

विप्लुतेत्यादि यक्षगृहीत लक्षणम् । विप्लुताक्षमश्रुपूर्णचक्षुषम् । रहस्यभाषिणमिति— गोप्यार्थवक्तारः । २१।२३

हास्यनृत्यप्रियं रौद्रचेष्टं छिद्रप्रहारिणम् ।
आक्रोशिनं शीघ्रगतिं देव-द्विज-भिषग्-द्विषम् ॥ २४ ॥
आत्मानं काष्ठशस्त्राद्यैर्घ्नन्तं भोः शब्दवादिनम् ।
शास्त्रवेदपठं विद्याद् गृहीतं ब्रह्मराक्षसैः ॥ २५ ॥

हास्येत्यादि ब्रह्मराक्षसगृहीत लक्षणम् । २४।२५

सक्रोधदृष्टिं भ्रुकुटिमुद्वहन्तं ससम्भ्रमम् ।
प्रहरन्तं प्रधावन्तं ब्रुवन्तं(१) भैरवाननम् ॥ २६ ॥
अन्नाद्विनापि बलिनं नष्टनिद्रं निशाचरम् ।
निर्लज्जमशुचिं शूरं क्रूरं परुषभाषिणम् ॥ २७ ॥
रोषणं रक्त-माल्य-स्त्री-रक्त-मद्यामिष-प्रियम् ।
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ ।
हसन्तमन्नकाले च राक्षसाधिष्ठितं वदेत् ॥ २८ ॥

(१) शब्दनमिति वा पाठः ।

सक्रोधदृष्टिमित्यादि राक्षस-गृहीत-लक्षणम्। भैरवाननं यथा स्यात्तथा मुक्तम्। निशाचर मिति—निशायामेव भ्रमणशीलम्। २६—२८

अस्वस्थचित्तं नैकत्र तिष्ठन्तं परिधाविनम्।
उच्छिष्ट-नृत्य-गान्धर्व-हास-मद्यामिष-प्रियम्॥ २९॥
निर्भत्सनाद्दीनमुखं रुदन्तमनिमित्ततः।
नखैर्लिखन्तमात्मानं रुक्षध्वस्तवपुःस्वरम्॥ ३०॥
आवेदयन्तं दुःखानि सम्बद्धाबद्धभाषिणम्।
नष्टस्मृतिं शून्यरतिं लोलं नग्नं मलीमसम्॥ ३१॥
रथ्याचेलपरीधानं तृणमालाविभूषणम्।
आरोहन्तञ्च काष्ठाश्मं तथा सङ्करकूटकम्॥
बह्वाशिनं पिशाचेन विजानीयादधिष्ठितम्॥ ३२॥

अस्वस्थचित्तमित्यादि पिशाचाधिष्ठित लक्षणम्। रुक्षध्वस्तवपुः-स्वरमिति—रुक्षवपुषम्,—उद्ध्वस्तस्वरञ्च स्वरसादयुक्तमित्यर्थः। सम्बद्धाबद्धभाषिणमिति—किञ्चित् सम्बद्धं किञ्चिदसम्बद्धञ्च भाषते। रथ्याचेलपरीधानमिति—रथ्यायां यच्चेलं भग्नवस्त्रैकदेशः पतित्वा तिष्ठति तदेव परीधानं यस्य। तृणरचिता माला तृणमाला। तथा सङ्करकूटकमिति—सम्मार्जनीक्षिप्ततृणादिराशिमारोहन्तम्। २९—३२

प्रेताकृतिक्रियागन्धं भीतमाहारविद्विषम्।
तृषान्वितञ्च प्रेतेन गृहीतं नरमादिशेत्॥ ३३॥

प्रेताकृतीत्यादि प्रेतगृहीत लक्षणम्। ३३

बहुप्रलापं कृष्णास्यं प्रविलम्बितयायिनम्।
शूनप्रलम्बवृषणं कूष्माण्डाधिष्ठितं वदेत्॥ ३४॥

बहुप्रलापमित्यादि कुष्माण्डगृहीतलक्षणम्। प्रविलम्बितयायिनमिति—अशीघ्रगामिनमित्यर्थः। कुष्माण्डाः प्रेतभेदाः। ३४

गृहीत्वा काष्ठलोष्ट्रादि भ्रमन्तं चीरवाससम्।
नग्नं धावन्तमुत्त्रस्तदृष्टिं तृणविभूषणम्॥ ३५॥

श्मशानशून्यायतनं रथ्यैकद्रुमसेविनम् ।
तिलान्नमद्यमांसेषु सततं सक्तलोचनम् ।
खाखोटा(१)धिष्ठितं विद्याद् वदन्तं परुषाणि च ॥ ३६ ॥

खाखोटाः सरीसृपाः तैरधिष्ठितस्य लक्षण माह गृहीत्वेत्यादि । ३५।३६

याचन्तमुदकं चान्नं त्रस्तालोहितलोचनम् ।
उग्रवाक्यश्च जानीयान्नरमौकिरणार्दितम् ॥ ३७ ॥

औकिरणाः किन्नरभेदाः तैरधिष्ठितस्य लक्षणमाह याचन्तमित्यादि । ३७

गन्ध-माल्य-रतिं सत्यवादिनं परिवेपिनम् ।
बहुनिद्रश्च जानीयाद् वेतालेन वशीकृतम् ॥ ३८ ॥

वेतालगृहीतस्य लक्षणमाह गन्धमाल्येत्यादि । ३८

अप्रसन्नदृशं दीनवदनं शुष्कतालुकम् ।
चलन्नयनपक्ष्माणं निद्रालुं मन्दपावकम् ॥ ३९ ॥
अपसव्यपरीधानं तिलमांसगुडप्रियम् ।
स्खलद्वाचश्च जानीयात् पितृग्रहवशीकृतम् ॥ ४० ॥

पितृग्रहाधिष्ठितस्य लक्षणमाह अप्रसन्नदृशमित्यादि । दीनवदनं म्लानमुखम् । ३९।४०

गुरुवृद्धर्षिसिद्धाभिशापचिन्तानुरूपतः ।
व्याहाराहारचेष्टाभिर्यथास्वं तद्ग्रहं वदेत् ॥ ४१ ॥

गुर्वादिभिश्चतुर्भिर्ग्रहैर्गृहीतानां लक्षणान्याह गुर्वित्यादि । गुर्वादीनाञ्चतूर्णां यादृशोऽभिशापः यादृशी च चिन्ता अशुभानुध्यानं तमनुरूपा या व्याहाराहारचेष्टा स्ताभिर्यथास्वं गुर्वादिग्रहं वदेत् । तृतीयान्ता तसिः । ४१

कुमारवृन्दानुगतं नग्नमुद्धतमूर्द्धजम् ।
अस्वस्थमनसं दैर्घ्यकालिकं सग्रहं त्यजेत् ॥ ४२ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम
उत्तरतन्त्रे भूतविज्ञानो नाम चतुर्थोऽध्यायः ।

ग्रहगृहीतानां सामान्यतोऽसाध्यलक्षणमाह कुमारेत्यादि । कुमारवृन्दं शिशुवृन्दम् । सग्रहं ग्रहगृहीतम् । ४२

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे चतुर्थोऽध्यायः ।

---

(१) निषादेति वा पाठः ।

पञ्चमोऽध्यायः ।

अथातो भूतप्रतिषेधं व्याख्यास्यामः
इतिऽस्माहुः आत्रेयादयो महर्षयः ॥ १ ॥
भूतं जयेदहिंसेच्छं जपहोमबलिव्रतैः ।
तपः-शील-समाधान-ज्ञान-दान-दयादिभिः ॥ २ ॥
हिङ्गु-व्योषाल-नैपाली-लशुनार्कजटा-जटाः ।
अजलोमी सगोलोमी भूतकेशी वचा लता ॥ २ ॥
कुक्कुटी सर्पगन्धाख्या तिक्ताः कालविषाणिके ।
वज्रप्रोक्ता वयस्था च शृङ्गी मोहनवल्ल्यपि ॥ ३ ॥
स्रोतोजाञ्जनरक्षोघ्नं रक्षोघ्नं चान्यदौषधम् ।
खराश्व-श्वाविदुष्ट्रर्क्ष-गोधा-नकुल-शल्यकान् ॥ ४ ॥
द्वीपि-मार्जार-गो-सिंह-व्याघ्र-सामुद्रसत्त्वतः ।
चर्म-पित्त-द्विज-नखा वर्गेऽस्मिन् साधयेद्घृतम् ॥ ५ ॥
पुराणमथवा तैलं नवं तत्पाननस्ययोः ।
अभ्यङ्गे च प्रयोक्तव्यमेषां चूर्णश्च धूपने ॥ ६ ॥
एभिश्च गुटिकां युञ्ज्यादञ्जने सावपीडने ।
प्रलेपे कल्कमेतेषां क्वाथं च परिषेचने ।
प्रयोगोऽयं ग्रहोन्मादान्सापस्मारान् शमं नयेत् ॥ ७ ॥

हिंग्वादौ आलं-हरितालं, नैपाली-मनःशिला कस्तुरिके त्यरुणः। अर्कस्य जटा मूलं, जटा जटामांसी, अजलोमी भूतकेशीभेदः, गोलोमी श्वेतदुर्वा, लता प्रियङ्गुः, कुक्कुटी उच्चटाभेदः। डल्हणस्तु कुक्कुटाण्डसदृशकन्दा महौषधी कुक्कुटी त्याह। सुश्रुते तु कुक्कुटीस्थाने मर्कटी पठ्यते। सर्पगन्धा रास्ना, तिक्ता लताकस्तूरी, तिला इति न पाठः सुश्रुते चन्द्रटेच तथैव दर्शनात्। काल-विषाणिके काकोलीक्षीरकाकोल्यावित्यरुणः। सुश्रुते तु तिक्तालाबुविषाणिके इति पठ्यते विषाणिका मौर्व्वीति डल्हणो व्याचष्टे। वज्रप्रोक्ता स्नुहीत्यरुणः। वयस्था

ब्राह्मी, शृङ्गी कर्कटशृङ्गी, मोहनवल्ली मल्लिकाभेदः वन्देस्यरूणः, स्रोतोऽञ्जनं सौवीराञ्जनम् । रक्षोघ्नः श्वेतसर्षपः, अन्यदपि रक्षोघ्नमौषधं गुग्गुल्वादिकम् । श्वावित् सेजकः, शल्लकस्तद्भेदः । द्वीपी चित्रव्याघ्रः, समुद्रसत्त्वो मकरादिः । वर्ग इति वचनेन कल्कक्वाथरूपतां तथा यथालाभमेतानि देयानीति च बोधयति । पुराण मिति घृतविशेषणम् । १—७

गजाह्वापिप्पलीमूलव्योषामलकसर्षपान् ।
गोधानकुलमार्जारझषपित्तप्रपेषितान् ।
नावनाभ्यङ्गसेकेषु विदधीत ग्रहापहान् ॥ ८ ॥

गजाह्वेत्यादि । गजाह्वा गजपिप्पली, तथा पिप्पलीमूलञ्च, झषो मत्स्यः । ८

सिद्धार्थक-वचा-हिङ्गु-प्रियङ्गु-रजनीद्वयम् ।
मञ्जिष्ठा श्वेतकटभी वचा श्वेताद्रिकर्णिका ॥ ९ ॥
निम्बस्य पत्रं बीजन्तु नक्तमालशिरीषयोः ।
सुराह्वं त्र्यूषणं सर्पिर्गोमूत्रे तैश्चतुर्गुणे ॥ १० ॥
सिद्धं सिद्धार्थकं नाम पाने नस्ये च योजितम् ।
ग्रहान्सर्वान्निहंत्याशु विशेषादासुरान् ग्रहान् ।
कृत्यालक्ष्मीविषोन्मादज्वरापस्मारपाप्म च ॥ ११ ॥

सिद्धार्थकेत्यादौ श्वेतकटभी श्वेतगुञ्जेत्यरुणः । श्वेताद्रिकर्णिका श्वेतापराजिता । ९—११

एभिरेवौषधैर्बस्तवारिणा कल्पितोऽगदः ।
पाननस्याञ्जनालेपस्नानोद्घर्षणयोजितः ।
गुणैः पूर्ववदुद्दिष्टो राजद्वारे च सिद्धिकृत् ॥ १२ ॥

एभिरेवौषधैरिति सिद्धार्थकादिभिः बस्तवारिणा छागमूत्रेण । उद्घर्षणमुद्वर्त्तनम् । १२

सिद्धार्थक-व्योष-वचाऽश्वगन्धानिशा-द्वयं हिङ्गु-पलाण्डुकन्दं ।
बीजं करञ्जात् कुसुमं शिरीषात् फलञ्च वल्कञ्च कपित्थवृक्षात् ॥ १३ ॥

समागिमन्थं सनतं सकुष्ठं श्योनाकमूलं किणिही सिता च।
बस्तस्य मूत्रेण विभावितं तत् पित्तेन गव्येन गुडान् विदध्यात् ॥ १४ ॥
दुष्टव्रणोन्मादतमोनिशान्धानुद्धन्धकान् वारिनिमग्नदेहान्।
दिग्धाहतान् दर्पितसर्पदष्टांस्ते साधयन्त्यञ्जन-नस्य-लेपैः ॥१५॥

सिद्धार्थकव्योषेत्यादौ किणिहीसिता श्वेतापामार्गः। गुडानित्ति—गुड़कान्। दिग्धहतानिति विषाक्तशस्त्रहतान्। १३—१५

कार्पासास्थि-मयूरपिच्छ-वृहती-निर्माल्य-पिण्डीतक-
त्वङ् वांशी*-वृष-दंशविट्-तुष-वचा-केशाहिनिर्मोचनैः (१)।
नागेन्द्रद्विजश्रृङ्गः हिंगुमरिचैस्तुल्यैः कृतं धूपनं
स्कन्दोन्माद-पिशाच-राक्षस-सुरावेशज्वरघ्नं परम् ॥ १६ ॥

कार्पासास्थीत्यादौ निर्म्माल्यं शिवनिर्म्माल्यम् पिण्डीतकं मदनफलं त्वग् वांशी वंशस्य त्वक् वंशनेलीति यावत्। वृषदंशो विड़ालस्तस्यविट् पुरीषम्। केशी भूतकेशीति निश्चलः। अहि निर्म्मोचनं सर्पनिर्म्मोकम्। १६—१७

त्रिकटुक-दल-कुङ्कुम-ग्रन्थिक-क्षार-सिंही-
निशा-दारु-सिद्धार्थयुग्माम्बु-शक्राह्वयैः
सितलशुन-फलत्रयोशीर-तिक्ता-वचा-
तुत्थं-यष्टी-बला-लोहितैला-शिला-पद्मकैः।
दधि-तगर-मधूकसार-प्रियाह्वाविसाख्या-
विषा-तार्क्ष्यशैलैः सचव्यामयैः कल्कितैः
घृतमनवमशेषमूत्रांशसिद्धम्मतं
मूतरावाह्वयं पानतस्तद् ग्रहघ्नं परम् ॥ १८ ॥

त्रिकटुकेत्यादौ दलं तमालपत्रमित्यरुणः। ग्रन्थिकं पिप्पलीमूलम्। क्षारो यवक्षारः, सिंही पृश्निपर्णी, निशा हरिद्रा, दारु देवदारु, सिद्धार्थयुग्मं श्वेतकृष्ण-भेदात्, अम्बु बालकं, शक्राह्वयं कुटजः। सितेतिलशुनविशेषणं गृञ्जनाख्यलशुन-

* मांसीति पाठः।

(१) निर्मोकके रितिवा पाठः।

व्यवच्छेदाय । फलत्रयं त्रिफला, तिक्ता कटुकी, तुत्थं खर्परिकातुत्थं, यष्टी यष्टीमधुकं लोहिता लाक्षा, दधि कपित्थफलं, प्रियाह्वा जीवन्ती वृद्धिरित्यन्ये । विसाख्या स्वल्पमृणाली, विषा अतिविषा, तार्क्ष्यशैलं रसाञ्जनम्, आमयं कुष्ठम् । घृतमनवमिति पुराणम् । अशेष मूत्रांशसिद्ध मिति अशेषाणां सूत्रस्थानोक्तानामष्टानां मूत्राणामंशैः घृतापेक्षया चतुर्थभागैः सिद्धम् । १८

नत-मधुककरञ्ज-लाक्षा-पटोली-समङ्ग-वचा-पाटली-
हिंगुसिद्धार्थ-सिंही-निशायुग्युतारोहिणी-
बदर-कटु-फलत्रि-काकाण्ड-दारु-कृमिघ्नाजगन्धा-
मराङ्कोल्ल-कोशातकी-शिग्रु-निम्बाम्बुदेन्द्राह्वयैः ।
गदशुकतरुपुष्पबीजाग्रषष्ट्यद्रिकर्णीनिकुम्भा-
ग्निबिल्वैः समैः कल्कितैर्मूत्रवर्गेण सिद्धं घृतं-
चिरविनिहितमाशुसर्वैः क्रमैर्योजितं हन्ति-
सर्वग्रहोन्मादकुष्ठज्वरांस्तन्महाभूतरावं स्मृतम् ॥ १९ ॥

महाभूतरावाख्यं घृतमाह नतेत्यादि । नतं तगरं, सिंही पृष्णिपर्णी, निशायुक् हरिद्रायुगं तेन युता रोहिणी कटुरोहिणी । कटुफलत्रीति अत्र त्रीत्यस्य परनिपातश्छान्दसत्वात् कटु त्रयं फलत्रयञ्चेत्यर्थः । काकाण्डः शूकशिम्बा, अमरा गुडूची, कोषातकी घोषकः, अम्बुदं मुस्तकम् इन्द्राह्वयः कुटजोऽर्ज्जुनो वा । शुकतरुः शिरीषः, अग्रषष्टी मञ्जिष्ठा, अद्रिकर्णी गिरिकर्णिका, निकुम्भो दन्ती, घृतञ्चिरविनिहितमितिपुराणमित्यर्थः । सर्व्वैः क्रमैः पाननस्यादिभिः । १९

ग्रहा गृह्णन्ति ये येषु तेषां तेषु बिशेषतः ।
दिनेषु बलिहोमादीन् प्रयुञ्जीत चिकित्सकः ॥ २० ॥

इदानीं पूर्व्वोक्तग्रहग्रहणकालोपदर्शनप्रयोजन माह ग्रहा इत्यादि । २०

स्नान-वस्त्र-वसा-मांस-मद्य-क्षीर-गुडादि च ।
रोचते यद्यदा येभ्यस्तत्तेषामाहरेत्तदा ॥ २१ ॥
रत्नानि गन्धमाल्यानि बीजानि मधुसर्पिषी ।
भक्ष्याश्च सर्वे सर्वेषां सामान्यो बिधिरित्ययम् ॥ २२ ॥

बीजानीति-यवादीनि । २१।२२

शतपत्रञ्च रोध्रञ्च तगरं नागसर्षपाः ॥
शीतेन वारिणा पिष्टं नावनाञ्जनयोर्हितम् ॥३१॥

शतपत्र मित्यादि । शतपत्रं श्वेतपुण्डरीकं, नागं नागकेशरं, हितमित्यत्र नागानामिति सम्बध्यते । ३१

यक्षाणां क्षीर-दध्याज्य मिश्रकौदन-गुग्गुलुः ।
देवदारूत्पलं पद्ममुशीरं बल्वकाञ्चनम् ॥ ३२ ॥
हिरण्यञ्च बलिस्तथा मूत्रगोक्षीरमेकतः (१) ।
सिद्धं समोन्मितं पान-नावनाभ्यञ्जने हितम् ॥ ३३ ॥

यक्षाणामित्यादि । मिश्रकौदनं मिश्रिततिलयवमाषकृतमन्नम् । हिरण्यमिति कपर्दकम् । तथा गोमूत्रक्षीरं समोन्मितमिति-तुल्यप्रमाणमेकत्र सिद्धं नावनाभ्यङ्ग-विधिना यक्षाणां हितम् । ३२—३३

हरितकी हरिद्रे द्वे लशुनो मरिचं वचा ।
निम्बपत्रञ्च बस्ताम्बुकल्कितं नावनाञ्जनम् ॥ ३४ ॥

हरीतक्यादौ वस्ताम्बुकल्कितमिति-छागमूत्रपिष्टम् । नावनाञ्जन मित्यत्रापि यक्षाणां हितमिति सम्बध्यते । ३४

ब्रह्मरक्षोबलिः सिद्धं यवानां पूर्णमाढ़कम् ।
तोयस्य कुम्भः पललं छत्रं वस्त्रं विलेपनम् ॥ ३५ ॥
गायत्रीविंशतिपलकाथेऽर्द्धपलिकैः पचेत् ।
त्र्यूषणत्रिफला-हिंगु-षड्ग्रन्था-मिशि-सर्षपैः ॥ ३६ ॥
सनिम्बपत्रलशुनैः कुडवान्सत्र सर्पिषः ।
गोमूत्रे त्रिगुणे पाने नस्याभ्यङ्गेषु तद्धितम् ॥ ३७ ॥

ब्रह्मरक्षोबलिरित्यादि । सिद्धमिति-पक्कम् । आढ़कमिति-चतुःषष्टि पलानि । पूर्णमित्यन्यूनातिरिक्तम् । तोयस्य कुम्भ इति तोयपूर्णकलसः । पललं मांसम् गायत्री खदिरं, मिषिः शतपुष्पा । हितमित्यत्र ब्रह्मरक्षसामिति शेषः । ३५—३७

---

(१) मूत्राज्यक्षीर मितिवा पाठः ।

रक्षसां पललं शुक्तं कुसुमं मिश्रकौदनम् ।
बलिः पक्वाममांसानि निष्पावा रुधिरोक्षिताः ॥ ३८ ॥

रक्षसामित्यादौ पललं तिलकल्कः । निष्पावाः शिम्बयः । ३८

नक्तमालशिरीषत्वङ्मूलपुष्पफलानि च ।
तद्वच्च कृष्णपाटल्या बिल्वमूलं कटुत्रिकम् ॥ ३९ ॥
हिंग्विन्द्रयव-सिद्धार्थ-लशुनामलकीफलम् ।
नावनाञ्जनयोर्योज्यो बस्तमूत्रहृतोऽगदः (१) ॥ ४० ॥

राक्षसहिते नावनाञ्जने युते नक्तमालेत्यादि । नक्तमालः करञ्जः । तद्वच्च कृष्णपाटल्या इति—कृष्णपाटल्या अपि त्वङ् मूल पुष्पफलानीत्यर्थः । बस्तमूत्रहृतोऽगद इति छागमूत्रेण द्रवीकृतः, अगदइत्यनेन विषहरत्वमप्यस्य योगस्य बोध्यते । ३९—४०

एभिरेव घृतं सिद्धं गवां मूत्रे चतुर्गुणे ।
रक्षोग्रहान् वारयते पानाभ्यञ्जन-नावनैः ॥ ४१ ॥

एभिरेवेति नक्तमालत्वगादिभिः । ४१

पिशाचानां बलिः सीधुपिण्याकः पललं दधि ।
मूलकं लवणं सर्पिः सभूतौदन-यावकम् ॥ ४२ ॥

पिशाचानामित्यादि । पिण्याकः खलिः, भूतौदनं मिश्रकौदनम् । यावकं यवकृतमन्नम् । ४२

हरिद्राद्वय-मञ्जिष्ठा-मिशि-सैन्धव-नागरम् ।
हिंगु प्रियंगु-त्रिकटु-रसोन-त्रिफला वचा ॥ ४३ ॥
पाटलाश्वेतकटभीशिरीषकुसुमैर्घृतम् ।
गोमूत्रपादिकं सिद्धं पानाभ्यञ्जनयोर्हितम् ॥ ४४ ॥
बस्ताम्बुपिष्टैस्तैरेव योज्यमञ्जन-नावनम् ॥ ४५ ॥

हरिद्राद्वयेत्यादिना पिशाचहितं घृतमाह । कुसुमपदं पाटल्यादिभिः सम्बध्यते । गोमूत्रपादिकमिति गोमूत्रापेक्षया पादिकं तेन गोमूत्रं घृताच्चतुर्गुणमित्यर्थतः सिध्यति । तैरेवेति हरिद्राद्यादिभिः । ४३—४५

---

(१) बस्तमूत्रयुत इत्यपि पाठः ।

देवर्षिपितृगन्धर्वे तीक्ष्णं नस्यादि वर्जयेत् ।
सर्पिःपानादि मृद्वस्मिन् भैषज्यमवचारयेत् ॥ ४६ ॥
ऋते पिशाचात्सर्वेषु प्रतिकूलञ्च नाचरेत् ।
स वैद्यमातुरं घ्नन्ति क्रुद्धास्तेहि महौजसः ॥ ४७ ॥
ईश्वरं द्वादशभुजं नाथमार्य्यावलोकितम् ।
सर्ववाधिचिकित्सञ्च जपन् सर्वग्रहान् जयेत् ॥
तथोन्मादानपस्मारानन्यं वा चित्तविप्लवम् ॥ ४८ ॥

आर्य्यया पार्व्वत्या अवलोकितम् । (१) सर्व्वान् व्याधीन् चिकित्सतीति सर्व्वव्याधिचिकित्सः । ४६--४८

महाविद्याञ्च मायूरीं शुचिं तं भावयेत्सदा ॥ ४९ ॥
भूतेशं पूजयेत् स्थाणुं प्रमथाख्यांश्च तद्गणान् ।
जपन् सिद्धांश्च तन्मन्त्रान् ग्रहान्सर्वानपोहति ॥ ५० ॥

महाविद्याञ्च मायूरी मित्यथर्व्ववेदोक्ताम् । ४९—५०

यच्चानन्तरयोः किञ्चिद्वक्ष्यतेऽध्याययोर्हितम् ।
यच्चोक्तमिह तत्सर्वं प्रयुञ्जीत परस्परम् ॥ ५१ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे भूतप्रतिषेधोनाम पञ्चमोध्यायः ।

यच्चेत्यादि । अनन्तरयोरिति अव्यवधानेन वक्ष्यमाणयोरध्याययो रुन्मादापस्मार-प्रतिषेधाख्ययोः । यच्चोक्तमिहेति अस्मिन्नध्याये च यदुक्तम् । परस्परं प्रयुञ्जीतेति एतदध्यायोक्तं चिकित्सितमुन्मादेऽपस्मारे च प्रयुञ्जीत, उन्मादापस्मारयोश्च यदुक्तं तदपि देवादिग्रहगृहीतेषु प्रयुञ्जीतेत्यर्थः । ५१

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्ववोधे) उत्तरे तन्त्रे पञ्चमोऽध्यायः

---

(१) आर्य्यावलोकितेश्वराख्योऽयं देवो महायानपन्थिनां बौद्धाना मेवेति प्रतिभाति। यदुक्तं साधनमालायां तस्य ध्यानम् "भगवन्तमार्य्यावलोकितेश्वरं कृष्णवर्णं प्रत्यालीढस्थं सूर्य-मण्डलस्थं पञ्चमुखं त्रिनेत्रं द्वादशभुजम्" इत्यादि ।

षष्ठोऽध्यायः ।

अथात उन्मादप्रतिषेधं व्याख्यास्यामः-
इतिहस्माहुः रात्रेयादयो महर्षयः ॥ १ ॥

उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः ।
उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥ २ ॥

आधिर्मानसी व्यथा शोकादिः । उन्मादशब्दस्यार्थमाहउन्माद इत्यादि । उन्मार्गगैः विमार्गगैः दोषैर्मनसो मदो विभ्रम उन्मादः । १—२

शारीरमानसैर्दुष्टैरहितादन्नपानतः ।
विकृतासात्म्यसमलाद्विषमादुपयोगतः ॥ ३ ॥
विषण्णस्याल्पसत्त्वस्य व्याधिवेगसमुद्भवात् ।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात् ॥ ४ ॥
आधिभिश्चित्तविभ्रंशाद् विषेणोपविषेण च ।
एभिर्हि हीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥ ५ ॥
धियो विधाय कालुष्यं हत्वा मार्गान् मनोवहान् ।
उन्मादं कुर्वते तेन धी-विज्ञान-स्मृति-भ्रमात् ॥ ६ ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः ।
भ्रमत्यचिन्तितारम्भः—

शारीरमानसैरिति-शारीरैर्वातादिभिः मानसौ च रजस्तमोरूपौ, विकृतं च संयोगादि-विरुद्धमन्नपानं, समलं दुष्टं गरसहितमन्नपानम् । विषमादुपयोगत इति अविधिकृतादन्नपानोपयोगात् । विषण्णस्येति विषादयुक्तस्य तथाल्पसत्त्वगुणस्य । व्याधिवेगसमुद्भवादिति क्षीणस्य हेतुः । चेष्टावैषम्यादिति विरुद्धचेष्टातः । आधिभिरिति मानसैर्दुःखैः शोकचिन्तादिभिः । उपविषं संयोगजविषम् । धियः कालुष्यं भ्रान्तत्वम् । मनोवहान् मार्गानिति मनोवहानि स्रोतांसि । तेनेत्युन्मादेन । विज्ञानं शास्त्रज्ञानम् एतेषां भ्रमो वैकृतम् । अचिन्तितारम्भ इति अविमृश्यकारी । ३—७—

तत्र वातात् कृशाङ्गता ॥ ७ ॥
अस्थाने रोदनाक्रोश-हसित-स्मित-नर्तनम् ।
गीत-वादित्र-वागङ्गविक्षेपास्फोटनानि च ॥ ८ ॥
असाम्ना वेणुवीणादिशब्दानुकरणं मुहुः ।
आस्यात् फेनागमोऽजस्रमटनं बहुभाषिता ॥ ९ ॥
अलङ्कारोऽनलङ्कारैरयानैर्गमनोद्यमः ।
गृद्धिरभ्यवहार्येषु तल्लाभे चावमानता ॥ १० ॥
उत्पिण्डितारुणाक्षत्वं जीर्णे चान्ने गदोद्भवः ।

तत्रेत्यादिना वातोन्मादलक्षणमाह । अस्थाने अतिरोदनादीनामविषये । अङ्गविक्षेपोऽङ्गहावः । आस्फोटनं मल्लस्येवाङ्गविन्यासः । असाम्नेत्युच्चैः । अयानैरिति अश्वादिप्रसिद्धयानव्यतिरिक्तैः कुक्कुरादिभिः । गृद्धिरभ्यवहार्येष्विच्छा अलब्धेष्विति शेषः । तल्लाभे चावमानितेति अभ्यवहार्यलाभे तु सति अवमानितेत्यवधीरणम् । उत्पिण्डिताक्षत्वं विकृतीकृतनेत्रत्वम् । गदस्य उन्मादस्य उद्भव आधिक्यम् । ७—११ -

पित्तात् सन्तर्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः ॥ ११ ॥
शीतच्छायोदकाकांक्षा नग्नत्वं पीतवर्णता ।
असत्य-ज्वलन-ज्वाला-तारका-दीप-दर्शनम् ॥ १२ ॥

पित्तादित्यादि पित्तोन्मादलक्षणम् । सन्तर्जनं परत्रासनम्, मुष्टिलोष्टाद्यभिद्रव इति मुष्टिलोष्टादिकं हस्ते कृत्वा अभिद्रवति । असत्यान् मिथ्यारूपान् ज्वलनादीन् पश्यति । —११—१२

कफादरोचकश्छर्दिरल्पेहाहारवाक्यता ।
स्त्रीकामता रहःप्रीतिर्लालासिङ्घाणकस्रुतिः ॥ १३ ॥
बैभत्स्यं शौचविद्वेषो निद्रा श्वयथुरानने ।
उन्मादो बलवान् रात्रौ भुक्तमात्रे च जायते ॥ १४ ॥

कफादित्यादि श्लैष्मिकोन्माद लक्षणम् । ईहा चेष्टा, रहो विजनं स्थानं तत्र प्रीतिः । १३—१४

सर्व्वायतनसंस्थानसन्निपाते तदात्मकम् ।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्ज्जयेत् ॥ १५ ॥

सान्निपातिकोन्माद लक्षण माह सर्व्वेत्यादि। सर्व्वेषामायतनानां हेतूनां सर्व्वेषां संस्थानानां लिङ्गानां सन्निपाते मेलके सति तदात्मकं सन्निपातात्मकमुन्मादं विद्यात्। १५

धन-कान्तादि-नाशेन दुःसहेनाभिषङ्गवान् ।
पाण्डुर्दीनो मुहुर्मुह्यन् हाहेति परिदेवते ॥ १६ ॥
रोदित्यकस्मान् म्रियते तद्गुणान् बहु मन्यते ।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ १७ ॥

आधिजमुन्मादमाह धनेत्यादि। अभिषङ्गवानित्यभिभूतः। अकस्माद्रोदिति अकस्माच्च म्रियते मृतवच्चेष्टते। तदगुणानिति मृतकान्तादिगुणान्। विचेष्टत-इति विरुद्धं चेष्टते। १६—१७

विषेण श्यावबदनो नष्टच्छायाबलेन्द्रियः ।
वेगान्तरेऽपि सम्भ्रान्तो रक्ताक्षस्तं विवर्जयेत् ॥ १८ ॥

विषजमाह विषेणेत्यादि। वेगान्तरेऽपि विश्रान्त इति विषस्य प्रथम-द्वितीय-तृतीयादिभेदेन षड् वेगा भवन्ति, तत्र प्रकृताद्वेगादन्योवेगो वेगान्तरं तत्रापि विश्रान्त-इति पूर्व्वस्मिन् विषवेगे यथा विश्रान्त स्तथाऽन्यस्मिन्नपि वेगे विश्रान्त श्चित्त विभ्रमवानित्यर्थः। तमिति विषजमुन्मादम्। १८

अथानिलज उन्मादे स्नेहपानं प्रयोजयेत् ।
पूर्व्वमावृतमार्गे तु सस्नेहं मृदु शोधनम् ॥ १९ ॥

इदानीं चिकित्साभिधानमुपक्रमते अथेत्यादि। पूर्व्वमिति पूर्व्वेण सम्बध्यते। अनिलज इति निरावरण वातजे यदि तु सावरणवायौ स्नेहपानं क्रियते तदा शूलादयो वर्द्धन्ते उक्तं हि "मेदः कफाभ्यामनिलो निरुद्धः शूलाङ्गमर्दं श्वयथून् करोति। स्नेहं प्रयुञ्जन्नबुधस्तु तस्मै संवर्द्धयन्त्यैव हि तान् विकारान् ॥" इति तर्हि आवृतमार्गवातजे किं विधेयमित्याह आवृतमार्गेष्वित्यादि। सस्नेह-मीषत् स्नेहम्। १९

कफ-पित्तभवेऽप्यादौ वमनं सविरेचनम् ।
स्निग्ध-स्विन्नस्य वस्तिश्च शिरसः सविरेचनम् ॥ २० ॥
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्थमप्यनुवृत्तौ तु तीक्ष्णं नावनमञ्जनम् ॥ २१ ॥
हर्षणाश्वासनोत्त्रास-भय-ताड़न-तर्ज्जनम् ।
अभ्यङ्गोद्वर्तनालेपधूमान् पानञ्च सर्पिषः ॥
युञ्ज्यात्तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः ॥ २२ ॥

कफजोन्मादे पित्तजोन्मादे च यद्विधेयं तदाह कफपित्तभव इत्यादि । वस्तीनिति निरूहानुवासनरूपान् । इत्थमप्यनुवृत्ताविति एवमुक्तरीत्या चिकित्सिते कृतेऽपि यद्युन्मादोऽनुवर्त्तते तदा तीक्ष्णं नावनादिकं कुर्य्यादित्यर्थः । उत्त्रासो व्यालादिभिरुत्त्रासनम् । भयमिति राजपुरुषादि द्वारा भयजननम् । तर्जनं वाचा । २०—२२

हिंगु-सौवर्चल-व्योषैर्द्विपलांशैर्घृताढ़कम् ।
सिद्धं समूत्रमुन्मादभूतापस्मारनुत्परम् ॥ २३ ॥

उन्माद हराणि घृतान्याह-हिङ्गित्यादि । व्योषस्यापि प्रत्येकं द्विपलांशता । गोमूत्र मत्र घृताच्चतुर्गुणम् । चरकेऽपि 'चतुर्गुणे गवां मूत्रे' इत्युक्तम् । २३

द्वौ प्रस्थौ स्वरसाद् ब्राह्म्या घृतप्रस्थञ्च साधितम् ।
व्योष-श्यामा-त्रिवृद्दन्ती-शङ्खपुष्पी-नृपद्रुमैः ॥ २४ ॥
ससप्तला-कृमिहरैः कल्कितैरक्षसम्मितैः ।
पलवृद्ध्या प्रयुञ्जीत परं मात्रा चतुष्पलम् ॥ २५ ॥
उन्माद-कुष्ठापस्मारहरं वन्ध्यासुतप्रदम् ।
वाक्-स्वर-स्मृति-मेधाकृत् धन्यं ब्राह्मीघृतं स्मृतम् ॥ २६ ॥

द्वौ प्रस्थावित्यादि । ब्राह्म्याः स्वरसाद् द्वौ प्रस्थौ । पलवृद्ध्येति प्रथमेऽह्नि पलं, द्वितीये द्वे पले, तृतीये तु त्रीणि, चतुर्थे तु चत्वारि । ततः परं चतुष्पलं कृत्वैव प्रत्यहं प्रयुञ्जीतेति । २४—२६

वरा-विशाला-भद्रैला-देवदार्वेलवालुकैः ।
द्विसारिवा-द्विरजनी-द्विस्थिरा-फलिनी-नतैः ॥ २७ ॥

बृहती-कुष्ठ-मञ्जिष्ठा-नागकेशर-दाड़िमैः ।
वेल्ल-तालीसपत्रैला-मालतीमुकुलोत्पलैः ॥ २८ ॥
सदन्ती-पद्मक-हिमैः कर्षांशैः सर्पिषः पचेत् ।
प्रस्थं भूतग्रहोन्माद-कासापस्मारपाप्मसु ॥ २९ ॥
पाण्डुकण्डुविषे शोफे मोहे मेहे गरे ज्वरे ।
अरेतस्यप्रजसि वा दैवोपहतचेतसि । ३०
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके ॥
बल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ।
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च ॥ ३१ ॥

कल्याणघृतमाह वरेत्यादि। वरा त्रिफला, विशाला गोरक्षकर्कटीमूलम्, हरेणुः रेणुका, एलवालुकं स्वनामख्यातं सुगन्धिद्रव्यम्। द्विशारिवा अनन्तमूल-श्यामालते, द्विस्थिरा शालपर्णी पृश्निपर्ण्यौं। फलिनी प्रियङ्गुः, नतं तगरम्, वेल्लो विड़ङ्गः, हिमं रक्तचन्दनम्। २७—३१

एभ्यो द्विसारिवादीनि जले पक्त्वैकविंशतिम् ।
रसे तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरचतुर्गुणम् ॥ ३२ ॥
वीरा-द्विमेदा-काकोली-कपिकच्छू-विषाणिभिः ।
सूर्पपर्णीयुतैरेतन्महाकल्याणकं परम् ॥
बृंहणं सन्निपातघ्नं पूर्व्वस्मादधिकं गुणैः ॥ ३३ ॥

महाकल्याणघृतमाह एभ्य इत्यादि। एभ्य इति कल्याणघृतोक्तवरादिभ्यः। अतद्गुण-संविज्ञान-बहुव्रीहि-शङ्का निरासार्थ मेकविंशतिमित्युक्तम्। गृष्टि-रेकबारप्रसूता धेनुः। अत्र चतुर्गुणस्य क्षीरस्य निर्द्दिष्टत्वाद् उत्सर्गसिद्धो द्रवो भूत एव तेनानिर्द्दिश्यमानः क्वाथोऽत्र स्नेहसम एवेति पञ्चगुणः पाकः। अन्ये तु क्षीरमानसाहचर्य्यात् क्वाथोऽपि चतुर्गुण इत्यष्टगुणः पाक इत्याहुः। वीरा पृश्निपर्णी क्षीरविदारीत्यन्ये, विषाणी ऋषभकः। सूर्पपर्णीति मापपर्णी मुद्गपर्णी च। ३२। ३३

जटिला पूतना केशी चारटी मर्कटी वचा ॥
त्रायमाणा जया वीरा चोरकः कटुरोहिणी। ३४

कायस्था शूकरी छत्रा अतिछत्रा पलङ्कषा ॥
महापुरुषदन्ता च वयस्था नाकुलीद्वयम् । ३५
कटम्भरा वृश्चिकाली शालपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थकोन्मादग्रहापस्मारनाशनम् । ३६
महापैशाचिकं नाम घृतमेतद्यथामृतम् ॥
बुद्धि-मेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम् ॥ ३७ ॥

महापैशाचिकं घृतमाह जटिलेत्यादि। जटिला मांसी, पूतना हरीतकी, केशी भूतकेशी, चारटी कुम्भाडुः यद्वायष्टिकेत्यन्ये, मर्कटी शूकशिम्बा, जया जयन्ती वीरा क्षीरकाकोली पृष्टिपर्णीत्यपरे, चोरकश्चण्डा, कायस्था सूक्ष्मैला सिन्धुवार इत्यन्ये, शूकरी वाराहीकन्दः तदभावे चर्म्मकारालुकः। छत्रा मधुरिका, अतिच्छत्रा शतपुष्पा, अपरेतु छत्रातिच्छत्रे द्रोणपुष्पीद्वयमाहुः। पलङ्कषा गुग्गुलुः। महापुरुषदन्ता शतमूली, वयस्था ब्राह्मी, नाकुलीद्वयं रास्नाद्वयम्, कटम्भरा कटभी वृश्चिकाली वृश्चिकपत्री। महापैशाचिकमित्यत्र महच्छब्दः पूजावचनः अल्पपैशाचिकस्याभावात्। ३४—३७

ब्राह्मीमैन्द्रींविडङ्गानि व्योषं हिङ्गु जटां मुराम् ॥
रास्नां विशल्यां लशुनं विपघ्नीं सुरसां वचाम् । ३८
ज्योतिष्मतीं नागविन्नामनन्तां सहरीतकीम् ॥
काच्छीञ्च हस्तिमूत्रेण पिष्ट्वा छायाविशोषिता । ३९
वर्त्तिर्नस्याञ्जनालेपधूपैरुन्मादसूदनी ॥

ब्राह्मीमित्यादौ ऐन्द्री इन्द्रवारुणी, जटा जटामांसी, मुरा स्वनामख्याता, विपघ्नी पाठा, विशल्या अग्निशिखा, सुरसः पर्णाशः, नागविन्ना, नागदन्तीत्यरुणः। काच्छी सौराष्ट्रमृत्तिका। ३८—४० –

अवपीडाश्च विविधाः सर्षपाः स्नेहसंयुताः। ४०
कटुतैलेन चाभ्यङ्गो ध्मापयेच्चास्य तद्रजः।
सहिङ्गुस्तीक्ष्णधूमश्च सूत्रस्थानोदितो हितः ॥ ४१ ॥

अवपीडा इत्यादि। अवपीडो नस्यभेदः। ध्मापयेच्चास्य तद्रज इति तस्य सर्षपस्य रजश्चूर्णं ध्मापयेच्चूर्णनस्यं प्रधमनरूपं कारयेत्। —४०।४१

शृगाल-शल्यकोलूक-जतुका-वृष-बस्तजैः ।
मूत्र-पित्त-शकृल्लोम-नख-चर्म्मभिराचरेत् । ४२
धूप-धूमाञ्जनाभ्यङ्ग-प्रदेह-परिषेचनम् ॥
धूपयेत् सततञ्चैनं श्व-गोमत्स्यैस्तु पूतिभिः ॥ ४३
वातश्लेष्मात्मके प्रायः

शृगालेत्यादि । जतुका चर्म्मचटकः । शृगालादीनां मूत्रादीनि यथासम्भवं ग्राह्याणि । वातश्लेष्मात्मके प्राय इति पूर्व्वेण सम्बध्यते । ४२—४३

पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः । ४४
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥

पैत्तिके इत्यादि । तिक्तकं घृतं कुष्ठोक्तम् । जीवनीयगणसिद्धं घृतं जीवनीयघृतम् । मिश्रकः स्नेहो गुल्मोक्तः । ४४—४५—

विध्येच्छिरां यथोक्तां वा तृप्तं मेद्यामिषस्य वा । ४५
निवाते शाययेदेवं मुच्यते मतिविभ्रमात् ॥

विध्येत् शिरां यथोक्तामिति शिराव्यधविध्युक्ताम् । तृप्तं मेद्यामिषस्य वा मेदुरमांसेन तृप्तं तृप्यत्यर्थयोगे करणे षष्ठीयम् । यद्यपि 'निवृत्तामिषमद्यो य' इत्यादिना मांसं निषेधयिष्यत्युन्मादे तथापि तदुत्सर्गवचनं मेदुरमांसोपयोगप्रतिपादकवचनेन बाध्यते । अन्येतु निवृत्तामिषत्वमागन्तून्मादप्रशमनं निवृत्तमद्यत्वन्तु निजोन्मादप्रशमनमिति तेनेह निजोन्मादे मांसविधानं न विरुध्यते इति व्याचक्षते : —४५—४६—

प्रक्षिप्यासलिले कूपे शोषयेद्वा बुभुक्षया । ४६
आश्वासयेत् सुहृत् तं वा वाक्यैर्धर्म्मार्थसंहितैः ॥
ब्रूयादिष्टविनाशं वा दर्शयेदद्भुतानि वा । ४७

असलिल इति तोयरहिते । ब्रूयादिष्टविनाशं वेत्याद्युक्तविधानं चित्तोद्भ्रान्तिकरमपि तदभ्रान्तस्य चित्तस्य प्रकृतौ स्थापनार्थम् । दृश्यते हि घट्टनचलितस्य सन्धेः पुनर्घट्टनेनैव सम्यगवस्थापनं तथेहापि ज्ञेयम् । ४६—४७

बद्धं सर्षपतैलाक्तं न्यस्तश्चोत्तानमातपे ॥
कपिकच्छ्वाथवा तप्तैर्लोह-तैलजलैः स्पृशेत् । ४८
कशाभिस्ताड़यित्वा वा बद्धं श्वभ्रे विनिक्षिपेत् ॥
अथवा वीतशस्त्राश्मजने सन्तमसे गृहे ॥ ४९ ॥
सर्पेणोद्धृतदंष्ट्रेण दान्तैः सिंहैर्गजैश्च तम् ।
अथवा राजपुरुषा बहिर्नीत्वा सुसंयतम् ॥ ५० ॥
भाययेयुर्बधेनैनं तर्जयन्तो नृपाज्ञया ।
देहदुःखभयेभ्यो हि परं प्राणभयं मतम् ॥ ५१ ॥
तेन याति शमं तस्य सर्व्वतो विप्लुतं मनः ।
सिद्धा क्रिया प्रयोज्येयं देशकालाद्यपेक्षया ॥ ५२ ॥

बद्धमित्यादि । सर्षपतैलाक्तस्यातपे स्थापनं स्रोतःशोधनार्थं मुद्रेजनार्थञ्च ज्ञेयम् । श्वभ्रे इति गर्त्ते विनिक्षिपेदित्यन्वयः । सन्तमसे अन्धकारव्याप्ते, सिंहैरिति व्याघ्रैः, दान्तैरित्यायत्तैः, भाययेयुरित्यत्रापि सम्बध्यते । अथवेत्यादौ बहिरिति ग्रामाद्बहिः, बधेनेति प्रहारेण । देहदुःखभयेभ्य इति देहदुःखानि कपिकच्छुलेपनादीनि तत्तत्कृतेभ्यो भयेभ्यः । इयमित्यनुक्ता क्रिया । ४८—५२

इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते ।
तस्य तत्सदृशप्राप्ति-सान्त्वाश्वासैः शमं नयेत् ॥ ५३ ॥

सान्त्वं सामप्रयोगः, आश्वासः सन्तोषजनकं वचनम् । ५३

काम-शोक-भय-क्रोध-हर्षेर्ष्या-लोभसम्भवान् ।
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत् ॥ ५४ ॥

परस्पर प्रतिद्वन्द्वैरिति परस्पर विरोधिभिः । अतएवोक्तं दूरे "क्रोधजो याति कामेन शान्तिं क्रोधेन कामजः । भयशोकोद्भवौ ताभ्यां भीशोकाभ्यां तथेतरौ" इति । ५४

भूतानुबन्धमीक्षेत प्रोक्तलिङ्गाधिकाकृतिम् ।
यद्युन्मादे ततः कुर्य्याद्भूतनिर्दिष्टमौषधम् ॥ ५५ ॥
बलिञ्च दद्यात् पललं यावकं सक्तु-पिण्डिकाम् ।
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान् ॥ ५६ ॥

पक्वामकानि मांसानि सुरामैरेयमासवम् ।
अतिमुक्तस्य पुष्पाणि जात्याः सहचरस्य च ॥
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च । ५७ ॥
निवृत्तामिषमद्यो यो हिताशी प्रयतः शुचिः ॥
निजागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते । ५८ ॥

इदानीम् उक्त सद्विधे (षड् विधे) उन्मादे पूर्व्वोक्त देवादिभूत लक्षण दर्शनाद् भूतानुबन्धं विज्ञाय भूतविद्योक्तं चिकित्सितं कार्य्यमित्याह भूतानुबन्ध-मित्यादि । उन्मादे यदि भूतैः पूर्व्वोक्तै र्देवादिभिरष्टादशभिरनुबन्धमनुषङ्ग-मीक्षत तदा भूतनिर्दिष्टमिति भूतप्रतिषेधोक्तमौषध-बलि होमादि कुर्य्यात् । उन्मादे भूतानुबन्धः कथं ज्ञातव्य इत्याह प्रोक्तलिङ्गाधिकाकृतिमिति यद्विधस्योन्मादस्य यानि लिङ्गानि प्रोक्तानि तेभ्यो अधिका आकृतिः र्देवादिग्रह-लक्षणं यस्य भूतानुबन्धस्य तम् । अतिमुक्तो माधवीलता । गवां तीर्थं-इति गोष्ठे । ५५—५८

प्रसाद इन्द्रियार्थानां बुद्ध्यात्ममनसां तथा ।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम् ॥ ५९ ॥

इति श्रीमद् वाग्भट विरचितायाम् अष्टाङ्गहृदय संहितायाम
उत्तरे तन्त्रे उन्मादप्रतिषेधोनाम षष्ठोऽध्यायः ।

विगतोन्माद लक्षण माह—प्रसाद इत्यादि । इन्द्रियार्थाः विषयाः । ५९

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः।

अथातोऽपस्मारप्रतिषेधं व्याख्यास्यामः

इतिहस्माहुरात्रेयादयो महर्षयः ॥ १ ॥

स्मृत्यपायो ह्यपस्मारः स धीसत्त्वाभिसंप्लवात् ।

जायतेऽभिहते चित्ते चिन्ता-शोक-भयादिभिः ॥ २ ॥

उन्मादवत्प्रकुपितैश्चित्तदेहगतैर्मलैः ।

हते सत्त्वे हृदि व्याप्ते संज्ञावाहिषु खेषु च ॥ ३ ॥

तमोविशन्मूढमतिर्बीभत्साः कुरुते क्रियाः ।

दन्तान् खादन् वमन् फेनं हस्तौ पादौ च विक्षिपन् ॥ ४ ॥

पश्यन्नसन्ति रूपाणि प्रस्खलन् पतति क्षितौ ।

विजिह्माक्षिभ्रुवो दोषवेगेऽतीते विबुध्यते ॥ ५ ॥

कालान्तरेण स पुनश्चैवमेव विचेष्टते ।

अपस्मारस्य स्वरूपमाह स्मृत्यपाय इत्यादि। स्मृतेरित्यनुभूतार्थज्ञानस्य अपायः सर्वथा अपगमः। स्मृत्यपाये हेतुमाह स धीसत्त्वाभिसंप्लवादिति। स इति स्मृत्यपायः, धीसत्त्वयो बुद्धिसत्त्वलक्षणगुणयो रभि संप्लवादुन्मादरूपत्वात्। तथा चित्ते मनस्यभिहतेऽन्यादृशे सति। एतेषामन्यादृशत्वे हेतुमाह चिन्तेत्यादि। उन्मादवदित्यादौ मलैरिति दोषैः चित्तगतकैः रजस्तमोरूपैः, देहगतैः वातादिभिः सत्त्वे मनस्यभिहते सति हृदि च मनः स्थाने व्याप्ते सति तथा संज्ञावाहिषु खेष्विति स्रोतःसु व्याप्तेषु सत्सु अपस्मारी बीभत्साः क्रियाः कुरुत इत्यन्वयः। बीभत्साः क्रियाः दन्तखादनादिरूपाः। विजिह्माक्षिभ्रुवमिति—विजिह्मे कुटिले अक्षिभ्रुवं यस्य। अक्षिभ्रुवशब्दोऽयम् 'अचतुरविचतुरादि' सूत्रे निपातितः। दोषवेगः प्रकोपोत्कर्षः। कालान्तरे चेति यस्मिन् कालान्तरे पुनरपि दोषवेगो भवति तस्मिन्नित्यर्थः। विचेष्टत इति दन्तखादन फेनवमनरूपां विरूपचेष्टां कुरुते। १—६—

अपस्मारश्चतुर्भेदो वाताद्यैर्निचयेन तु ॥ ६ ॥

अपस्मारस्य वातादिभेदेन चातुर्विध्यमाह अपस्मार इत्यादि। निचयेनेति सन्निपातेन। ६

रूपमुत्पित्स्यमानेऽस्मिन् हृत्कम्पः शून्यता भ्रमः ।
तमसो दर्शनं ध्यानं भ्रूव्युदासोऽक्षिवैकृतम् ॥ ७ ॥
अशब्दश्रवणं स्वेदो लालासिङ्घाणकश्रुतिः ।
अविपाकोऽरुचिर्मूर्च्छा कुक्ष्याटोपो बलक्षयः ॥ ८ ॥
निद्रानाशोऽङ्गमर्दस्तृट् स्वप्ने गानं सनर्त्तनम् ।
पानं मद्यस्य तैलस्य तयोरेव च मेहनम् ॥ ९ ॥

पूर्व्वरूपमाह रूपमित्यादि । शून्यता हृदयस्यैव, भ्रमश्चक्रस्थितस्येव संवित्तिः । ध्यानं जिह्मायनम् । भ्रूव्युदास इति भ्रुवोरुत्क्षेपः । अशब्दश्रवणमिति असतः शब्दस्य श्रवणम् शब्दश्रवणाभावो वा । तयोरेवच मेहनमिति तैलमद्ययोर्मेहनं प्रस्रवणं स्वप्ने स्यात् । ७—९

तत्र वातात् स्फुरत्सक्थिः प्रपतंश्च मुहुर्मुहुः ।
अपस्मरति संज्ञाञ्च लभते विस्वरं रुदन् ॥ १० ॥
उत्पिण्डिताक्षः श्वसिति फेनं वमति कम्पते ।
आविध्यति शिरो दन्तान् दशत्याध्मातकन्धरः ॥ ११ ॥
परितो विक्षिपत्यङ्गं विषमं विनताङ्गुलिः ।
रूक्षश्यावारुणाक्षित्वङ्नखास्यः कृष्णमीक्षते ॥ १२ ॥
चपलं परुषं रूपं विरूपं विकृताननम् ।

तत्रेत्यादिना वातादिभेदेन लक्षणमाह । तत्र वातिके अपस्मारे पुरुषः स्फुरत्सक्थिः स्यात् । मुहुर्मुहुरपस्मरति मुहुर्मुहुश्च संज्ञां लभते । उत्पिण्डिताक्ष इति वर्त्तुलीकृताक्षः । आविध्यतीत्याक्षिपति विषमं यथा स्यात्तथाऽङ्गं विक्षिपति । विनताङ्गुलिरिति कुञ्चिताङ्गुलिः । कृष्णमित्यादि रूपविशेषणम् । १०—१३—

अपस्मरति पित्तेन मुहुः संज्ञाञ्च विन्दति ॥ १३ ॥
पीत-फेनाक्षि-वक्त्र-त्वगास्फालयति मेदिनीम् ।
भैरवादीप्तरुषितरूपदर्शी तृषान्वितः ॥ १४ ॥

पैत्तिकापस्मार माह अपस्मरतीत्यादि । पित्तेन मुहुरपस्मरति मुहुश्च संज्ञां विन्दति । आस्फालयति मेदिनीमिति हस्तपादाभ्यां मेदिनीमभिहन्तीत्यर्थः । —१३—१४

कफाच्चिरेण ग्रहणं चिरेणैव विबोधनम् ।
चेष्टाऽल्पा भूयसी लाला शुक्ल-नेत्र-नखास्यता ॥
शुक्लाभरूपदर्शित्वं सर्व्वलिङ्गन्तु वर्ज्जयेत् ॥ १५ ॥

कफादित्यादौ चिरेण ग्रहणमिति चिरेणापस्मारवेगागम इत्यर्थः। चेष्टाल्पेति हस्तपादादिविक्षेपणरूपा चेष्टा अल्पा भवति, लाला तु भूयसी । १५

अथावृतानां धी-चित्त-हृत्खानां प्राक् प्रबोधनम् ।
तीक्ष्णैः कुर्य्यादपस्मारे कर्म्मभिर्व्वमनादिभिः ॥ १६ ॥
वातिकं वस्तिभूयिष्ठैः पैत्तं प्रायो विरेचनैः ।
श्लैष्मिकं वमनप्रायैरपस्मारमुपाचरेत् ॥ १७ ॥
सर्व्वतस्तु विशुद्धस्य सम्यगाश्वासितस्य च ।
अपस्मारविमोक्षार्थं योगान् संशमनान् शृणु ॥ १८ ॥

अपस्मारस्य चिकित्साविधान मारभते अथेत्यादि। अपस्मारारम्भक दोषैरावृतानामित्यर्थः। हृत्खानामिति हृदयस्थदशधमनीनां प्रबोधनमिति दोषव्यपगमेन संप्रसादनम्। वमनप्रायैरिति वमनप्रधानैः। सर्व्वत इति ऊर्द्ध्वमधश्च शुद्धस्य अन्ये तु सर्व्वैः कर्मभि शुद्धस्येत्याहुः। आश्वासितस्येति शोधनानन्तरं संसर्जनक्रमेणाप्यायितबलस्य । १६—१८

गोमय-स्वरस-क्षीर-दधि-मूत्रैः शृतं हविः ।
अपस्मार-ज्वरोन्माद-कामलान्तकरं पिबेत् ॥ १९ ॥

स्वल्पपञ्चगव्यघृतमाह गोमयेत्यादि । १९

द्विपञ्चमूली-त्रिफला-द्विनिशा-कुटजत्वचः ।
सप्तपर्णमपामार्गं नीलिनीं कटुरोहिणीम् ॥ २० ॥
शम्पाक-पुष्करजटा-फल्गुमूल-दुरालभाः ।
द्विपलाः सलिलद्रोणे पक्त्वा पादावशेषिते ॥ २१ ॥
भार्गी-पाठाढ़की-कुम्भ-निकुम्भ-व्योष-रोहिषैः ।
मूर्व्वा-भूतिक-भूनिम्ब-श्रेयसी-सारिवाद्वयैः ॥ २२ ॥
मदयन्त्यग्निनिचुलैरक्षांशैः सर्पिषः पचेत् ।

प्रस्थं तद्वद्द्रवैः पूर्व्वैः पञ्चगव्यमिदं महत् ॥ २३ ॥
ज्वरापस्मार-जठर-भगन्दरहरं परम् ।
शोफार्शःकामलापाण्डु-गुल्म-कास-ग्रहापहम् ॥ २४ ॥

महापञ्चगव्यघृतमाह द्विपञ्चमूलेत्यादि। द्विपञ्चमूलेति दशमूलाख्यं पञ्चमूलद्वयम्। नीलिनी नीलिका अन्येतु नीलवृक्षामाहुः। सम्पाकमारग्वधफलम्। पुष्करस्य जटा मूलम्, फल्गु काष्ठोडुम्बरिका तस्यामूलम्। किन्तु फल्गुफलमपियुक्तम्। यदाह जतुकर्णः—

"दशमूलं फल्गुफलं त्रिफलापामार्गं नीलिनी कटुकाः।
द्विहरिद्राकुटजत्वक् पुष्कर सम्पाक दुःस्पर्शान्।
सप्तच्छदश्च पक्ता द्विपलान् भूनिम्बनिचुलमूतिकैः।
भार्गीपाठामुर्व्वा मदयन्ती श्रेयसी व्योषैः।
त्रिवृता रोहिषदन्ती द्विशारिवा चित्रकाढ़कीवीजैः।
अक्षांशैः सर्पिरथोगोमूत्राद्यैः पचेत्तुल्यैः।
अमृतमिव पञ्चगव्यं महदिदमुदरज्वरार्शसां शुभदम्।" इति

आढ़की तुवरी तस्या वीजमुक्तजतुकर्णसंवादात्। कुम्भस्त्रिवृता, निकुम्भोदन्ती, रोहिषोगन्धतृणभेदः, भूतीकं कत्तृणम्, श्रेयसी हस्तिपिप्पली, मदयन्ती मल्लिकाभेदः, निचुलं हिज्जलफलं चरके निचुलानीति नपुंसकनिर्देशात्। तद्वद् द्रवैः पूर्व्वैरिति गोमयस्वरसक्षीरदधिमूत्रैः। तत्र पादावशिष्टः क्वाथश्चतुर्गुणः गोमयस्वरसादयश्च चत्वारो घृतसमा स्तेनाष्टगुणः पाकः। २०—२४

ब्राह्मी-रस-वचा-कुष्ठ-शङ्खपुष्पी-शृतं घृतम्।
पुराणं मेध्यमुन्मादालक्ष्म्यपस्मारपाप्मजित् ॥ २५ ॥
तैलप्रस्थं घृतप्रस्थं जीवनीयैः पलोन्मितैः।
क्षीरद्रोणे पचेत् सिद्धमपस्मारविमोक्षणम् ॥ २६ ॥

ब्राह्मीत्यादौ ब्राह्मीस्वरस श्चतुर्गुणः। २५—२६

कंसे क्षीरेक्षुरसयोः काश्मर्येऽष्टगुणे रसे।
कार्षिकैर्जीवनीयैश्च सर्पिःप्रस्थं विपाचयेत्।
वातपित्तोद्भवं क्षिप्रमपस्मारं निहन्ति तत् ॥ २७ ॥

कंस इत्यादि । कंसे इत्याढके, काश्मर्य्यं इति गाम्भारीभवे रसे इति क्वाथे । वातपित्तोद्भवमिति द्वन्द्वजानामपस्माराणामत्रानिर्देशाद् वातोद्भवं पित्तोद्भवञ्च ज्ञेयम् । १५

तद्वत् काश-विदारीक्षु-कुश-क्वाथशृतं पयः ॥ २८ ॥

तद्वदित्यादौ तद्वदित्यनेन पूर्व्वयोगफलश्रुतिमतिदिशति । पय इत्यत्र घृतमिति चरके पठ्यते । २८

कूष्माण्डस्वरसे सर्पिरष्टादशगुणे शृतम् ।
यष्टीकल्कमपस्मारहरं धी-वाक्स्वरप्रदम् ॥ २९ ॥
कपिलानां गवां पित्तं नावनं परमं हितम् ।
श्व-शृगाल-बिड़ालानां सिंहादीनाञ्च शस्यते ॥ ३० ॥ (१)

कपिलानामित्यादौ कपिलवर्णानां गवाम् । सिंहादीनाञ्च शस्यते इत्यत्रापि पित्तमिति योज्यम् । २९–३०

गोधा-नकुल-नागानां पृषतर्क्षगवामपि ।
पित्तेषु साधितं तैलं नस्येऽभ्यङ्गे च शस्यते ॥ ३१ ॥

पृषतो हरिणभेदः । ३१

त्रिफला-व्योष-पीतद्रु-यवक्षार-फणिज्झकैः ।
श्र्याह्वापामार्ग-कारञ्जबीजैस्तैलं विपाचितम् ।
वस्तमूत्रे हितं नस्यं चूर्णं वाध्मापयेद्भिषक् ॥ ३२ ॥

त्रिफलेत्यादौ पीतद्रु देवदारु,(२) फणिज्झकः पर्णाशः, श्र्याह्वोऽत्र बिल्वः ननु नवनीतखोटिः, श्र्याह्वादीनां बीजनिर्देशादित्याहुः । चूर्णं वाध्मापयेदिति प्रधमनं कारयेदित्यर्थः । ३२

नकुलोलूक-माज्र्जार-गृध्र-कीटाहि-काकजैः ।
तुण्डैः पक्षैः पुरीषैश्च धूपमस्य प्रयोजयेत् ॥ ३३ ॥

(१) पूजित मिति वा पाठः ।
(२) दार्व्वी इतीन्दुः ।

नकुलेत्यादौ उलूकः पेचकः, कीटः पश्चिमदेशप्रसिद्धो वृश्चिकः यस्य दंशान् म्रियते मनुष्य इत्याहुः। एषां तुण्डादिकं यथासम्भवं ग्राह्यम्। ३३

शीलयेत्तैललशुनं पयसा वा शतावरीम्।
ब्राह्मीरसं कुष्ठरसं वचां वा मधुसंयुताम्॥ ३४॥

कुष्ठस्य रसं क्वाथम्। ३४

समं क्रुद्धैरपस्मारो दोषैः शारीरमानसैः।
यज्जायते यतश्चैष महामर्म्मसमाश्रयः॥ ३५॥
तस्माद्रसायनैरेनं दुश्चिकित्स्यमुपाचरेत्।
तदार्त्तञ्चाग्नितोयादेर्विषमात् पालयेत् सदा॥ ३६॥

सममित्येककालम्, महामर्म हृदयम्, तदार्त्तमित्यपस्मारार्त्तम्। विषमादित्युच्चप्रदेशात् शैलादेः निम्नप्रदेशाच्च श्वभ्रादेः पालयेदिति रक्षेत्। ३५—३६

मुक्तं मनोविकारेण त्वमित्थं कृतवानिति।
न ब्रूयाद्विषयैरिष्टैः क्लिष्टं चेतोऽस्य बृंहयेत्॥ ३७॥

इति श्रीमद् वाग्भट विरचितायाम् अष्टाङ्गहृदय संहितायाम्
उत्तरे तन्त्रेऽपस्मार प्रतिषेधो नाम सप्तमोऽध्यायः।
भूतविद्या समाप्ता।

मुक्तमित्यादि। मनोविकारेणोन्मादेनापस्मारेण वा मुक्त मिति परित्यक्तम्। इत्थमिति बीभत्सचेष्टादिकं त्वं कृतवानसीति (न) ब्रुयात्। एतद्वचनस्य हृदयोद्वेजकत्वादिति भावः। इष्टै र्विषयैरिति अभिमतैः शब्दस्पर्शादिभिः। ३७

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
सप्तमोऽध्यायः। समाप्ता च भूतविद्येति।

अष्टमोऽध्यायः।

अथातो वर्त्मरोगविज्ञानीयमध्यायं व्याख्यास्यामः
इतिहस्माहु रात्रेयादयो महर्षयः ॥ १ ॥

अथ-शब्द-महोदयादौ भूतविद्यानन्तरं शालाक्यस्योद्दिष्टत्वात्तदनन्तरं शालाक्यमुच्यते। तत्रोऽपि शालाक्य-सामान्यात् प्रथमं वर्त्मरोगविज्ञानमाह अथात इत्यादि। नयनगोलकावरक-विशेषोन्मेषाश्रय-चर्मद्वयं वर्त्मोच्यते। १

सर्व्वरोगविज्ञानोक्तैरहितैः कुपिता मलाः।
अवहुल्यैर्विशेषेण प्रायः पित्तानुसारिणः ॥ २ ॥
शिराभिरूर्द्ध्वं प्रसृता नेत्रावयवमाश्रिताः।
वर्त्म सन्धिं सितं कृष्णं दृष्टिं वा सर्व्वमक्षि वा ॥ ३ ॥
रोगान् कुर्युः

अत्र नेत्ररोगे वक्तव्ये प्रथमं सर्व्वनेत्ररोगसाधारणनिदानाभिधानपूर्व्वकं तद् संप्राप्तिमाह सर्व्वरोगविज्ञानोक्तैरित्यादिना कुर्युरित्यन्तेन। नेत्रावयवं वर्त्मादिकम्। वा शब्द प्रत्येकं सम्बध्यते। वर्त्म वा सन्धिं वा सितं वा असितं वा दृष्टिं वा सर्व्वमक्षि वा आश्रिताः। २—४—

मलस्तत्र प्राप्य वर्त्माश्रयाः शिराः।
सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम् ॥ ४ ॥
पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमाशु च।
विमर्दनात् स्याच्च शमः कृच्छ्रोन्मीलं वदन्ति तम् ॥ ५ ॥

(१) मलस्तत्रेत्यादिना कृच्छ्रोन्मीलनाख्यं वर्त्मरोगमाह। तत्र तेषु वर्त्माश्रितेषु मध्ये मलो वायुर्वर्त्माश्रयाः शिराः प्राप्य सुप्तोत्थितस्य जनस्य सवेदनं वर्त्मस्तम्भं कुरुते तं कृच्छ्रोन्मीलमाहुः। —४—५

चालयन् वर्त्मनी वायुर्निमेषोन्मेषणं मुहुः।
करोत्यरुङ्निमेषोऽसौ

(२) निमेषाख्यं वर्त्मरोगमाह चालयन्नित्यादि। वायुर्वर्त्मनी चालयन् मुहुः

पुनः पुनः निमेषोन्मेषणं करोति। अरुगिति ईषत् पीड़ाकरम्। असौ निमेषाख्य-रोगः। ६—

वर्त्म यत्तु निमील्यते।
विमुक्तसन्धि निश्चेष्टं हीनं वातहतं हि तत् ॥ ६ ॥

(३) वर्त्म यत्त्वित्यादिना वातहताख्यं रोगमाह। यद् वर्त्म निमील्यते निमीलितमेव तिष्ठति। विमुक्तो विश्लिष्टो वर्त्मशुक्लगतसन्धिर्यत्र तत्तथा। निश्चेष्टं निमेषोन्मेषरहितम्। सन्धिविश्लेषादेव तदाश्रयाणां निमेषोन्मेष-कर्त्रीणां शिराणामपि विश्लेषेण निमेषोन्मेषरहितत्वमित्यभिप्रायः। हीनमिति सङ्कुचितम्। तद्रोगं वातहतं वदन्तीति पूर्व्वोक्तं क्रियापदमत्रापि सम्बध्यते। —६

कृष्णाः पित्तेन बह्वयोऽन्तर्व्वर्त्मकुम्भीकवीजवत्।
आध्मायन्ते पुनर्भिन्नाः पिड़काः कुम्भिसंज्ञिताः ॥ ७ ॥

(४) कृष्णाइत्यादिना कुम्भा(म्भ्या)ख्यपिड़कामाह। अन्तर्वर्त्मेति वर्त्मनोऽभ्यन्तरे। कुम्भीकः कुम्भाडुलता। आध्मायन्ते पुनर्भिन्ना इति—पुनः पुनः भिन्नाः पुनःपुन राध्मायन्ते च। ७

सदाहक्लेदनिस्तोदं रक्ताभं स्पर्शनाक्षमम्।
पित्तेन जायते वर्त्म पित्तोत्क्लिष्टमुशन्ति तत् ॥ ८ ॥

(५) पित्तोत्क्लिष्टलक्षणमाह सदाहेति। ८

करोति कण्डूं दाहञ्च पित्तं पक्ष्मान्तमास्थितम्।
पक्ष्मणां शदनञ्चानु (१) पक्ष्मशातं वदन्ति तम् ॥ ६ ॥

(६) पक्ष्मशातमाह करोतीत्यादि। पक्ष्मान्तमिति पक्ष्ममूलम्। शदन-मित्युन्मूलनम्। ९

पोथक्यः पिड़काः श्वेताः सर्षपाभा घनाः कफात्।
शोफोपदेहं रुक्‌कण्डूपिच्छिलाश्रुसमन्विताः ॥ १० ॥

(७) पोथकीलक्षणमाह पोथक्य इत्यादिना समन्विता इत्यन्तेन। घनाइति कठिना। उपदेहः पिञ्जोड़िका। १०

(१) शातन मिति वा पाठः।

कफोत्क्लिष्टं भवेद्वर्त्म स्तम्भक्लेदोपदेहवत् ॥ ११ ॥

(८) कफोत्क्लिष्टलक्षणमाह कफोत्क्लिष्ट मित्यादि । यद्वर्त्म स्तम्भक्लेदोपदेहयुक्तं भवति तत्कफोत्क्लिष्टं नाम । ११

ग्रन्थिः पाण्डुररुक्पाकः कण्डूमान् कठिनः कफात् ।
कोलमात्रः स लगणः किञ्चिदल्पस्ततोऽथवा ॥ १२ ॥

(९) लगणलक्षणमाह ग्रन्थिरित्यादि । किञ्चिदल्पस्ततोऽथवेति तस्मात् कोलात् किञ्चिदल्पो वा भवति । १२

रक्ता रक्तेन पिड़कास्तत्तुल्यपिड़काचिताः ।
उत्सङ्गाख्यां

(१०) रक्तेत्यादिना उत्सङ्गाख्यां पिड़कामाह । तत्तुल्यपिड़काचितेति पूर्वोत्पन्नपिड़कातुल्याभिः पिड़काभिर्व्याप्तेत्यर्थः । १३—

तथोत्क्लिष्टं राजिमत् स्पर्शनाक्षमम् ॥ १३ ॥

(११) तथेत्यादिना रक्तोत्क्लिष्टवर्त्मलक्षणमाह । तथेति उत्सङ्गपिड़कावद् रक्तोत्क्लिष्टवर्त्मापि रक्तेन भवतीत्यर्थः । राजीमदिति रक्तवर्णसूक्ष्मशिरायुक्तम् । —१३

अर्शोऽधिमांसं वर्त्मान्तः स्तब्धं स्निग्धं सदाहरुक् ।
रक्तं रक्तेन तत् स्रावि छिन्नं छिन्नञ्च वर्द्धते ॥ १४ ॥

(१२) अर्श इत्यादिना वर्द्धते इत्यन्तेन वर्त्मगतार्शोलक्षणमाह । वर्त्ममध्ये स्थितम् अधिमांसं मांसाङ्कुररूपम् अर्श इत्युच्यते । रक्तमिति रक्तवर्णम् । तत्स्रावीति रक्तस्रावि । १४

मध्ये वा वर्त्मनोऽन्ते वा कण्डूषारुग्वती स्थिरा ।
मुद्गमात्रासृजा ताम्रा पिड़काऽञ्जननामिका ॥ १५ ॥

(१३) मध्य इत्यादिना अञ्जननामिकामाह । ऊषा दाहः । १५

दोषैर्वर्त्म वहिःशूनं यदन्तः सूक्ष्मखाचितम् ।
सस्रावमन्तरुदकं विसाभं विसवर्त्म तत् ॥ १६ ॥

(१४) विसवर्त्म लक्षणमाह दोषैरित्यादि। यद्वर्त्म दोषैर्वातादिभि र्वहिः-शूनं भवति अन्तरभ्यन्तरे च सूक्ष्मैः खैश्छिद्रै राचितं भवति, अन्तरुदकमृणालवच्च सस्रावं भवति तत् विसवर्त्मसंज्ञकः । १६

यद्वर्त्मोत्क्लिष्टमुत्क्लिष्टमकस्मान्म्लानतामियात् ।
रक्तदोषत्रयोत्क्लेशाद् वदन्त्युत्क्लिष्टवर्त्म तत् ॥ १७ ॥

(१५) उत्क्लिष्टवर्त्मलक्षणमाह यद्वर्त्मेत्यादि। यद्वर्त्म रक्तसहितदोष-त्रयोत्क्लेशाद् उत्क्लिष्ट मुत्क्लिष्ट मुच्छून मुच्छूनं सद् अकस्मादेव म्लानतां शुष्कता-मीयात तद्वर्त्म उत्क्लिष्टवर्त्म भवति । १७

श्यावबवर्त्म मलैः सास्रैः श्यावं रुतक्लेदशोफवत् ।

(१६) श्यावबवर्त्मलक्षणमाह श्यावबवर्त्मेत्यादि। मलैः सास्रैरिति शोणित-सहितै र्वातादिभिः । १८—

श्लिष्टाख्यवर्त्मनी श्लिष्टे कराडूश्वयथुरागिणी ॥ १८ ॥

(१७) श्लिष्टवर्त्म लक्षणमाह श्लिष्टाख्यमित्यादि। यत्र वर्त्मनी इति वर्त्मद्वयं श्लिष्टे परस्परं संलग्ने भवतः, तथा कण्डुश्वयथुरागयुक्ते च भवतः तत् श्लिष्टाख्यं श्लिष्टवर्त्माख्यं वदन्ति । —१८

वर्त्मनोऽन्तः खरा रूक्षाः पिड़काः सिकतोपमाः ।
सिकतावर्त्म

(१८) सिकतावर्त्म लक्षणमाह वर्त्मनोऽन्तरित्यादि । १९—

कृष्णन्तु कर्दमं कर्दमोपमम् ॥ १९ ॥

(१९) कृष्णमित्यादिना वर्त्मकर्दममाह। कर्दमसदृशं यत्कृष्णं वर्त्म तत् कर्दममाहुः । —१९

बहलं बहलैर्मांसैः सवर्णैश्चीयते समैः ।

(२०) बहलवर्त्म लक्षणमाह बहल मित्यादि। यद्वर्त्म बहलै र्घनै र्मांसैरिति

मांसपिड़काभिः चीयते तद्वर्त्म बहलमित्युच्यते। सवर्णैरिति त्वक्समान-वर्णैः । २०—

कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ॥ २० ॥
स्यात्तेन शिशुरुच्छूनताम्राक्षो वीक्षणाक्षमः ।
स वर्त्मशूलपैच्छिल्यकर्णनासाक्षिमर्द्दनः ॥ २१ ॥

(२१) कुकूणकमाह कुकूणक इत्यादि । —२०—२१

पक्ष्मोपरोधे सङ्कोचो वर्त्मनां जायते तथा ।
स्वरतान्तर्मुखत्वञ्च लोम्नामन्यानि वा पुनः ॥ २२ ॥
कण्टकैरिव तीक्ष्णाग्रैर्घृष्टं तैरक्षि सूयते ।
उष्यते चानिलादिद्विड़ल्पाहः शान्तिरुद्धृतैः ॥ २३ ॥

(२२) पक्ष्मोपरोध इत्यादिना उद्धृतैरित्यन्तेन पक्ष्मोपरोधमाह । रोम्ना-मन्तर्मुखत्वमिति अन्तरिति वर्त्मनो रभ्यन्तरे मुखं येषाम् । अन्यानि वा रोमाणि पुनर्जायन्ते इत्यन्वयः । तै रित्यन्तर्मुखै रोमभिः । अनिलादिद्विडिति आदि शब्दादातपानलयो र्ग्रहणम् सुश्रुतेऽपि वातातपानलद्वेषीत्युक्तम् । २२—२३

कनीनके वहिर्व्वर्त्म कठिनो ग्रन्थिरुन्नतः ।
ताम्रः पक्वोऽस्रपूयास्रुदलज्याध्मायते मुहुः ॥ २४ ॥

(२३) अलजी माह कनीनक इत्यादि । कनीनके चक्षुःप्रान्ते बहिर्वर्त्मेति वर्त्मनो बहिर्भागे यो ग्रन्थिः सोऽलजीत्युच्यते । स ग्रन्थिः पक्वः सन् अस्रस्रावी पूयस्रावी च । ध्मायते मुहुरिति मुहुः पुनःपुनः उन्नतः सन् ध्मायते उच्छुनो भवति । २४

वर्त्मान्तर्म्मांसपिण्डाभः श्वयथुर्ग्रथितोऽरुजः ।
सास्रैः स्यादर्व्वुदो दोषै र्व्विषमो बाह्यतश्चलः ॥ २५ ॥

(२४) अर्बुदमाह वर्त्मान्तरित्यादि । विषमो बाह्यत इति बहिर्भागे निम्नोन्नतः । २५

चतुर्व्विंशतिरित्येते व्याधयो वर्त्मसंश्रयाः ॥ २६ ॥

उपसंहरति चतुर्विंशति रित्यादि । २६

आद्योऽत्र भेषजैः साध्यो द्वौ ततोऽर्शश्च वर्ज्जयेत् ।
पक्ष्मोपरोधो याप्यः स्याच्छेषांश्छस्त्रेण साधयेत् ॥ २७ ॥
कुट्टयेत् पक्ष्मसदनं छिन्द्यात्तेष्वपि चार्ब्बुदम् ।
भिन्द्याल्लगणकुम्भीकाबिसोत्सङ्गाञ्जनालजी ॥ २८ ॥
पोथकीश्यावसिकताश्लिष्टोत्क्लिष्टचतुष्टयम् ।
सकर्द्दमं सबहलं विलिखेत् सकुकूणकम् ॥ २९ ॥

इति श्रीमद् वाग्भटविरचिताया मष्टाङ्गहृदय संहितायाम्
उत्तर तन्त्रे वर्त्मरोग विज्ञानीयो नामाष्टमोऽध्यायः ।

उक्तानां विकाराणां चिकित्सासूत्रमाह आद्य इत्यादि । अत्र एषु मध्ये आद्यः कृच्छ्रोन्मीलनाख्यो भेषजैः साध्यः । ततोऽनन्तरं द्वौ निमेषवातहतौ तथाऽर्शश्च वर्जयेत् । कुट्टयेदिति कूर्चाख्येन शस्त्रेण प्रतिसारयेत् । छिन्द्यादिति वृद्धिपत्रादिना । लगणादीनि भिन्द्यादिति व्रीहिमुखादिना । बिसेति बिसवर्त्म । अञ्जनेत्यञ्जननामिका । उत्क्लिष्टचतुष्टयमिति पित्तोत्क्लिष्ट-कफोत्क्लिष्ट-रक्तोत्क्लिष्ट-निचयोत्क्लिष्टानि । विलेखनं प्रच्छ (च्छा) नम् । २७ – २९

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रेऽष्टमोध्यायः ।

नवमोऽध्यायः।

अथातो वर्त्मरोगप्रतिषेधं व्याख्यास्यामः

इतिहस्माहु रात्रेयादयो महर्षयः ॥ ॥ १ ॥

कृच्छ्रोन्मीले पुराणाज्यं द्राक्षाकल्काम्बुसाधितम्।

ससितं योजयेत् स्निग्धं नस्यधूमाञ्जनादि च ॥ २ ॥

कृच्छ्रोन्मील इति कृच्छ्रोन्मीलनाख्ये वर्त्मरोगे। द्राक्षाकल्कक्वाथाभ्यां साधितम्। ससितमिति प्रक्षेपविधिना। स्निग्धमिति नस्यादिविशेषणम्। १—२

कुम्भीकावर्त्मलिखितं सैन्धवप्रतिसारितम्।

यष्टी-धात्री-पटोलीनां क्काथेन परिषेचयेत् ॥ ३ ॥

कुम्भीकायुक्तवर्त्म लिखितमिति प्रच्छितम्। ३

निवातेऽधिष्ठितस्याप्तैः शुद्धस्योत्तानशायिनः।

बहिःकोष्णाम्बुतप्तेन स्वेदितं वर्त्म वाससा ॥ ४ ॥

निर्भुज्य वस्त्रान्तरितं वामाङ्गुष्ठाङ्गुलीधृतम्।

न स्रंसते चलति वा वर्त्मैवं सर्व्वतस्ततः ॥ ५ ॥

मण्डलाग्रेण तत्तिर्य्यक् कृत्वा शस्त्रपदाङ्कितम्।

लिखेत्तेनैव पत्रैर्व्वा शाकशेफालिकादिजैः ॥ ६ ॥

फेनेन तोयराशेर्व्वा पिचुना प्रमृजन्नसृक्।

स्थिते रक्ते सुलिखितं सक्षौद्रैः प्रतिसारयेत् ॥ ७ ॥

यथास्वमुक्तैरनु च प्रक्षाल्योष्णेन वारिणा।

घृतेनासिक्तमभ्यक्तं बध्नीयान्मधुसर्पिषा।

ऊर्द्ध्वाधः कर्णयोर्द्दत्वा पिण्डीश्च यवशक्तुभिः ॥ ८ ॥

द्वितीयेऽहनि मुक्तस्य परिषेकं यथायथम्।

कुर्य्यात् चतुर्थे नस्यादीन्मुञ्चेदेवाह्नि पञ्चमे ॥ ९ ॥

अधिष्ठितस्येति गृहीतस्य। मण्डलाग्रेण शस्त्रपदांकितमिति प्रच्छितमित्यर्थः। तेनैवेति मण्डलाग्रेण। लिखेदिति घर्षयेत्। शाको मरुजद्रुमविशेषः। तोयराशेः फेने-

नेति समुद्रफेनेन। यथास्वमुक्तैरिति क्षारविध्युक्तैः प्रतिसारणक्षारैः प्रतिसारयेत्। मधुसर्पिषा अभ्यक्त मित्यन्वयः। ऊर्द्ध्वाध इत्यादि अनन्तरं वर्त्मनो रूद्ध्मधक्ष-यवशक्तुभिः पिण्डीं दत्त्वा कर्णयोर्बध्नीयात्। परिषेकं कुर्य्यादित्यन्वयः। चतुर्थे दिने नस्यादीन् कुर्य्यात्। आदि शब्दाद् धूमादीनां ग्रहणम्। अत्र मुञ्चेदेवाह्नि पञ्चमे इत्युक्ते स्तृतीयचतुर्थदिवसयोरपि परिषेकनस्यादिदानानन्तरं पिण्ड्या बन्धनं बोध्यम्। मुञ्चेदेवेत्यत्र एव कारेण न पुन र्बध्नीयादित्यर्थः। ४—९

समं नखनिभं शोफ-कण्डू-घर्षाद्यपीड़ितम्।
विद्यात् सुलिखितं वर्त्म लिखेद् भूयो विपर्य्यये ॥ १० ॥

सम्यग् लिखितस्य लक्षणमाह सममित्यादि। लिखेद्भूयो विपर्य्यय इति विपर्य्यये इत्यसम्यग् लेखने सति भूयः पुनरपि वर्त्म लिखेत्। १०

रुक्पक्ष्म-वर्त्म-सदनं स्रंसनादतिलेखनात्।
स्नेहस्वेदादिकस्तस्मिन्निष्टो वातहरः क्रमः ॥ ११ ॥

लेखनातियोगस्य लक्षणमाह रुगित्यादि। ११

अभ्यज्य नवनीतेन श्वेतरोध्रं प्रलेपयेत्।
एरण्डमूलकल्केन पुटपाके पचेत्ततः ॥ १२ ॥
स्विन्नं प्रक्षालितं शुष्कं चूर्णितं पोटलीकृतम्।
स्त्रियाः क्षीरे छगल्या वा मृदितं नेत्रसेचनम् ॥ १३ ॥

तमेव क्रममाह अभ्यज्येत्यादि। श्वेतलोध्रः शावरलोध्रम्। नवनीतेनाभ्यज्य एरण्डमूलकल्केन लेपयेत्। तत स्तल्लोध्रं पुटपाकविधिना पचेत्। स्विन्नमिति पुटपाकविधिना उत्स्विन्नं लोध्रं चूर्णितं कृत्वा ततो वस्त्रे पोट्टलीकृत्य नारीक्षीरेण छागीक्षीरेण वा विमृद्य नेत्रसेचन माश्च्योतनं कार्य्य मित्यर्थः। १२—१३

शालितण्डुलकल्केन लिप्तं तद्वत्परिष्कृतम्।
कुर्य्यान्नेत्रेऽतिलिखिते मृदितं दधिमस्तुना ॥ १४ ॥
केवलेनापि वा सेकं मस्तुना जाङ्गलाशिनः।

तदेव श्वेतलोध्रम् एरण्डमूल कल्कस्थाने शालितण्डुलकल्कं दत्त्वा क्षीरस्थाने च दधिमस्तु दत्त्वापि पूर्व्वोक्तेन विधिना युञ्जीतेत्याह शालितण्डुलेत्यादि। १४।१५—

पिड़का व्रीहिवक्त्रेण भित्वा तु कठिणोन्नताः ॥ १५ ॥(१)
निष्पीड़येद्वतु विधिः परिशेषस्तु पूर्व्ववत् ।
लेखने भेदने चायं क्रमः सर्व्वत्र वर्त्मनि ॥ १६ ॥

पिड़का इत्यादौ पूर्व्ववदिति कुम्भीकावत् । — १५ — १६

पित्तास्रोत्क्लिष्टयो स्वादुकल्कसिद्धेन सर्पिषा ।
शिराविमोक्षः स्निग्धस्य त्रिवृच्चूर्णं विरेचनम् ॥ १७ ॥
लिखिते स्रुतरक्ते च वर्त्मनि क्षालनं हितम् ।
यष्टीकषायः सेकस्तु क्षीरं चन्दनसाधितम् ॥ १८ ॥

पित्तास्रोत्क्लिष्टयोरित्यादि पित्तोत्क्लिष्टरक्तोत्क्लिष्टयोः । स्वादुकल्को मधुरगण-कल्कः तत्सिद्धेन सर्पिषा स्निग्धस्य पुंसः शिराविमोक्षणादिकं कुर्य्यात् । यष्टीकषाय इत्यस्य क्षालनमित्यनेनान्वयः । चन्दनसाधितं क्षीरन्तु सेक इति योज्यम् । १७ — १८

पक्ष्मणां सदने सूच्या रोमकूपान् विघर्षयेत् । (२)
ग्राहयेद्वा जलौकोभिः पयसेक्षुरसेन वा ।
वमनं नावनं सर्पिः शृतं मधुरशीतलैः ॥ १९ ॥

विघर्षयेदिति कुट्टयेत् । पयसा इक्षुरसेन वा वमनमित्यन्वयः । मधुर-शीतलैः शृतं सर्पिर्नावन मित्यर्थः । १९

सञ्चूर्ण्य पुष्पकासीसं भावयेत् सुरसारसैः ।
ताम्रे दशाहं परमं पक्ष्मशाते तदञ्जनम् ॥ २० ॥

सुरसा तुलसी निर्गुण्डी वा । २०

पोथकीर्लिखिताः शुण्ठीसैन्धवप्रतिसारिताः ।
उष्णाम्बुक्षालिताः सिञ्चेत् खदिराढ़किशिग्रुभिः ।
अप्सिद्धैर्द्विनिशाश्रेष्ठा-मधुकैर्व्वा समाक्षिकैः ॥ २१ ॥

अप्सिद्धैरिति जलेन क्वथितैः । श्रेष्ठा त्रिफला । २१

---

(१) पिटिकां कठिनोन्नतामिति वा पाठः ।

(२) विकुट्टयेदिति वा पाठः ।

कर्कोटकिरे विलिखिते सक्षौद्रैः प्रतिसारणम् ।
सूक्ष्मैः सैन्धव-कासीस-मनोह्वा-कण-तार्क्ष्यजैः ।
वमनाञ्जन-नस्यादि सर्वं च कफजिद्धितम् ॥ २२ ॥

कर्कोटकिर इति कर्कोटकिशाल्यकर्करोगे। कणा पिप्पली छान्दसत्वात् ह्रस्वत्वम् । २२

कर्त्तव्यं लवणेऽप्येतदशान्तावम्भिका वहेत् ॥ २३ ॥
कुकूणे खदिर-अब्दा-बिम्बपत्रशृतं घृतम् ।
पीत्वा धात्री वमेत् कृष्णा-वची-सर्षप-सैन्धवैः ॥ २४ ॥
अभया-पिप्पली-द्राक्षा-क्वाथेनैनां विरेचयेत् ।
मुस्ता-द्विरजनी-कृष्णा-कल्केनालेपयेत् स्तनौ ॥ २५ ॥
धूपयेत्सर्षपैः साज्यैः शुद्धां क्वाथं च पाययेत् ।
पटोल-मुस्त-मृद्वीका-गुडूची-त्रिफलोद्भवम् ॥ २६ ॥
शिशोस्तु लिखितं वर्त्म स्रुतासृग्धात्र्यम्बुजन्मभिः ।
धातक्यम्लातक-जम्बूत्थ-त्वक्क्वाथेन सेचयेत् ॥ २७ ॥

अम्बुजन्मभिरिति जलौकोभिः । २३—२७

प्रायः क्षीरघृताशित्वाद्बालानां श्लेष्मजा गदाः ।
तस्माद्वमनमेवाग्रे सर्वव्याधिषु पूजितम् ॥ २८ ॥
सिन्धूत्थ-कृष्णापामार्ग-बीजाज्य-स्तन्य-माक्षिकम् ।
चूर्णो वचायाः सक्षौद्रो मदनं मधुकान्वितम् ॥ २९ ॥
क्षीरं क्षीरान्नमन्नं च भजतः क्रमशः शिशोः ।
वमनं सर्वरोगेषु विशेषेण कुकूणके ॥ ३० ॥

बालेषु वमनविधाने उपपत्तिमाह प्राय इत्यादि । सिन्धूत्थेत्यादि योगः क्षीरपे । चूर्ण इत्यादिकस्तु क्षीरान्नादे । मदनं मधुकान्वितमिति तु अन्नादे । २८—३०

सप्तला-रस-सिद्धाज्यं योज्यं चोभयशोधनम् ।
त्रिफला-रोध्र-यष्ट्याह्व-रोहिणी-निम्बपल्लवैः ॥ ३१ ॥

सप्तला चर्मकषा । उभयशोधनमिति ऊर्ध्वाधः शोधनम् । ३१

कुक्कुणके हिता वर्तिः पिष्टैस्ताम्ररजोऽन्वितैः ।
क्षीर-क्षौद्र-घृतोपेतं दग्धं वा फेनजं रजः ॥ ३२ ॥

द्विनिशेत्यादिनाऽञ्जनयोगमाह । फेनजमिति समुद्रफेनजम् । क्षौद्रजमिति पाठे तु दग्धमिति जारितमित्यर्थः । ३२

एला-रसोन-कतक-शङ्खोषण-फणिज्जकैः ।
वर्त्तिः कुक्कुणपोथक्योः सुरापिष्टैः सकट्फलैः ॥ ३३ ॥

एलेत्यादौ शङ्खः शङ्खनाभिः । ३३

पक्ष्मरोधे प्रवृद्धेषु शुद्धदेहस्य रोमसु ।
उत्सृज्य द्वौ भ्रुवोऽधस्ताद्भागौ भागं च पक्ष्मतः ॥ ३४ ॥
यवमात्रं यवाकारं तिर्यक्छित्त्वाऽऽर्द्रवाससा ।
अपनेयदसृक् तस्मिन्नल्पीभवति शोणिते ॥ ३५ ॥
सीव्येत् कुटिलया सूच्या मुद्गमात्रान्तरैः पदैः ।
बद्धा ललाटे पट्टे च तत्र सेवनसूत्रकम् ॥ ३६ ॥
नातिगाढश्लथं सूच्या निक्षिप्याथ योजयेत् ।
मधुसर्पिः कवलिकां न चास्मिन्बन्धमाचरेत् ॥ ३७ ॥
न्यग्रोधादिकषायैश्च सक्षीरैः सेचयेद्रुजि ।
पञ्चमे दिवसे सूत्रमपनीयावचूर्णयेत् ।
गैरिकेण व्रणं युञ्ज्याच्छीर्ष्णा नस्याञ्जनादि च ॥ ३८ ॥

पक्ष्मोपरोधचिकित्सामाह पक्ष्मरोध इत्यादि । सेवनसूत्रकमिति "षिवु तन्तुसन्ताने" इत्यस्य रूपम् । सीव्यते अनेनेति सेवनम् । ३८

दंहदशान्तौ निर्युज्य कर्मदोषाश्रयां वलीम् ।
सन्दंशेनाधिकं पक्ष्म हृत्वा तस्याश्रयं दहेत् ॥ ३९ ॥
सूच्यग्रेणाग्निवर्णेन

तस्याश्रयमिति अधिकस्य पक्ष्मणः आश्रयं स्थानम् अग्निवर्णेन सूच्यग्रेण दहेत् । ३९—४०—

दाहो बाह्यालजेः पुनः ।

अलजी चिकित्सामाह दाह इत्यादि ।

भिन्नस्य क्षारवह्निभ्यां सुच्छिन्नस्यार्बुदस्य च ॥ ४० ॥

इति श्रीमद् वाग्भट विरचितायामष्टाङ्गहृदय संहितायाम्

उत्तरतन्त्रे वर्त्मरोगप्रतिषेधोनाम नवमोऽध्यायः ।

भिन्नस्येत्यादिनाऽर्बुदस्य तथा छिन्नस्यच क्षारवह्निभ्यां दाहः । ४०

इति (श्रीशिवदास सेनकृते अष्टाङ्गहृदय तत्त्वबोधे)

उत्तरे तन्त्रे नवमोऽध्यायः ॥

दशमोऽध्यायः ।

अथातः सन्धिसितासितरोगविज्ञानीयमध्यायं व्याख्यास्यामः

इतिहस्माहु रात्रेयादयो महर्षयः ॥ १ ॥

वायुःक्रुद्धः शिराः प्राप्य जलाभं जलवाहिनीः ।

अश्रु स्रावयते वर्त्म-शुक्लसन्धेः कनीनकात् ॥ २ ॥

तेन नेत्रं सरुग्रागशोफं स्यात् स जलास्रवः ।

तत्र सन्धिगतान् नव रोगानाह वायुरित्यादि । सन्धयः षड् भवन्ति यदाह सुश्रुतः– "पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः ।

शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतस्तथा ॥

ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः ॥ इति (उं १ अं)

अत्र जलास्रवलक्षणमाह वायुरित्यादि । जलाभमित्यश्रुविशेषणम् । नासासमीपनेत्रान्तः कनीनकः । १—३—

कफात्कफास्रवे श्वेतं पिच्छिलं बहलं स्रवेत् ॥ ३ ॥

कफास्रव लक्षणमाह कफात् कफस्रव इत्यादि । श्वेतमित्याद्यश्रुविशेषणम् ।—३

कफेन शोफस्तीक्ष्णाग्रः क्षारबुद्बुदकोपमः।
पृथुमूलबलः स्निग्धः सवर्णोमृदुपिच्छिलः ॥ ४ ॥
महानपाकः कण्डूमानुपनाहः स नीरुजः।

उपनाहलक्षणमाह कफेनेत्यादि। क्षारजलोत्थबुद्बुदसदृशः। अपाक इति ईषत्पाकः। अयञ्च कृष्णदृष्टिमण्डलयोः सन्धौ जायते। नीरुज इत्यस्यान्वयः। तथाच विदेहः

"वायुः श्लेष्माणमादाय जनयेदल्पवेदनम्।
श्लेष्मोपनाहं तं विद्यात् * * *" इति। ४—५

रक्ताद् रक्तास्रवे ताम्रं बहूष्णं चास्रु संस्रवेत् ॥ ५ ॥

रक्तास्रवलक्षणमाह रक्तादित्यादि। —५

वर्त्मसन्ध्याश्रया शुक्ले पिड़का दाहशूलिनी।
ताम्रा मुद्गोपमा भिन्ना रक्तं स्रवति पर्व्वणी ॥ ६ ॥

पर्व्वणीमाह वर्त्मसन्ध्याश्रयेत्यादि। ६

पूयास्रावे मलाः सास्रा वर्त्मसन्धेः कनीनकात्।
स्रावयन्ति मुहुः पूयं सास्रु त्वङ्मांसपाकतः ॥ ७ ॥ (१)

पूयास्राव लक्षणमाह। पूयास्राव इत्यादि। सास्रु पूयः इत्यन्वयः। ७

पूयालसो व्रणः सूक्ष्मः शोफसंरम्भपूर्व्वकः।
कनीनसन्धावाध्मायी पूयास्रावी सवेदनः ॥ ८ ॥

पूयालस लक्षणमाह पूयालस इत्यादि। ८

कनीनस्यान्तरलजी शोफो रुक्तोद-दाहवान्।

अलजी लक्षणमाह कनीनस्येत्यादि। कनीनस्यान्त रभ्यन्तरे यः शोथो रुक्तोददाहवान् भवति सोऽलजी। ९—

अपाङ्गे वा कनीने वा कण्डूषा-पक्ष्मपोटवान् ॥ ९ ॥
पूयास्रावी कृमिग्रन्थिर्ग्रन्थिःकृमियुतोऽर्तिमान्।

क्रिमिग्रन्थिमाह अपाङ्ग इत्यादि। अपाङ्गे वा कनीने वा क्रिमियुतो ग्रन्थिः क्रिमिग्रन्थिरित्युच्यते। कण्डूषेत्यत्र कण्डूयेति केचित् पठन्ति। किन्तु

---

(१) सास्रमिति वा पाठः।

"वर्त्मशुक्लस्य सन्धौ तु ग्रन्थिः पित्तकफात्मकः ।
उष्मणा पच्यते गाढं तत्र मूर्च्छन्ति जन्तवः ॥"

इति विदेह वचनात् पित्तसम्बन्धोऽप्यत्रास्तीति कण्डूषेत्येव पाठः साधुः । पक्ष्मपोटः पक्ष्मोत्पाटनम् । —९—१०—

उपनाह-कृमिग्रन्थि-पूयालसक-पर्व्वणी ॥ १० ॥
शस्त्रेण साधयेत्पञ्च सालजी नास्रवांस्त्यजेत् ।

उपनाहादीनां पञ्चानां शस्त्रसाध्यताभिधान पूर्व्वकं जलास्राव कफास्रावरक्तास्रव पूयास्रवाणां चतुर्णामसाध्यतामाह उपनाहेत्यादि । अलज्या सह उपनाहादीन् पञ्च शस्त्रेण साधयेत् । --१०—११

पित्तं कुर्यात्सिते विन्दून्सासितश्यावपीतकान् ॥ ११ ॥ (१)
मलाक्तादर्शतुल्यं वा सर्व्वं शुक्लमदाहरुक् ।
रोगोऽयं शुक्तिकासंज्ञः सशकृद्भेदतृड्ज्वरः ॥ १२ ॥

इदानीमुद्देशक्रमानुसारात् सन्धिगतान् नव व्याधीनभिधाय शुक्लभागगतास्त्रयोदश व्याधयो वाच्याः । तत्र प्रथमं शुक्तिकाख्यं व्याधिमाह पित्तमित्यादि । सिते इति शुक्लभागे । ससितश्यावपीतकानिति ईषत्शुक्लवर्णानुविद्धश्यावपीतवर्णान् । मलाक्तेत्यादि मलाक्तादर्शवत् सर्व्वशुक्लं वा विन्दुं करोति । अदाहरुगिति ईषद्दाहरुक्, एतच्च रोग इत्यस्य विशेषणम् । केचित्तु सदाहरुगिति पठन्ति । —११—१२

कफाच्छुक्ले समं श्वेतं चिरवृद्ध्यधिमांसकम् ।
शुक्लार्म

शुक्लार्म्मलक्षणमाह कफादित्यादि । शुक्ले इति शुक्लभागे । एतादृशमधिमांसकं शुक्लार्म्मोच्यते । सम मित्यत्र घनमिति पाठे बहलमित्यर्थः । चिरवृद्धीति कफजत्वाच्चिरेण वर्द्धते । १३—

शोफस्त्वरुजः सवर्णो बहलोऽमृदुः ॥ १३ ॥
गुरुः स्निग्धोऽम्बुविन्द्वाभो बलासग्रथितं स्मृतम् ।

बलासग्रथित लक्षणमाह शोफस्त्वित्यादि । अमृदुः कठिनः कफानिलजत्वात् । तथाच विदेहः—"मारुतोत्पीडितः श्लेष्मा शुक्लभागे व्यवस्थितः ।

(१) असितश्यावपीतकानिति वा पाठः ।

जलविन्दुरिवोच्छूनोह्यमृदुः कफसम्भवः ॥
बलास ग्रथितं नाम तं शोथं भिषगादिशेत् ॥"

इति । १३—१४—

विन्दुभिः पिष्टधवलैरुत्सन्नैः पिष्टकं वदेत् ॥ १४ ॥

पिष्टलक्षणमाह विन्दुभिरित्यादि। पिष्टधवलैरिति पिष्टः पिष्टतण्डुलः तद्वद्धवलैः। उत्सन्नै रित्युन्नतैः। — १४

रक्तराजीततं शुक्लमुष्यते यत्सवेदनम्।
अशोफाश्रूपदेहं च शिरोत्पातः सशोणितात् ॥ १५ ॥

शिरोत्पातमाह— रक्तराजीततमित्यादि। रक्तराजी रक्तवर्णा अक्षिशिरा। शुक्लमिति शुक्लमक्षिमण्डलम्। उष्यते इति दह्यते। उपदेहः पिच्चोरिका। १५

उपेक्षितः शिरोत्पातो राजीस्ता एव वर्द्धयन्।
कुर्यात्सास्रं शिराहर्षं तेनाक्ष्युद्वीक्षणाक्षमम् ॥ १६ ॥

शिराहर्षमाह उपेक्षित इत्यादि। साश्रु अश्रुसहितम् अक्षि उद्वीक्षणे अक्षमं भवति। १६

शिराजालं शिराजाले बृहद्रक्तं घनोन्नतम्।

शिराजाल लक्षणमाह शिराजाल मित्यादि। अनुलोम-विलोम-शिरानिचय-रचित-निरन्तर-गवाक्षितत्वात् शिराजालमिव यद् भवति तत् शिराजाल-मित्युच्यते। १७—

शोणितार्म्म समं श्लक्ष्णं पद्माभमधिमांसकम् ॥ १७ ॥

शोणितार्म्मलक्षणमाह शोणितार्म्मेत्यादि। योग्यतया लोहितपद्मपत्र-सदृशम् अधिमांसं शोणतार्म्मेत्युच्यते। — १७

नीरुक् श्लक्ष्णोऽर्ज्जुनं विन्दुः शशलोहितलोहितः।

अर्ज्जुनमाह नीरुगित्यादि। शशशोणितवल्लोहितो यो विन्दुः सोऽर्ज्जुन-इत्युच्यते। १८—

मृद्वाशुवृद्ध्यरुङ्मांसं प्रस्तारि श्यावलोहितम् ॥ १८ ॥
प्रस्तार्य्यर्म्म मलैः सास्त्रैः

मृद्वित्यादिना सास्त्रैरित्यन्तेन प्रस्तार्य्यर्म्मणो लक्षणमाह। एतादृशं मांसं प्रस्तार्य्यर्म्मसंज्ञकं भवति। मृदु कोमलम्, तथा आशुवृद्धि तथा प्रस्तारि प्रसरणशीलं तथा श्यावमीषन्नीलं तथा लोहितमिति लोहितं वा इति विकल्पो बोध्यः नतु समुच्चयः। यदाह निमिः—

"समन्ताद् विसृतः श्यावो रक्तो वा मांससञ्चयः।
सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते ॥" इति

मलैः सास्त्रै रित्यनन्तरं जायते इति प्रेषः। १८—१९—

स्नाय्वर्म स्नायुसन्निभम्

स्नाय्वर्म्म लक्षणमाह स्नाय्वर्म्म स्नायुसन्निभमिति। स्नायुसन्निभं यत् मांसं तत् स्नाय्वर्म्मोच्यते। —१९—

शुष्कासृक्पिण्डवच्छ्यावं यन्मांसं बहलं पृथु ॥ १९ ॥
अधिमांसार्म तद्

अधिमांसार्म्म लक्षणमाह शुष्कासृगित्यादि। —१९—२०—

दाहघर्षवत्यः शिरावृताः ॥
कृष्णासन्नाः शिरासंज्ञाः पिड़काः सर्षपोपमाः ॥ २० ॥

शिराजपिड़का लक्षणमाह दाहघर्षवत्य इत्यादि। घर्षः करकरिका। शिराभिरावृता कृष्णासन्ना इति कृष्णमण्डल समीपजाः। शिरासंज्ञा इति शिरासम्भवत्वात् शिरासंज्ञा इत्यर्थः। सर्षपोपमा इति श्वेतसर्षपोपमाः। तन्त्रान्तरे सितपिड़का-इत्युक्तत्वात्। —२०

शुक्ति-हर्ष-शिरोत्पात-पिष्टक-ग्रथितार्ज्जुनम्।
साधयेदौषधैः षट्कं शेषं शस्त्रेण सप्तकम् ॥ २१ ॥
नवोत्थं तदपि द्रव्यैः अर्म्मोक्तं यच्च पञ्चधा।
तच्छेद्यमसितप्राप्तं मांसस्नायुशिरावृतम् ॥
चर्म्मोद्दालवदुच्छ्रायि दृष्टिप्राप्तं च वर्ज्जयेत् ॥ २२ ॥

उक्तानां त्रयोदशानां शुक्लभागगतव्याधीनां चिकित्सासूत्रमाह शुक्लेत्यादि।

नवोत्थं तदपि द्रव्यैरिति शस्त्रसाध्यत्वेन यत् सप्तकमुक्तं तद् यदि नवोत्थमित्यचिरोत्थं भवति तदा तदपि द्रव्यैरित्यौषधैः साधयेत्। अर्म्मोक्तं यच्च पञ्चविधेत्यादि शुक्लार्म्मशोणितार्म्मादिभेदेन यत् पञ्चविधमर्म्मोक्तं तद् यदि असितप्राप्तमिति कृष्णमण्डलप्राप्तं स्यात्तथा मांसस्नायुशिरावृतञ्च स्यात्तथा चर्म्मोद्दालवत् चर्म्मदलवदुच्छ्रायि बहलं स्यात्तदा छेद्यं छेदनार्हं भवति। सुश्रुतेऽप्युक्तम् (उं १५ अं)

चर्म्माभं बहलं यत्तु स्नायुमांस शिरावृतम् ।
छेद्यमेव तदर्म्म स्यात् कृष्णमण्डलगञ्च यत् ॥'' इति

अन्येतु चर्म्मखण्डवदित्याहुः। दृष्टिमण्डलप्राप्तन्तु यदर्म्म तद्वर्जयेत्। २१—२२

पित्तं कृष्णेऽथवा दृष्टौ शुक्रं तोदाश्रुरागवत् ।
छित्त्वा त्वचं जनयति तेन स्यात् कृष्णमण्डलम् ॥ २३ ॥
पक्वजम्बुनिभं किञ्चिन्निम्नं च क्षतशुक्रकम् ।
तत्कृच्छ्रसाध्यं याप्यं तु द्वितीयपटलव्यधात् ॥ २४ ॥
तत्र तोदादिबाहुल्यं सूचीविद्धाभकृष्णता ।
तृतीयपटलच्छेदादसाध्यं निचितं व्रणैः ॥ २५ ॥

इदानीं कृष्णभागगतरोगानाह पित्तमित्यादि सव्रणशुक्र लक्षणमाह। दृष्टाविति दृष्टिसमीपे पित्तं कर्त्तृ कृष्णभागे दृष्टिसमीपे वा शुक्रं जनयति। त्वचं छित्त्वेति प्रथमं पटलं भित्त्वा, क्षतशुक्रकमिति सव्रणशुक्रमित्यर्थः। तत्रेति द्वितीयपटलव्यधे सूचीविद्धसदृश-कृष्ण-भागता। एतच्च बहलत्वख्यापनार्थम् सूचीव्यधवत् पीड़ादर्शनार्थं ञ्चोक्तम्। तृतीयेत्यादि तृतीय पटलच्छेदाद् यत् क्षतशुक्रं तद् बहुभि र्व्रणै र्निचितं भवत्यसाध्यञ्च। २३—२५

शङ्खशुक्लं कफाच्छन्नायं नातिरुक् शुद्धशुक्रकम् ॥ २६ ॥

सव्रणशुक्रमभिधाय अव्रणशुक्रमाह शङ्खेत्यादि। शुद्धशुक्रमित्यव्रणशुक्रम्। २६

आताम्रपिच्छिलाश्रुस्रुदाताम्रपिड़कातिरुक् ।
अजाविट्सदृशोच्छ्रायकाष्र्यार्या वर्ज्याऽसृजाऽजका ॥ २७ ॥

अजकामाह आताम्रेत्यादि। आताम्रं पिच्छिलञ्चाश्रु स्रवतीति विवृण्। अजापुरीषतुल्ये उच्छ्रायकार्ष्ण्ये यस्याः। २७

शिराशुक्रं मलैः सास्रैस्तज्जुष्टं कृष्णमण्डलम् ।
सतोद-दाह-ताम्राभिः शिराभिरवतन्यते ॥
अनिमित्तोष्ण-शीताच्छ-घनाश्रु-स्नुच्च तत्त्यजेत् ॥ २८ ॥

शिराशुक्रमाह-शिराशुक्रमित्यादि । तज्जुष्टमिति शिराशुक्राख्यव्याधिजुष्टम् । अवतन्यते व्याप्यते । अनिमित्त मकस्मादेव कदाचिदुष्णं कदाचिदच्छं कदाचिद् घनमश्रु स्रवति । २८

दोषैः सास्रैः सकृत्कृष्णं नीयते शुक्ररूपताम् ।
धवलाभ्रोपलिप्ताभं निष्पावार्द्धदलाकृति ॥ २९ ॥
अतितीव्र-रुजा-राग-दाह-श्वयथु-पीड़ितम् ।
पाकात्ययेन तत्

पाकात्यय लक्षणमाह दोषैरित्यादि । यत्र व्याधौ सास्रैः सरक्तैर्दोषैः कृष्णमिति कृष्णमण्डलं सकृद् एकदैव शुक्ररूपता मीयते प्राप्यते तेन पाकात्यायाख्येन व्याधिना तत् कृष्णमण्डलं धवलाभ्रोपलिप्तसदृशं भवति । निष्पावः शिम्बी तद्विदलाकारञ्च भवति । २९--३०—

शुक्रं वर्जयेत्तीव्रवेदनम् ॥ ३० ॥
यस्य वा लिङ्गनाशोऽन्तःश्यावं यद्वा सलोहितम् ।
अत्युत्सेधावगाढ़ं वा साश्रु नाड़ीव्रणावृतम् ॥ ३१ ॥
पुराणं विषमं मध्ये विच्छिन्नं यच्च शुक्रकम् ।
पञ्चेत्युक्ता गदाः कृष्णे साध्यासाध्यविभागतः ॥ ३२ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम्
उत्तरतन्त्रे सन्धिसितासितरोगविज्ञानीयोनाम दशमोऽध्यायः ।

असाध्यशुक्रलक्षणमाह शुक्रं वर्जयेदित्यादि । यस्य वा लिङ्गनाश इति लिङ्ग्यते ज्ञायते अनेनेति लिङ्गमिन्द्रियशक्तिः तस्य नाशः । तथा अन्तरभ्यन्तरे श्याववर्णं यच्छूक्रम् । अत्युत्सेधमत्युच्छ्रितम् । अवगाढ़मिति अवगाढ़मूलम् । पुराणं चिरोत्थितम् । विषमं विषमसंस्थानम् । पञ्च गदा इति सव्रणशुक्रं अव्रणशुक्रं तथा अजका शिराशुक्रं पाकात्ययश्चेति पञ्च गदाः । —३०—३२

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे दशमोऽध्यायः ।

एकादशोऽध्यायः

अथातः सन्धिसितासितरोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः ॥ १ ॥
उपनाहं भिषक् स्विन्नं भिन्नं व्रीहिमुखेन च।
लेखयेन्मण्डलाग्रेण ततश्च प्रतिसारयेत् ॥ २ ॥
पिप्पली-क्षौद्र-सिन्धूत्थैर्बध्नीयात् पूर्ववत्ततः।
पटोलपत्रामलककषायेणाश्च्योतयेच्च तम् ॥ ३ ॥

उपनाहादिकानामनयोरसाध्यत्वेन तौ परित्यज्य उपनाह चिकित्सामाह उपनाहमित्यादि। पिप्पलीक्षौद्रसिन्धूत्थैः प्रतिसारयेदित्यन्वयः। स्विन्नमिति वर्त्मरोगप्रतिषेधोक्त प्रकारेण पोट्टलिकया उष्णोदकपरिप्लुतयेति। बध्नीयात् पूर्ववत्तत इति वर्त्मरोग प्रतिषेधे प्रक्षाल्योष्णेन वारिणा घृतेन सिक्तमित्यादिना यो बन्ध उक्त स्तद्वत्। तमित्युपनाहम्। १—३

पर्वणीं बडिशेनात्तां बाह्यसन्धित्रिभागतः।
वृद्धिपत्रेण वर्ध्मार्धे स्यादश्रुगतिरन्यथा ॥ ४ ॥
चिकित्सा चार्म्मवत्क्षौद्रसैन्धवप्रतिसारिता।

पर्वणीचिकित्सामाह पर्वणीमित्यादि। बाह्यसन्धेस्तृतीयभागे बडिशेन आत्ता गृहीता पर्वणी अर्द्धे अर्द्धभागे वृद्धिपत्रेण शस्त्रेण वर्द्धता छेदनीया। अतोऽन्यथा छेदनादश्रुगति रश्रुनाडी स्यात् चिकित्सेत्यादि। एवैव पर्वणी क्षौद्रसैन्धव-प्रतिसारिता सती अर्म्मवद्धा चिकित्स्या। ४—५—

पूयालसे सिरां विध्येत्ततस्तमुपनाहयेत् ॥ ५ ॥
कुर्व्वीत चाक्षिपाकोक्तं सर्व्वं कर्म्म यथाविधि।
सैन्धवार्द्रक-कासीस-लोह-ताम्रैः सुचूर्णितैः ॥ ६ ॥
चूर्णाञ्जनं प्रयुञ्जीत सक्षौद्रैर्वा रसक्रियाम्।

पूयालस चिकित्सामाह पूयालस इत्यादि। सक्षौद्रैर्वा रसक्रियामिति चूर्णैरेव क्षौद्रयोगात्सलीकालतरं सत् रसक्रिया भवति। —५—७—

कृमिग्रन्थिं करीषेण स्विन्नं भित्त्वा विलिख्य च ॥ ७ ॥
त्रिफला-क्षौद्र-कासीस-सैन्धवैः प्रतिसारयेत् ।

क्रिमिग्रन्थिचिकित्सामाह क्रिमिग्रन्थिमित्यादि । भित्त्वेति व्रीहिमुखेन अवलिख्येति मण्डलाग्रेण । —७—८—

पित्ताभिष्यन्दवच्छुक्ति

शुक्ति चिकित्सामाह पित्ताभिष्यन्दवच्छुक्तिमिति । —८—

बलासाह्वयपिटकौ ॥ ८ ॥
कफाभिष्यन्दवन्मुक्त्वा सिराव्यधमुपाचरेत् ।
बीजपूररसाक्तञ्च व्योषकट्फलमञ्जनम् ॥ ९ ॥
जातीमुकुल-सिन्धूत्थ-देवदारु-महौषधैः ।
पिष्टैः प्रसन्नया वर्त्तिः शोफकण्डूघ्नमञ्जनम् ॥ १० ॥

बलासग्रथितपिडकयोश्चिकित्सामाह बलासाह्वयेत्यादि । मुक्त्वा सिराव्यधमिति सिराव्यधवर्जं कफाभिष्यन्दोक्तं सर्वं चिकित्सितं कार्यमित्यर्थः । बीजपूरेत्यादि व्योषकट्फलचूर्णं बीजपूररसेनालोड्याञ्जनं विधेयम् । जातीत्यादि जातीमुकुलादिभिः प्रसन्नया सुराविशेषेण पिष्टैर्वर्त्तिः कार्या तया अञ्जनं शोफकण्डूघ्नं भवति ।

रक्तस्यन्दवदुत्पातहर्षजालासु च क्रिया ।
सिरोत्पाते विशेषेण घृतमाक्षिकमञ्जनम् ॥ ११ ॥

सिरोत्पात सिराहर्षसिराजालानां चिकित्सामाह रक्तस्यन्दवदित्यादि । रक्ताभिष्यन्दवत् । सिरोत्पात इत्यादौ घृतमाक्षिकमञ्जनमिति अञ्जनं सौवीराञ्जनम्, घृतमधुभ्यां सौवीराञ्जनं पिष्ट्वा वर्त्तिः कार्येति गयदासः । घृतमधुभ्यां सौवीराञ्जनं घृष्ट्वाऽञ्जनं कार्यमित्यन्ये । ११

सिराहर्षे तु मधुना श्लक्ष्णाक्तं रसाञ्जनम् ।
अर्जुने शर्करा-मस्तु-क्षौद्रैराश्च्योतनं हितम् ॥ १२ ॥
सिराहर्षेत्यादि । अत्राञ्जनं कार्यमिति शेषः । १२
स्फटिकः कुङ्कुमं शङ्खो मधुको मधुनाञ्जनम् ।

स्फटिकमित्यादि । स्फटिकादिकं चूर्णीकृत्य मधुनाञ्जनं कार्यम् । १२—

मधुना वाञ्जनं शङ्खः फेनो वा सितया सह ॥ १३ ॥

मधुनावाञ्जनमित्यादि । शङ्खः शङ्खनाभिः मधुना सह अञ्जनं हितम् तथा सितया शर्करासहितः समुद्रफेनोवा अञ्जनं हितम् । तन्त्रान्तरेप्युक्तम्—

"शङ्खः क्षौद्रेण संयुक्तः कतकः सैन्धवेन वा ।
सितयार्णवफेनोवा पृथगञ्जनमर्हणम् ॥" इति

अरुणस्तु सौवीराञ्जनं मधुना सहितं शङ्खो वा समुद्रफेनो वा शर्करासहित-इति व्याचष्टे । तन्न उक्ततन्त्रान्तर विरोधादेव । —१३

अर्म्मोक्तं पञ्चधा तत्तु नतु धूमाविलञ्च यत् ।
रक्तं दोषनिभं यच्च शुक्रवत्तस्य भेषजम् ॥ १४ ॥

अर्म्मस्य चिकित्सामाह अर्म्मेत्यादि । धूमवदाविलं धूमाविलम् । १४

उत्तानस्येतरत् स्विन्नं ससिन्धूत्थेन चाञ्जितम् ।
रसेन बीजपूरस्य निमील्याक्षि विमर्दयेत् ॥ १५ ॥
इत्थं संरोषिताक्षस्य प्रचलेऽर्म्माधिमांसके ।
धृतस्य निश्चलं मूर्ध्नि वर्त्मनोश्च विशेषतः ॥ १६ ॥
अपाङ्गमीक्षमाणस्य वृद्धेऽर्म्मणि कनीनकात् ।
बली स्याद् यत्र तत्रार्म्म बड़िशेनावलम्बितम् ॥ १७ ॥
नात्यायतं मुचुण्ड्या वा सूच्या सूत्रेण वा ततः ।
समन्तान्मण्डलाग्रेण मोचयेदथ मोक्षितम् ॥ १८ ॥
कनीनकमुपानीय चतुर्भागावशेषितम् ।
छिन्द्यात् कनीनके रक्षेद्वाहिनीश्चाश्रुवाहिनीः ॥ १९ ॥
कनीनकव्यधादश्रुनाड़ी चाक्षिणि प्रवर्त्तते ।

अर्म्मसु शस्त्रचिकित्सा यथा विधेया तदाह उत्तानस्येत्यादि । उत्तानस्य पुंसो वामदक्षिणयो रक्ष्णोरितरदित्येकतरमक्षि स्विन्नमिति उष्णाम्बुतप्तवस्त्रेण कृतस्वेदं तथा सैन्धवसहितेन बीजपूररसेन चाञ्जितम् एतादृशमक्षि निमील्य विमर्दयेद् घर्षयेत् । इत्थ मुक्तपरिपाट्या संरोषिताक्षस्येति संरब्धलोचनस्य । संरुषिताक्षस्येति पाठे तु संरुषितं बीजपूररसेन व्रक्षितमक्षि यस्य ईदृशस्य पुंसो

अर्म्मरूपे अधिमांसे प्रचले सति। अपाङ्गमित्यादि कनीनकादिति कनीनकमवधीकृत्य वृद्धमर्म्म यदि भवति तदा अपाङ्गमीक्षमाणस्य पुंसो यत्र बली मांससङ्कोचः स्यात्तत्र प्रदेशे तदर्म्म बड़िशेन मुचुण्ड्या शस्त्रविशेषेण (१) वा सूच्या वा सूत्रेण (२) वा नात्यायतं यथा स्यात्तथा अवलम्बितं गृहीतं मोचयेद् उत्तोलयेत्। अथ मोक्षितं तदर्म्म कनीनकमुपानीय चतुर्थभाग मवशिष्य संरक्ष्य मण्डलाग्रेण छिन्द्यात्। कनीनकं रक्षेद्वाहिनीश्चाश्रुवाहिनी रिति अर्म्म तथा छिन्द्याद् यथा कनीनकस्य तथा अश्रुवाहिन्याश्च नाड्या बाधा न स्यादित्यर्थः। यदि पुनः कनीनकोपघातः स्यात्तदाक्षिण अश्रु वा नाड़ी वा प्रवर्त्तते। १५—२०—

वृद्धेऽर्म्मणि तथाऽपाङ्गात् पश्यतोऽस्य कनीनकात् ॥ २० ॥
सम्यक् छिन्नं मधु-व्योष-सैन्धव-प्रतिसारितम्।
उष्णेन सर्पिषा सिक्तमभ्यक्तं मधुसर्पिषा ॥ २१ ॥
बन्धीयात्

वृद्धेऽर्म्मणोत्यादि। यदितु अपाङ्गमवधीकृत्य वृद्धमर्म्म स्यात् तदा कनीनकं पश्यतोऽर्म्म मोचयेत् मोक्षितञ्च अपाङ्गमुपानीय चतुर्भागावशेषितं मण्डलाग्रेण छिन्द्यात्, यथा अपाङ्गबाधा ह्यश्रुवहनाड़ी बाधाच न स्यादिति बोध्यम्।—१९—२२ —

सेचयेन् मुक्त्वा तृतीयादिदिनेषु च।
करञ्जबीजसिद्धेन क्षीरेण कथितैस्तथा ॥ २२ ॥
सक्षौद्रै र्द्विनिशा-रोध्र-पटोली-यष्टि-किंशुकैः।
कुरण्टमुकुलोपेतैर्मुञ्चेदेवाह्नि सप्तमे ॥ २३ ॥
सम्यक् छिन्ने भवेत् स्वास्थ्यं

सेचयेदित्यादि। तृतीयचतुर्थादिदिनेषु मुक्त्वा करञ्जबीजसिद्धक्षीरादिभिः सेचयेत्। कुरुण्टः पीतझिण्टी। मुञ्चेदेवेति न पुनर्बध्नीयादित्यर्थः। —२२—२४—

(१) मुचुण्डी तु यन्त्र मेव न तु शस्त्रम्। यदुक्तं सूत्रस्थाने यन्त्रविध्यध्याये
"मुचुण्डीसूक्ष्मदन्तर्ज्वं मूले रुचकभूषणा।" इति
यन्त्रमिदं प्रायः पाश्चात्यानां शिराबन्धनयन्त्र (artery forsceps) तुल्यं ज्ञेयम्।

(२) अत्र सूच्या वा सूत्रेण वेति विकल्पश्चिन्त्यः क्रियाकरणासम्भवात्। सूत्रेणोपहितया सूच्या चर्म्मगताधिमांसे यत्र बली जाता तत्र विद्ध्वा सूत्रं प्रवेश्य तत्सूत्रेण बद्ध्वा आकृष्य किञ्चिदूर्ध्वमुत्तोल्य मण्डलाग्रेण शनैर्विलिख्यात्यधिष्ठानात् शुक्लकृष्णभागान् मोचयेत्। इति व्याख्यानं साधु न वेति शालाक्यविदः प्रमाणम्।

हीनातिच्छेदजान् गदान् ।
सेकाञ्जनप्रभृतिभिर्ज्जयेल्लेखनबृंहणैः ॥ २४ ॥

हीनातिच्छेदजानित्यादि । हीनच्छेदजान् गदान् लेखनैः सेकाञ्जनादिभिर्जयेत् । —२४

सितामनःशिलैलेय-लवणोत्तमनागरम् ।
अर्द्धकर्षोन्मितं तार्क्ष्यं पलार्द्धञ्च मधुप्लुतम् ।
अञ्जनं श्लेष्मतिमिर-पिल्ल-शुक्रार्म्म-शोष-जित् ॥ २५ ॥

तान्येवाञ्जनान्याह सितेत्यादि । सिता शर्करा, एलेयमेलवालुकम्, लवणोत्तमं सैन्धवम् । एतत् सर्व्वं प्रत्येकमर्द्धकर्षोन्मितम् । तार्क्ष्यं रसाञ्जनं तस्य पलार्द्धम् एतत् सर्व्वं मधुनालोड्याञ्जनं कार्य्यम् । २५

त्रिफलैकतमद्रव्यत्वचं पानीयकल्किताम् ।
शरावपिहितां दग्ध्वा कपाले चूर्णयेत्ततः ॥ २६ ॥
पृथक् शेषौषधरसैः पृथगेव च भाविता ।
सा मषी शोषिता पेष्या भूयो द्विलवणान्विता ।
क्षीरयेतान्यञ्जनान्याह लेखनानि परं निमिः ॥ २७ ॥

त्रिफलेत्यादि । कपाले दग्ध्वेत्यन्वयः । शेषौषधरसैरिति हरीतक्यादित्वच्त्रयमध्ये यस्य मषी क्रियते तदपेक्षयाऽवशिष्टं यत्तिष्ठति तदेव शेषौषधशब्देनोच्यते । द्विलवणान्वितेति सौवर्चल सैन्धवान्विता । २६—२७

शिराजाले शिरा यास्तु कठिना लेखनौषधैः ।
न सिध्यन्त्यर्म्मवत्तासां पिड़कानाञ्च साधनम् ॥ २८ ॥

शिराजाल-शिराजपिड़कयो श्चिकित्सामाह शिराजाल इत्यादि । तासामिति कठिनशिराणां तथा पिड़कानामिति शिराजपिड़कानां साधनं चिकित्सा अर्म्मवत् ।

सुश्रुतेऽप्युक्तम्—"शिराजाले शिरा यास्तु कठिनास्तास्तु बुद्धिमान् ।
उल्लिखेन् मण्डलाग्रेण बड़िशेनावलम्बिताः ॥
शिराजपिड़का जाता या न सिध्यन्ति भैषजैः ।
अर्म्मवन् मण्डलाग्रेण तासां छेदन मिष्यते ॥
रोगयो श्चैतयोः कार्य्यमर्म्मोक्तं प्रतिसारणम् ॥ इति (उ° १५ अ°) २८

दोषानुरोधाच्छुक्रेषु स्निग्धरूक्षं वराघृतम् ।
तिक्तमूर्ध्वमसृक्स्रावो रेकसेकादि चेष्यते ॥ २९ ॥

शुक्रचिकित्सामाह दोषानुरोधादित्यादि । वरा त्रिफला, दोषबलात् कदाचित् स्निग्धा कदाचित् रूक्षा त्रिफला हिता । तथा तिक्तघृतम् । ऊर्ध्वमसृक्स्राव इति लोचने । वक्ष्यति च "शिरया वा हरेद् रक्तं जलौकोभिश्च लोचनात् ।" इति २९

त्रिस्त्रिवृद्वारिणा पक्वं क्षतशुक्रे घृतं पिबेत् ।
शिरयाऽनु हरेद्रक्तं जलौकोभिश्च लोचनात् ॥ ३० ॥
सिद्धेनोत्पल-काकोली-द्राक्षा-यष्टि-विदारिभिः ।
ससितेनाजपयसा सेचनं सलिलेन वा ।
रागाश्रुवेदनाशान्तौ परं लेखनमञ्जनम् ॥ ३१ ॥
वर्त्तयो जातिमुकुल-लाक्षा-गैरिक-चन्दनैः ।
प्रसादयन्ति पित्तास्रं घ्नन्ति च क्षतशुक्रकम् ॥ ३२ ॥

त्रिरित्यादि । त्रिवृत्त्वाथेन वारत्रयं पक्वमित्यर्थः । सिद्धेनेति क्षीरपाकविधिना । वर्त्तयः इत्यादौ गैरिकं सुवर्णगैरिकं श्रेष्ठत्वादेवमन्यत्रापि । सुवर्णगैरिकञ्च यदत्यन्तरक्तं मृदु च । ३०—३२

दन्तैर्दन्ति-वराहोष्ट्र-गवाश्वाज-खरोद्भवैः ।
सशङ्ख-मौक्तिकाम्भोऽधिफेनैर्मरिचपादिकैः ।
क्षतशुक्रमपि व्यापि दन्तवर्तिर्निवर्त्तयेत् ॥ ३३ ॥

दन्तैरित्यादि । मरिचपादिकैरिति समुदितचूर्णमपेक्ष्य । ३३

तमालपत्रं गोदन्त-शङ्खफेनोऽस्थि गार्दभम् ।
ताम्रञ्च वर्त्तिर्मूत्रेण सर्व्व-शुक्रक-नाशिनी ॥ ३४ ॥

तमालपत्रमित्यादि । ताम्रमिति मारितताम्ररजः एवमन्यत्रापि । ३४

रत्नानि दन्ताः शृङ्गाणि धातवस्त्र्यूषणं त्रुटिः ।
करञ्जबीजं लशुनो व्रणसादि च भेषजम् ।
सव्रणाव्रणगम्भीरत्वक्स्थ-शुक्रघ्नमञ्जनम् ॥ ३५ ॥

रत्नानीत्यादौ रत्नानि मौक्तिकादीनि धातवो गैरिकादयः त्रुटिः सूक्ष्मैला । व्रणसादि भेषजं चूर्णक्षीर्य्यादि । ३५

निम्नमुन्नमयेत् स्नेह-पान-नस्य-रसाञ्जनैः ।
सरुजं नीरुजं तृप्तिपुटपाकेन शुक्रकम् ॥ ३६ ॥

निम्नमित्यादि । सरुजं निम्नशुक्रं स्नेहपानादिभिरुन्नमयेत् । निरुजं शुक्रं तर्पणपुटपाकेनोन्नमयेत् । ३६

शुद्धशुक्रे निशायष्टीसारिवाशाबराम्भसा ।
सेचनं रोध्रपोटल्या कोष्णाम्भोमग्नयाऽथवा ॥ ३७ ॥

शुद्धशुक्रचिकित्सामाह शुद्धेत्यादि । शाबरः श्वेतलोध्रः । ३७

बृहतीमूल-यष्ट्याह्व-ताम्र-सैन्धव-नागरैः ।
धात्रीफलाम्बुना पिष्टैर्लेपितं ताम्रभाजनम् ॥ ३८ ॥
यवाज्यामलकीपत्रैर्बहुशो धूपयेत्ततः ।
तत्र कुर्वीत गुटिकास्ता जलक्षौद्रपेषिताः ।
महानीला इतिख्याताः शुद्धशुक्रहराः परम् ॥ ३९ ॥

बृहतीत्यादि । धात्रीफलाम्बुना धात्रीफलस्वरसेन । ३८–३९

स्थिरे शुक्रे घने चाऽस्य बहुशोऽपहरेदसृक् ।
शिरःकायविरेकांश्च पुटपाकांश्च भूरिशः ॥ ४० ॥

स्थिरे इत्यादौ घने इति कठिने । ४०

कुर्यान्मरिच-वैदेही-शिरीषफल-सैन्धवैः ।
घर्षणं त्रिफलाक्वाथपीतेन लवणेन वा ॥ ४१ ॥

कुर्य्यादित्यादि । वैदेही पिप्पली शिरीषफल शब्देन शिरीषफलोद्भवं बीजमुच्यते उपचारात् । उक्तं हि सुश्रुते (उ ं १२ अ ं)

"शिरीषबीज मरिच पिप्पली सैन्धवैरपि ।
शुक्रप्रघर्षणं कार्य्यम् * * ॥" इति

एतैश्चूर्णीकृतैरञ्जनशलाकास्थितैः घर्षणं कार्य्यम् । त्रिफलाक्वाथपीतेनेति त्रिफलाक्वाथभावितेन । ४१

कुर्य्यादञ्जनयोगौ वा श्लोकार्द्धगदिताविमौ ।
शङ्ख-कोलास्थि-कतक-द्राक्षा-मधुक-माक्षिकैः ।
सुरादन्तार्णवमलैः शिरीषकुसुमान्वितैः ॥ ४२ ॥

कुर्य्यादित्यादि । इमाविति शङ्खकोलास्थीत्यादि मौक्तिकान्त एकः सुरादिः

शिरीषकुसुमान्तस्तु द्वितीयः। अत्र शङ्खादीनां चूर्णं सुरया संघृष्याञ्जनं कार्य्यम्। दन्तशब्दे सामान्येनोक्तेऽपि प्रकरणाद्दन्तिवराहादिदन्त एव ग्राह्यः। अर्णवमलः समुद्रफेनः। ४२

धात्री-फणिज्झक-रसे क्षारो लाङ्गलिकोद्भवः।
उषितः शोषितश्चूर्णः शुक्रघर्षणमञ्जनम् (१) ॥ ४३ ॥

धात्रीत्यादि। फणिज्झक: पर्णाशः, उषित इति भावितः। ४३

मुद्गा वा निस्तुषाः पिष्टाः शङ्ख-क्षौद्र-समायुताः।
सारो मधूकान्मधुमान् मज्जा वाऽक्षात्समाक्षिका ॥ ४४ ॥

मुद्गा वेत्यादिना समाक्षिका इत्यन्तेन योगत्रयमाह। अत्रापि शुक्रघर्षणमञ्जनमिति सम्बध्यते। क्षौद्रसमायुता इत्यन्तः प्रथमः। मधुमान् इत्यन्तो-द्वितीयः। समाक्षिक इत्यन्तस्तु तृतीय इति। अक्षादिति विभीतकफलात्। ४४

गोखराश्वोष्ट्रदशनः शङ्खः फेनः समुद्रजः।
वर्त्तिरर्ज्जुनतोयेन हन्ति शुक्रक-नाशिनी ॥ ४५ ॥

गोखराश्वेत्यादौ अर्ज्जुनतोयेनेति अर्जुनवृक्षमूलस्य स्वरसेन क्वाथेन वा। ४५

उत्सन्नं वा सशल्यं वा शुक्रं बालादिभिर्लिखेत् ॥ ४६ ॥

उत्सन्नमित्यादि। आदिशब्दात् शाकपत्रादीनां ग्रहणम्। ४६

सिराशुक्रे त्वदृष्टिघ्ने चिकित्सा व्रणशुक्रवत् ॥ ४७ ॥

शिराशुक्रचिकित्सामाह शिराशुक्र इत्यादि। दृष्टिघ्नस्य शिराशुक्रस्यासाध्यत्वेन तन्निरासार्थमदृष्टिघ्न इति शिराशुक्रविशेषण मुक्तम्। ४७

पुण्ड-यष्ट्याह्व-काकोली-सिंही-लोह-निशाञ्जनम्।
कल्कितं छागदुग्धेन सघृतैर्धूपितं यवैः।
धात्रीपत्रैश्च पर्य्यायाद्वर्त्तिर्नेत्राञ्जनं परम् ॥ ४८ ॥

पुण्डेत्यादि। पुण्डाह्वं प्रपौण्डरीककाष्ठम्। सिंही पृश्निपर्णी। लोहं जारितलौहचूर्णम्। कल्कितमिति पिष्टम्। पर्य्यायादिति क्रमेण यवैर्धात्रीपत्रैश्च धूपितम्। ४८

अशान्तावर्म्मवच्छस्त्रमजकाख्ये च योजयेत्।
अजकायामसाध्यायां शुक्रेऽन्यत्र च तद्विधे ॥ ४९ ॥

(१) घर्षण मिति वा पाठः।

वेदनोपशमं स्नेहपानासृक्स्रावणादिभिः ।
कुर्य्याद्वीभत्सतां जेतुं शुक्रस्योत्सेधसाधनम् ॥ ५० ॥

इदानी मसाध्येष्वजकादिषु वैरूप्यहरं विधिमाह अजकायामित्यादि । तद्विध— इत्यसाध्यः । ४९।५०

नारिकेलास्थि-भल्लात-ताल-वंशकरीरजम् ।
भस्माद्भिः स्रावयेत्ताभिर्भावयेत् करभास्थिजम् ॥ ५१ ॥
चूर्णं शुक्रेष्वसाध्येषु तद्वैवर्ण्यघ्नमञ्जनम् ।
साध्येषु साधनायाञ्जमिदमेव च शीलितम् ॥ ५२ ॥

नारिकेलास्थीत्यादि । नारिकेलफलास्थि भल्लातबीजं तालस्य जटा वंशकरीरस्य तु पाक्लुड़कम् एतत् सर्व्वं तिलनालाग्निना दग्ध्वा भस्म ग्राह्यम् । तच्च भाव्यसमं गृहीत्वा प्रत्यह मष्टगुणोदके षोड़शगुणोदके वा निःक्वाथ्य पादशेष मेकविंशतिवारान् स्रावयेदिति केचित् । किंवा क्वाथमकृत्वा चतुर्गुणेन वा जलमात्रेण विस्रावणं कार्य्यम् । अपरेतु भाव्यद्रव्यसमं भस्म चतुर्गुणेन वा ऽम्बुना निःक्वाथ्यार्द्धशेषेण तेन विस्रावणं वदन्ति । व्यवहारस्तु पूर्व्वेणैव । परिस्राव्य च गृहीतेन स्वच्छेन क्षारोदकेन सप्ताष्टौ वारान् करभास्थिचूर्णं भाव्यम् । करभः उष्ट्रः । एतच्च प्रतिभावनमेव चूर्णीकर्त्तव्यम् । एतच्चूर्णं मध्वाक्तशलाकया संगृह्य शुक्रदेशं घर्षयेत् । ततस्त्रिफला क्वाथेनाक्षिप्रक्षालनमिति क्रियापरिपाटी । शुक्रेष्वसाध्येष्विति अनेनासाध्यशुक्रस्य वैवर्ण्यनाशनं परं क्रियते न पुनः शुक्रनाशनमिति दर्शयति । ५१।५२

अजकां पार्श्वतोविद्ध्वा सूच्या विस्राव्य चोदकम् ।
समं प्रपीड्याङ्गुष्ठेन वसार्द्रेणानुपूरयेत् ॥ ५३ ॥
व्रणं गोमांसचूर्णेन बद्धं बद्धं विमुच्य च ।
सप्तरात्राद् व्रणे रूढ़े कृष्णभागे समे स्थिरे ॥ ५४ ॥
स्नेहाञ्जनञ्च कर्त्तव्यं नस्यञ्च क्षीरसर्पिषा ।
तथापि पुनराध्माने भेदच्छेदादिकां क्रियाम् ।
युक्त्या कुर्य्याद्यथा नातिच्छेदेन स्यान्निमज्जनम् ॥ ५५ ॥

अजकामित्यादि । सममिति प्रपीड़नक्रियाविशेषणम् । वसार्द्रेणेति गोमांसचर्णविशेषणम् । वसास्थाने घृतं सुश्रुतेनोक्तम् यथा (उं १२ अं)

व्रणं गोमांसचूर्णेन पूरयेत् सर्पिषा सह ।" इति

स्नेहाञ्जनं घृतादिसहितमञ्जनम् । निमज्जनम् मिति मध्ये निम्नता । ५३—५५

नित्यञ्च शुक्रेषु श्रुतं यथास्वं पाने च मर्शे च घृतं विदध्यात् ।
न हीयते लब्धबला तथान्तस्तीक्ष्णाञ्जनैर्दृक् सततं प्रयुक्तैः ॥५६॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे सन्धिसितासित रोगप्रतिषेधो नामैकादशोऽध्यायः ।

नित्यमित्यादौ यथास्वं श्रुतमिति यस्मिन् शुक्रे यस्मिन् दोषे वा यदौषधमुक्तं तेन सिद्धमित्यर्थः । मर्शो नस्तकर्म्मविशेषः । ५६

इति (श्रीशिवदास-सेन-कृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे एकादशोऽध्यायः ॥

द्वादशोऽध्यायः

अथातो दृष्टिरोगविज्ञानीयमध्यायं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥ १ ॥

दृष्टिरोगो दृष्टिमण्डलगतरोगः । दृष्टिप्रमाणन्तु मसूरार्द्ध दलप्रमाणम् । यदाहनिमिः—"पञ्चभूतात्मिका दृष्टिर्मसूरार्द्ध दलोन्मिता ।" इति । १

सिरानुसारिणि मले प्रथमं पटलं श्रिते ।
अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः ॥ २ ॥

तद्गताश्च सप्तविंशतिर्व्याधयो भवन्ति तद् यथा—वातिकं तिमिरं, वातिकः काचो, वातिको लिङ्गनाशो, गम्भीरिका, पैत्तिकं तिमिरं, पैत्तिकः काचः, पैत्तिको लिङ्गनाशो, ह्रस्वाख्या, पित्तविदग्धदृष्टिः, कफतिमिरं, कफकाचः, कफलिङ्गनाशः, रक्ततिमिरं, रक्तकाचः, रक्तलिङ्गनाशः, संसर्गजतिमिरं, सान्निपातिकतिमिरं, संसर्गजः काचः, सान्निपातिकः काचः, संसर्गजलिङ्गनाशः, सान्निपातिकलिङ्गनाशः, नकुलान्ध्यः, दोषान्धः, उष्णविदग्धदृष्टिः, अम्लविदग्धदृष्टिः, धूमरः, औपसर्गिक-लिङ्गनाश इति । एषां सामान्य लक्षणाभिधानपूर्व्वकं क्रमेण लक्षणं वाच्यम् । तत्र दृष्टयां चत्वारि पटलानि । तत्र पटलविशेष सम्बद्ध दोषभेदेन तिमिराख्यस्य

रोगस्य विशेषान् आह सिरानुसारिणीत्यादि । सिरानुसारिणीति नेत्रसम्बद्ध-शिरानुसारिणीत्यर्थः । रूपमिति रूपवद्द्रव्यम् । अनिमित्ततः इत्यकस्मात् । अयं तिमिराख्य आमय इति वक्ष्यमाणेनान्वयः । २

प्राप्ते द्वितीयं पटलमभूतमपि पश्यति ।
भूतन्तु यत्नादासन्नं दूरे सूक्ष्मञ्च नेक्षते ॥ ३ ॥
दूरान्तिकस्थं रूपञ्च विपर्य्यासेन मन्यते ।
दोषे मण्डलसंस्थाने मण्डलानीव पश्यति ॥ ४ ॥

प्राप्त इत्यादि । अभूत मित्यसत् । विपर्य्यासेन मन्यते इति दूरस्थमन्तिकस्थ-तया पश्यति अन्तिकस्थञ्च दूरस्थतया इति । मण्डलानीति मण्डलाकृतीनि । ३।४

द्विधैकं दृष्टिमध्यस्थे बहुधा बहुधा स्थिते ।
दृष्टेरभ्यन्तरगते ह्रस्ववृद्धविपर्य्ययम् ॥ ५ ॥
नान्तिकस्थमधःसंस्थे दूरगं नोपरि स्थिते ।
पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः ॥ ६ ॥

द्विधेत्यादि दृष्टिमध्यस्थे दोषे एकं वस्तु द्विधा द्विप्रकारं पश्यति । तथा बहुधा स्थिते दोषे एकं वस्तु बहुधा बहुप्रकारं पश्यति । ह्रस्वदीर्घविपर्य्ययमिति ह्रस्वं वस्तु दीर्घमिव पश्यति दीर्घञ्च ह्रस्वमिव पश्यतीत्यर्थः । नान्तिकस्थ-मित्यादि । अधःस्थिते दोषे अन्तिकस्थं न पश्यति उपरिस्थिते च दूरस्थं न पश्यतीत्यर्थः । अयमुक्तप्रकारः सर्व्व एवामयः तिमिराख्यः । आशुव्यापकतया तिमिरसाधर्म्म्यात्तिमिरसंज्ञा । ५।६

प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते ।

अस्यैव तिमिरस्यावस्थाविशेषेण काचसंज्ञामाह प्राप्नोतीत्यादि । स एव तिमिराख्यो रोग उपेक्षया दोषे तृतीयपटलाश्रिते सति काचतां प्राप्नोति । ७—

तेनोर्द्ध्वमीक्षते नाधस्तनुचेलावृतोपमम् ।
यथादोषञ्च (१) रज्येत दृष्टिर्हीयेत च क्रमात् ॥ ७ ॥

तस्यैव लक्षणमाह तेनेत्यादि । तनुचेलावृतोपममिति ईक्षणक्रिया विशेषणम् । सूक्ष्मवस्त्रावृतसदृश मित्यर्थः । यथादोषञ्च रज्येतेति दृष्टौ दोषानुरूपो रागो वर्णो भवतीत्यर्थः । हीयेतेति हीनशक्तिः भवतीत्यर्थः ।—७

(१) यथा वर्णञ्चे ति वा पाठः ।

अथाप्युपेक्षमाणस्य चतुर्थपटलं गतः ।
लिङ्गनाशं मलः कुर्वन् छादयेद्दृष्टिमण्डलम् ॥ ८ ॥

तस्यैव तिमिरस्य चतुर्थपटलाश्रिते दोषे सति लिङ्गनाशसंज्ञामाह अथेत्यादि । तृतीयपटलश्रवणानन्तरमप्युपेक्षमाणस्येत्यर्थः । लिङ्ग्यते ज्ञायते अनेनेति लिङ्गमिन्द्रियशक्तिः तस्य नाशोऽस्मिन्निति लिङ्गनाशो व्याधिः । ८

तत्र वातेन तिमिरे व्याविद्धमिव पश्यति ।
चलाविलारुणाभासं प्रसन्नञ्चेक्षते मुहुः ॥ ९ ॥
जालानि केशान् मशकान् रश्मींश्च-

तिमिर-काच-लिङ्गनाशानां सामान्य-लक्षणमभिधाय वातादिभेदेन विशिष्ट-लक्षणमाह तत्रेत्यादि । व्याविद्धमिव कुटिलमिव । चलमिति भ्राम्यमाणम् । मुहुरिति कदाचित् प्रसन्नमित्यविपरीतं सम्यगीक्षते । कदाचिच्च चलाविलारुणाभासं विपरीतमीक्षत इत्यर्थः । ९।१०—

उपेक्षितेऽत्र च ।
काचीभूते दृगरुणा पश्यत्यास्यमनासिकम् ॥ १० ॥
चन्द्रदीपाद्यनेकत्वं वक्रमृज्वपि मन्यते ।

वातिक काच लक्षणमाह उपेक्षितेऽत्र चेति । अत्र तिमिरे उपेक्षणात् काचीभूते सति वातेन अरुणदृग् भवति । आस्यञ्च नासिकारहितं पश्यति । वक्रमृज्वपि मन्यते इति ऋज्वपि वक्रं मन्यते ।—१०।११

वृद्धः काचो दृशं कुर्याद्रजोधूमावृतामिव ॥ ११ ॥
स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ।
सलिङ्गनाशो

वातिक लिङ्गनाश लक्षणमाह वृद्ध इत्यादि । हतदर्शनामिति हतदर्शनशक्तिम् । स लिङ्गनाश इति वातिक लिङ्गनाश इत्यर्थः ।—११।१२—

वात स्तु (१) सङ्कोचयति दृक्शिराः ।
दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता ॥ १२ ॥

वातस्त्वित्यादिना गम्भीरिकामाह । एषा च वातजन्या ।—१२

(१) वाति तु इति पाठः ।

पित्तजे तिमिरे विद्युत्खद्योतांद्योतदीपितम् ।
शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ॥ १३ ॥

पित्तजतिमिरलक्षणमाह पित्तज इत्यादि । १३

काचे दृक् काचनीलाभा तादृगेव च पश्यति ।
अर्केन्दु-परिवेशाग्नि-मरीचीन्द्रधनूंषि च ॥ १४ ॥

पित्तज काच लक्षणमाह काच इत्यादि । कांस्याभा नीलाभा चेत्यर्थः । तादृगेव हि पश्यतीति कांस्याभं नीलाभञ्च पश्यतीत्यर्थः । १४

भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः ।

पैत्तिक लिङ्गनाश लक्षणमाह भृङ्गनीलेत्यादि । निरालोकेति तेजःशून्या । १५—

दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना ।

ह्रस्वाख्यामाह दृष्टिरित्यादि । पित्तजन्य एवायम् ।—१५—

भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ॥ १५ ॥

पित्तविदग्धदृष्टिमाह (भवेदित्यादि ।) पीताभदर्शनेति सर्व्वमेव द्रव्यं पीतमेव पश्यति ।—१५

कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ।
शङ्खेन्दु-कुन्द-कुसुमैः कुमुदैरिव चाचितम् ॥ १६ ॥

कफज-तिमिर-लक्षणमाह कफेनेत्यादि । १६

काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम् ।
सिताभा सा च दृष्टिः स्यात्

कफज काच लक्षणमाह काच इत्यादि । अत्रापि पश्यतीति सम्बध्यते । १७ —

लिङ्गनाशे तु लक्ष्यते ॥ १७ ॥

मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः ।
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ॥ १८ ॥
उष्णे सङ्कोचमायाति छायायां परिसर्पति ।
शङ्ख-कुन्देन्दु-कुमुद-स्फटिकोपमशुक्लिमा ॥ १९ ॥

कफज लिङ्गनाशमाह लिङ्गनाशेत्वित्यादि । मूर्त्त इति कठिनः ।—१७—१९

रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।

रक्तजतिमिरलक्षणमाह रक्तेनेत्यादि ।—२०—

काचेतु रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति ॥

रक्तज काच लक्षणमाह काचेत्वित्यादि । तादृक् पश्यतीति सर्व्वमेव वस्तु रक्तवर्णं कृष्णवर्णं वा पश्यति ।—२०—

लिङ्गनाशेऽपि तादृग् दृङ् निष्प्रभा हतदर्शना ॥ २० ॥

रक्तज-लिङ्गनाश-लक्षणमाह-लिङ्गनाशेऽपीत्यादि । तादृग्दृगिति रक्ता कृष्णाभा वेत्यर्थः । (हतदर्शना इति) हतदर्शनशक्तिः ।—२०

संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणम् ।

तिमिरादीनकस्माच्च तैः स्याद्व्यक्ताकुलेक्षणम् ।

तिमिरे शेषयोर्दृष्टौ चित्रो रागः प्रजायते ॥ २१ ॥

संसर्गजानां सान्निपातिकानाञ्च तिमिरकाचलिङ्गनाशानां लक्षणमाह संसर्गेत्यादि । संसर्गसन्निपातेषु तिमिरादीन् संकीर्णलक्षणान् विद्यात् । आदिशब्दात् काचलिङ्गनाशयोर्ग्रहणम् । तैः संसर्गसन्निपातैः । अकस्मादिति निमित्ताद्विना कदाचिद् व्यक्तं स्पष्टं कदाचिदाकुलमीक्षणं यस्य एवम्भूतो नरस्तिमिरिः स्यात् । शषयोः काचलिङ्गनाशयोः संसर्गजसन्निपातयो र्दृष्टौ चित्रो वातादिकृतो नानाविधो रागः स्यात् । २१

द्योतते नकुलस्येव यस्य दृङ् निचिता मलैः ।

नकुलान्ध्यः स तत्राह्नि चित्रं पश्यति नो निशि ॥ २२ ॥

नकुलान्ध्यलक्षणमाह द्योततइत्यादि । नकुलस्येव यस्य दृग् द्योतते प्रभायुक्ता भवतीत्यर्थः । २२

अर्केऽस्तमस्तकन्यस्तगभस्तौ स्तम्भमागताः ।

स्थगयन्ति दृशं दोषा दोषान्धः सगदोऽपरः ॥ २३ ॥

दिवाकरकरस्पृष्टा भ्रष्टा दृष्टिपथान्मलाः ।

विलीनलीना यच्छन्ति व्यक्तमत्राह्नि दर्शनम् ॥ २४ ॥

अर्क इत्यादिना रात्र्यन्धमाह । दोषा अत्र कफप्रधाना ज्ञेयाः । स्तम्भमागता-इति स्त्यानीभूतेन कफेनावरुद्धगतयः । स्थगयन्ति आवृण्वन्ति । दोषान्ध-इति दोषा शब्देन रात्रिरुच्यते रात्र्यन्ध इति । ननु ते दोषा दिवापि तिष्ठन्ति

तत् कथं दिवसेऽपि दृष्टिं न स्थगयन्तीत्यत आह दिवाकरेत्यादि। विलीनलीना-इति विलीनं विनष्टं लीनं स्रोतःसंश्लेषो येषां ते तथा। सूर्य्यकरस्पर्शेन अवरोधकस्य कफस्य व्यपगमात् स्रोतोभ्यो व्यपगता इत्यर्थः। २४

उष्णतप्तस्य सहसा शीतवारिनिमज्जनात्।
त्रिदोषरक्तसंपृक्तो यात्यूष्मोर्द्ध्वं ततोऽक्षिणी ॥ २५ ॥
दाहोषे मलिनं शुक्लमहन्याविलदर्शनम्।
रात्रावान्ध्यञ्च जायेत विदग्धोष्णेन सा स्मृता ॥ २६ ॥

उष्णतप्तस्येत्यादिना उष्णविदग्धामाह। दाहोषे इत्यत्र भवत इति शेषः। मलिनं शुक्लमिति शुक्लं यदक्षिमण्डलं तत् मलिनं स्यात्। तथा अहनि दिवसे आविलदर्शनं स्यात्। तथा रात्रौ चान्ध्यं जायेत। सा उष्णविदग्धा स्मृता। २५—२६

भृशमम्लाशनाद्दोषैः साम्लैर्या दृष्टिराचिता।
सक्लेदकण्डू कलुषा विदग्धाम्लेन सा स्मृता ॥ २७ ॥

अम्लविदग्धामाह भृशमित्यादि। २७

शोक-ज्वर-शिरोरोग-सन्तप्तस्यानिलादयः।
धूमाविलां धूम्रदृशं दृशं कुर्य्युः स धूमरः ॥ २८ ॥

शोकज्वरेत्यादिना धूमरमाह। धूमाविलामिति धूमाविलामिवेत्यर्थः। धूम्रदृशमिति सर्व्वमेव भावं धूम्रवर्णं पश्यतीति क्विप्। धूमदृशमित्यपि पाठः। २८

सहसैवाल्पसत्त्वस्य पश्यतो रूपमद्भुतम्।
भास्वरं भास्करादिं वा वाताद्या नयनाश्रिताः ॥ २९ ॥
कुर्व्वन्ति तेजः संशोष्य दृष्टिं मूषितदर्शनाम्।
वैदूर्य्यवर्णां स्तिमितां प्रकृतिस्थामिवाव्यथाम् ॥ ३० ॥
औपसर्गिक इत्येष लिङ्गनाशः

सहसैवेत्यादिना आगन्तु लिङ्गनाशमाह। अद्भुतं रूपं सुरर्षिगन्धर्व्वादि-रूपम्। तेजः संशोष्येति चक्षुरिन्द्रियरूपं तेजोऽभिभूय। मूषितदर्शनामिति अपनीत-दर्शन-शक्तिम्। वैदूर्य्यवर्णामिति वैदूर्य्यवद् विमल-वर्णाम्, स्तिमितामिति

स्निग्धाम् । अतएव प्रकृतिस्थामिव स्वाभाविकीमिव । एतेन नयनगोलकं स्वाभाविक गोलकवद् विमलं दृश्यते अथच दर्शनशक्तिर्नास्तीत्यर्थः । औपसर्गिक-इति आगन्तुनिमित्त इत्यर्थः । २६—३१—

अत्र वर्जयेत् ।

विना कफाल्लिङ्गनाशात् गम्भीरां ह्रस्वजामपि ॥ ३१ ॥
षट् काचा नकुलान्ध्यश्च याप्याः शेषांस्तु साधयेत् ।
द्वादशेति गदा दृष्टौ निर्दिष्टाः सप्तविंशतिः ॥ ३२ ॥

इति श्रीमद्वाग्भट विरचितायामष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे
दृष्टिरोगविज्ञानीयो नाम द्वादशोऽध्यायः ।

उक्तानां सप्तविंशतिव्याधीनाम् असाध्यादिविभागमाह अत्र वर्जयेदित्यादि । अत्रेति एषु मध्ये कफाद्विना कफज लिङ्गनाशं विना वातिकपैत्तिकरक्तज-संसर्गज-सन्निपातौपसर्गिकान् षडेव लिङ्गनाशान् वर्जयेत् । षट् काचा इति वातिक-पैत्तिक कफजरक्तजसंसर्गज-सन्निपातजाः षट् काचा याप्याः । तथा नकुलान्ध्यश्च याप्यः । शेषांस्तु द्वादशेति वातपित्तकफरक्त-संसर्गसन्निपात-भेदेन षट्तिमिराः, तथा कफज-लिङ्गनाश-पित्तविदग्धदृष्टि-दोषान्ध्योष्णविदग्धाम्लविदग्धदृष्टिधूमराः इति षडिति मिलित्वा द्वादश साधयेत् चिकित्सेद् इति उक्तरीत्या सप्तविंशतिर्गदा दृष्टिमण्डले निर्दिष्टाः । —३१—३२

इति (श्रीशिवदास-सेन-कृते अष्टाङ्गहृदय तत्त्वबोध) उत्तरे तन्त्रे
द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

अथातस्तिमिरप्रतिषेधं व्याख्यास्यामः
इतिहस्माहुरात्रेयादयो महर्षयः ॥ १ ॥
तिमिरं काचतां याति काचोऽप्यान्ध्यमुपेक्षया ।
नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्‌द्रुतम् ॥ २॥

तिमिरस्य शीघ्रप्रतिकार्य्यत्वं सोपपत्तिक माह तिमिरमित्यादि । आन्ध्यत्रमिति लिङ्गनाशताम् उक्तं हि वृद्धवाग्भटे लिङ्गनाशो नीलिका पटलमान्ध्यमिति पर्य्यायाः इति (उ॰ १७ अ॰) १—२

तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषितम् । (१)
तत् क्वाथे द्विगुणं क्षीरं घृतप्रस्थं विपाचयेत् ॥ ३ ॥
प्रपौण्डरीक-काकोली-पिप्पली-लोध्र-सैन्धवैः ।
शताह्वा-मधुक-द्राक्षा-सिता-दारु-फलत्रयैः ॥ ४ ॥
कार्षिकैर्निशि तत् पीतं तिमिरापहरं परम् ।

तुलामित्यादि । पादशेषितमिति पाकक्रिया विशेषणम् । ३—५—

द्राक्षा-चन्दन-मञ्जिष्ठा-काकोलीद्वय-जीवकैः ॥ ५ ॥
सिता-शतावरी-मेदा-पुण्डाह्व-मधुकोत्पलैः ।
पचेज्जीर्णं घृतप्रस्थं समक्षीरं पिचून्मितैः ।
हन्ति तत्काच-तिमिर-रक्तराजी-शिरोरुजः ॥ ६ ॥

द्राक्षेत्यादौ पिचून्मितैरिति कर्षोन्मितैः । —५—६

पटोल-निम्ब-कटुका-दार्व्वी-सेव्य-वरा-वृषम् ।
सधन्वयास-त्रायन्ती-पर्पटं पालिकं पृथक् ॥ ७ ॥
प्रस्थमामलकानाञ्च क्वाथयेल्लव्यणेऽम्भसि ।
तदाढकेऽर्द्धपलिकैः पिष्टैः प्रस्थं घृतात् पचेत् ॥ ८ ॥

---

(१) पादशेषित इति वा पाठः ।

मुस्त-भुनिम्ब-पटोल-कुटजोदीच्य-चन्दनैः ।
सपिप्पलीकैस्तत् सर्पिर्घ्राण-कर्णास्य-रोगजित् ॥ ९ ॥
विद्रधिज्वर-दुष्टारुर्विसर्पापचि-कुष्ठनुत् ।
विशेषाच्चक्षुः-तिमिर-नक्तान्ध्योष्णाम्लदाहहृत् ॥ १० ॥

पटोलेत्यादौ सैन्यसुषीरम् । वरा त्रिफला, तत्स्वपे द्रोणे, तदाढक इति तस्य क्वाथस्याढके घृतात् प्रस्थं पचेत् । अर्द्धपलिकैरिति मुस्तादिविशेषणम् । उदीच्यं बालकम्, दुष्टारुः व्रणः । उष्णाम्लदाहहृदिति उष्णदाह उष्णविदग्धाल्योऽम्याधिः अम्लदाहोऽम्लविदग्धा दृष्टिः । ७–१०

त्रिफलाष्टपलं क्वाथ्यं पादशेषं जलाढके ।
तेन तुल्यपयस्केन त्रिफलापलकल्कवान् ॥ ११ ॥
अर्द्धप्रस्थो घृतात् सिद्धः सितया माक्षिकेण वा
युक्तं पिबेत्तत्तिमिरी तद्युक्तं वा वरारसम् ॥ १२ ॥

त्रिफलाष्टपलमित्यादि । पादशेषं यथा स्यात्तथा क्वाथ्यमिति क्वथनीयम् । सिता वा मधु वा प्रक्षेप्यम् । तद्युक्तमिति उक्तघृतयुक्तं वरारसं त्रिफला-क्वाथम् । ११–१२

यष्टीमधुककाकोली-व्याघ्री-कृष्णामृतोत्पलैः । (१)
पालिकैः ससिताद्राक्षैर्घृतप्रस्थं पचेत् समैः ॥ १३ ॥
अजाक्षीर-वरा-वासा-मार्कवस्वरसैः पृथक् ।
महात्रैफलमित्येतत् परं दृष्टिविकारजित् ॥ १४ ॥

यष्टी मधुकेत्यादौ वरारसः त्रिफलायाः स्वरसः क्वाथो वा । १३–१४

त्रैफलेनाथ हविषा लिहानस्त्रिफलां निशि ।
यष्टीमधुकसंयुक्तां मधुना च परिप्लुताम् ॥ १५ ॥
मासमेकं हिताहारः पिबन्नामलकोदकम् ।
सौपर्णं लभते चक्षुरित्याह भगवान् निमिः ॥ १६ ॥

त्रैफलेनेत्यादौ सुपर्णो गरुडस्तस्येव चक्षुरित्यर्थः । १५–१६

---

(१) यष्टीकद्विकाकोलीति वा पाठः ।

ताप्याद्रिजतु-रौप्याख्य-धात्री-त्रिफला-हेम-यष्ट्याह्व-सिता-जीर्णाज्य-माक्षिकैः ।
संयोजिता यथाकामं तिमिरघ्नी वरा वरा ॥ १७ ॥
सघृतं वा वराक्वाथं शीलयेत्तिमिरामयी ।

ताप्येत्यादौ ताप्यं सुवर्णमाक्षिकम्, जीर्णाज्यं पुराणघृतम् । वरा त्रिफला, तथा वरा श्रेष्ठा । १७ – १८—

अपूप-सूप-सक्तून् वा त्रिफलाचूर्णसंयुतान् ॥ १८ ॥
पायसं वा वरायुक्तं शीतं समधुशर्करम् ।
प्रातर्भक्तस्य वा पूर्व्वमद्यात् पथ्यां पृथक् पृथक् ।
मृद्वीका शर्कराक्षौद्रैः सततं तिमिरातुरः ॥ १९ ॥

अपूपेत्यादौ अपूपः 'पुया' इति नाम्ना काश्यादौ प्रसिद्धो भक्ष्यविशेषः । प्रातरिति पूर्व्वेण सम्बध्यते । तथा भुक्तस्य पूर्व्वं वा पृथक् पृथक् मृद्वीकाशर्कराक्षौद्रैर्युतां पथ्यां हरीतकीम् अद्यात् । १८ – १९

स्रोतोजांशांश्चतुःषष्टिं ताम्रायोरूप्य-काञ्चनैः ।
युक्तां प्रत्येकमेकांशैरन्धमूषोदरस्थिताम् ॥ २० ॥
ध्मापयित्वा समावृत्तं ततस्तच्च निषेचयेत् ।
रसस्कन्धकषायेषु सप्तकृत्वः पृथक् पृथक् ॥ २१ ॥
वैदूर्य्य-मुक्ता-शङ्खानां त्रिभिर्भागैर्युतं ततः ।
चूर्णाञ्जनं प्रयुञ्जीत तत् सर्व्वं तिमिरापहम् ॥ २२ ॥

स्रोतोजांशानित्यादि । स्रोतोजं सौवीराञ्जनम् तस्य चतुःषष्टिर्भागाः । ताम्रायोरूप्य-काञ्चनैः प्रत्येकमेकभागैर्युक्ताः । तान् अन्धमूषोदरस्थितान् ध्मापयित्वा तत् सर्व्वं समावृत्तमिति सम्यगावर्त्तितं यदा भवति तदा रसस्कन्धकषायेषु सप्तकृत्वः पृथक् सेचयेत् । मधुरादिरसस्कन्धाश्च रसभेदीय—(सूं १० अं) एवोक्ताः । वैदुर्य्यमुक्ताशङ्खानां मिलित्वा त्रिभिर्भागैर्युतमेतच्चूर्णाञ्जनं प्रयुञ्जीत । २० –२२

मांसी-त्रिजात-कायःकुङ्कुम-नीलोत्पलाभया-तुत्थैः ।
सित-काच-शङ्ख-फेनक-मरिचाञ्जन-पिप्पली-मधुकैः ॥ २३ ॥

चन्द्रे प्रश्विनीसनाथे सुचूर्णितैरञ्जयेद्युगलमक्ष्णोः ।
तिमिरार्म्म-रक्तराजी-कण्डूकाचादिशममिच्छन् ॥ २४ ॥

मांसीत्यादि व्यक्तम् । २३—२४

मरिच-वरलवण-भागौ भागौ द्वौ कण-समुद्रफेनाभ्याम् ।
सौवीरभागनवकं चित्रायां चूर्णितं कफामयजित् ॥ २५ ॥

मरिचेत्यादौ वरलवणं सैन्धवम्, कणः पिप्पली, सौवीरं सौवीराञ्जनम् । कफामयः कफतिमिरम् । २५

द्राक्षा-मृणालीस्वरसे क्षीर-मद्य-वसासु च ।
पृथक् दिव्यारसु स्रोतोञ्जं सप्तकृत्वो निषेचयेत् ॥ २६ ॥
तच्चूर्णितं स्थितं शङ्खे दृक्प्रसादनमञ्जनम् ।
शस्तं सर्व्वाक्षिरोगेषु विदेहपति निर्म्मितम् ॥ २७ ॥

द्राक्षेत्यादि । द्राक्षादिस्वरसे तथा क्षीरादिषु तथा आकाशजलेषु च स्रोतोञ्जं सौवीराञ्जनं पृथक् सप्तकृत्वो निषेचयेत् । २६—२७

निर्दग्धं बादराङ्गारैस्तुत्थञ्चोत्थं निषेचितम् ।
क्रमादजापयः-सर्पिः-क्षौद्रे तस्मात् पलद्वयम् ॥ २८ ॥
कार्षिकैस्तार्क्ष्य-मरिच स्रोतोञ्ज-कटुका-नतैः ।
पटु-लोध्र-शिला-पथ्या-कणलाञ्जन-फेनकैः ॥ २९ ॥
युक्तं पलेन यष्ट्याश्च मूषान्तर्ध्मातचूर्णितम् ।
हन्ति काचार्म्म-नक्तान्ध्य-रक्तराजीः सुशीलितः ।
चूर्णो विशेषात्तिमिरं भास्करो भास्करो यथा ॥ ३० ॥
त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुल्व-तालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनाष्टकम् ॥ ३१ ॥
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ।
तिमिरान्तकरं लोके द्वितीय इव भास्करः ॥ ३२ ॥

निर्दग्धमित्यादि । इत्थमिति सप्तकृत्वः, तार्क्ष्यं स्वर्णमाक्षिकम्, पटु सैन्धवम्, अञ्जनं रसाञ्जनम्, फेनः समुद्रफेनः । एकं भास्करपदं चूर्णविशेषणम् । त्रिंशद् भागा भुजङ्गस्येत्यादि स्पष्टमधिकम् । २८—३२

गोमूत्रे छगलरसेऽम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तप्तं ज्वलितमनेकशो निषिक्तं
तत्कुर्य्याद्गरुड़समं नरस्य चक्षुः ॥ ३३ ॥

गोमूत्र इत्यादि । छगलरसं छागदुग्धं छागमांसरस इत्यन्ये । विषे चेति विषशब्देनात्र सेकान्यथानुपपत्या विषक्वाथ उच्यते । अनेकधा इति सप्तकृत्वः । ज्वलितमिति दग्धम्, एतदपि चूर्णाञ्जनम् । ३३

श्रेष्ठाजलं भृङ्गरसं सविषाज्यमजापयः ।
यष्टीरसञ्च यत्सीसं सप्तकृत्वः पृथक् पृथक् ॥ ३४ ॥
तप्तं तप्तं पायितं तच्छलाका नेत्रे युक्ता साञ्जनाऽनञ्जना वा ।
तैमिर्य्यार्म्म-स्राव-पैच्छिल्य-पैल्लं कण्डूं जाड्यं रक्तराजीश्च हन्ति ॥३५॥

श्रेष्ठेत्यादौ श्रेष्ठा त्रिफला । तप्तं कृत्वा यादृशं त्रिफलाजलादिकं पृथक् पृथक् सप्तकृत्वः पायितं तस्य सीसकस्य शलाका नेत्रे न्यस्ता सती तैमिर्य्यादीन् हन्ति । ३४—३५

रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम् ।
ईषत् कर्पूरसंयुक्तमञ्जनं नयनामृतम् ॥ ३६ ॥

रसेन्द्रेत्यादि । रसेन्द्रः पारदः भुजङ्गः सीसं अञ्जनं रसाञ्जनं तयोः पारद-सीसयोस्तुल्यम् । अग्नौ सीसं द्रवीकृत्य पारदेन चूर्णीकृतरसाञ्जनेन च योजनं कार्य्यम् । एतैस्त्रिभिः संघजैः शलाकां कृत्वा तया किञ्चित् कर्पूरयुक्तया अञ्जन-मुपदिशन्ति । ३६

योगृध्रस्तरुण-रवि-प्रकाशगलस्तस्यास्यं समयमृतस्य गोशकृद्भिः ।
निर्दग्धं समघृतमञ्जनञ्च पेष्यं योगोऽयं नयनबलं करोति गार्ध्रम् ॥३७॥

यो गृध्र इत्यादौ समयमृतस्येति वचनम् अभिघातादिहतगृध्रनिरासार्थम् । अञ्जनमिति सौवीराञ्जनं गार्ध्रं नयनबलमिति गृध्रस्येव नयनबलं करोतीत्यर्थः । ३७

कृष्णासर्पवदने सहविष्कं दग्धमञ्जनमनिसृतधूमम् ।
चूर्णितं नलदपत्रविमिश्रं भिन्नतारमपि रक्षति चक्षुः ॥३८॥

कृष्णसर्पेत्यादौ नलदं मांसी, पत्रं तेजपत्रम् । ३८

कृष्णसर्पं मृतं न्यस्य चतुरश्चापि वृश्चिकान् ।
क्षीरकुम्भे त्रिसप्ताहं क्लेदयित्वाथ मन्थयेत् ॥ ३९ ॥
तत्र यन्नवनीतं स्यात् पुष्णीयात्तेन कुक्कुटम् ।
अन्धस्तस्य पुरीषेण प्रेक्षते ध्रुवमञ्जनात् ॥ ४० ॥

कृष्णसर्पमित्यादि । वृश्चिकानपि मृतान् । ३९—४०

कृष्णसर्पवसा शङ्खः कतकात् फलमञ्जनम् ।
रसक्रियेय मचिरादन्धानां दर्शनप्रदा ॥ ४१ ॥

कृष्णसर्पवसेत्यादि । शङ्खनाभ्यादीनां चूर्णं कृष्णसर्पवसया द्रवीकृत्य रसक्रिया कार्य्येत्यर्थः । ४१

मरिचानि दशार्द्धपिचुस्ताप्यात्तुत्थात्पलं पिचुर्यष्ट्याः ।
क्षीरार्द्रं दग्धमञ्जनमप्रतिसाराख्यमुत्तमं तिमिरे ॥४२॥

मरिचानीत्यादि । मरिचानि दश, स्वर्णमाक्षिकादर्द्धपिचुरर्द्धकर्षः तुत्थात् पलम् । यष्ट्याइति यष्ठीमधुकस्य पिचुः कर्षः । एतत् सर्व्वमादौ क्षीरार्द्रं पश्चाद्दग्ध-मप्रतिसार-संज्ञक-मञ्जनं भवति । ४२

अक्षबीज-मरिचामलकत्वक् तुत्थ-यष्टिमधुकैर्जलपिष्टैः ।
छाययैव गुटिकाः परिशुष्का नाशयन्ति तिमिराण्यचिरेण ॥ ४३ ॥

अक्षबीजेत्यादौ अक्षबीजं विभीतकास्थिमज्जा । ४३

मरिचामलकजलोद्भवतुत्थाञ्जनताप्यधातुभिः क्रमवृद्धैः ।
षण्माक्षिक इति योगस्तिमिरार्म्म-क्लेद-काच-कण्डूहन्ता ॥ ४४ ॥

मरिचेत्यादौ जलोद्भवं पद्मम् । मरिचस्य एको भागः आमलकस्य द्वौ, जलोद्भवस्य त्रयः तथा अञ्जनस्य चत्वारः ताप्यधातोः स्वर्णमाक्षिकस्य च पञ्च भागाः । माक्षिकस्य मधुनः षड्भागा इति । अतएव षण्माक्षिक इति संज्ञा । ४४

रत्नानि रूप्यं स्फटिकं सुवर्णं स्रोतोऽञ्जनं ताम्रमयः सशङ्खम् ।
कुचन्दनं लोहितगैरिकञ्च चूर्णाञ्जनं सर्व्वदृगामयघ्नम् ॥ ४५ ॥

रत्नानीत्यादौ रत्नानि मरकतादीनि । रत्नरूप्यस्फटिकसुवर्णताम्रलोहानि

मारितानि ग्राह्याणीति । एवमन्यत्रापि । अतएव नागार्जुनीयाञ्जनयोगविवरणे निश्चलेन ताम्रं मारितं ग्राह्यमिति व्याख्यातम् । ४५

तिलतैलमक्षतैलं भृङ्गस्वरसोऽसनाच्च निर्यूहः ।
आयसपात्रविपक्वं करोति दृष्टेर्बलं नस्यम् ॥ ४६ ॥

तिलतैलमित्यादि । अक्षतैलं बिभीतकमज्जभवतैलम् । भृङ्गराजस्य रसो असनक्वाथश्च मिलित्वा तैलापेक्षया चतुर्गुणः । ४६

दोषानुरोधेन च नैकशस्तं स्नेहास्रविस्रावणरेकनस्यैः ।
उपाचरेदञ्जन-मूर्द्धवस्ति-वस्तिक्रिया-तर्पण-लेप-सेकैः ॥ ४७ ॥
सामान्यं साधनमिदं प्रतिदोषमतः शृणु ॥ ४८ ॥

इदानीं बलवति दोषे बहुलं स्नेहादिकर्म्म कार्य्यमित्याह दोषानुरोधेनेत्यादि । नकश इति बहुश इत्यर्थः, मूर्द्धवस्तिः शिरोवस्तिः । सामान्यमिति सर्व्वतिमिरसाधारणम् । ४७—४८

वातजे तिमिरे तत्र दशमूलाम्भसा घृतम् ।
क्षीरे-चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ॥ ४९ ॥

वातज इत्यादि । अत्र दशमूलक्वाथोऽपि चतुर्गुणक्षीर-साहचर्य्याच्चतुर्गुणो ग्राह्यः । श्रेष्ठा त्रिफला । ४९

त्रिफला-पञ्चमूलानां कषायं क्षीरसंयुतम् ।
एरण्डतैलसंयुक्तं योजयेच्च विरेचनम् ॥ ५० ॥

त्रिफलेत्यादौ पञ्चमूलं बृहत् पञ्चमूलम् । त्रिफलादिकषायक्षीरयोश्च समो भागः । किंवा "द्रवान्तरेण योगे हि क्षीरं स्नेहसमं भवेद्" इति वचनात् क्षीरं स्नेहसमम् । त्रिफलादिकषायस्तु घृतात्त्रिगुणः । एरण्डतैलन्तु प्रक्षेपविधिना । ५०

समूलजाल-जीवन्ती-तुलां द्रोणेऽम्भसः पचेत् ।
अष्टभागस्थिते तस्मिंस्तैलप्रस्थं पयःसमे ॥ ५१ ॥
बलात्रितय-जीवन्ती-वरीमूलैः पलोन्मितैः ।
यष्टीपलैश्चतुर्भिश्च लोहपात्रे विपाचयेत् ॥ ५२ ॥
लोह एव स्थितं मासे नावनादूर्ध्वजत्रुजान् ।

श्लेष्मोद्भवेऽमृताक्वाथ-वरा-कणा-शृतं घृतम् ।
विध्येच्छिरां पीतवतो दद्याद्यानु विरेचनम् ॥
क्वाथं पूगाभया-शुण्ठी-कृष्णा-कुम्भ-निकुम्भजम् ॥ ६८ ॥

कफतिमिरचिकित्सामाह श्लेष्मोद्भवे इत्यादि। वरा त्रिफला, कणा पिप्पली छान्दसत्वाद्ध्रस्वम्। एतैः शृतं घृतं पीतवतः शिरां विध्येदित्यन्वयः। पूगं पूगफलं कुम्भस्त्रिवृता, निकुम्भो दन्ती। ६८

ह्रीवेर-दारु-द्विनिशा-कृष्णा-कल्कैः पयोऽन्वितैः ।
द्विपञ्चमूलनिर्य्यूहे तैलं पक्वञ्च नावनम् ॥ ६९ ॥

ह्रीवेरेत्यादि। अत्र पयस्तैलसमं दशमूलक्वाथः त्रिगुणश्चतुर्गुणो वा। ६९

शङ्ख-प्रियङ्गु-नेपाली-कटुत्रिक-फलत्रिकैः ।
दृग्वैमल्याय विमला वर्त्तिः स्यात्

शङ्खेत्यादौ नेपाली मनःशिला। विमलेति वर्त्तेः संज्ञा। ७०—

कोकिला पुनः ॥ ७० ॥
कृष्णलोहरजोव्योष-सैन्धव-त्रिफलाञ्जनैः ।

कोकिला पुनरित्यादिना अञ्जनैरित्यन्तेन कोकिलाख्यां वर्त्तिमाह। अञ्जनमत्र सौवीराञ्जन मित्याहुः। कृष्णत्वात् कोकिलेति संज्ञा। —७०—७१—

शश-गो-खर-सिंहोष्ट्र-द्विजा लालाटमस्थि च ॥ ७१ ॥
श्वेतगोबालमरिच-शङ्ख-चन्दन-फेनकम् ।
पिष्टं स्तन्याजदुग्धाभ्यां वर्त्तिस्तिमिरशुक्रजित् ॥ ७२ ॥
[मधूकसाराञ्जन-ताम्रत्रिकटुकविडङ्ग पौण्डरीकानि ।
स लवणतुत्थ त्रिफलालोध्राणि नभोम्बुपिष्टानि ॥
वर्त्तिश्चतुर्द्दशाङ्गी नयनामय नाशनी शिलास्तम्भे ।
लिखिता हिताय जगतस्तिमिरापहरी विशेषेण ॥
एकगुणा मागधिका द्विगुणा च हरीतकी सलिलपिष्टा ।
वर्त्तिरियं नयनसुखा तिमिरार्म्मपटलकाचाश्रुहरी ॥]

शशेत्यादि। अत्र लालाटमस्थ्यपि शशादीनामेव। फेनः समुद्रफेनः। अत्रान्तरे मधुकसाराञ्जनेत्यादि योग स्तथा एकगुणेत्यादियोगश्चाधिकः। —७१।७२

रक्तजे पित्तवत्सिद्धिः शीतैश्चास्रं प्रसादयेत् ॥ ७३ ॥

रक्तज तिमिर चिकित्सामाह रक्तजइत्यादि । सिद्धिः साधनम् । ७३

द्राक्षया नलद-लोध्र-यष्टिभिः शङ्ख-ताम्र-हिमपद्म-पद्मकैः ।

सोत्पलैश्छगलदुग्धवर्त्तितैरस्रजं तिमिरमाशु नश्यति ॥ ७४ ॥

द्राक्षयेत्यादौ हिमं चन्दनम् । वर्त्तितैरिति पिष्टैः । ७४

संसर्गसन्निपातोत्थे यथादोषोदयं क्रियाम् ॥ ७५ ॥

यथादोषोदयमिति यस्य दोषस्य उदय आधिक्यं तदनुरूपा चिकित्सेत्यर्थः । ७५

सिद्धं मधूककृमिजिन् मरिचामरदारुभिः ।

सक्षीरं नावनं तैलं पिष्टैर्लेपो मुखस्य च ॥ ७६ ॥

सिद्धमित्यादौ मधूकस्य सारः । ७६

नत-नीलोत्पलानन्ता-यष्ट्याह्व-सुनिषण्णकैः ।

साधितं नावने तैलं शिरोवस्तौ च शस्यते ॥ ७७ ॥

नतेत्यादौ नतं तगरपादिका । ७७

दद्यादुशीर-निर्य्यूहे चूर्णितं कणसैन्धवम् ।

तत्स्रुतं सघृतं भूयः पचेत् क्षौद्रं घने क्षिपेत् ॥

शीते चास्मिन् हितमिदं सर्व्वजे तिमिरेऽञ्जनम् ॥ ७८ ॥

दद्यादित्यादि । उशीरस्य क्वाथे चूर्णीकृतं पिप्पलीसैन्धवं दद्यात् । तच्च वस्त्रेण परिस्राव्य घृतसहितं कृत्वा पुनः पचेद्, अस्मिंश्च पाकाद्घनीभूते शीते च सति क्षौद्रं क्षिपेत् । अत्र उशीरक्वाथोऽष्टपलः कणासैन्धवयोः प्रत्येकमष्टौ माषकाः, घृतस्य च कर्षः एवं मधुनोऽपीत्याहुः । रसक्रियेयम् । ७८

अस्थीनि मज्जपूर्णानि सत्त्वानां रात्रिचारिणाम् ।

स्रोतोजाञ्जनयुक्तानि वहत्यम्भसि वासयेत् ॥ ७९ ॥

मासं विंशतिरात्रं वा ततश्चोद्धृत्य शोषयेत् ।

समेषशृङ्गीपुष्पाणि सयष्ट्याह्वानि तानि तु ॥

चूर्णितान्यञ्जनं श्रेष्ठं तिमिरे सन्निपातिके ॥ ८० ॥

अस्थीनीत्यादि । रात्रिचारिणां सत्त्वानामिति 'वादुलि' संज्ञकानां पक्षिणाम् । ते हि रात्रिचरत्वेन प्रसिद्धाः । अन्येतु पेचकचर्म्मचटकादीनामपि ग्रहण-माहुः । ७५—८०

काचेऽप्येषा क्रिया मुक्त्वा शिरां यन्त्रनिपीड़िताः ।

आन्ध्याय स्युर्म्मला दद्याच्छ्राव्ये रक्ते जलौकसः ॥ ८१ ॥

काचेऽपीत्यादि । एषा पूर्व्वोक्ता क्रिया काचेऽपि कार्य्या । शिरां मुक्त्वा इति शिरावेधोऽत्र न कार्य्य इत्यर्थः । कुत इत्याह यन्त्रनिपीड़िता इत्यादि । यतः शिरामोक्षार्थं क्रियमाणेन यन्त्रेण निपीड़िता मला दोषा आन्ध्याय स्युः यदा त्वत्र रक्तस्रावणं विधेयं स्यात्तदा जलौकसो दद्यादित्याह स्राव्येत्वित्यादि । ८१

गुड़ः फेनोऽञ्जनं कृष्णा मरिचं कुङ्कुमाद्रजः ।

रसक्रियेयं सक्षौद्रा काचयापनमञ्जनम् ॥ ८२ ॥

गुड़ इत्यादि । फेनः समुद्रफेनः । अत्र गुञ्जाफलाञ्जनमिति पाठः क्वचित् क्वचित् पुस्तके दृश्यते । स च टीकाकृद्भिरव्याख्यातत्वादुपेक्षणीयः । तथा रत्नप्रभाया मपि गुड़पाठ एव दृश्यते इति । काचयापनमञ्जन मित्यत्र काचार्मापह-मञ्जन मित्यपि पाठः ।

नकुलान्ध्ये त्रिदोषोत्थे तैमिर्य्योविहितो विधिः ।

रसक्रियाघृत-क्षौद्र-गोमयस्वरस-द्रुतैः ।

तार्क्ष्य-गैरिक-तालीसैर्निशान्ध्ये हितमञ्जनम् ॥ ८३ ॥

दध्ना विघृष्टं मरिचं रात्र्यान्ध्याञ्जनमुत्तमम् ॥ ८४ ॥

करञ्जिकोत्पल-स्वर्णगैरिकाम्भोजकेसरैः ।

पिष्टैर्गोमयतोयेन वर्त्तिर्दोषान्ध्यनाशिनी ॥ ८५ ॥

अजामूत्रेण वा कौन्ती-कृष्णा-स्रोतोज-सैन्धवैः ॥ ८६ ॥

कालानुसारी-त्रिकटु-त्रिफलाल-मनःशिलाः ।

सफेनाश्छागदुग्धेन राज्यान्ध्ये वर्त्तयो हिताः ॥ ८७ ॥

रसक्रियेत्यादि । तार्क्ष्यं रसाञ्जनम् । घृतादियोगाद् द्रवीकृतैः तार्क्ष्यादिभी-रसक्रियारूपमञ्जनमित्यर्थः । दोषान्ध्यं रात्र्यन्धम् । कौन्ती रेणुकः । स्रोतोजं सौवीराञ्जनं कालानुसारी तगरम् । आलं हरितालम् । फेनः समुद्रफेनः छागदुग्धेन पिष्ट्वेत्यर्थः । ८३—८७

सन्निवेश्य यकृन्मध्ये पिप्पलीरदहन् पचेत् ।

ताः शुष्का मधुना घृष्टा निशान्ध्ये श्रेष्ठमञ्जनम् ॥ ८८ ॥

सन्निवेश्येत्यादौ यकृन्मध्य इति छागयकृन्मध्ये इत्याहुः। अन्यत्रापि छागयकृन् मध्य इत्युक्तम् । ८८

खादेच्च प्लीह-यकृती माहिषे तैलसर्पिषा ॥ ८६ ॥
घृते सिद्धानि जीवन्त्याः पल्लवानि च भक्षयेत् ।
तथातिमुक्तकैरण्ड-शेफाल्यभीरुजानि च ।

खादेदित्यादौ तैलसर्पिषेत्यत्र सिद्धे इति शेषः। अतिमुक्तो माधवी-लता । ८९—९० –

भृष्टं घृतं कुम्भयोनेः पत्रैः पाने च पूजितम् ॥ ९० ॥

भृष्टमित्यादौ कुम्भयोनेरित्यगस्त्याख्य वृक्षस्य ।—९०

धूमराख्याम्लपित्तोष्णविदाहे जीर्णसर्पिषा ।
स्निग्धं विरेचयेच्छीतैः पीतैर्द्विहाद्य सर्वतः ॥ ९१ ॥

धूमरादीनां चतूर्णां व्याधीनां चिकित्सामाह धूमराख्येत्यादि। शोक-ज्वरेत्यादिना धूमरः पूर्व्वमुक्तः। भृशमम्लाशनाद्दोषैरित्यादिना तु अम्लविदाह-उक्तः । भवेत् पित्तविदग्धाख्येत्यादिना च पित्तविदाहः । त्रिदोषरक्तसम्पूर्ण इत्यादिना तु उष्णविदाहोऽप्युक्त इति। शीतैरिति शीतवीर्य्यैः । ९१

गोशकृद्रसदुग्धाज्यैर्विपक्वं शस्यतेऽञ्जनम् ।
स्वर्णगैरिक-तालीस-चूर्णावापा रसक्रिया ॥ ९२ ॥

गोशकृदित्यादि। एषु धूमरादिषु यदञ्जनं देयं तत्सर्व्वं गोशकृद्रसादिभि-र्विपक्वं कृत्वा देयमित्यर्थः। स्वर्णगैरिकादिचूर्ण मावापः प्रक्षेपो यस्याम् । ९२

मेदा-शावरकानन्ता-मञ्जिष्ठा-दार्व्वि-यष्टिभिः ।
क्षीराष्टांशं घृतं पक्वं सतैलं नावनं हितम् ॥ ९३ ॥
तर्पणं क्षीरसर्पिः स्याद्शाम्यति शिराव्यधः ॥ ९४ ॥

मेदेत्यादौ दार्व्वी दारुहरिद्रा छान्दसत्वाद्ध्रस्वः। क्षीरस्याष्टौ अंशा भागा-यत्र। यमकमेतत्। क्षीरोत्थं सर्पिः क्षीरसर्पिः। यद्येवंकृतेऽपि न शाम्यति तदा शिराव्यधः कार्य्यः । ९३—९४

चिन्ताभिघात-भी-शोक-रौक्ष्यात् सोत्कटकासनात् ।
विरेक-नस्य-वमन पुटपाकादिविभ्रमात् ॥ ९५ ॥

विरुद्धाहार-भ्रमणात्-क्षुत्तृष्णादिविधारणात् ।
अक्षिरोगावसाने च वर्ज्येत्तिमिररोगवत् ॥ ९६ ॥
यथास्वं तत्र युञ्जीत दोषादीन् वीक्ष्य भेषजम् ॥ ९७ ॥

विरुद्धेत्यादि । विरेकादीनां विभ्रमोऽयथावद् विधानम् । अक्षिरोगाणामवसानम् अवसानं निवृत्तिस्तस्मात् । ९५—९७

सूर्योपरागानल-विद्युदादि-विलोकनेनोपहतेक्षणस्य ।
सन्तर्पणं स्निग्धहिमादि कार्यं तथाञ्जनं हेम घृतेन घृष्टम् ॥ ९८ ॥

सूर्योपरागेत्यादि । हेमेति मारित-पुटित-सुवर्णचूर्णम् । ९८

चक्षूरक्षायां सर्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥ ९९ ॥

नेत्ररक्षायां सर्वदा प्रयत्नवता भाव्यमित्याह चक्षूरक्षायामित्यादि । ९९

त्रिफला रुधिरस्रुतिर्विशुद्धिर्मनसो निर्वृतिरञ्जनञ्च नस्यम् ।
शकुनाशनता सपादपूजा घृतपानञ्च सदैव नेत्ररक्षा ॥ १०० ॥

चक्षुष्यं वर्गमाह त्रिफलेत्यादि । शकुनाशनता पक्षिमांसभोजनम् । पादपूजा पादाभ्यङ्गादिरूपा । घृतपानमिति पुराणघृतपानम् । यदाह सुश्रुतः "घृतं पुराणं त्रिफलां शतावरीम्" इत्यादि (उ १७ अ) नेत्ररक्षाहेतुत्वेन नेत्ररक्षेत्यर्थः । १००

अहितादशनात्सदानिवृत्तिर्भृशभास्वच्चलसूक्ष्मवीक्षणाच्च ।
मुनिना निमिनोपदिष्टमेतत् परमं रक्षणमीक्षणस्य पुंसाम् ॥१०१॥

इति श्रीमद्वाग्भटविरचितायां अष्टाङ्गहृदयसंहितायाम्
उत्तरतन्त्रे तिमिरप्रतिषेधो नाम त्रयोदशोऽध्यायः ॥

निदानपरिवर्जनरूपां चिकित्सामाह अहितादित्यादि । १०१

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे)
उत्तरे तन्त्रे त्रयोदशोऽध्यायः ।

विदग्धाहार-वमनात्-क्षुत्तृष्णादिविधारणात् ।
अक्षिरोगावसानाच्च पश्येत्तिमिररोगवत् ॥ ९६ ॥
यथास्वं तत्र युञ्जीत दोषादीन् वीक्ष्य भेषजम् ॥ ९७ ॥

चिन्तेत्यादि । विरेकादीनां विभ्रमोऽयथावद् विधानम् । अक्षिरोगाणामवसानम् असम्यङ् निवृत्तिस्तस्मात् । ९५—९७

सूर्य्योपरागानल-विद्युदादि-विलोकनेनोपहतेक्षणस्य ।
सन्तर्पणं स्निग्धहिमादिकार्य्यं तथाञ्जनं हेम घृतेन घृष्टम् ॥ ९८ ॥

सूर्य्योपरागेत्यादि । हेमेति मारित-पुटित-सुवर्णचूर्णम् । ९८

चक्षूरक्षायां सर्व्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥ ९९ ॥

नेत्ररक्षायां सर्व्वदा प्रयत्नवता भाव्यमित्याह चक्षूरक्षायामित्यादि । ९९

त्रिफला रुधिरस्रुतिर्व्विशुद्धिर्म्मनसो निर्वृतिरञ्जनञ्च नस्यम् ।
शकुनासनता सपादपूजा घृतपानञ्च सदैव नेत्ररक्षा ॥ १०० ॥

चक्षुष्यं वर्गमाह त्रिफलेत्यादि । शकुनाशनता पक्षिमांसभोजनम् । पादपूजा पादाभ्यङ्गादिरूपा । घृतपान मिति पुराणघृतपानम् । यदाह सुश्रुतः "घृतं पुराणं त्रिफलां शतावरीम्" इत्यादि (उ १७ अ) नेत्ररक्षाहेतुत्वेन नेत्ररक्षेत्यर्थः । १००

अहितादशनात्सदानिवृत्तिर्भृशभास्वच्चलसूक्ष्मवीक्षणाच्च ।
मुनिना निमिनोपदिष्टमेतत् परमं रक्षणमीक्षणस्य पुंसाम् ॥१०१॥

इति श्रीमद्वाग्भटविरचितायामष्टाङ्गहृदय संहितायाम्
उत्तरतन्त्रे तिमिरप्रतिषेधो नाम त्रयोदशोऽध्यायः ॥

निदाण परिवर्जनरूपां चिकित्सामाह अहितादित्यादि । १०१

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे)
उत्तरे तन्त्रे त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः ।

अथातो लिङ्गनाशप्रतिषेधं व्याख्यास्यामः
इति हस्माहु राजे यादयो महर्षयः ॥ १ ॥

यद्यपि तिमिरावस्थाविशेषत्वाल्लिङ्गनाशस्य तिमिर-प्रतिषेध-मध्यएव लिङ्गनाश-चिकित्सितं वक्तुं युज्यते तथापि बहुवक्तव्यत्वाल्लिङ्गनाश चिकित्सितं पृथगध्यायेनाह अथात इत्यादि । १

विध्येत् सुजातं निष्पेक्ष्यं लिङ्गनाशं कफोद्भवम् ।
आवर्त्तक्यादिभिः षड्भिर्विवर्जितमुपद्रवैः ॥ २ ॥

सुजातमिति सुष्ठु घनीभूततया जातम् अतएव निष्पेक्ष्यं दर्शनशक्तिरहितम् कफोद्भवमिति लिङ्गनाश विशेषणम् । साध्यत्वं स्फोरणत्वम् । अन्येषां लिङ्गनाशाना मसाध्यत्वेनोक्तत्वात् । आवर्त्तकाद्यः षड्पद्रवा वक्ष्यमाणाः । २

सोऽसञ्जातो हि विषमो दधिमस्तुनिभस्तनुः ।
शलाकयाऽवकृष्टोऽपि पुनरूर्ध्वं प्रपद्यते ॥ ३ ॥
करोति वेदनां तीव्रां दृष्टिञ्च स्थगयेत् पुनः ।
श्लेष्मलैः पूर्यते चाशु सोऽन्यैः सोपद्रवैश्चिरात् ॥ ४ ॥
श्लैष्मिको लिङ्गनाशो हि सितत्वाच्छ्लेष्मणः सितः ।
तस्यान्यदोषाभिभवात् भवत्यनीलता गदः ॥ ५ ॥

असम्यग्जातस्य लिङ्गनाशस्य लक्षणं तद्रूपदोषञ्चाह सोऽसञ्जात इत्यादि । विषम इति न समसंस्थानः, तनुरित्यघनः । स्थगयेदित्यावृणुयात् । श्लेष्मलै-रित्यादि । स इति श्लैष्मिको लिङ्गनाशः श्लेष्मलैराहारै राशु शीघ्रं पूर्यते । चिरादिति चिरकालेन च सोपद्रवोऽपि भवति । उपद्रवाश्च वक्ष्यमाणाः । तस्यान्य-दोषाभिभवादिति तस्य श्लेष्मणोऽन्यदोषेण वातादिना अभिभवात् । ३—५

तत्रावर्त्तचला दृष्टिरावर्त्तकमस्यशा सिता ।

आवर्त्तकादीनां षण्णामुपद्रवाणां लक्षणमाह तत्रेत्यादि । आवर्त्तचलेति आवर्त्तो जलभ्रमिः तद्वच्चला भवति तथा अरुणा सिता वा भवति । ६—

बिलेर्पा वा व्यहाद्वास्य कार्थमुं कान्ति सेवयेत् ।
वातघ्नैः सप्तमे त्वह्नि सर्व्वथैवाक्षि मोचयेत् ॥ २२ ॥
यन्त्रणामनुरुध्येत दृष्टेरास्थैर्य्यलाभतः ।
रूपाणि सूक्ष्मदीप्तानि सहसा नावलोकयेत् ॥ २३ ॥

दृष्टिस्थैर्य्यलाभपर्य्यन्तमेव यन्त्रणाम् आहाराचारनियम मनुरुध्येत कुर्य्यात् । १५—२३

शोफरागरुजादीनामधिमन्थस्य चोद्भवः ।
अहितैर्व्वधदोषाच्च यथास्वं तानुपाचरेत् ॥ २४ ॥
कल्किताः सघृता दूर्व्वायवगैरिकसारिवाः ।
मुखालेपे प्रयोक्तव्या रुजारागोपशान्तये ॥ २५ ॥
ससर्पास्तिलास्तद्वन्मातुलुङ्गरसाप्लुताः ।

शोफेत्यादि । यथास्वमिति वातादिप्रत्यनीकादिभिः । मुखालेप इति नेत्र समीपे, रागो अक्षिलौहित्यम् । तद्वदिति मुखालेपाद् रुजारागोपशमना-इत्यर्थः । २४—२६—

पयस्या-सारिवापत्र-मञ्जिष्ठा-मधुयष्टिभिः ॥ २६ ॥
अजाक्षीरयुतैर्लेपः सुखोष्णः शर्म्मकृत्परम् ।

पयस्येत्यादौ पयस्या क्षीरकाकोली, पत्रं तेजपत्रम् । —२६—२७—

रोध्र-सैन्धव-मृद्वीका-मधुकैश्छागलं पयः ॥ २७ ॥
शृतमाश्च्योतनं योऽयं रुजारागविनाशनम् ।

लोध्रेत्यादौ आश्च्योतन मक्षिपूरणम् । —२७—२८ —

मधुकोत्पलकुष्ठैर्व्वा द्राक्षा-लाक्षा-सितान्वितैः ॥ २८ ॥

मधुकेत्यादि । अत्रापि मधुकादिभिः शृतं छागलं पयः आश्च्योतनविधिना रुजारागविनाशनं भवतीत्यर्थः । — २८

वातघ्नसिद्धे पयसि शृतं सर्पिश्चतुर्गुणे ।
पद्मकादिप्रतीवापं सर्व्वकर्म्मसु शस्यते ॥ २९ ॥

वातघ्नेत्यादि । वातघ्नो भद्रदार्वादिः । सर्व्वकर्मस्विति नस्यपानादिषु । २९

शिरां तथानुपशमे स्निग्धस्विन्नस्य मोक्षयेत् ।

मन्थोक्ताश्च क्रियां कुर्य्याद्

शिरामित्यादौ शिरामिति ललाटीम् । न केवलं शिरां मोक्षयेत् किन्तु मन्थोक्तामित्यधिमन्थोक्तां क्रियाञ्च कुर्य्यात् । ३०—

वेधे रूढेऽञ्जनं मृदु ॥ ३० ॥

वेध इत्यादि । मृदु अतीक्ष्णम् । — ३०

आढ़कीमूल-मरिच हरिताल-रसाञ्जनैः ।

विद्धेऽक्ष्णि सगुड़ा वर्त्तिर्योज्या दिव्याम्बुपेषिता ॥ ३१ ॥

आढकीत्यादौ आढकी तुवरी । ३१

जाती-शिरीष-धव-मेषविषाण-पुष्प-वंडूर्य्यमौक्तिकफलं पयसा सुपिष्टम् ।
आजेन ताम्रममुना प्रतनु प्रदिग्धं सप्ताहतः पुनरिदं पयसैव पिष्टं ॥३२॥
पिण्डाञ्जनं हितमनातपशुष्कमक्ष्णि विद्धे प्रसादजननं बलकृच्च दृष्टेः ।

जातीत्यादौ जाती मालती, मेषविषाणो मेषश्रृङ्गी पुष्पशब्दस्य जात्यादिभिश्चतुर्भिः प्रत्येकमन्वयः । मौक्तिकफलं मुक्तैव । आजेनेति पयोविशेषणम् । प्रतनु अघनं यथा स्यात्तथा प्रदिग्धं लिप्तम् । पयसैव पिष्टमिति प्रकरणादाजेनैव । ३२—३३—

स्रोतोजविद्रुमशिलाप्पतिफेनतीक्ष्णै-(१)
रस्यैवतुल्यमुदितंगुणकल्पनाभिः ॥ ३३ ॥

इति श्रीमद् वाग्भटविरचिताया मष्टाङ्गहृदय संहितायाम्
उत्तर तन्त्रे लिङ्गनाश प्रतिषेधो नाम चतुर्दशोऽध्यायः ।

स्रोतोजेत्यादि । स्रोतोजं रसाञ्जनम्, विद्रुमः प्रवालः शिला मनःशिला, अप्पतिफेनः समुद्रफेनः, तीक्ष्णं मरिचम् । सुश्रुतेऽप्युक्तम्—

"स्रोतोजं विद्रुमं फेनः सागरस्य मनःशिला ।
मरिचानि च तै वर्त्तीः कारयेद्वापि पूर्ववत् ॥" इति (उ १७ अं)

अस्यैव तुल्य मुदितं गुणकल्पनाभि रिति गुणकल्पनाभिः अस्य पूर्व्वोक्तयोगस्य तुल्यमित्यर्थः । त्रिफलेत्यादि योगोऽधिकम् अरुणादिभि रपि न धृतः ।

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे चतुर्दशोऽध्यायः ।

---

(१) पत्र थिफिनेति वा पाठः ।

पञ्चदशोऽध्यायः।

अथातः सर्वाक्षिरोगविज्ञानीयं व्याख्यास्यामः

इति ह स्माहुरात्रेयादयो महर्षयः ॥ १ ॥

वर्त्मसन्ध्यादिप्रतिविभागात् व्याधीनभिधाय सम्प्रति सर्वाक्षिगतरोगानभिधातुं सर्वाक्षिरोगविज्ञानीयमाह अथात इत्यादि । १

वातेन नेत्रेऽभिष्यण्णे नासानाहोऽल्पशोफता ।

शङ्खाक्षिभ्रूललाटस्य तोदस्फुरणभेदनम् ॥ २ ॥

शुष्काल्पा दूषिका शीतमच्छमश्रु चलाचलम् ।

निमेषोन्मेषणं कृच्छ्राज्जन्तूनामिव सर्पणम् ॥ ३ ॥

विकम्पोऽक्ष्णोऽक्षिपारुष्यम्

चतुर्विधोऽभिष्यन्दो भवति वातपित्तकफरक्तभेदेन। तत्र प्रथमं वातेनेत्यादिना वाताभिष्यन्दमाह। नासानाहो यत्र नासा पिहितेव भवति। जन्तूनामिति पिपीलिकानाम्। उत्तरमप्युक्तम्। २—४—

सोऽभिष्यन्द उपेक्षितः ।

अधिमन्थो भवेत्तत्र कर्णयोर्नदनं भ्रमः ॥ ४ ॥

अरणेव च मथ्यन्ते ललाटाक्षिभ्रुवादयः ।

वाताभिष्यन्दस्योपेक्षया वाताधिमन्थजनकत्वमाह सोऽभिष्यन्द इत्यादि । सर्वेति वाताधिमन्थे अरणी मन्थनदण्डकः । —४—५—

हताधिमन्थः सोऽपि स्यात् प्रमादात्तेन वेदनाः ॥ ५ ॥

अनेकरूपा जायन्ते व्रणो दृष्टौ च दृष्टिहा ।

अधिमन्थोऽप्युपेक्षया हताधिमन्थो भवतीत्याह हताधिमन्थ इत्यादि । सोऽधिमन्थोऽपि प्रमादादनवधानादुपेक्षितः सन् हताधिमन्थाख्यो व्याधिर्भवति । तस्य लक्षणमाह तेनेत्यादि । अनेकरूपा इति तोदभेदादिकाः । —५—६—

मन्याक्षिशङ्खतो वायुरन्यतो वा प्रवर्तयेत् ॥ ६ ॥

व्यथां तीव्रामपैच्छिल्यरागशोफं विलोचनम् ।

सङ्कोचयति पक्ष्माणि सोऽन्यतोवातसंज्ञितः ॥ ७ ॥

मन्येत्यादिनाऽन्यतोवाताख्यं व्याधिमाह। मन्ये इति ग्रीवापश्चाद्भाग-शिराद्वयम्। सहन्वर्थं तसि। अन्यतो नेत्रकर्णशङ्खादन्यत्र दृष्टे। स्यंत्र इति भ्रुवा परिगतम्। सोऽन्यतोवातसंज्ञित इति अन्यत्र मन्यादौ या तस्य कारणस्यावस्थानम् अन्यत्र चाक्षि संकोच इत्यन्यतोवातः। —६—७

तद्वच्चेत्र भवेज्जिह्मसूनं वातविपर्यये।

तद्वदित्यादिना वातपर्ययं माह। वातपर्ययाख्ये रोगे नेत्रं तद्वदिति अन्यतोवात इव भ्रवैच्छिल्यरागं शोफं तथा कदाचित् जिह्मं कुटिलं कदाचिद्सूनं सङ्कुचितं स्यात्। ८—

दाहो धूमायनं शोफः श्यावता वर्त्मनो बहिः ॥ ८ ॥

अन्तःक्लेदोऽश्रुपीतोष्णं रागः पीताभदर्शनम्।

क्षारोक्षितक्षताक्षत्वं पित्ताभिष्यन्दलक्षणम् ॥ ९ ॥

दाह इत्यादिना पित्ताभिष्यन्द लक्षणमाह। धूमायनं धूमस्येवोद्गमनम् रागश्च तथा पीताभदर्शनं पीतवर्णलोचनम्। क्षारोक्षिताक्षताक्षत्वमिति क्षारोक्षितक्षतमिव अक्षि यस्य स क्षारोक्षितक्षताक्षः। क्षारोक्षितक्षतवदक्षि वेदना भवतीत्यर्थः। —८—९

ज्वलदङ्गारकीर्णाभं यकृत्पिण्डसमप्रभम्।

अधिमन्थे भवेन्नेत्रम्

पित्ताभिष्यन्दोपेक्षया जातस्य पैत्तिकाधिमन्थस्य लक्षणमाह ज्वलदङ्गारेत्यादिना नेत्रमित्यन्तेन। १०—

स्यन्दे तु कफसम्भवे ॥ १० ॥

जाड्यं शोफो महान् कण्डूर्निद्रान्नानभिनन्दनम्।

सान्द्रस्निग्धबहुश्वेतपिच्छावद्दूषिकाश्रुता ॥ ११ ॥

स्यन्देत्वित्यादिना कफाभिष्यन्दलक्षणमाह। निद्रा भवति तथा अन्ने न अभिनन्दनम् अनिच्छा। दूषिका नेत्रमलम्। ११

अधिमन्थे नतं कृष्णमुन्नतं शुक्लमण्डलम्।

प्रसेको नासिकाध्मानं पांशुपूर्णमिवेक्षणम् ॥ १२ ॥

श्लैष्मिकाभिष्यन्दोपेक्षया जातस्य श्लैष्मिकाधिमन्थस्य लक्षणमाह अधिमन्थ-

इत्यादि। कृष्णमिति कृष्णमण्डलं रक्तं भवति। शुक्लमण्डलन्तु रक्तं भवती-त्यर्थः। नासिकाया नासापुटस्य ध्मानं कफपूर्णता। १२

रक्ताश्रु राजीदूषीकनेत्रमण्डलदर्शनम्।
रक्तस्यन्देन नयनं सपित्तस्यन्दलक्षणम् ॥ १३ ॥

रक्ताभिष्यन्द लक्षणमाह रक्ताश्रुराजीत्यादि। राजी रेखा रक्तानां लोहिता-नाम् अश्रुराजीदूषिकानां तथा रक्तस्य च नेत्रमण्डलस्य दर्शनं भवति। तथा नयनं पित्ताभिष्यन्दलक्षणसहितं भवति। १३

मन्थेऽक्षि ताम्रपर्य्यन्तमुत्पाटनसमानरुक्।
रागेण बन्धुकनिभं ताम्यति स्पर्शनाक्षमम् ॥ १४ ॥
असृङ् निमग्नारिष्टाभकृष्णमग्न्याभदर्शनम्।

रक्ताभिष्यन्दोपेक्षया जातस्याधिमन्थस्य लक्षणमाह मन्थ इत्यादि। रक्तजे अधिमन्थे ताम्रः पर्यन्तभागो यस्य ईदृशमक्षि भवति। असृङ्निमग्नारिष्टाभ-कृष्णमिति असृजि रक्ते निमग्नो अरिष्टो लशुनकोषः (१) तत्सदृशः कृष्णभागो यस्य एवम्भूत मक्षि स्यात्। अग्न्याभदर्शनमिति ज्वलदङ्गारसदृशं दृष्टिमण्डलं भवति। १४–१५–(२)

अधिमन्था यथास्वञ्च सर्व्वे स्यन्दाधिकव्यथाः ॥ १५ ॥

चतुर्णामधिमन्थानां समासेनापि लक्षणमाह अधिमन्था इत्यादि। यथास्व-मिति यस्माद् यस्मादभिष्यन्दाद् योयोऽधिमन्थो जायते तत्र तत्राभिष्यन्दे या या

---

(१) अत्रारिष्टशब्दस्य लशुनकोषस्योऽर्थश्चिन्त्यः। कृष्णमिति कृष्णमण्डलसदृङ् निमग्ना-रिष्टाभं स्यात्। तत्र कृष्णमण्डलस्य लशुनकोषाभता न कथञ्चिदपि सङ्गच्छते। अरिष्टं नाम फलविशेषः यस्य च बीजं कृष्णमण्डलवद् गोलाकारं गाढचिक्कणकृष्णवर्णं च भवति। फल-केशप्रोक्षणनिर्मितवस्त्रपरिष्कारणाय व्यवह्रियते 'रीठा' इति वङ्गीयैर्भाष्यते। डल्हणोऽपि अरिष्टकं कृष्णफलं 'रीठा' इति लोके इत्याह। रक्तेनाधिमन्थितं नयनं बहुशो दृष्टचरमस्माभिः तत्र तु कृष्णमण्डलं बन्धुजीवपुष्पप्रतीकाशं शोणितवर्णं लोहितोपप्लुतश्च भवतीति तन्मध्ये कृष्ण-मण्डलं रीठाबीजमिव शोणितमध्ये प्रतिभाति इति सुधीभिर्विभाव्यम्।

(२) अग्न्याभदर्शन मित्यस्य व्याख्यानं नातिसमीचीनम्। सुश्रुते तु पश्यत्यग्निनिभा दिशः इत्यस्यैव प्रतिवचन मेतत् भवितु मर्हति। व्याख्यानेनानेन अन्यथार्थं ग्राहयतीति लक्षणीयम्। न खलु कस्मिन्नपि व्याधौ दृष्टिमण्डलस्य ज्वलदङ्गार सदृशत्वं भवति। नाकुलान्ध्य-व्याधौ दृष्टिमण्डले पीतभावेऽपि न तत्र ज्वलदङ्गारसदृशत्वमुपलभ्यते।

स्तोदभेदादिरूपा वेदना उक्ता स्तदपेक्षया तज्जन्येऽधिमन्थे तास्ता वेदना अधिका भवन्ति । एवं पित्तज-कफज-रक्तजा आधिमन्था बोध्याः । —१५

शङ्खदन्तकपोलेषु कपाले चातिरुक्कराः ।

शङ्खेत्यादि । वातिकोऽधिमन्थः शङ्खे अतिरुक्करो भवति । पैत्तिको दन्ते श्लैष्मिकः कपोले रक्तजस्तु शिरःकपालेऽतिरुक्कर इति यथासंख्यं योजयन्ति ।१६—

वातपित्तातुरं घर्षतोदभेदोपदेहवत् ॥ १६ ॥
रूक्षदारुणवर्त्माक्षिकृच्छ्रोन्मीलननिमीलनम् ।
विकूणनं विशुष्कत्वं शीतेच्छा शूलपाकवत् ॥ १७ ॥
उक्तः शुष्काक्षिपाकोऽयं

वातपित्तातुरमित्यादिना शुष्काक्षिपाकमाह । यत्र व्याधौ अक्षि वातपित्ताभ्यामातुरं पीडितं कृत्वा घर्षादिमद् भवति, घर्षः करकरिका, उपदेहः पिच्छोङ्किका । तथा वायुना शोषणाद् रुक्षं तथा दारुणं कठिनञ्च वर्त्म यस्य ईदृशं यत्राक्षि भवति । तथा यत्र च अक्षि कृच्छ्रोन्मीलनिमोलनं भवति उन्मीलनमुन्मेषः । तथा यत्र च अक्षि विकूर्णनादिमद् भवति विकूर्णनं विशेषेण अतिशयेन निमीलनं तेन कदाचिदुन्मीलनञ्च भवतीति सूच्यते । अयमुक्तप्रकारो व्याधिः शुष्काक्षिपाक उक्तः । अयञ्च व्याधि र्यद्यपि सरक्तवातेन जन्यते यदाह करालः—

"कुणितं खर वर्त्माक्षि कृच्छ्रोन्मीलाविलेक्षणम् ।
सदाहः सासृजो वातात् शुष्कपाकान्वितं वदेत् ॥" इति

तथापि पित्तरक्तयो स्तुल्यलिङ्गत्वेन वातपित्तोत्तरमित्यपि न विरुध्यते । वातपित्तोत्तर मित्यपि पाठः । —१६—१८—

सशोफः स्याच्चिभिर्म्मलैः ।
सरक्तै स्तत्र शोफोऽतिरुग्दाहष्ठीवनादिमान् ॥ १८ ॥
पक्वोदुम्बरसङ्काशं जायते शुक्लमण्डलम् ।
अश्रूष्णशीतविशदपिच्छलाच्छघनं मुहुः ॥ १९ ॥

प्रभूतशोथाल्पशोथभेदेन द्विविधनेत्रपाकमाह सशोफः स्यादित्यादि । अयमक्षिपाकः शोथसहित श्चे त्तदा सरक्तै र्मलै र्वातादिभि र्भवति । तत्र सशोफाक्षिपाके शोथः अतिशयेन रुग्दाहादियुतः स्यात् । तथा शुक्लमण्डलञ्च पक्वोदुम्बर-

सङ्घातं जायते तथा अश्रु च मुहुः कदाचिच्छीतं कदाचिदुष्णं कदाचिच्च विशदं कदाचिच्च पिच्छिलं तथा कदाचिदच्छं कदाचिच्च घनं स्यात्। —१८—१९

अल्पशोफेऽल्पशोफस्तु पाकोऽन्यैर्लक्षणैस्तथा।

अल्पशोफ इत्यादि। अल्पोऽल्पप्रदेशयः शोफो यत्र ईदृशो नेत्रपाकोऽल्पशोफ इत्युच्यते। स च नेत्रपाको अन्यैरिति शोफव्यतिरिक्तैः पूर्वोक्तलक्षणै रुपलक्षितः स्यात्। सुश्रुतेऽप्युक्तम्—

"शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे।" इति (उं ६ अं) २०—

अक्षिपाकात्यये शोफः संरम्भः कलुषाश्रुता ॥ २० ॥

कफोपदिग्धमसितं सितं प्रक्लेदरागवत्।

दाहो दर्शनसंरोधो वेदनाश्चानवस्थिताः ॥ २१ ॥

अक्षिपाकात्ययमाह अक्षिपाकात्यय इत्यादि। संरम्भः शोथः; असितं कृष्णमण्डलं कफोपदिग्धं भवति। सितमण्डलमपि प्रक्लेदि रागवद् भवति। —२०—२१

अन्नसारोऽम्लतां नीतः पित्तरक्तोल्बणैर्मलैः।

शिराभिर्नेत्रमारूढः करोति श्यावलोहितम् ॥ २२ ॥

सशोफदाहपाकाश्रु भृशञ्चाविलदर्शनम्।

अम्लोषितोऽयमित्युक्ता गदाः षोड़श सर्व्वगाः ॥ २३ ॥

अम्लोषितमाह अन्नसार इत्यादि। अन्नसार इत्यन्नरसः। षोड़शेति चत्वारोऽभिष्यन्दाः चत्वारश्चाधिमन्थाः हताधिमन्थान्यतोवात-वातपर्य्यय-शुष्काक्षिपाक-सशोफाक्षिपाकाल्पशोफाक्षिपाकाक्षिपाकात्ययाम्लोषिता इति षोड़शेत्यर्थः।२२—२३

हताधिमन्थमेतेषु सान्निपाकात्ययं त्यजेत् ॥ २४ ॥

हताधिमन्थमित्यादि। एतेषु षोड़शव्याधिषु मध्ये। २४

वातोद्भूतः पञ्चरात्रेण दृष्टिं सप्ताहेन श्लेष्मजातोऽधिमन्थः।

रक्तोत्पन्नो हन्ति तद्वत्त्रिरात्रान् मिथ्याचारात् पैत्तिकः सद्य एव ॥२५॥

इति श्रीमद् वागभटविरचितायाम् अष्टाङ्गहृदयम् संहितायाम्

उत्तरतन्त्रे सर्व्वाक्षि रोगविज्ञानीयो नाम पञ्चदशोऽध्यायः।

अधिमन्थो यदात्मको यावता कालेन मिथ्याचाराद्दृष्टिं हन्ति तदाह वातोद्भूत इत्यादि। सद्यः शब्देनात्र त्रिरात्र मुच्यते। वैद्यप्रसारके हि सद्यः शब्दस्य

त्रिरात्रवाचकत्वेन दृष्टत्वात् । कालावधिरत्र व्याधिप्रभावात् । सुश्रुते पुनरन्यथैव कालावधिरुच्यते यथा "हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात् ।
षड्रात्राद्वातिकोवैनिहन्यात् मिथ्याचारात् पैत्तिकः सद्य एव ॥" इति
(उ ६ अ) उभयमपि प्रमाणं स्मृतिद्वैधवत् । २५

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः ।

अथातः सर्वगाक्षिरोगप्रतिषेधं व्याख्यास्यामः
इति हस्माहुरात्रेयादयो महर्षयः ॥ १ ॥
प्राग्रूप एव स्यन्देषु तीक्ष्णगण्डूषनावनम् ।
कारयेदुपवासञ्च कोपादन्यत्र वातजात् ॥ २ ॥

पूर्व्वाध्यायोक्तानां व्याधीनां क्रमेण प्रतिकारमभिधातुं सर्व्वगाक्षिरोग-प्रतिषेध-उच्यते । स्यन्देष्विति अभिष्यन्देषु । १—२

दाहोपदेहरागाश्रुशोफशान्त्यै विड़ालकम् ।
कुर्य्यात् सर्व्वत्र पत्रैलामरिचस्वर्णगैरिकैः ॥ ३ ॥
सरसाञ्जन-यष्ट्याह्व-नत-चन्दन-सैन्धवैः ।

दाहेत्यादौ उपदेहो दूषिका । विड़ालकमिति अक्ष्णोर्बहिर्लेपो विड़ालक इति शालाक्य-प्रसिद्धसंज्ञा । सर्व्वत्राभिष्यन्दे पत्रादिभिः सैन्धवान्तैः विड़ालकं कुर्य्यात् । ३—४—

सैन्धवं नागरं तार्क्ष्यं घृष्टं मण्डेन सर्पिषः ॥ ४ ॥
वातजे घृतभृष्टं वा योज्यं शवरदेशजम् ।

सामान्याभिष्यन्दे विड़ालकमभिधाय वातादिभेदेनापि तमाह सैन्धवमित्यादि । वातजे सैन्धवादित्रयं सर्पिर्मण्डेनाघनीभावान् निघृष्य विड़ालकं कुर्य्यादित्यर्थः । तार्क्ष्यघृष्टमितिपाठे सैन्धवं नागरञ्च तार्क्ष्यं रसाञ्जनाख्यप्रस्तरे निघृष्टमित्यर्थः ।

अत्रैव योगान्तरमाह घृतभृष्टं वा योज्यं शवरदेशजमिति शवरदेशजं शावर-रोध्रम् । —४—५—

मांसी-पद्मक-काकोली-यष्ट्याह्वैः पित्तरक्तयोः ॥

मनोह्वा-फलिनी-क्षौद्रैः कफे

पित्तरक्तयोरभिष्यन्दयोर्विडालकमाह मांसीत्यादि । अत्रापि विडालकं कुर्य्यादिति पूर्व्वोक्तं सम्बध्यते एवं वक्ष्यमाणेऽपि । —५—

सर्व्वैस्तु सर्व्वजे ॥ ५ ॥

त्रैदोषिकाभिष्यन्दचिकित्सामाह सर्व्वैस्तु सर्व्वज इति । सर्व्वैरिति प्रत्येक वाताद्युक्त विडालकद्रव्यैः । —५

सितमरिचभागमेकं चतुर्म्मनोह्वं द्विरष्टशावरकम् ।

सञ्चूर्ण्य वस्त्रबद्धं प्रकुपितमात्रेऽवगुण्डनं नेत्रे ॥ ६ ॥

सितमरिचेत्यादौ सितमरिचं रक्तशोभाञ्जनवीजम् एवं सर्व्वत्र । मनोह्वा मनःशिला तस्याश्चत्वारो भागाः । द्विरष्टशावरकमिति शावरलोध्रस्य षोड़श भागाः । प्रकुपितमात्रे नेत्रे हितमिति शेषः । ६

आरण्याश्छगलरसे पटावबद्धाः सुस्विन्ना नखवितुषीकृताः कुलत्थाः ।

तच्चूर्णं सकृदवचूर्णनान्निशीथे नेत्राणां विधमति सद्य एव कोपम् ॥ ७ ॥

आरण्या इत्यादौ कुलत्थाः वन्यकुलत्थ इत्यर्थः । छगलरसे इति छागक्षीरे स्विन्ना इत्यन्वयः । ७

व्योषाभया-तुत्थक-यष्टि-रोध्रैः पुटी सुसूक्ष्मैः श्लथवस्त्रबद्धैः । (१)

ताम्रस्थधान्याम्लनिमग्नमूर्त्तिररत्तिं जयत्यक्षिणि नैकरूपाम् ॥ ८ ॥

व्योषेत्यादि । व्योषादिभिः श्लक्ष्णचूर्णीकृतैः कृता पुटो 'पुड़िया' इति ख्याता, किं विशिष्टा श्लथं यथा स्यात्तथा वस्त्रेण बद्धा, पुनः किं विशिष्टा ताम्रपात्रस्थं धान्याम्लं काञ्जिकं तत्र निमग्ना मूर्त्तिः शरीरं यस्याः सा तथा अयं योग आश्चयोतनरूपः । ८

षोड़शभिः सलिलपलैः पलं तथैकं कटंकटेर्य्याः सिद्धम् ।

सेकोऽष्टभागशिष्टः क्षौद्रयुतः सर्व्वदोषकुपिते नेत्रे ॥ ९ ॥

षोड़शभिरित्यादि । कटंकटेरी दारुहरिद्रा । ९

(१) रोध्रैः सूतीति वा पाठः ।

वातपित्तकफसन्निपातजां नेत्रयोर्बहुविधामपि व्यथाम् ।
शीघ्रमेव जयति प्रयोजितः शिग्रुपल्लवरसः समाक्षिकः ॥ १० ॥

वातपित्तेत्यादि । शिग्रुः शोभाञ्जनः । प्रयोजित इति पूरणविधया । १०

तरुणमुरुबुकपत्रं मूलञ्च विभिद्य सिद्धमाजे क्षीरे ।
वाताभिष्यन्दरुजं सद्यो विनिहन्ति सक्तुपिण्डिका कोष्णा ॥ ११ ॥

तरुणमित्यादि । उरुबुकः एरण्डः । तरुणं पत्रं पल्लवः । विभिद्येति पृथक्तया किंवा विभिद्येति संक्षुद्य । तरुणोरुबुकपत्रेण तन्मूलेन क्षीरपरिभाषया सिद्धम् आजं क्षीरं सेचनविधया वाताभिष्यन्दरुजां हन्तीत्यर्थः । किंवा उरुबुकपत्रं तथा मूलञ्च आजक्षीरे संसाध्य नयने न्यस्तं सत् वाताभिष्यन्दरुजां हन्तीत्यर्थः । सक्तुपिण्डिका नयने न्यस्ता सती वाताभिष्यन्दरुजां हन्ति । ११

आश्च्योतनं मारुतजे क्वाथो बिल्वादिभिर्हितः ।
कोष्णः सहैरण्ड-जयाबृहती-मधुशिग्रुभिः ॥ १२ ॥ (१)

आश्च्योतनमित्यादि । आश्च्योतन मक्षिसेकः बिल्वादि महत्पञ्चमूलम् । जया जयन्ती । सहैरण्डेत्यादि बिल्वादिविशेषणम् । तेन एक एवायं योगः । यदाह जतुकर्णः—"महापञ्चमूलकरुबुकशिग्रु तर्कारीसिंहीक्वाथः" इति । तन्त्रान्तरे तु केवलबिल्वादिक्वाथनाऽप्ययं योगो दृश्यते । तथाहि—

"पूरणं तीव्रशूलघ्नं तथा बिल्वादिजाम्भसा ।
एरण्डेन शृतं क्षीरं आजंवाश्च्योतने हितम् ॥" इति

किन्तु योगद्वयपक्षे सहैरण्डेति जयादिविशेषणम् नतु बिल्वादिविशेषणम् । एकयोगत्वप्रसङ्गात् । १२

ह्रीवेरवक्रशार्ङ्गेष्टोदुम्बरत्वक्षु साधितम् ।
साम्भसा पयसाजेन शूलाश्च्योतनमुत्तमम् ॥ १३ ॥
[रोध्रामलकरसाञ्जन बिम्बितिका पत्रतुवरिका तुल्यैः ।
आश्च्योतनमिदमक्ष्णोः प्रसह्य सद्यः प्रकोपहरम् ॥]

ह्रीवेरेत्यादि । ह्रीवेरं बालकं, वक्रं तगरपादिका, शार्ङ्गेष्टा गुञ्जामूलम् । रोध्रेत्यादि पद्यमक्षिकम् । १३

---

(१) जटेति वा पाठः ।

मञ्जिष्ठा-रजनी-लाक्षा-द्राक्षा-द्धिमधुकोत्पलैः ।
क्वाथः सशर्करः शीतः सेचनं रक्तपित्तजित् ॥ १४ ॥

मञ्जिष्ठेत्यादिना रक्तपित्ताभिष्यन्द चिकित्सामाह । रक्तपित्तजन्यनेत्र-रोगजिदित्यर्थः । अनेन चक्षुःपूरणम् । रजन्यत्र दारुहरिद्रा उक्तंहि चरके

"द्राक्षादार्व्वीसमञ्जिष्ठा लाक्षाद्धिमधुकोत्पलैः ।
क्वाथ सशर्करःशीतः पूरणं रक्तपित्तनुत् ॥" इति (चि॑ २६ अ)

रक्तपित्त-जन्य-नेत्ररोगजिदित्यर्थः । १५

कशेरुयष्ट्याह्वरजस्तान्तवे शिथिलं स्थितम् ।
अप्सु दिव्यासु निहितं हितं स्यन्देऽस्रपित्तजे ॥ १५ ॥

कशेर्वित्यादौ तान्तव इति वस्त्रे । इदमप्याश्च्योतनम् । उक्तं हि

"कशेरुमधुकानाञ्च चूर्णमम्बर संवृतम् ।
न्यस्तमप् स्वान्तरीक्षासु हितमाश्च्योतनं भवेत् ॥" इति (सु॑ उ॑ १२ अ॑) १५

पुण्ड्र-यष्टी-निशा-पुटोप्लुता स्तन्ये सशर्करे । (१)
छागदुग्धेऽथवा दाहरुग्रागाश्रुनिवर्त्तनी ॥ १६ ॥

पुण्ड्रेत्यादि । पुण्ड्रं प्रपौण्डरीककाष्ठम् । यष्टी यष्टीमधु, निशा हरिद्रा एषां चूर्णैः पूर्व्ववत् श्लथवस्त्रबद्धा पुटी । इदमप्याश्च्योतनम् । १६

श्वेतरोध्रं समधुकं घृतभृष्टं सुचूर्णितम् ।
वस्त्रस्थं स्तन्यमृदितं पित्तरक्ताभिघातजित् ॥ १७ ॥

श्वेतरोध्रमित्यादि । इदमप्याश्च्योतनम् । १७

नागर-त्रिफला-निम्ब-वासा-रोध्ररसं कफे ।
कोष्णमाश्च्योतनं

नागरेत्यादिना कोष्णमित्यन्तेन कफाभिष्यन्दचिकित्सामाह । १८—

मिश्रैर्भेषजैः सान्निपातिके ॥ १८ ॥

मिश्रैरित्यादिना सान्निपात चिकित्सितम् । मिश्रैरिति प्रत्येकवाताद्युक्तभेषजैरेव मिश्रीभूतैः । —१८

---

(१) निशामूतीति वा पाठः ।

सर्पि : पुराणं पवने पित्ते शर्करयान्वितम् ।
व्योषसिद्धं कफे पीत्वा यवक्षारावचूर्णितम् ।
स्रावयेद्रुधिरं भूयस्ततः स्निग्धं विरेचयेत् ॥ १९ ॥

सर्पिरित्यादि । पुराणं दशवर्षस्थितम् । स्रावयेदिति शिरामोक्षेण । तदुक्तं सुश्रुते—"पुराणसर्पिषा स्निग्धौ स्यन्दाधिमन्थपीड़ितौ ।
स्वेदयित्वा यथान्यायं शिरामोक्षेण योजयेत् ॥" इति (उं ९ अं) शिरा च लालाटी तदुक्तम्
"अधिमन्थादिषु भिषक् लालाटीं व्यधयेत् सिराम् ।" इति १९

आनूपवेशवारेण शिरोवदनलेपनम् ।
उष्णेन शूले दाहे तु पयः सर्पिर्युतैर्हिमैः ॥ २० ॥

आनुपेत्यादि । आनूपमांसकृतवेशवारेण । शूल इति च्छेदः । हिमैरिति शीतवीर्य्यैश्चन्दनोशीरादिभिः । २०

तिमिरप्रतिषेधश्च वीक्ष्य युञ्ज्याद्यथायथम् ।
अयमेव विधिः सर्व्वो मन्थादिष्वपि शस्यते ॥ २१ ॥

तिमिरप्रतिषेधमित्यादि । यथायथमिति यद्दोषजन्ये तिमिरे यच्चिकित्सित-मुक्तं तद्दोषजन्ये स्यन्देऽपि तच्चिकित्सितमित्यर्थः । मन्थादिष्वपीत्यादि शब्दाद् अन्यतोवातादीनां ग्रहणम् । यदाह सुश्रुतः
"रोगोयश्चान्यतोवातो यश्च मारुतपर्य्ययः ।
अनेनैव विधानेन भिषक् तावपि साधयेत् "॥ इति (उं ९ अं) २१

अशान्ते सर्व्वथा मन्थे भ्रुवोरुपरि दाहयेत् ॥ २२ ॥

अनया क्रियया यद्यधिमन्थो न शाम्यति तदा दाहं कुर्य्यादित्याह अशान्त-इत्यादि । २२

रूप्यं रूक्षेण गोदध्ना लिम्पेन्नीलत्वमागते ।
शुष्के तु मस्तुना वर्त्तिर्व्वातात्स्यामयनाशिनी ॥ २३ ॥

अञ्जनान्याह रूप्येत्यादि । रूक्षेण सररहितेन गोदध्ना लिप्ते रूप्ये अनन्तरं नीलत्व मागते सति तदनु शुष्के सति अनन्तरं मस्तुना कृता वर्त्तिर्वातज नेत्रामय-नाशनी भवति । २३

सुमनःकोरका शङ्खस्त्रिफला मधुकं बला ।
पित्तरक्तापहा वर्त्तिः पिष्टा दिव्येन वारिणा ॥ २४ ॥

सुमनः कोरका इत्यादि । सुमनः कोरका जातीमुकुलानि शङ्खः शङ्खनाभिः । २४

सैन्धवं त्रिफला व्योषं शङ्खनाभिः समुद्रजः ।
फेनः शैलेयकंसर्जौ वर्त्तिः श्लेष्माक्षिरोगनुत् ॥ २५ ॥

सैन्धवमित्यादि । समुद्रजः फेन इत्यन्वयः । २५

प्रपौण्डरीकं यष्ट्याह्वं दार्व्वीं चाष्टपलं पचेत् ।
जलद्रोणे रसे पूते पुनः पक्वे घने क्षिपेत् ॥ २६ ॥
पुष्पाञ्जनाद्दशपलं कर्षञ्च मरिचात्ततः ।
कृतश्चूर्णोऽथवा वर्त्तिः सर्व्वाभिष्यन्दसम्भवान् ॥ २७ ॥
हन्ति रागरुजाघर्षान् सद्यो दृष्टिं प्रसादयेत् ।
अयं पाशुपतो योगो रहस्यं भिषजां परम् ॥ २८ ॥

प्रपौण्डरीकमित्यादि । अष्टपलमिति प्रत्येकम् । अत्र 'पुष्पाञ्जनाद्दशपलं' तथा 'कर्षञ्चमरिचात्ततः' इति प्रमाद पाठः । यदाह चरकः—

"प्रपौण्डरीकं यष्ट्याह्वं दार्व्वीञ्चाष्टपलोन्मिताम् ।
जले पक्त्वा रसे पूते पुनः पक्वे रसे घने ॥
कर्षञ्च श्वेतमरिचाज्जातिपुष्पाञ्जवात् पलम् ।
चूर्णं दत्त्वा त्रिदोषघ्नी वर्तिर्दृष्टिप्रसादनी ॥" इति (चिं २६ अं) श्वेतमरिचं शोभाञ्जन वीजम् । २६—२८

शुष्काक्षिपाके हविषः पानमक्ष्णोश्च तर्पणम् ।
घृतेन जीवनीयेन नस्यं तैलेन चाणुना ।
परिषेको हितश्चात्र पयः कोष्णं ससैन्धवम् ॥ २९ ॥
सर्पिर्युक्तं स्तन्यपिष्टमञ्जनं हि महौषधम् ।
वसा वानूपसत्त्वोत्था किञ्चित्सैन्धवनागरा ॥ ३० ॥
घृताक्तान् दर्पणे घृष्टान् केशान् मल्लकसम्पुटे ।
दग्ध्वाज्यपिष्टा लोहस्था सा मषी श्रेष्ठमञ्जनम् ॥ ३१ ॥

शुष्कपाक चिकित्सामाह शुष्काक्षिपाक इत्यादि । हविषः पानमिति पुराण-

घृतादेः। जीवनीयगणसिद्धेन घृतेन अक्ष्णोस्तर्पणम्। तथाणुना तैलेन नस्यविधावुक्तेन नस्यं वा कार्य्यम्। परिषेके च ईषत्सैन्धवयुक्तं कोष्णं पयोन्वितम्। सुश्रुते कोष्णमित्यत्र शीतमिति पठ्यते। महौषधं शुण्ठी। वसेत्यादिक मञ्जनान्तरम्, सुश्रुतेऽप्युक्तम्—

"वसा वानूपजलजा सैन्धवेन समायुता।
नागरोन्मिश्रिता किञ्चित् शुष्कपाके तदञ्जनम्॥ इति (उ'९ अ')

घृताक्तानित्यादि। आदौ घृताक्तान् पश्चाद्दर्पणे घृष्टानित्यर्थः। २९—३१

सशोफे चाल्पशोफे च स्निग्धस्य व्यधयेच्छिराम्।
रेकः स्निग्धैः पुनर्द्राक्षापथ्याकाथत्रिवृद्धृतैः॥ ३२॥
श्वेतरोध्रं घृतभृष्टं चूर्णितं तान्तवस्थितम्।
उष्णाम्बुना विमृदितं सेकः शूलहरः परम्॥ ३३॥
दार्व्वीप्रपौण्डरीकस्य क्वाथो वाश्च्योतने हितः।
सन्धारांश्च प्रयुञ्जीत घर्षरागाश्रुरुग्धरान्॥ ३४॥

सशोफाल्पशोफयो रक्षिपाकयोश्चिकित्सामाह सशोफ इत्यादि। तान्तवे इति वस्त्रे। सन्धारानिति सन्धारसंज्ञकान् वक्ष्यमाणानञ्जनयोगान्। घर्षः करकारिका। ३२—३४

ताम्रं लोहे मृतघृष्टं प्रयुक्तं नेत्रे सर्पिर्धूपितं वेदनाघ्नम्।

तानेव योगानाह ताम्रम् इत्यादि। सर्पिषा धूपितम्। ३५—

ताम्रे घृष्टो गव्यदध्नः सरो वा युक्तः कृष्णासैन्धवाभ्यां वरिष्ठः॥३५॥

ताम्रे घृष्ट इत्यादि। वरिष्ठ इति श्रेष्ठः। —३५

शङ्खं ताम्रे स्तन्यघृष्टं घृताक्तैः शम्याः पत्रैर्धूपितं तद्यवैश्च।
नेत्रे युक्तं हन्ति सन्धारसंज्ञं क्षिप्रं घर्षं वेदनाश्चातितीव्राम्॥ ३६॥
उडुम्बरफलं लोहघृष्टं स्तन्येन धूपितम्।
साज्यैः शमीच्छदैर्दाह-शूल-रागाश्रु-हर्षजित्॥ ३७॥
शिग्रुपल्लवनिर्य्यासः सुघृष्टस्ताम्रसम्पुटे।
घृतेन धूपितो हन्ति शोफघर्षाश्रुवेदनाः॥ ३८॥

तिलाढ्यस्ता सुत्कपाल' कांस्ये पूर्वं सुधूपितम् ।

विस्रवत्स्वेषु ताम्रपर्णीपञ्चमूलकमुरारजित् ॥ ३९ ॥

सधूपितमित्यादि । सर्वां सर्वेति सर्वां स्वकालस्यातः स्विन्नपरिस्रावरक्ता । तिलाढ्येति तिलकल्कान्वयस्या । ३९—३९

स्वभ्यरेखाङ्किते केते विपतैषधवेद्दवे ।

सर्वेषामन्यतेवं कार्यं किंपरं वाजयेत्र तैः ॥ ४० ॥

स्वभ्यरेखेत्यादि । किं परं वाजयेत्र तैरिति वाक्यपाद् सर्वं तैः स्वभ्यरेखेभिः बोधयेत् । ४०

तालोदयत्र-वरदा-वत-लोहरसाञ्जनैः ।

त्रातो-गुग्गुल-कासीस-सैन्धवैस् वर्णितैः ॥ ४१ ॥

ताम्रपात्रस्थ स्वाद्वं धारयेत् पेषयेत्ततः ।

सूक्ष्मेष्वथ गुटिकाः कुर्यांच्छायाविशोषिताः ॥ ४२ ॥

ताः स्तन्यपृष्टा नयने शोफ-कण्डूविनाशनाः ॥ ४३ ॥

श्याङ्गोत्थसम्युक्तं ताम्रजोऽञ्जनैरकालिकात्म् ।

शस्यालकरञ्जनात्पूरितं शोफरक्तप्रशुत् ॥ ४४ ॥

तालोदयत्रेत्यादि । वरदा त्रिफला, लोहरसः लोहचूर्णं वा, वर्तं समर पादिका । व्याघ्री कण्टकारी, त्वक् गुडत्वक् । अजाक्षीरेण कल्कितं पिष्टम् । ४१—४४

प्रक्लोषिते स्तुत्रांत त्रिफलापिण्डस्याभवम् ।

अक्लोषित चिकित्सामाह अक्लोषित इत्यादि । त्रिफलापिण्डस्य साधने चिकित्सितम् । ४५—

उपक्लिष्टाः कटुत्रिफलाक्षिवर्त्मोत्थाः कुकूणकाः ॥ ४५ ॥

पक्ष्मोपरोधः शुष्काक्षिपाकः पूयालसो विसः ॥

पोथकश्चाक्लोषितोऽल्पाल्पस्यन्दवन्त्यादिकाविकाम् ॥ ४६ ॥

स्तेऽल्पाद्दशरिल्याख्या शेषिकालानुबन्धिकाः ।

इदानीं पुनर्विशतोषां महागदानां चिरकालानुबन्धेन विस्रवत्स्वेषाह उपक्लिष्ट इत्यादि । पित्तः 'कटुत्रा' इतिख्याताः कफोत्-क्लिष्टपित्तोपक्लिष्ट-रक्तोपक्लिष्ट-

निचयोत्क्लिष्टाः इति चत्वार उत्क्लिष्टाः। बिस इति बिसवर्त्म। अल्पाख्य इति अल्पशोफोऽक्षिपाकः। स्यन्दमन्था विनाऽनिलादिति अनिलाद्विना स्यन्दा-अधिमन्थाः। तेन स्यन्दत्रयमधिमन्थत्रयञ्चेति षट्। तेन सर्व्वैर्मिलित्वा अष्टादशेत्यर्थः। —४५—४७—

चिकित्सितं पृथक्तेषां स्वं स्वमुक्त्वाथ वक्ष्यते ॥ ४७ ॥
पिल्वीभूतेषु सामान्यात्

चिकित्सितमित्यादि। तेषामष्टादशानां पृथगिति पार्थक्येन स्वं स्वं चिकित्सितं पूर्व्वमुक्त्वा अथानन्तरं पिल्वीभूतेषु चिरकालानुबन्धात् पिल्वतां गतेषु तेष्वष्टादशसु सामान्यात् सर्व्वसाधारण्यं यच्चिकित्सितं तद् वक्ष्यते। —४७।४८—

अथ पिल्वाक्षिरोगिणः।

स्निग्धस्य छर्दितवतः शिराविद्धहृतासृजः ॥ ४८ ॥
विरिक्तस्य च वर्त्मानु निर्लिखेदविशुद्धितः।

तदेव साधारण चिकित्सितमाह अथेत्यादि। निर्लिखेदिति प्रतिसारयेत्। अविशुद्धितः इति छर्दितवत इत्यादिभिः सम्बध्यते। —४८—४९

तुत्थकस्य पलं श्वेतमरिचानि च विंशतिः ॥ ४९ ॥
त्रिंशता काञ्जिकपलैः पिष्ट्वा ताम्रे निधापयेत् ॥
पिल्वानपिल्वान् कुरुते बहुवर्षोत्थितानपि ॥ ५० ॥
तत्सेकेनोपदेहांस्तु कण्डूशोफांश्च नाशयेत्।

तुत्थकस्येत्यादि। श्वेतमरिचानि शोभाञ्जनबीजानि विंशतिरित्याकृतिमानेन। पिल्वानिति पिल्वरोगिणः। अपिल्वानिति पिल्वरोगरहितान्। तत्सेकेनेति तुत्थादि सहित काञ्जिक सेकेन। उपदेहः पिच्छोड़िका। —४९—५१—

करञ्जबीजं सुरसं सुमनः कोरकाणि च ॥ ५१ ॥
संक्षुद्य साधयेत् क्वाथे पूते तत्र रसक्रिया ॥
अञ्जनं पिल्लभैषज्यं पक्ष्मणाञ्च प्ररोहणम् ॥ ५२ ॥

करञ्जबीजमित्यादि। सुरसः पर्णाशः, सुमनःकोरकानि जातीमुकुलानि तत्र रसक्रियेति तस्मिन् क्वाथे पुनः पाकाद् घनीभूते सति रसक्रिया भवतीत्यर्थः। —५१—५२

रसाञ्जनं सर्जरसो रीतिपुष्पं मनःशिला ।
समुद्रफेनं लवणं गैरिकं मरिचानि च ।
अञ्जनं मधुना पिष्टं क्लेदकण्डूघ्नमुत्तमम् ॥ ५३ ॥
अभयारसपिष्टं वा तगरं पिल्लनाशनम् ।
भावितं वस्तमूत्रेण सस्नेहं देवदारु च ॥ ५४ ॥

रसाञ्जनमित्यादि । रीतिपुष्पमिति पाठे रीतिपुष्पं पुष्पाञ्जनम् । अत्र पेषणं मधुनैव । वस्तमूत्रेणेति छागमूत्रेण । सस्नेहमिति सघृतम् । ५३—५४

सैन्धव-त्रिफला-कृष्णा-कटुका-शङ्खनाभयः ।
सताम्ररजसो वर्त्तिः पिल्लशुक्रकनाशिनी ॥ ५५ ॥

सैन्धवेत्यादि । कटुका कटुरोहिणी । ५५

पुष्पकाशीसचूर्णो वा सुरसारसभावितः ।
ताम्रे दशाहं तत् पैल्लघ्नपक्ष्मशातजिदञ्जनम् ॥ ५६ ॥

पुष्प काशीसेत्यादौ सुरसा ग्राम्य तुलसी । अन्येतु पर्णाशभेद इत्याहुः । ५६

अलश्च सौवीरकमञ्जनञ्च ताभ्यां समं ताम्ररजश्च सूक्ष्मम् ।
पिल्लेषु रोमाणि निषेवितोऽसौ चूर्णः करोत्येकशलाकयापि ॥ ५७ ॥

अलमित्यादौ अलं हरितालं, सौवीरकमञ्जनं सौवीराञ्जनम् । ५७

लाक्षा-निर्गुण्डी-भृङ्ग-दार्व्वीरसेन
श्रेष्ठं कार्पासं भावितं सप्तकृत्वः ।
दीपः प्रज्वाल्यः सर्पिषा तत्समुत्था
श्रेष्ठा पिल्लानां रोपणार्थे मषी सा ॥ ५८ ॥

लाक्षेत्यादि भृङ्गो भृङ्गराजः श्रेष्ठं कार्पासमिति कीटाद्यनुपहतं किंवा मुख्यं तेन वन-कार्पास-निरासः । ५८

वर्त्मावलेखं बहुशस्तद्वच्छोणितमोक्षणम् ।
पुनः पुनर्व्विरेकश्च नित्यमाश्च्योतनाञ्जनम् ॥ ५९ ॥
नावनं धूमपानञ्च पिल्लरोगातुरो भजेत् ।
पूयालसे त्वशान्तेऽन्तर्दाहः सूक्ष्मशलाकया ॥ ६० ॥

वर्त्मावलेख मित्यादौ तद्वदिति बहुशः । ५९।६०

चतुर्णवतिरित्यक्ष्णोर्हेतुलक्षणसाधनैः ।
परस्परमसङ्कीर्णाः कार्त्स्न्येन गदिता गदाः ॥ ६१ ॥

चतुर्णवति रित्यादि । वर्त्माश्रयाश्चतुर्विंशतिः, सन्ध्याश्रया नव, शुक्लाश्रया स्त्रयोदश, कृष्णाश्रयाः पञ्च, दृष्टिगताः सप्तविंशतिः, सर्व्वगतास्तु षोड़शेति मिलित्वा चतुर्णवतिरित्यर्थः । ६१

सर्व्वदा च निषेवेत स्वस्थोऽपि नयनप्रियः ।
पुराणयव-गोधूम-शालि-षष्टिक-कोद्रवान् ॥ ६२ ॥
मुद्गादीन् कफपित्तघ्नान् भूरिसर्पिःपरिप्लुतान् ।
शाकञ्चैवंविधं मांसं जाङ्गलं दाड़िमं सिताम् ॥ ६३ ॥
सैन्धवं त्रिफलां द्राक्षां वारि पाने च नाभसम् ।
आतपत्रं पदत्राणं विधिवद्दोषशोधनम् ॥ ६४ ॥

इदानीं चक्षुष्याणि द्रव्याण्याह सर्व्वदेत्यादि । शाकञ्चैवंविधमिति कफपित्तघ्नं भूरिसर्पिः परिप्लुतमित्यर्थः । ६२—६४

वर्जयेद्वेगसंरोधमजीर्णाध्यशनानि च ।
शोक-क्रोध-दिवास्वप्न-निशाजागरणानि च ।
विदाहि विष्टम्भकरं यच्चेहाहारभेषजम् ॥ ६५ ॥

वर्जनीयान्याह वर्जयेदित्यादि । ईहा चेष्टा । ६५

द्वे पादमध्ये पृथुसन्निवेशे शिरे गते ते बहुधा च नेत्रे ।
ता म्रक्षणोद्वर्त्तनलेपनादीन् पादप्रयुक्तान्नयनं नयन्ति ॥ ६६ ॥
मलोष्णसंघट्टनपीड़नाद्यैस्ता दूषयन्ते नयनानि दुष्टाः ।
भजेत् सदा दृष्टिहितानि तस्मादुपानदभ्यञ्जनधावनानि ॥ ६७ ॥

इति श्रीमद् वागभट विरचितायाम् अष्टाङ्गहृदयसंहितायाम् उत्तरतन्त्रे सर्व्वगाक्षिरोग प्रतिषेधो नाम षोड़शोऽध्यायः ।

पादाभ्यञ्जादीनां चक्षुष्यत्वं सोपपत्तिकमाह द्वे पादमध्य इत्यादि । अत्र यत्तदोर्नित्यसम्बन्धाद् ये इति बोध्यम् । ये द्वे शिरे पादमध्ये तिष्ठतः ते शिरे बहुधा बहुप्रकारीभूय नेत्रे गते प्राप्ते, अतस्ताः शिराः पादप्रयुक्तान् म्रक्षणादीन्

अभ्यङ्गादीन् नयनं नयन्ति प्रापयन्ति। पृथुसन्निवेशो इति महामूले। तासां पादगतशिराणां दुष्ट्या नयनदुष्टिश्च भवतीत्याह मलोष्णेत्यादि। ६६।६७

इति (श्रीमत् शिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे षोडशोऽध्यायः।

सप्तदशोऽध्यायः।

अथातः कर्णरोगविज्ञानीयं व्याख्यास्यामः
इति हस्माहुरात्रेयादयो महर्षयः॥ १॥
अवश्यायजलक्रीडाकर्णकण्डूयनैर्मरुत्।
मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः॥ २॥
प्राप्य श्रोत्रशिराः कुर्याच्छूलं स्रोतसि वेगवत्।
अर्द्धावभेदकं स्तम्भं शिशिरानभिनन्दनम्॥ ३॥
चिराच्च पाकं पक्वन्तु लसीकामल्पशः स्रवेत्।
श्रोत्रं शून्यमकस्माच्च स्यात् सञ्चारविचारवत्॥ ४॥

इन्द्रियगत-विकार-निरुपण प्रसङ्गात् कर्णरोगविज्ञानीय उच्यते। तत्रावश्याये-त्यादिना वातिक-कर्णशूलमाह। मिथ्यायोगेन शब्दस्येति मिथ्यायोगशब्देनात्र शब्दस्यासम्यग्योगमात्रं गृह्यते तेनायोगातियोगमिथ्यायोगानां ग्रहणम् तेच सूत्रस्थानोक्ता अनुसरणीयाः। वेगः पुनः पुनः भवनं तद्युक्तं शूलमित्यर्थः। शिशिरानभिनन्दनं शीतद्वेषः। पक्वन्तु श्रोत्रं लसीकां पिच्छिलं द्रवभागं स्रवेत्। सञ्चारविचारवदिति सञ्चरन्तीति सञ्चाराः कीटास्तेषां विचारः परिसर्पणं तद्वद् भवतीत्यर्थः। १—४

शूलं पित्तात् सदाहोषा शीतेच्छा श्वयथुं ज्वरम्।
आशु पाकं प्रपक्वञ्च सपीतलसिकास्रुतिः।
सालसीका स्पृशेद्यद्यत्तत्तत्पाकमुपैति च॥ ५॥

पैत्तिक कर्णशूलमाह शूलमित्यादि। उषा समीपस्थेनेव वह्निना दाहः।

दाहादिभिर्ज्वरान्तैः सह वर्तते इति । आशुपाकमिति अत्रापि श्रोत्रमिति सम्बध्यते । ५

कफाच्छिरोहनुग्रीवागौरवं मन्दता रुजः ।
कण्डूः श्वयथुरुष्णेच्छा पाकाच्छ्वेतघना स्रुतिः ॥ ६ ॥

कफज कर्णशूलमाह कफादित्यादि । अत्रापि शूल इति सम्बध्यते । कफाद् यच्छूलं तत्रेत्यर्थः । ६

करोति श्रवणे शूलमभिघातादि दूषितम् ।
रक्तं पित्तसमानार्त्ति किञ्चिदाधिकलक्षणम् ॥ ७ ॥

रक्तजशूलमाह करोतीत्यादि । किञ्चिदाधिकलक्षणमिति पैत्तिकशूलापेक्षया किञ्चिदधिकं लक्षणं रक्तस्रावादि भवतीत्यर्थः । ७

शूलं समुदितैर्दोषैः सशोफज्वरतीव्ररुक् ।
पर्य्यायादुष्णशीतेच्छं जायते श्रुतिजाड्यवत् ॥ ८ ॥
पक्वं सितासितारक्तघनपूयप्रवाहि च ।

साम्निपातिक शूल लक्षणमाह शूलमित्यादि । ८।९—

शब्दवाहिशिरासंस्थे शृणोति पवने मुहुः ॥ ९ ॥
नादानकस्माद्विविधान् कर्णनादं वदन्ति तम् ।
श्लेष्मणानुगतो वायुर्नादो यो समुपेक्षितः ॥ १० ॥
उच्चैः कृच्छ्रात् श्रुतिं कुर्य्याद्बधिरत्वं क्रमेण च ।

बाधिर्य्यमाह श्लेष्मणेत्यादि । —९—११—

वातेन शोषितः श्लेष्मा स्रोतोलिम्पेत्ततो भवेत् ॥ ११ ॥
रुग् गौरवं पिधानञ्च स प्रतीनाहसंज्ञितः ।

प्रतीनाहमाह वातेनेत्यादि । स्रोत इति कर्णस्रोतः । —११।१२—

कण्डूशोफौ कफाच्छ्रोत्रे स्थिरौ तत् संज्ञया स्मृतौ ॥ १२ ॥

कर्णकण्डूं कर्णशोफञ्चाह कण्डूशोफावित्यादि । यद्यपि कर्णशोफं शोफार्शोऽर्बुद-मीरितमित्यनेनात्रैव वक्ष्यति तथापि कफशोफः प्रायोभावित्वात् पृथक्कृत्वोच्यते । तत्संज्ञयेति कर्णकण्डुसंज्ञया कर्णशोफ संज्ञया च । —१२

कफो विदग्धः पित्तेन सरुजं नीरुजन्त्वपि ।
घनपूतिबहुक्लेदं कुरुते पूतिकर्णकम् ॥ १३ ॥

कफ इत्यादिना पूतिकर्णमाह । विदग्ध इति विलीनः । सुश्रुतेऽप्युक्तम् "स्रोतः स्थिते श्लेष्मणि पित्ततेजसा विलीयमाने भृशसंप्रतापिते । अवेदनो वाथ सवेदनो वा घनं स्रवेत् पूति स पूतिकर्णकः ॥" इति (उ॰ २० अं॰) १३

वातादिदूषितं श्रोत्रं मांसासृक् क्लेदजा रुजम् ।
खादन्तो जन्तवः कुर्य्युस्तीव्रां स कृमिकर्णकः ॥ १४ ॥

कृमिकर्णकमाह वातादीत्यादि । क्लेदजा जन्तवः क्रिमयः मांसासृक् खादन्तः रुजं कुर्य्यु रित्यन्वयः । १४

श्रोत्रकण्डूयनाज्जाते क्षते स्यात् पूर्व्वलक्षणः ।
विद्रधिः पूर्व्ववच्चान्यः

कर्णविद्रधिमाह श्रोत्रेत्यादिना विद्रधिरित्यन्तेन । पूर्व्वलक्षण इति पूर्व्वोक्त-क्षतजविद्रधिलक्षणयुक्त इत्यर्थः । अन्यो दोषजो यो विद्रधिः सोऽपि पूर्व्ववत् निदान स्थानोक्त दोषजविद्रधिवत् । सुश्रुतेऽप्युक्तम्

"क्षताभिघातप्रभवस्तुविद्रधिर्भवेत्तथा दोषकृतः परः पुनः ।
सरक्तपीतारुणमस्रमास्रवेत् प्रतोदधूमायनदाहचोषवान् ॥" इति (उ॰ २० अं॰) १५—

शोफोऽर्शोऽर्बुदमीरितम् ॥ १५ ॥

शोफार्शोऽर्बुदमीरितमिति । अत्रापि पूर्व्ववदिति सम्बध्यते । शोफादीनां लक्षणं यत्पूर्व्व मीरितमुक्तं तद्वदत्रापि शोफादिकं ज्ञेयमित्यर्थः । —१५

तेषु रुक्पूतिकर्णत्वं बधिरत्वञ्च बाधते ।

कर्णसम्भवानामेषां विशिष्टं लिङ्गमाह तेष्वित्यादि । १६—

गर्भेऽनिलात् संकुचिता शष्कुली कुचिकर्णकः ॥ १६ ॥

कुचिकर्णकमाह गर्भ इत्यादि । गर्भेऽभ्यन्तरे कर्णशष्कुली यदि वातात् सङ्कुचिता भवति तदा कुचिकर्णक इत्युच्यते । —१६

एको नीरुगनेको वा गर्भे मांसांकुरः स्थिरः ।
पिप्पली पिप्पलीमानः

कर्णपिप्पलीमाह एकइत्यादिना पिप्पलीमान इत्यन्तेन । स्थिर इत्यचलः । पिप्पलीप्रमाणो यो मांसाङ्कुरः कर्णे भवति स पिप्पलीत्युच्यते । १७—

सन्निपाताद्विदारिका ॥ १७ ॥

सवर्णः सरुजः स्तब्धः श्वयथुः स उपेक्षितः ।
कटुतैलनिभं पक्वः स्रवेत् कृच्छ्रेण रोहति ॥ १८ ॥
सङ्कोचयति रूढ़ा च सा ध्रुवं कर्णशष्कुलीम् ।

सन्निपातादित्यादिना विदारिकामाह विदारिका स्वरूपमाह सवर्ण इत्यादि । स श्वयथुरुपेक्षितः सन् पक्वा स्रुत्वा कटुतैलनिभं स्रवति । सा च विदारिका रूढा सती कर्णशष्कुलीं सङ्कोचयति । —१७—१९—

शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम् । १९ ॥

पालीशोषमाह शिरास्थ इत्यादि । तदाह्वयमिति पालीशोष संज्ञकम् । —१९

कृशा दृढ़ा च तन्त्रीवत् पाली वातेन तन्त्रिका ।

तन्त्रीमाह कृशेत्यादि । तन्त्री वीणादिसम्बद्धा "तान्ति" रिति ख्याता तद्वत् कृशा दृढा च कर्णपाली तन्त्रिकेत्युच्यते । २०—

सुकुमारे चिरोत्सर्गात् सहसैव प्रवर्द्धिते ॥ २० ॥
कर्णे शोफः सरुक्पाल्यामरुणः परिपोटवान् ।
परिपोटः स पवनात्

सुकुमार इत्यादिना पवनादित्यन्तेन परिपोटमाह । सुकुमार इति हेतुगर्भ-विशेषणं तेन सौकुमार्य्याद्धेतो चिरकालं व्याप्य कर्णवर्द्धनत्यागात् अतः सहसैव वर्द्धितुमारब्धे कर्णे यः शोथः स परिपोट इत्युच्यते । परिपोटस्तु त्वचः किञ्चिद् विदरणं तद्युक्तम् । —२०।२१—

उत्पातः पित्तशोणितात् ॥ २१॥

गुर्व्वाभरणभाराद्यैः श्यावो रुग्दाहपाकवान् ।
श्वयथुः स्फोटपिड़कारागोषक्लेदसंयुतः ॥ २२ ॥

उत्पात इत्यादिना क्लेदसंयुत इत्यन्तेनोत्पातमाह । श्यावत्वं यद्यपि

वातादेव भवति तथापि रक्तपित्तजन्ये उत्पाते वातानुबन्धाद् व्याधिप्रभावाद्वा ज्ञेयम्। —२१।२२

पाल्यां शोफोऽनिलकफात् सर्व्वतो निर्व्यथः स्थिरः।

स्तब्धः सवर्णः कण्डूमानुन्मन्थो गल्लिरश्च सः ॥ २३ ॥

उन्मन्थमाह पाल्यामित्यादि। उन्मन्थस्यैव संज्ञान्तरमाह गल्लिरश्च स इति। २३

दुर्व्विद्धे वर्द्धिते कर्णे सकण्डूदाहपाकरुक्।

श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ॥ २४ ॥

दुःखवर्द्धनमाह दुर्विद्ध इत्यादि। दुर्विद्धो भूत्वा यः कर्णो वर्द्धितो भवति तत्र यः श्वयथुः स दुःखवर्द्धन इत्युच्यते। २४

कफासृक्कृमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः।

लेह्याख्याः पिडकास्ता हि लिह्युः पालीमुपेक्षिताः ॥ २५ ॥

कफासृगित्यादिना लेह्यमाह। लिह्युरिति निर्मांसीकुर्य्युः। २५

पिप्पलीसर्व्वजं शूलं विदारी कुचिकर्णकः।

एषामसाध्या याप्यैका तन्त्रिकान्यांस्तु साधयेत्।

पञ्चविंशतिरित्युक्ताः कर्णरोगा विभागतः ॥ २६ ॥

इति श्रीमद् वागभटविरचितायाम् अष्टाङ्गहृदय संहितायाम् उत्तर तन्त्रे कर्णरोग विज्ञानीयो नाम सप्तदशोऽध्यायः।

उक्तानां कर्णरोगाणां साध्यादि विभागमाह पिप्पलीत्यादि। एषां मध्ये पिप्पल्यादयश्चत्वारोऽसाध्याः प्रत्याख्येयाः। एका तन्त्रिका याप्या। अन्यान् विंशतिं साधयेत्। पञ्चविंशतिरिति कर्णशूलानि वात-पित्त कफ शोणित सन्निपात-भेदेन पञ्च। तथा कर्णनाद-बाधिर्य्य-प्रतीनाह-कण्डू-शोफ-पूतिकर्ण-क्रिमिकर्ण-कर्णविद्रधि कर्णार्शः- कर्णार्बुद-कुचिकर्ण पिप्पली विदारिका-पालीशोष-तन्त्री-परिपोटोत्पातोन्मन्थ-दुःखवर्द्धन-लेह्य इति पञ्चविंशतिः। —२६

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे सप्तदशोऽध्यायः।

अष्टादशोऽध्यायः।

अथातः कर्णरोगप्रतिषेधं व्याख्यास्यामः

इति ह स्माहुरात्रेयादयो महर्षयः ॥ १ ॥

कर्णशूले पवनजे पिबेद्रात्रौ रसाशितः।

वातघ्नसाधितं सर्पिः कर्णं स्विन्नञ्च पूरयेत् ॥ २ ॥

पत्राणां पृथगश्वत्थबिल्वार्कैरण्डजन्मनाम्।

तैलसिन्धूत्थदिग्धानां स्विन्नानां पुटपाकतः ॥ ३ ॥

रसैः कवोष्णैस्तद्वच्च मूलकस्यारलोरपि।

उक्तानां कर्णरोगाणां क्रमेण चिकित्सा अभिधातुं कर्णरोग प्रतिषेध उच्यते। तत्र वातिक-कर्णशूल-चिकित्सा माह कर्णशूल इत्यादि। वातघ्नो भद्रदार्व्वादिगणः, सर्पिः पिबेदित्यन्वयः। कर्णम् इत्यादि। स्विन्नं कर्णम् अश्वत्थादिजन्मनां पत्राणां रसैः पृथक् पूरयेत् किं विशिष्टानां, तैल सिन्धूत्थाभ्यां दिग्धानां लिप्तानाम्। अनन्तरं पुटपाक विधिना स्विन्नाना मुक्तविधिं मूलकारल्वोरप्यतिदिशति तद्वदित्यादि। अरलुः श्योनाकः। १—४—

गणे वातहरेऽम्लेषु मूत्रेषु च विपाचितः ॥ ४ ॥

महास्नेहो द्रुतं हन्ति सुतीव्रामपि वेदनाम्।

गण इत्यादि। वातहरो गणो भद्रदार्व्वादिः। अम्लेष्विति रसभेदीयोक्तेषु अम्लवर्गेषु। महास्नेहश्चतुःस्नेहः। —४—५—

महतः पञ्चमूलस्य काष्ठात् क्षौमेण वेष्टितात् ॥ ५ ॥

तैलसिक्तात् प्रदीप्ताग्रात् स्नेहः सद्यो रुजापहः।

योज्यश्चैवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारलात् ॥ ६ ॥

महतः पञ्चमूलस्येत्यादि। एतच्च पञ्चमूलकाष्ठमष्टाङ्गुलप्रमाणं कार्य्यम्। यदुक्तम् "महतः पञ्चमूलस्य काष्ठान्यष्टाङ्गुलानि च" इत्यादि। —५—६

वातव्याधिप्रतिश्यायविहितं हितमत्र च।

वर्जयेच्छिरसा स्नानं शीताम्भःपानमह्न्यपि ॥ ७ ॥

वर्जयेदित्यादौ शिरसेति सहार्थे तृतीया। तेनाशिरस्कं स्नानन्तु कार्य्यमेवेति दर्शयति। अपि शब्दाद्रात्रावपि शीतलजलपानं न कार्य्यमिति दर्शयति। ७

पित्तशूले सितायुक्तं घृतस्निग्धं विरेचयेत् ।

पैत्तिकशूलचिकित्सामाह पित्तशूल इत्यादि । ८—

द्राक्षायष्टिश्रुतं स्तन्यं शस्यते कर्णपूरणम् ॥ ८ ॥

द्राक्षेत्यादौ यष्टी मधुयष्टिका स्तन्यं नारीक्षीरम् । —८

यष्ट्यनन्ताहिमोशीर-काकोली-रोध्र-जीवकैः ।

मृणाल-बिस-मञ्जिष्ठा-सारिवाभिश्च साधयेत् ॥ ९ ॥

यष्टीमधुरसप्रस्थं क्षीरद्विप्रस्थसंयुतम् ।

तैलस्य कुडवं नस्यपूरणाभ्यञ्जनैरिदम् ॥ १० ॥

निहन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।

यष्ट्यादिभिश्च सघृतैः कर्णौ दिह्यात् समन्ततः ॥ ११ ॥

यष्टीत्यादौ अनन्ता दुरालभा, किंवा अनन्ता अनन्तमूलं शारिवा तु श्यामालता, हिमं चन्दनं, मृणालं स्थूलमृणालम्, बिसं स्वल्पमृणालम् । एषां सारिवान्तानां कल्कः यष्टीमधुक्वाथस्य प्रस्थ एकः । केवलं क्षौद्रमेवचेति अत्रापि नस्यादिभिः शूलदाहोषा हन्तीति सम्बध्यते । यष्ट्यादिभिरिति पूर्वोक्तैः र्यष्टयनन्ताहिमोशीरादिभिः । ९—११

वामयेत् पिप्पलीसिद्धसर्पिःस्निग्धं कफोद्भवे ।

धूम-नावन-गण्डूष-स्वेदान् कुर्य्यात् कफापहान् ॥ १२ ॥

वामयेदित्यादिना कफज-कर्णशूल-चिकित्सामाह । पिप्पली-कल्कसिद्ध-सर्पिषा स्निग्धमित्यर्थः । १२

लशुनार्द्रक-शिग्रूणां सुरङ्ग्या मूलकस्य च ।

कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥ १३ ॥

लशुनेत्यादौ सुरङ्गी रक्तशोभाञ्जनम् । कदली कदलीवागुड़ा तस्याः स्वरसः । एतेव लशुनस्वरसादयो व्यस्ताः समस्ताश्च बोध्याः । १३

अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ।

सन्निधाय स्नुहीकाण्डे कोरिते तच्छदावृतान् ॥ १४ ॥

स्वेदयेत् पुटपाकेन सरसः शूलजित् परम् ।

अर्काङ्कुरानित्यादि अर्कस्य अङ्कुरः 'कुण्ठी' । अम्लपिष्टानिति काञ्जिक पिष्टान् । कोरिते इति कृतविवरे । तच्छदावृतानिति स्नुहीपत्रावृतान् । १४—१५—

रसेन बीजपूरस्य कपित्थस्य च पूरयेत् ॥ १५ ॥
सूक्तेन पूरयित्वा वा फेनेनान्ववचूर्णयेत्।

रसेनेत्यादि योगत्रयम्। फेनेनेति समुद्रफेनचूर्णेन।—१५—१६—

अजाविमूत्रवंशत्वक्सिद्धं तैलञ्च पूरणम् ॥ १६ ॥

अजावीत्यादि। वंशत्वग् वंशनेली अस्याः कल्कः। अजामूत्रे अविमूत्रे वा वंशत्वक्सिद्धं तैलमित्यर्थः। यदाह करालः

"वंशावलेख कल्केन मूत्र आजेऽथवाविके।
पचेत्तैलं रुजः शान्त्यै कर्णयोः पूरणं भिषक् ॥" इति—१६

सिद्धं वा सार्षपं तैलं हिङ्गु-तुम्बुरु-नागरैः।

सिद्धमित्यादि। अत्र पाकार्थं जलमेव द्रवान्तरानुक्तेः। तुम्बुरु धनीयकाकृतिवणिग्द्रव्यम्।१७—

रक्तजे पित्तवत् कार्य्यं शिराश्चाशु विमोक्षयेत् ॥ १७ ॥
पक्के पूयवहे कर्णे धूमगण्डूषनावनम्।
युञ्ज्याान्नाड़ीविधानञ्च दुष्टव्रणहरञ्च यत् ॥ १८ ॥

रक्तजकर्णशूल चिकित्सामाह रक्तज इत्यादि।—१७—१८

स्रोतः प्रमृज्य दिग्धन्तु द्वौ कालौ पिचुवर्त्तिभिः।
पूरेण धूपयित्वा तु माक्षिकेण प्रपूरयेत् ॥ १९ ॥

स्रोत इत्यादि। दिग्धं पूयलिप्तं कर्णस्रोतः द्वौ कालौ सायं प्रातश्च पिचुवर्त्तिभिः प्रमृज्य पूयं निरस्य अनु पश्चात् पुरेण गुग्गुलुना धूपयित्वा माक्षिकेन मधुना प्रपूरयेत्। १९

सुरसादिगणक्वाथफाणिताक्ताञ्च योजयेत्।
पिचुवर्त्तिं ससूक्ष्मैश्च तच्चूर्णैरवचूर्णयेत् ॥ २० ॥
शूलक्लेदगुरुत्वानां विधिरेष निवर्त्तकः।

सुरसादीत्यादि। सुरसादिगणक्वाथेन कृतो यो फाणिताकारो द्रवः तेनाक्तां म्रक्षितां पिचुवर्तिं योजयेत्। तच्चूर्णैरिति सुरसादिगणचूर्णैः। २०—२१—

प्रियङ्गु-मधुकाम्बष्ठा-धातक्युत्पलपर्णिभिः ॥ २१ ॥

मञ्जिष्ठा-लोध्र-लाक्षाभिः कपित्थस्य रसेन च ।

पचेत्तैलं तदा स्रावं निगृह्णात्याशु पूरणात् ॥ २२ ॥

प्रियङ्ग्वित्यादि । अम्बष्ठा पाठा, उत्पलं नीलोत्पलं, पर्णी पृष्णिपर्णी । उक्तं हि धन्वन्तरिनिघण्टौ "पृष्णिपर्णी पृथक्पर्णी पर्णी क्रोष्टुकपुच्छकेति" । प्रियङ्ग्वादीनां कल्कः, कपित्थरसश्चतुर्गुणः । —२१—२२

नादबाधिर्य्ययोः कुर्य्याद् वातशूलोक्तमौषधम् ।

श्लेष्मानुबन्धे श्लेष्माणं प्रागजयेद्वमनादिभिः ॥ २३ ॥

नाद-बाधिर्य्ययो र्यदि कफानुबन्धः स्यात्तदा यत् कार्य्यं तदाह श्लेष्मानुबन्ध इत्यादि । २३

एरण्ड-शिग्रु-वरुण-मूलकात् पत्रजे रसे ।

चतुर्गुणे पचेत्तैलं क्षीरे चाष्टगुणोन्मिते ॥ २४ ॥

यष्ट्याह्वा-क्षीरकाकोली कल्कयुक्तं निहन्ति तत् ।

नादबाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥ २५ ॥

एरण्डेत्यादि । एरण्डादिपत्रस्वरसे इत्यर्थः । २४—२५

पक्वं प्रतिविषा-हिङ्गु-मिशि-त्वक्स्वर्जिकोषणैः ।

सशुक्तैः पूरणात्तैलं रुक्स्राव-श्रुतिनाद-नुत् ॥ २६ ॥

कर्णनादे हितं तैलं सर्षपोत्थश्च पूरणे ।

पक्वमित्यादि । मिषिः शतपुष्पा, त्वग् गुड़त्वक्, स्वर्जिका स्वर्जिकाक्षारः, ऊषणं मरिचम् एषां कल्कः । शुक्तन्तु पाकार्थम् । २६—२७—

वालमूलकखण्डानां क्षारो (१) हिङ्गु महौषधम् ॥ २७ ॥

शतपुष्पा-वचा-कुष्ठ-दारु-शिग्रु-रसाञ्जनम् ।

सौवर्चल-यवक्षार-स्वर्जिकौद्भिद्-सैन्धवम् ॥ २८ ॥

भूर्जग्रन्थिविडं मुस्तामधुशुक्तं चतुर्गुणम् ।

मातुलुङ्गरसस्तद्वत् कदलीस्वरसश्च तैः ॥ २९ ॥

(१) शुष्कमूलकेति वा पाठः ।

पक्वं तैलं जयत्याशु सुकृच्छ्रानपि पूरणात् ।
कण्डूं क्लेदञ्च बाधिर्य्यं पूतिकर्णाश्च रुक्कृमीन् ॥ ३० ॥
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च ।

क्षारतैलमाह बालमूलकेत्यादि । मधुशुक्तं चतुर्गुण मिति—
"जम्बीरस्य फलरसं पिप्पलीमूल संयुतम् ।
मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् ।
मासेन तज्जातरसं मधुशुक्त मुदाहृतम् ॥" इति
अत्र जम्बीरफलरसस्य द्वात्रिंशत्पलानि, पिप्पलीमूलस्य तु चत्वारि, मधुनोऽष्टौ पलानीति वृद्धवैद्योपदेशात् मानक्रमो ज्ञेयः । तावदिति चतुर्गुण इत्यर्थः । —२७—३१—

अथ सुताविव स्यातां कर्णौ रक्तं हरेत्ततः ॥ ३१ ॥
सशोफक्लेदयोर्म्मन्दश्रुतेर्व्वमनमाचरेत् ।
बाधिर्य्यं वर्जयेद्बालवृद्धयोश्चिरजञ्च यत् ॥ ३२ ॥

अथेत्यादिना कर्णस्वापचिकित्सामाह । अस्यच कर्णस्वापस्य रक्तजशूललिङ्गत्वेन तत्रैवान्तर्भावान्न संख्याधिक्यम् । अतएव रक्तपित्तसमानार्ति किञ्चिद्वाधिकलक्षण मित्युक्तम् । — ३१ — ३२

प्रतीनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनानु कर्णौ तैलस्य पूरयेत् ॥ ३३ ॥
सशुक्तसैन्धवमधार्मातुलुङ्गरसस्य वा ।
शोधनाद् रूक्षतोत्पत्तौ घृतमण्डस्य पूरणम् ॥ ३४ ॥

कर्णप्रतीनाहचिकित्सामाह प्रतीनाह मित्यादि । प्रतीनाहं वातशोषितं श्लेष्माणं स्नेहस्वेदैः परिक्लेद्य कर्णशोधकेन शस्त्रेन (यन्त्रेण) शोधयेत् । अनुपश्चात् कर्णौ तैलस्य पूरयेत् । तैलस्येति करणे "पूरतृप्त्यर्थयोः" इति करणे षष्ठी एवं मातुलुङ्गरसस्येति च । सशुक्तसैन्धवमधोरिति तैलविशेषणं तथा मातुलुङ्गरसस्य च विशेषण मित्यरुणः । तैलविशेषणपक्षे तु लिङ्गविनिमयः कार्य्यः । कर्ण शोधकेन शस्त्रेण (यन्त्रेण) कर्णशोधने क्रियमाणे यदि कर्ण क्षतं कर्णरुक् च जायते तदा घृतमण्डेन कर्णपूरणं कार्य्यम् । ३३—३४

क्रमोऽयं मलपूर्णेऽपि कर्णे

अयं चिकित्सा क्रमः कर्णगूथपूर्णे कर्णेऽपि कार्य्य इत्याह क्रमोऽयं मलपूर्णेऽपि कर्णे इति । ३५—

कण्डूां कफापहम् ।

नस्यादि तद्वच्छोफेऽपि कटूष्णैश्चात्र लेपनम् ॥ ३५ ॥

कर्णकण्डु कर्णशोफयोश्चिकित्सामाह कण्डूामित्यादि । —३५

कर्णस्रावोदितं कुर्य्यात् पूतिकृमिलकर्णयोः ।

पूरणं कटुतैलेन विशेषात् कृमिकर्णके ॥ ३६ ॥

पूतिकर्ण-क्रिमिकर्णयो श्चिकित्सामाह कर्णस्रावोदित मित्यादि । क्रिमिलेति असुखेन च । ३६

वमिपूर्व्वा हिता कर्णविद्रधौ विद्रधिक्रिया ।

दोषज कर्णविद्रधि चिकित्सानाह वमि पूर्व्वेत्यादि । वमनपूर्व्वा । ३७—

पित्तोत्थकर्णशूलोक्तं कर्त्तव्यं क्षतविद्रधौ ॥ ३७ ॥

अर्शोऽर्बुदेषु नासावत्

आगन्तु कर्णविद्रधि चिकित्सामाह पित्तोत्थेत्यादि । अर्शोऽर्बुदेषु नासावदिति कर्णार्शसि कर्णार्बुदे च नासार्शोवत् नासार्बुदवच्च चिकित्सितं कार्य्य मित्यर्थः ।—३७--३८—

आमा कर्णविदारिका ।

कर्णविद्रधिवत्साध्या यथादोषोदयेन च ॥ ३८ ॥

आमेत्यादिना दोषोदयेनेत्यन्तेन कर्णविदारिका चिकित्सामाह । यथा दोषोदयेनेति यद्दोषजन्या विदारिका तद्दोषजन्य विद्रधिवत्तस्य साधन मित्यर्थः । —३८

पालीशोषेऽनिलश्रोत्रशूलवन्नस्यलेपनम् ।

स्वेदञ्च कुर्य्यात् स्निग्धाञ्च पालीमुद्वर्त्तयेत्तिलैः ॥ ३९ ॥

पियालबीज-यष्ट्याह्व-हयगन्धा-यवान्वितैः ।

ततः पुष्टिकरैः स्नेहैरभ्यङ्गं नित्यमाचरेत् ॥ ४० ॥

पालीशोष चिकित्सामाह पालीशोष इत्यादि । अनिले श्रोत्रशूलवदिति वातिककर्णशूलवत् । ३९—४०

शतावरी-वाजिगन्धा-पयस्यैरण्ड-जीवकैः
तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत्परम् ॥ ४१ ॥

तानेव पालीपुष्टिकरान् स्नेहानाह शतावरीत्यादि। शतावर्य्यादीनां कल्कः क्षीरन्तु तैलाच्चतुर्गुणम्। पयस्या क्षीरकाकोली विदारीकन्द इत्यन्ये। जीवकैरित्यत्र वीजकैरिति पाठे एरण्डस्य वीजं नतु वीजकः पीतशालस्तस्य रुक्षणत्वात्। रण्डजीवकै रित्येव पाठः सुश्रुतेऽपि (सू' १४) दृश्यते टीकाकृताञ्च सम्मत इति। ४१

कल्केन जीवनीयेन तैलं पयसि पाचितम्।
आनूपमांसक्वाथे च पालीपोषणवर्द्धनम् ॥ ४२ ॥

कल्केनेत्यादि। जीवनीयेनेति जीवनीय दशकेन। दुग्धमत्र स्नेहसमम्। आनूपमांस-क्वाथस्तु त्रिगुण इत्याहुः। पोषणं परिणाहेन, वर्द्धनन्तु दैर्घ्येन। ४२

पालीं छित्त्वातिसंक्षीणां शेषां सन्धाय पोषयेत्।
पालीमित्यादि। शेषामिति छिन्नशेषाम्। ४३—

याप्येवं तन्त्रिकाख्यापि परिपोटेऽप्ययं विधिः ॥ ४३ ॥
याप्येवमित्यादि। एवमिति पालीशोप चिकित्सितेन। —४३

उत्पाते शीतलैर्लेपो जलौकोहृतशोणिते।
जम्ब्वाम्रपल्लव-बला-यष्टी-रोध्र-तिलोत्पलैः ॥ ४४ ॥
सधान्याम्लैः समञ्जिष्ठैः सकदम्बैः ससारिवैः।
सिद्धमभ्यञ्जनं तैलं विसर्पोक्तघृतानि च ॥ ४५ ॥

उत्पात चिकित्सामाह उत्पात इत्यादि। शीतलैरिति न्यग्रोधादिगण-प्रभृतिभिर्गणैः। जम्ब्वाम्रेत्यादि। अत्र धान्याम्लं काञ्जिकम् इदञ्च चतुर्गुणम्। परिशिष्टानान्तु कल्कः। ४४—४५

उन्मन्थेऽभ्यञ्जनं तैलं गोधाकर्कीवसान्वितम्।
तालपत्राश्वगन्धार्क-वाकूची-फल-सैन्धवैः ॥
सुरसा-लाङ्गलीभ्याञ्च सिद्धं तीक्ष्णञ्च नावनम् ॥ ४६ ॥

उन्मन्थ इत्यादि। कर्की कर्कटः। गोधाकर्कटयोर्वसा। सुश्रुतेऽप्युक्तम् "गोधाकूलीरवसया सह तैलन्तु साधितम्" (चि' २५ अ) इति। तालपत्रादीनां

कल्कः वाकुच्याःफल वाकुचीफलम्, अन्येतु फलं मदनफलमित्याहुः। सुरसा ग्राम्य-तुलसी, लाङ्गली लाङ्गलियामूलम्। ४६

दुर्विद्धेऽश्मन्त-जम्ब्वाम्रपत्र-क्वाथेन सेचिताम्।
तैलेन पालीं स्वभ्यक्तां सुश्लक्ष्णैरवचूर्णयेत्॥ ४७॥
चुर्णैर्मधुक-मञ्जिष्ठा-प्रपुण्ड्रद्विनिशोद्भवैः।
लाक्षा-विडङ्ग-सिद्धश्च तैलमभ्यञ्जने हितम॥ ४८॥

दुर्विद्ध इत्यादि। अश्मन्तो 'मालुया' वृक्षः पत्रशब्दस्याश्मन्तादिभिः प्रत्येक-मन्वयः। प्रपुण्ड्रः 'पुण्डरिआ' काष्ठम्। द्विनिशा हरिद्राद्वयम्। सुश्रुतेऽप्युक्तम्

तथाश्मन्तकजम्ब्वाम्र पत्रक्वाथेन सेचिताम्।
प्रपौण्डरीक मधुक मञ्जिष्ठा रजनीद्वयैः।
चूर्णैविवर्द्धने पालिं तैलाक्तामवचूर्णयेत्॥" इति (चिं २५ अं)

अतएव प्रपौण्ड्राद्धनिशोद्भवैरिति प्रमादः पाठः। (लाक्षेति) लाक्षा-विड़ङ्गकल्क सिद्धमित्यर्थः। ४७—४८

स्विन्नां गोमयजैः पिराडैर्बहुशः परिलेहिकाम्।
विडङ्गसारैरालिम्पेदुरभ्रीमूत्रकल्कितैः॥ ४९॥
कौटजेंगुद-कारञ्जबीज-शम्पाक-वल्कलैः।

स्विन्नामित्यादिना परिलेहिका चिकित्सामाह। अत्र पृथङ् निर्देश सामान्याद् विड़ङ्गसारै रित्येको योगः। कौटजेत्यादिस्तु द्वितीयो योगः। सुश्रुतेऽप्युक्तम्

"स्विन्नां गोमयजैः पिण्डैः प्रदिह्यात् परिलेहिकाम्।
पिष्टैर्विड़ङ्गैरथवा सुरभीमूत्र संयुतैः।
करञ्जेङ्गुदिवीजैर्वा कुटजारग्वधायुतैः॥" इति (चिं २५ अं) सम्पाक-आरग्वधः। ४९—५०—

अथवाभ्यञ्जने तैर्वा कटुतैलं विपाचयेत्॥ ५०॥
सनिम्बपत्र-मरिच-मदनैर्लेहिकाव्रणे।

अथवेत्यादि तैरिति विड़ङ्गसारादिभिः सर्वैः। मदनन्त्वत्र मधुच्छिष्टम्, सुश्रुतेऽप्युक्तम्—

"सर्वैर्वा सार्षपं तैलं सिद्धं मरिचसंयुतैः ।
सनिम्बपत्रैरभ्यङ्गो मधुच्छिष्टान्वितैर्हितः ॥" इति (चिं २५ अ') ५०।५१—

छिन्नन्तु कर्णं शुद्धस्य बन्धमालोच्य यौगिकम् ॥५१॥
शुद्धास्रं लागयेल्लग्ने सद्यश्छिन्ने विशोधनम् ।

इदानीं छिन्नकर्णपालीसन्धानार्थं विधिमाह छिन्नमित्यादि । शुद्धस्येति वमनादिभिः । बन्धमालोच्य यौगिकमिति शस्त्रविध्युक्तेषु पञ्चदशबन्धेषु मध्ये यो बन्धो यत्र यौगिको भवति तमालोच्य निर्णीय । शुद्धास्रमिति वातादिभिरदूषितरक्तम् । लागयेदिति संयोजयेत् । लग्ने सद्यश्छिन्ने विशोधनमिति सद्यश्छिन्ने लग्ने संहिते सति विशोधनं वमनादिकं कार्य्यम् । —५१—५२—

अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम् ॥ ५२ ॥
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम् ।
अभ्यज्य मधु-सर्पिर्भ्यां पिचुप्लोतावगुण्ठितम् ॥५३॥
सूत्रेणागाढशिथिलं बद्ध्वा चूर्णैरवाकिरन् ।
शोणितस्थापनैर्व्रणं पथ्यमाचारञ्चादिशेत्ततः ॥ ५४ ॥

छिन्नकर्णसन्धानं यथा विधेयं तदाह अथेत्यादि । केशान्तं ग्रथित्वेति संयम्य केशान्तग्रथनञ्च व्रणे केशसम्बन्धपरिहारार्थम् । छेदनं द्विधाकरणम् । लेखनं कर्कशपत्रादिभिर्घर्षणम् । सन्धिष्विति छिन्नकर्णसन्धिषु समं यथा स्यात्तथा निवेश्य संयोज्य । सममित्यस्यैव विवरणं न निम्नं न समुन्नतमिति । पिचु तूलकम्, प्लोतः कर्पटः, अनयोरेकतरेणावगुण्ठितमावृतम् । सुश्रुतेऽपि "पिचुप्लोतयोरन्यतरेणावगुण्ठ्य" इत्युक्तम् । शोणितास्थापनैश्चूर्णैरिति मृत्कपाल गैरिकादिचूर्णैरिति । सुश्रुतेऽपि "कपालचूर्णेनावकीर्य्य" इत्युक्तम् । पथ्यमाचारमिति व्रणहितमाहार विहारम् । —५२—५४

सप्ताहादामतैलाक्तं शनैरपनयेत् पिचुम् ।

सप्ताहादित्यादि । सप्ताहान्तरम् आमतैलाक्तं पिचुं शनैरपनयेत् । सुश्रुतेऽपि 'त्रयहाद्' इत्युक्तम् । व्रणावस्थाभेदेनोभयमपि प्रमाणम् । ५५—

सुरूढं जातरोमाणं श्लिष्टसन्धिं समंस्थिरम् ।
सुवर्त्मानं मरागञ्च शनैः कर्णं विवर्द्धयेत् ॥ ५५॥

सन्धितकर्णस्य वर्द्धनयोग्यामवस्थामाह सुरूढमित्यादि । सममनिम्नोन्नतम् । स्थिरं दृढम् । सुवर्त्मानमिति शोभनकन्तु छिद्रम् । अरोगमिति शूलादिवेदनारहितम् । शनैरिति न सहसा । —५५

जलशूकः स्वयङ्गुप्ता रजन्यौ बृहतीद्वयम् ।
अश्वगन्धा-बला-हस्तिपिप्पली-गौरसर्षपाः ॥ ५६ ॥
मूलं कोशातकाश्वघ्न-रूपिका-सप्तपर्णजम् ।
छुछुन्दरी कालमृता गृहं मधुकरीकृतम् ॥ ५७ ॥
जतुका जलजन्मा च तथा शावरकन्दकम् ।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम् ॥ ५८ ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात् कर्णवर्द्धनम् ।

कर्णवर्द्धनार्थमभ्यङ्गोपयोगि स्नेहमाह जलशूक इत्यादि । जलशूको जलतृणासक्तः कीटविशेषो 'जलशूआ' इति प्रसिद्धः । कोषातको घोषकभेदः, अश्वघ्नः करवीरः, रूपिका अर्कः एषां मूलम् । छुछुन्दरी 'छुछुआ' इति ख्याता मूषकाकृतिः । साच कालं प्राप्य स्वयमेव मृता नतु यत्नेन व्यापादिता । मधुकरी 'भ्रमरी' इति ख्यातः कीटविशेषो अतीव कृष्णवर्णः तया कृतं गृहं वासकः । जतुका चर्म्मचटकः । जलजन्मा जलौकाः, शावरकन्दो लसूनः वाराहीकन्द इत्यन्ये । खरमिति पाकक्रियाविशेषणम् । ५६—५९—

अथ कुर्याद्वयःस्थस्य छिन्नां शुद्धस्य नासिकाम् ॥ ५९ ॥
छिन्द्यान्नासासमं पत्रं तत्तुल्यञ्च कपोलतः ॥
त्वङ्मांसं नासिकासन्ने रक्षंस्तत्तनुतां नयेत् ॥ ६० ॥
सीव्येद् गण्डं ततः सूच्या सेविन्या पिचुयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्योपरि त्वचम् ॥ ६१ ॥
कपोलबन्धं सन्दध्यात् सीव्येन्नासाञ्च यत्नतः ।
नाडीभ्यामुत्क्षिपेदन्तः सुखोच्छ्वासप्रवृत्तये ॥ ६२ ॥

आमतैलेन सिक्ता तु पत्तङ्ग-मधुकाञ्जनैः ।
शोणितास्थापनैश्चान्यैः सुश्लक्ष्णीरवचूर्णयेत् ॥ ६३ ॥
ततो मधुघृताभ्यक्तं बद्ध्वाचारिकमादिशेत् ।
ज्ञात्वावस्थान्तरं कुर्यात् सद्यो व्रणविधिं ततः ॥ ६४ ॥
छिन्द्याद्रूढेऽधिकं मांसं नासोपान्ते च चर्मवत् ।
सीव्येत्ततश्च सुश्लक्ष्णं हीनं सम्बर्द्धयेत् पुनः ॥ ६५ ॥
निवेशिते यथान्यासं सद्यश्छेदेऽप्ययं विधिः ।
नाड़ीयोगाद्विनौष्ठस्य नासासन्धानवद्विधिः ॥ ६६ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम् उत्तरे तन्त्रे
कर्णरोग प्रतिषेधो नाम अष्टादशोऽध्यायः ॥

अत्रान्तरे छिन्ननासासन्धानविधिं तथाछिन्नौष्ठ सन्धान विधिञ्च सुश्रुते वागभटे च केचित् पठन्ति । ततपुन जेञ्जड़-चक्रदत्त-डह्लण-प्रभृतयोऽविज्ञेयफलत्वात् सन्दिग्धसन्धानत्वाच्च तथा समानतन्त्रे अपरापराचार्य्याननुमतत्वाच्च अवयवान्तर-सन्धानानुक्तौ हेत्वभावादनार्षमाहुरिति न पठनीय एवायं ग्रन्थः । —५९—६६

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
अष्टादशोऽध्यायः ।

एकोनविंशोऽध्यायः ।

अथातो नासारोगविज्ञानीयं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥ १ ॥

उक्तसङ्गस्यैव कर्णरोगानन्तरं नासारोगोऽभिधीयते । तत्र भूरिशिरोरोग-हेतुत्वात् प्रथमं प्रतिश्यायो वक्तव्यः । उक्तंहि शालाक्ये —

"भूयिष्ठं व्याधयः सर्व्वे प्रतिश्यायनिमित्तजाः ।
तस्माद्रोगः प्रतिश्यायः पूर्व्वमेवोपदेक्ष्यते ।" इति १ ।

अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः।
नीचात्युच्चोपधानेन पीतेनाल्पेन वारिणा ॥ २ ॥
अत्यम्बुपानरमणच्छर्दिवाष्पग्रहादिभिः।
क्रुद्धा वातोल्वणा दोषा नासायां स्त्यानतां गताः ॥
जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम् ॥ ३ ॥

तत्र सर्व्वप्रतिश्याय साधारणीं निदान पूर्व्विकां संप्राप्तिमाह अवश्यायेत्यादि। भाष्यमतिभाष्यम्। अति स्वपनं दिवास्वापः, जागरो रात्रिजागरः।

नीचेत्यादि। अल्पेनेत्यनन्तरम् 'अपि' शब्दो बोध्यः, किंवा पीतेनाप्यल्प वारिणेति पाठः। वातोल्बन इत्यनेन सर्वेष्वपि पीनसेषु वायोः प्राधान्यं दर्शयति। सुश्रुतेऽप्युक्तम्

"पीनसानान्तु सर्व्वेषां हेतुर्य्यस्मात समीरणः।
कफपित्ताधिकेऽप्यस्मान्मारुतं समुपाचरेत् ॥" इति

उपधानं गुण्डुः, नीचोपधानेनात्युच्चोपधानेन वा सूप्त्वा यदि अल्पमपि वारि पीतं भवति तेनेत्यर्थः। अतिशब्दस्य रमणेनापि सम्बन्धः अतिमैथुनमित्यर्थः। चरकेऽपि "अवश्यया मैथुन वाष्परोधैः" (चिं २६) इत्युक्तम्। छर्दिवेगनिग्रहो वाष्प-वेगनिग्रहश्चेत्यर्थः। वाष्पं नेत्रजलम्। आदि शब्दात् पूरीषादि-वेग-सन्धारणाजीर्ण-क्रोधर्त्तुवैषम्यादीनां ग्रहणम्। स्त्यानता घनत्वम्। वर्द्धमानं क्षयप्रदमिति उपेक्षया यदि वर्द्धते तदा क्षयं धातुक्षयं ददातीत्यर्थः। २।३

तत्र वातात् प्रतिश्याये मुखशोषो भृशं क्षवः।
घ्राणोपरोधनिस्तोद-दन्त-शङ्ख-शिरोव्यथाः ॥ ४ ॥
कीटका इव सर्पन्ति मन्यते परितो भ्रुवौ।
स्वरसादश्चिरात् पाकः शिशिराच्छकफस्रुतिः ॥ ५ ॥

तत्रेत्यादिना वातिकप्रतिश्याय लिङ्गमाह। क्षवः छिका, कीटकाः पिपीलिकाः। भ्रुवौ परित इति भ्रुवोश्चतुष्पार्श्वे "परितः शब्दयोगे कर्मप्रवचनीयैश्च" इति द्वितीया। चिरात्पाक इति कफस्य। शिशिरा शीतला तथा अच्छा द्रवप्रायाः। ४।५

पित्तात्तृष्णा-ज्वर-घ्राण-पिड़का-सम्भवभ्रमाः।
नासाग्रपाको रूक्षोष्णस्ताम्रपीतकफस्रुतिः ॥ ६ ॥

पित्तादित्यादिना पैत्तिक-प्रतिश्यायलिङ्गमाह घ्राणमध्ये पिड़कासम्भव इत्यर्थः। ६

कफात् कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ।
माधुर्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः ॥ ७ ॥

कफादित्यादिना श्लैष्मिक-प्रतिश्याय-लिङ्गमाह । कण्डूरिति गलादौ । सुश्रुतेऽप्युक्तम् "गलताल्वोष्ठशिरसां कण्डूभि रभिपीडितः ।" इति (उ: २४ अः) स्रुतिरिति कफस्य । ७

सर्व्वजो लक्षणैः सर्वैरकस्मादृद्धिशान्तिमान् ।

सान्निपातिकप्रतिश्यायलिङ्गमाह सर्व्वज इत्यादि । ८—

दुष्टं नासाशिराः प्राप्य प्रतिश्यायं करोत्यसृक् ॥ ८ ॥
उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता ।
कण्डूः श्रोताक्षि-नासासु पित्तोक्तश्चात्र लक्षणम् ॥ ९ ॥

दुष्टमित्यादिना रक्तज-प्रतिश्यायलिङ्गमाह । दुष्टमित्यसृग् विशेषणम् । उरसः सुप्ततेति स्पर्शाज्ञता । —८।९

सर्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः ।
यथोक्तोपद्रवाधिक्यात् स सर्वेन्द्रियतापनः ॥ १० ॥

अप्रतिक्रियया सर्व्व एव प्रतिश्याया दुष्टतां यान्तीत्याह सर्व्वएवेत्यादि । यथोक्तोपद्रवाधिक्यादिति वातजादि प्रतिश्यायलिङ्गत्वेनोक्तानां मुखशोषादीनामाधिक्यात् । स इति दुष्टप्रतिश्यायः । १०

साग्निसाद-ज्वर-श्वास-कासोरःपार्श्ववेदनः ।
कुप्यत्यकस्माद्बहुशो मुखदौर्गन्ध्यशोफकृत् ॥ ११ ॥
नासिकाक्लेद-संशोष-शुद्धि-रोधकरो मुहुः ।
पूयोपमा सिता रक्तग्रथितश्लेष्मसंस्रुतिः ॥ १२ ॥
मूर्च्छन्ति चात्र क्रिमयो दीर्घस्निग्धसिताणवः ॥ १३ ॥

तस्यैव दुष्टपीनसस्य लिङ्गमाह साग्निसादेत्यादि । अकस्माद् बहुशः कुप्यतीत्यनेन प्रकोपप्रशमयो रनैयत्येन पुनःपुनर्भवनं बोधयति । नासिकायाः शुद्धिरावरणशून्यता, रोधः पिधानं, नासिकायाश्च क्लेदसंशोषावरणपिधानानि भिन्नभिन्नदोषजानि नैककालं बोद्धव्यानि तेन विरोधो नो भावनीयः । मूर्च्छन्तीति प्रवर्त्तन्ते । अत्रेति एषु दुष्टतां गतेषु प्रतिश्यायेषु । ११—१३

रक्तजित्तुपि तैस्तुल्यमाद्यं लक्षयेत् क्षवम् ।
श्लेष्मा सपित्तकफः शीतो ह्रासश्च [illegible] ॥ १४ ॥

विकिरन्ना विशेषार्थं रक्तजस्य लक्षणमाह रक्तजित्यादि । तेषितीति [illegible] । सविकल्प इति विकल्पः । आचार्यान्तरलक्षणात्तु रक्तजि- [illegible] विस्तरेणैव [illegible] कृत्वा पृथक् नोक्तम् । तन्त्रान्तरे तु [illegible] साक्षादेवोक्तम् यथा—"[illegible] ।
[illegible] ॥" इति । १४

तीक्ष्णघ्राणोपयोगार्कतन्तुसूत्रतृणादिभिः ।
वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि ॥ १५ ॥
विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत् ।
निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भृशक्षवः ॥ १६ ॥

भृशक्षवनाम्नो नासारोगो दोषजागन्तुभेदेन द्विविधो भवति, तत्र तीक्ष्णेत्यादिना [illegible] तीक्ष्णं घ्राणं [illegible] तेषां [illegible] । किंवा तीक्ष्णादुपयोग [illegible] । वातकोपिभिः [illegible] । तथा वातकोपिभिः [illegible] नासिकातरुणास्थिनि विघट्टितेऽनिलः शृङ्गाटकं व्रजति [illegible] भूत्वा निवृत्तः सन् अत्यर्थं क्षवथुं कुरुते स रोगो भृशक्षव इत्युच्यते । अयं [illegible] केचित् पठन्ति । १५।१६

शोषयन्नासिकास्रोतः कफञ्च कुरुतेऽनिलः ।
शूकपूर्णाभनासात्वं कृच्छ्रादुच्छ्वसनं ततः ॥ १७ ॥
स्मृतोऽसौ नासिकाशोषो

शोषयन्नित्यादिना नासाशोषमाह । १७।१८—

नासानाहे तु जायते ।
बद्धत्वमिव नासायाः श्लेष्मरुद्धेन वायुना ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ॥ १८ ॥

नासानाहेत्यादिना नासानाहमाह । स्रोतसी इति नासा विवरद्वयम् । —१८

पचेन्नासापुटे पित्तं त्वङ्मांसं दाहशूलवत् ।

स घ्राणपाकः

पचेदित्यादिना नासापाकमाह। पित्तं नासापुटे तङ्मांसं नासापुटगतं तङ्मांसं कर्म्मभूतं पचेत्। दाहशूलवदिति दाहशूलयुक्तम्। १९—

स्रावस्तु तत्संज्ञः श्लेष्मसम्भवः ॥

अच्छो जलोपमोऽजस्रं विशेषान्निशि जायते ॥ १९ ॥

स्रावस्त्वित्यादिना जायत इत्यन्तेन नासास्रावमाह। तत्संज्ञ इति नासा-स्राव संज्ञः। अच्छ इत्यघनः।—१९

कफः प्रवृद्धो नासायां रुद्ध्वा स्रोतांस्यपीनसम् ।

कुर्य्यात् सघुर्घुरश्वासं पीनसाधिकवेदनम् ॥ २० ॥

अवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका ।

अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥ २१ ॥

कफ इत्यादिना अपीनसमाह। स्रोतांसीति नासागतान्येव। तेन अपीनसेन। अवेः मेषस्येव प्रक्लिन्ना नासिका अजस्रं सिंघाणकं स्रवति। २०।२१

रक्तेन नासा दग्धेव बाह्यान्तःस्पर्शनासहा ।

भवेद्धूमोपमोच्छ्वासा सा दीप्तिर्दहतीव च ॥ २२ ॥

रक्तेनेत्यादिना दीप्तिमाह। धूमोपमोच्छ्वासेति निःश्वासवायुर्धूमनिःसरणवत् पीड़ां कृत्वा निःसरतीत्यर्थः। २२

तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात् ।

श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम् ॥ २३ ॥

तालुमूल इत्यादिना पूतिनासमाह। यत्र व्याधौ तालुमूलगतैः दुष्टैः मलैः दोषै-र्मुखनासिकातः मारुतः श्लेष्मा च पूतिर्दुर्गन्धि भूत्वा निर्गच्छेत् तं व्याधिं पूतिनासं वदन्ति। २३

निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।

तत्पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥ २४ ॥

निचयादित्यादिना दोषज-मागन्तुजञ्च पूयरक्तमाह। निचयादिति सन्नि-पातात्। २४

पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयेन्मरुत् ।
कफं स शुष्कः पुटतां प्राप्नोति पुटकन्तु तत् ॥ २५ ॥

पित्तश्लेष्मेत्यादिना पुटकमाह । पुटकः 'पोटली' इति ख्यातः तत्सदृशताम् । २५

अर्शोऽर्बुदानि विभजेद्दोषलिङ्गैर्यथायथम् ॥ २६ ॥

अर्शोऽर्बुदानीत्यादिना नासार्शो नासार्बुदञ्चाह । यथायथं दोषलिङ्गैर्विभजेद् इति यस्मिन् नासार्शसि यस्मिन् नासार्बुदे वा यस्य यस्य दोषस्य लिङ्गं दृश्यते तेन च दोषलिङ्गेन तदर्शस्तदर्ब्बुदञ्च तत्तद्दोषजत्वेन विभजेत् । २६

सर्व्वेषु कृच्छ्राच्छ्वसनं पीनसः प्रततं क्षवः ।
सानुनासिकवादित्वं पूतिनासः शिरोव्यथा ॥ २७ ॥

अर्शोऽर्ब्बुदसाधारणानि लिङ्गान्याह सर्व्वेष्वित्यादि । सर्व्वेष्विति अर्शःसु अर्ब्बुदेषु च । २७

अष्टादशानामित्येषां यापयेद्दुष्टपीनसम् ॥ २८ ॥

इति श्रीमद् वाग्भट विरचितायां मष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे
नासारोगविज्ञानीयो नाम उनविंशतितमोऽध्यायः ॥

अष्टादशानामित्यादि । वातज-पित्तज-कफज-सर्व्वज-रक्तज-दुष्टप्रतिश्याय-भेदेन षट् प्रतिश्यायाः । तथा भ्रंशक्षवादयो अर्बुदान्ताश्च द्वादशेत्यष्टादश नासारोगाः । एषां मध्ये दुष्टपीनसं यापयेत् । २८

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे एकोनविंशोऽध्यायः ।

विंशोऽध्यायः

अथातो नासारोगप्रतिषेधं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥ १ ॥
सर्वेषु पीनसेष्वादौ निवातागारगो भवेत् ।
स्नेहन-स्वेद-वमन-धूम-गण्डूष-धारणम् ॥ २ ॥
वासो गुरूष्णं शिरसः सुघनं परिवेष्टनम् ।
लघ्वम्ललवणं स्निग्धमुष्णं भोजनमद्रवम् ॥ ३ ॥
धन्वमांस-गुड़-क्षीर-चणक-त्रिकटूत्कटम् ।
यव-गोधूम-भूयिष्ठं दधि-दाड़िम-सारिकम् ॥ ४ ॥
बालमूलकजो यूषः कुलत्थोत्थश्च पूजितः ।
कवोष्णं दशमूलाम्बु जीर्णां वा वारुणीं पिवेत् ॥ ५ ॥
जिघ्रेच्चोरक-तर्कारी-वचाजाज्युपकुञ्चिकाः ।

सर्व्वप्रतिश्यायसाधारणं क्रियासूत्रमाह सर्व्वेष्वित्यादि । दधिदाड़िमसारिकमिति दध्ना तथा दाड़िमसारेण दाड़िमवीजरसेन साधितमित्यर्थः । केचित्तु दधिदाड़िमसाधित मित्येव पठन्ति । जिघ्रेदित्यादौ चोरक श्चोरपुष्पी तर्कारी जयन्तीपत्रम् । २—६—

व्योष-तालीस-चविका-तिन्तिडीकाम्लवेतसम् ॥ ६ ॥
साग्न्यजाजीद्विपलिकात्वगेला-पत्र-पादिकम् ।
जीर्णाद्गुडात्तुलार्द्धेन पक्केन वटकीकृतम् ॥ ७ ॥
पीनस-श्वास-कासघ्नं रुचिस्वरकरं परम् ।

व्योषेत्यादि । अग्निश्चित्रकः अजाजी जीरकम्, व्योषादीनां नव पत्राणां (द्रव्याणां) प्रत्येकं पलद्वयम् ; एलात्वक्पत्राणामपि प्रत्येक मेकभागापेक्षया पादिकत्वम् । तुलार्द्धं पञ्चाशत् पलानि । सुश्रुते पुनरस्मिन् योगे इयत्तया मानं नोक्तम् । यथा—

"कटुत्रिकं चित्रकतिन्तिड़ीकं तालिशपत्रं चविकाम्बु संज्ञम् ।
विचूर्णितं जीरकचूर्णयुक्तं एलाछदत्वक् सुरभीकृतञ्च ॥

मिश्रं पुराणेन गुडेन दद्यात् तत्पीनसानां परिपाचनार्थम् ।"

इति (१) – ६–८–

शताह्वात्वग्बलामूलं श्योनाकैरण्डबिल्वजम् ॥ ८ ॥
सारग्वधं पिबेद्धूमं वसाज्यमदनाऽन्वितम् ।

शताह्वेत्यादिना धूमपानार्थं वर्त्तिमाह । त्वग् गुडत्वक् श्योनाकैरण्डबिल्वज-मित्यत्रापि मूलमिति सम्बध्यते । आरग्वधस्य फलं, मदनं मधुच्छिष्टम् । एभिर्वर्त्तिं कृत्वा तां वर्त्तिं धूमनेत्रे सन्निवेश्य धूमं पिबेदित्यर्थः । चरकेऽप्युक्तम्

"शताह्वात्वग् बलामूलं श्योनाकैरण्ड बिल्वजम् ।
सारग्वधं पिबेद्वर्त्तिं मधुच्छिष्ट वसाघृतैः ॥" इति (चि २६ अं)—४–९–

अथवा सघृतान् सक्तून् कृत्वा मल्लकसम्पुटे ॥ ९ ॥

अथवेत्यादि । अत्रापि धूमं पिबेदिति सम्बध्यते । यवशक्तून् सघृतान् शरावस्थिताङ्गारे दत्त्वा उपरिकृतछिद्रेण शरावान्तरेण पिधाय तस्मिन्नेव छिद्रे नलिकां दत्त्वा धूमं पिबेदित्यर्थः । —९

त्यजेत् स्नानं शुचं क्रोध मवश्यायं (२) हिमं जलम् ।

निदान वर्जनरूपां चिकित्सामाह त्यजेदित्यादि । अवश्यायो नीहारः । १०—

पिबेद्वातप्रतिश्याये सर्पिर्वातघ्नसाधितम् ॥ १० ॥
पटुपञ्चकसिद्धं वा विदार्यादिगणेन वा ।
स्वेदनस्यादिकां कुर्यात् चिकित्सामर्दितोदिताम् ॥ ११ ॥
पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतम् ।
परिषेकान् प्रदेहांश्च शीतैः कुर्वीत शीतलान् ॥ १२ ॥

सामान्येन चिकित्सामभिधाय विशेषेणाह पिबेदित्यादि । वातघ्नाः भद्रदार्वादि-गणादयः । पटुपञ्चकं लवणपञ्चकम् । विदार्य्यादिगणो विदारी-पञ्चाङ्गुलेत्यादिनोक्तः । पित्तरक्तोत्थयोरिति पित्तोत्थरक्तोत्थपीनसयोः । मधुरकैरिति जीवनीयदशकेन । शीतलानिति न्यग्रोधादि-सारिवादिगणाः शीतलास्तैः कृतान् । —१०–१२

---

(१) अद्यत्वे मुद्रित सुश्रुत पुस्तके पाठोऽयं नोपलभ्यते ।

(२) भृशं शय्यामिति वा पाठः ।

धवत्वक्त्रिफला-श्यामा-श्रीपर्णी-यष्टि-विल्वकैः ।
क्षीरे दशगुणे तैलं नावनं सनिशैः पचेत् ॥ १३ ॥

धवत्वगित्यादि । श्यामा प्रियङ्गुः, श्रीपर्णी गम्भारी । यष्टीति यष्टिमधुकम् । तिल्वको लोध्रः । सनिशैरिति हरिद्रा सहितैः । १३

कफजे लङ्घनं लेपः शिरसो गौरसर्षपैः ।
सक्षारं वा घृतं पीत्वा वमेत्

कफज इत्यादौ वमेदितिच्छेदः । गौरसर्षपैः शिरसो लेपः । १४—

पिष्टैस्तु नावनम् ॥ १४ ॥
वस्ताम्बुना पटुव्योष-वेल्ल-वत्सक-जीरकैः ।

पिष्टै स्त्वित्यादौ पटु सैन्धवम्, वेल्लो विड़ङ्गः, जीरकं कृष्णजीरकमिति सम्प्रदायः । वस्ताम्बुना छागमूत्रेण पिष्टैः सैन्धवादिभिः जीरकान्तैर्नावनमित्यर्थः । —१४।१५—

कटुतीक्ष्णैर्घृतैर्नस्यैः कवलैः सर्वजं जयेत् ॥ १५ ॥

कटुतीक्ष्णैरित्यादिना सन्निपातजप्रतिश्यायचिकित्सामाह । कटुतीक्ष्णैरिति कटुतीक्ष्णद्रव्यसिद्धैर्घृतादिभिः । अत्र सुश्रुत वचन मनुसर्त्तव्यम् यथा—

"सर्पींषि कटु तीक्ष्णानि हन्युः सर्व्वप्रकोपजम् ।
रसाञ्जने सातिविषे मुस्तायां भद्रदारुणि ॥
तैलं विपक्वं नस्यार्थे विदध्याच्चात्र बुद्धिमान् ।
मुस्तां तेजोवतीं पाठां कट्फलं मधुकं वचाम् ॥
सर्षपान् पिप्पलीमूलं पिप्पली सैन्धवाग्निकौ ।
तुल्यं करञ्जवीजञ्च कवल स्तत्र धारयेत् ॥" इति (उं २४ अं) —१५

यक्ष्मक्रिमिक्रमं कुर्वन् यापयेद्दुष्टपीनसम् ।

दुष्टपीनसे यद्विधेयं तदाह यक्ष्मेत्यादि । यक्ष्महरं क्रिमिहरञ्च क्रमं चिकित्सां कुर्व्वन् दुष्टपीनसं यापयेत याप्यतां प्रापयेत् । १६—

व्योषोरुवुकक्रिमिजिद् दारु माद्रीगदेंगुदम् ॥ १६ ॥
वार्त्ताकवीजं त्रिवृता सिद्धार्थः पूतिमत्स्यकः ।
अग्निमन्थस्य पुष्पाणि पीलु-शिग्रु-फलानि च ॥ १७ ॥

अश्वविड्रस-सूत्राभ्यां हस्तिसूत्रेण वैकतः ॥
लोमगर्भां कृतां वर्त्तिं धूमं घ्राणास्यतः पिबेत् ॥ १८ ॥

दुष्टपीनसे विधेयं धूममाह व्योषेत्यादि । क्रिमिजित् विडङ्गः, माद्री अतिविषा, गदः कुष्ठम्, ऐङ्गुदम् इङ्गुदीफलम् । पूतिमत्स्यक इति धूमवर्त्तौ पूतिमत्स्य दानञ्च दुष्टपीनसजन्यक्रिमीणां सुतक्लेशनार्थम् । अन्येतु पूतिः खट्टाशी नाडाकरञ्जो वा मत्स्यकः करवीरः इति व्याचक्षते । एतैः कृतां वर्त्तिं (१)**** कार्या निवेश्य घ्राणेनास्येन च धूमं पिबेदित्यर्थः । —१६—१८

क्षवथौ पुटकाख्ये च तीक्ष्णैः प्रधमनं हितम् ।

क्षवथावित्यादि । प्रधमनं चूर्णनस्यम् । १९—

शुण्ठी-कुष्ठ-कणा-वेल्ल-द्राक्षा-कल्ककषायवत् ॥ १९ ॥
साधितं तैलमाज्यं वा नस्यं स्यात् पुटप्रणुत् ।

शुण्ठ्यादौ वेल्लो विडङ्गः । अत्र कश्चित् वेल्लस्थाने बिल्वमिति पठित्वा बिल्वमूलमिति व्याचष्टे किन्तु वेल्ल पाठएव सर्व्वैरेव पुस्तकेषु दृश्यते टीकाकृद्भिश्च व्याख्यात इति । —१९।२०—

नासाशोषे बलातैलं पानादौ भोजनं रसैः ॥ २० ॥
स्निग्धो धूमस्तथा स्वेदो नासानाहेऽप्ययं विधिः ।
पाके दीप्तौ च पित्तघ्नं तीक्ष्णं नस्यादिसंस्रुतौ ॥ २१ ॥

नासाशोष इत्यादि । बलातैलं वातरक्तचिकित्सितोक्तं वातव्याधि चिकित्सितोक्तं वा । पानादावित्यादिशब्दादस्याभ्यङ्गयोर्ग्रहणम् रसैरिति मांसरसैः । पाक इति नासापाके तथा दीप्तौ पित्तघ्नं चिकित्सितं कार्य्यम् । स्रुतौ नासास्रावसंज्ञके व्याधौ तीक्ष्णं नस्यादिकं कार्य्यम् । —२०।२१

कफ-पीनसवत् पूतिनासा-पीनसयोः क्रिया ।

पूतिनासस्य तथा अपीनसस्य च चिकित्सामाह कफपीनसवदित्यादि । पूतिनासश्च अपीनसश्च पूतिनासापीनसौ । २२—

(१) अत्र मूल पुस्तके कानिचिदक्षराणि त्रुटितानि । तानि (धूमनलि) इत्येवं भवितुमर्हन्ति ।

लाक्षा-करञ्ज-मरिच-वेल्ल-हिङ्गु-कणा-गुडैः ॥ २२ ॥
अविमूत्रद्रुतैर्नस्यं कारयेद् वमने कृते ।

लाक्षेत्यादि । वमने कृत इति एतेन वमनानन्तरमेव विधीयमानमेतन्नस्यं फलदं भवतीति दर्शयति । २२।२३—

शिग्रु-सिंही-निकुम्भानां बीजैः सव्योषसैन्धवैः ॥ २३ ॥
सवेल्लसुरसैस्तैलं नावनं परमं हितम् ।

शिग्रित्यादि । शिग्रुः शोभाञ्जनम् । सिंही कण्टकारी, निकुम्भो दन्ती, सुरसः सिन्धुवारः, एषां कल्कः जलञ्चानुक्तद्रवत्वात् । तन्त्रान्तरे तु अस्मिन् गोमूत्रदर्शनात् नावनं परमं हितमित्यस्य स्थाने मूत्रसिद्धन्तु नावनमिति पठन्ति केचित्—यथा—

"त्रिकटुकविडङ्गसैन्धव बृहतीफल शिग्रुसुरस दन्तिभिः ।
तैलं गोजलसिद्धं नस्यं स्यात् पूतिनासस्य ॥" इति — २३।२४—

पूयरक्ते नवे कुर्याद् रक्तपीनसवत् क्रियाम् ॥ २४ ॥
अतिप्रवृद्धे नाड़ीवद्

पूयरक्ताख्य नासारोगस्य चिकित्सामाह पूयरक्त इत्यादि । अतिप्रवृद्धे तु पूयरक्ते नाड़ीव्रणवदुपक्रमं कुर्य्यात् । —२४।२५—

दग्धेष्वर्शोऽर्बुदेषु च ।
निकुम्भ-कुम्भ-सिन्धूत्थ-मनोह्वाल-कणाग्निकैः ॥ २५ ॥
कल्कितैर्घृतमध्वाक्तां घ्राणे वर्त्तिं प्रवेशयेत् ।
शिग्र्वादि नावनञ्चात्र पूतिनासोदितं भजेत् ॥ २७ ॥

इति श्रीमद् वाग्भट विरचितायामष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे
नासारोग प्रतिषेधो नाम विंशोऽध्यायः ।

नासार्शसो नासार्बुदस्य चिकित्सामाह दग्धेष्वित्यादि । सूत्रस्थानोक्तविधिना दग्धेष्वर्शोऽर्व्वुदेषु । कल्कितैः पिष्टैः निकुम्भादिभिर्वर्त्तिं कृत्वा घ्राणे प्रवेशयेत् । निकुम्भो दन्ती कुम्भस्त्रिवृता अग्निकश्चित्रको (२) **** नाआवा । शिग्र्वादि नावनं शिग्रुसिंहीत्यादिनोक्तं नस्यम् । —२५।२७

इति (श्रीशिवदास सेन कृते अष्टाङ्ग हृदय तत्त्वबोधे) उत्तरे
तन्त्रे विंशोऽध्यायः ॥

---

(२) अत्रापि कानिचिद् अक्षराणि त्रुटितानि ।

एकविंशोऽध्यायः ।

अथातो मुखरोगविज्ञानं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥ १ ॥
मत्स्य-माहिष-वाराह-पिशितामकमूलकम् ।
माष-सूप-दधि-क्षीर-शुक्तेक्षुरस-फाणितम् ॥ २ ॥
अवाक् शय्यां च भजतो द्विषतो दन्तधावनम् ।
धूम-च्छर्दन-गण्डूषानुचितश्च शिराव्यधम् ॥ ३ ॥
क्रुद्धाः श्लेष्मोल्बणा दोषाः कुर्वन्त्यन्तर्मुखे गदान् ।

मुखरोगो जिह्वाश्रयो रोगो वक्तव्यः। जिह्वाचेन्द्रियाधिष्ठानम् । अतः इन्द्रियाधिष्ठानप्रकरणे मुखरोगोऽभिधीयते । तत्र सामान्येन निदानमाह मत्स्येत्यादि । अवाक्शय्याञ्च भजत इति अधोमुखं यथा स्यात्तथा शयानस्येत्यर्थः । द्विषत इत्यकुर्व्वाणस्य । उचितमिति धूमादिभिरपि सम्बध्यते । अन्तर्मुखमिति मुखस्याभ्यन्तरे । १—४—

तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतौ ॥ ४ ॥

अत्र ओष्ठादिष्वष्टस्वाश्रयेषु पञ्चसप्ततिर्मुखरोगा भवन्ति तन्मध्ये प्रथमानोष्ठगतानेकादशव्याधीनाह तत्रेत्यादि । द्विधाकृताविति खण्डद्वयीकृतौ । —४

ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ ।
दाल्येते परिपाट्येते परुषासितकर्कशौ ॥ ५ ॥

वातिकमोष्ठकोपमाह ओष्ठकोपइत्यादि । दाल्येते इति किञ्चिद्विदीर्य्येते । परिपाट्येते इति किञ्चिदवदीर्णत्वचौ भवतः । ५

पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ ।
पिड़काभिर्म्महाक्लेदावाशु पाकौ

पित्तादित्यादिना आशुपाकावित्यन्तेन पैत्तिकमोष्ठकोपमाह । तीक्ष्णासहामिति तीक्ष्णद्रव्योपयोगेन दाहादिजननात् । ६—

कफात् पुनः ॥ ६

शीतासहौ गुरू शूनौ सवर्णपिड़काचितौ।

कफादित्यादिना कफजमोष्ठकोपमाह। सवर्णपिड़काचिताविति ओष्ठसमानवर्ण-पिड़काचितौ। —६।७—

सन्निपातादनेकाभौ दुर्गन्धस्रावपिच्छिलौ ॥ ७

अकस्मान्म्लानसंशूनरुजौ विषम-पाकिनौ।

सान्निपातिकमाह सन्निपातादित्यादि। अनेकाभाविति अनेकवर्णौ। तेन कदाचित्कृष्णौ कदाचिच्छ्वेताविल्यादि। तथा दुर्गन्धस्रावौ पिच्छिलौ च भवतः। अकस्मात् म्लानसंशूनरुजौ इति अकस्मात् म्लानौ इत्यर्थः तथा अकस्माच्च संशूनौ स्थूलौ तथा अकस्मादरुजौ तोदादिवेदनायुक्तौ। रुजतीति रुजं कर्त्तर्य्यच्। —७।८—

रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ ॥ ८ ॥

रक्तजमाह रक्तोपसृष्टावित्यादि। रक्तोपसृष्टाविति रक्तदूषितौ। — ८

खर्जूरसदृशश्चात्र क्षीणे रक्तेऽर्बुदं भवेत्।

रक्तार्बुदमाह खर्जूरेत्यादि। ९—

मांसपिण्डोपमौ मांसात् स्यातां मूर्छत् कृमीक्रमात् ॥ ९ ॥

मांसार्बुदमाह मांसपिण्डोपमावित्यादि। स्यातां मूर्च्छत्क्रिमी क्रमादिति क्रमादिति न सहसा रक्तार्बुद मांसार्बुदौ मूर्च्छत्क्रिमी स्यातां मूर्च्छन्तः उच्छ्रायं प्राप्नुवन्तः क्रिमयो ययो स्तौ तथा। — ९

तैलाभश्वयथुक्लेदौ सकण्डू मेदसा मृदू।

मेदोजमोष्ठकोपमाह तैलाभेत्यादि। सकण्डूविति कण्डूयुतौ। १०—

क्षतजाववदीर्येते पाट्येते चासकृत् पुनः ॥ १० ॥

ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ।

आगन्तुमोष्ठकोपमाह। क्षतजाविति अभिघातजन्यौष्ठकोपयुक्तौ, यद्यप्यत्राभि-घाताद् वातशोणिते एव प्रकुप्यतः तथापि कण्डूयोगात् कफसम्बन्धोऽप्यत्र ज्ञेयः। भोजेऽप्युक्तम्।

"क्षतावभिहतौ वापि रक्ताक्तौष्ठौ सवेदनौ ।
भवतः सपरिस्रावौ कफरक्तप्रदूषितौ ॥" इति – १०।११—

जलबुद्बुदवद्वातकफादोष्ठे जलार्बुदम् ॥ ११ ॥

जलार्बुदमाह जलबुद्बुदवदित्यादि । इत्योष्ठगता एकादशोक्ताः । —११

गण्डालजी स्थिरः शोफो गण्डे दाहज्वरान्वितः ॥ १२ ॥

इदानीं गण्डगतमेकं व्याधिमाह गण्डालजीत्यादि । गण्डे दाहज्वरान्वितः स्थिरः शोफो गण्डालजीत्युच्यते । १२

वातादुष्णसहा दन्ताः शीतस्पर्शाधिकव्यथाः ।
दाल्यन्त इव शूलेन शीताख्यो दालनश्च सः ॥ १३ ॥

दन्तगतान् दश व्याधीनाह (वातादित्यादि)। दाल्यन्त इवेति विदार्यमाणा-इव अस्यैव नामान्तरमाह दालनश्च स इति । १३

दन्तहर्षे प्रवाताम्लशीतभक्ष्याक्षमा द्विजाः ।
भवन्त्यम्लाशनेनैव सरुजाश्चलिता इव ॥ १४ ॥

दन्तहर्षमाह दन्तहर्ष इत्यादि । १४

दन्तभेदे द्विजास्तोदभेदरुक्स्फुटनान्विताः ।

दन्तभेदमाह दन्तभेद इत्यादि । १५—

चालश्चलद्भिर्दशनैर्भक्षणादधिकव्यथैः ॥ १५ ॥

दन्तचालमाह चाल इत्यादि । —१५

करालस्तु करालानां दशनानां समुद्भवः ।

करालमाह कराल इत्यादि । करालानामिति विषमाणाम् । १६—

दन्ताधिकोऽधिदन्ताख्यः स चोक्तः खलिवर्धनः ॥ १६ ॥
दन्ते जायमानेऽतिरुक् प्रजाते तत्र शाम्यति ।

अधिदन्तमाह दन्त इत्यादि । खलिवर्धन इति संज्ञान्तरम् । जाते तत्र प्रशाम्यतीति तस्मिन् अधिदन्ते जाते उत्थिते सति प्रभावादेव रुक् शाम्यति । —१६।१७—

अधावनान्मलो दन्ते कफो वा वातशोषितः । १७ ॥
पूतिगन्धः स्थिरीभूतः शर्करा

अधावनादित्यादिना शर्करेत्यन्तेन दन्तशर्करामाह । – १७।१८—

साऽप्युपेक्षिता ।

शातयत्यणुशो दन्तात् कपालानि कपालिका ॥ १८ ॥

सापीत्यादिना कपालिकामाह । सैव शर्करा उपेक्षिता सती । अणुशो दन्तात् कपालानीति दन्तमला एव कठिनकपालप्रायत्वात् कपालशब्देनोच्यन्ते । अणुश इति अणुप्रमाणान् कृत्वा दन्तात् शातयति निःसारयतीत्यर्थः । दन्तानिति पाठे कपालाकारान् दन्तावयवानित्यर्थः । —१८

श्यावः श्यावत्वमायाता रक्तपित्तानिलैर्द्विजाः ।

श्यावदन्तमाह श्याव इत्यादि । द्विजो दन्तः । १९—

समूलं दन्तमाश्रित्य दोषैरुल्बणमारुतैः ॥ १९ ॥
शोषिते मज्ज्ञि शुषिरे दन्तेऽन्नमलपूरिते ।
पूतित्वात् कृमयः सूक्ष्मा जायन्ते जायते ततः ॥ २० ॥
अहेतुतीव्रार्तिशमः ससंरम्भोऽसितश्चलः ।
प्रलीनपूयरक्तस्रुत् स चोक्तः कृमिदन्तकः ॥ २१ ॥

क्रिमिदन्तमाह समूल मित्यादि । दन्तान्तर्दन्ताभ्यन्तरे यत् शुषिरं विवरं वर्त्तते तत्र मज्ज्ञि दोषैः शोषिते सति अनन्तरं तस्मिन्नेव शुषिरे मलपूरिते सति सूक्ष्माः क्रिमयो जायन्ते । पूतित्वात् मलदौर्गन्ध्यात् । अहेतुतीव्रार्त्तिशम इति अकस्मादेव तीव्रार्त्तिस्तदुपशमश्च जायते । ससंरम्भः इति सशोथः । असित इति दुष्टरक्तजक्रिमिकृतशोथपाकद्वारेण कृष्णच्छिद्र इत्यर्थः । चल इति क्रिमिसञ्चारयुक्तः । प्रलीनपूयरक्तस्रुद् इति यदातु क्रिमयो लीना भवन्ति तदा पूयसहितं रक्तं स्रवति । —१९—२१

श्लेष्मरक्तेन पूतीनि वहन्त्यस्रमहेतुकम् ।
शीर्यन्ते दन्तमांसानि मृदुक्लिन्नासितानि च ॥ २२ ॥
शीतादोऽसौ

इदानीं दन्तमूलगता त्रयोदश व्याधयो वाच्याः । तत्र श्लेष्मेत्यादिना शीतादोऽसावित्यन्तेन शीतादमाह । दन्तमांसानीति दन्तबन्धनमांसानि अस्रं वहन्ति तथा शीर्य्यन्ते च । अहेतुकमिति अभिघातादिनिमित्तं विना । असौ शीतादनामा व्याधिः । २२।२३—

उपकुशः पाकः पित्तासृगुद्भवः ।

दन्तमांसानि दह्यन्ते रक्तान्युत्सेधवन्त्यतः ॥ २३ ॥

कण्डूमन्ति स्रवन्त्यस्रमाध्मायन्तेऽसृजि स्थिते ॥

चला मन्दरुजो दन्ताः पूतिवक्त्रश्च जायते ॥ २४ ॥

उपकुश इत्यादिना जायत इत्यन्तेन उपकुशमाह। पित्तासृगुद्भवः पाक- उपकुशः। तत्र दन्तमांसानि दह्यन्ते दाहवन्ति स्युः। अतो अनन्तरं कन्डूमन्ति भूत्वा अस्रं स्रवन्ति, असृजि स्थिते अवहति सति आध्मायन्ते उच्छूनानि स्युः। —२३।२४

दन्तयोस्त्रिषु वा शोफो बदरास्थिनिभो घनः ।

कफास्रात्तीव्ररुक् शीघ्रं पच्यते दन्तपुप्पुटः ॥ २५ ॥

दन्तयोरित्यादिना दन्तपुप्पुटमाह। दन्तयोरिति दन्तद्वये। अयञ्च दन्तयोस्त्रिष्वभिधानाद् द्वित्रिदन्तनियतः। वक्ष्यमाणः शुषिरस्तु नैवमिति भेदः। २५

दन्तमांसे मलैः सास्रैर्बाह्यान्तः श्वयथुर्गुरुः ।

सरुग्दाहः स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥ २६ ॥

दन्तमांस मित्यादिना दन्तविद्रधिमाह। मलैरिति दोषैः। २६

श्वयथुर्दन्तमूलेषु रुजावान् पित्तरक्तजः ।

लालास्रावी स शुषिरो दन्तमांसप्रशातनः ॥ २७ ॥

शुषिरमाह श्वयथुरित्यादि। २७

स सन्निपातज्वरवान् सपूयरुधिरस्रुतिः ।

महाशुषिर इत्युक्तो विशीर्णद्विजबन्धनः ॥ २८ ॥

महाशुषिरमाह स सन्निपातादित्यादि। स एव शुषिरः यदि सन्निपाताद् भवति ज्वरादिमांश्च तदा महाशुषिर इत्युच्यते। २८

दन्तान्ते कीलवच्छोफो हनुकर्णरुजाकरः ।

प्रतिहन्त्यभ्यवहृतिं श्लेष्मणा सोऽधिमांसकः ॥ २९ ॥

दन्तान्त इत्यादिना अधिमांस माह। दन्तान्त इति दन्ताना मन्ते अवसाने हनुसमीपस्थिते दन्त इत्यर्थः। २९

घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
यस्मिंश्चलन्ति दन्ताश्च सविदर्भोऽभिघातजः ॥ ३० ॥

घृष्टेष्वित्यादिना दन्तविदर्भमाह । संरम्भ इति शोथः । ३०

दन्तमांसाश्रितान् रोगान् यः साध्यानप्युपेक्षते ।
अन्तस्तस्यास्रवन् दोषः सूक्ष्मां सञ्जनयेद्गतिम् ॥ ३१ ॥
पूयं मुहुः सा स्रवति त्वङ्मांसास्थिप्रभेदिनी ।
ताः पुनः पञ्च विज्ञेया लक्षणैः स्वैर्यथोदितैः ॥ ३२ ॥

दन्तमांसाश्रितानित्यादिना पञ्च दन्तनाडी राह । तस्येति पुरुषस्य अन्तर्दोषः पूयः बहिरस्रवन् सन् सूक्ष्मामिति सूक्ष्ममुखीं गतिं नाडीं सञ्जनयेत् । पञ्चेति वात-पित्त-कफ-सन्निपातागन्तुनिमित्ताः । यथोदितैरिति ग्रन्थ्यादिविज्ञानीयाध्यायोक्तैः (उं ३० अं) एताश्च नाडीव्रण समान लक्षणा अपि शालाक्यतन्त्रोक्तसंख्या पूरणार्थं चिकित्साभेदार्थञ्चात्रोक्ताः । तदेव पञ्चभिर्दन्तनाडीभिः सह दन्तमूलगतास्त्रयोदश रोगा उक्ताः । ३१।३२

शाकपत्रखरा सुप्ता स्फुटिता वातदूषिता ।
जिह्वा

इदानीं जिह्वागता षड् व्याधयो वाच्याः । तत्र वातदूषित-जिह्वा-लक्षणमाह शाकेत्यादिना जिह्वेत्यन्तेन । शाको मरुजः द्रुमविशेषः तत्पत्रवत् खरा कण्टकचितेत्यर्थः सुप्तेति सुप्तेव सुप्ता रसानभिज्ञेत्यर्थः । ३३—

पित्तात् सदाहोषा रक्तैर्मांसाङ्कुरैश्चिता ॥ ३३ ॥

पैत्तिकमाह पित्तादित्यादि । —३३

शाल्मलीकण्टकाभैस्तु कफेन बहला गुरुः ।

श्लैष्मिकमाह शाल्मलीत्यादि । अत्रापि मांसांकुरैरिति सम्बध्यते । बहलेत्युच्छूना । ३४—

कफपित्तादधः शोफो जिह्वास्तम्भकृदुन्नतः ।
मत्स्यगन्धिर्भवेत् पक्वः सोऽलासो मांसशातनः ॥ ३४ ॥

अलासमाह कफपित्तादित्यादि । अध इति जिह्वाया अधः पक्वो भूत्वा मांसं शातयति । —३४

प्रबन्धनेऽधो जिह्वायाः शोफो जिह्वाग्रसन्निभः ।
साङ्कुरः कफपित्तास्रैर्लालोषास्तम्भवान् खरः ॥ ३५ ॥
अधिजिह्वः सरुक्वाग्दुर्वाक्याहारविघातकृत् ।

प्रबन्धन इत्यादिना अधिजिह्वमाह । प्रबन्धनं शिरा जिह्वाया अधःशिराया-मित्यर्थः । वाक्यविघातकृद् आहारविघातकृच्च । ३५।३६—

तादृगेवोपजिह्वस्तु जिह्वाया उपरि स्थितः ॥ ३६ ॥

तादृगित्यादिना उपजिह्वमाह । जिह्वाया उपरिस्थित इत्यनेन पूर्वस्माद् भेदं दर्शयति । —३६

तालुमांसेऽनिलाद्दुष्टे पिड़काः सरुजः खराः ।
बह्वयो घनाः स्रावयुक्तास्तास्तालुपिड़काः स्मृताः ॥ ३७ ॥

जिह्वागतान् पङ्क्त्याधीनभिधाय तालुगतानष्टावाह । तत्र तालुमांस इत्यादिना तालुपिडकोच्यते । 'घनं पूयं स्रवन्ति ताः' इति भोज वचनाद् घनेत्यास्राव-विशेषणम् । ३७

तालुमूले कफात् सास्राद् ध्मातवस्तिनिभो (१) मृदुः ।
प्रलम्बः पिच्छिलः शोफो नासयाऽऽहारमीरयन् ॥ ३८ ॥
कण्ठोपरोधस्तृट्कासवमिकृद्गलशुण्डिका ।

तालुमूल इत्यादिना गलशुण्डिकामाह । ध्मातवस्तिनिभ इति वायुपूरित चर्म्मपुटकतुल्यः । नासयाहारमीरयन्निति कण्ठस्य रुद्धत्वाद् यत्किञ्चिद् भक्षयति तत्सर्वं नासाद्वारेण निःसरतीत्यर्थः । ३८।३९—

तालुमध्ये निरुङ् मांसं संहतं तालुसंहतिः ॥ ३९ ॥

तालुसंहतिमाह तालुमध्य इत्यादि । तालुमध्ये संहतं कठिनीभूतं यन्-मांसं तत् तालुसंहति रित्युच्यते । निरुगित्यवेदनम् । —३९

पद्माकृतिस्तालुमध्ये रक्ताच्छ्वयथुरर्बुदम् ।

अर्बुदमाह पद्माकृतिरित्यादि । पद्माकृतिरिति पद्मकर्णिकाकृतिः । उक्तं हि-भोजे—

(१) मत्स्यवस्तिनिभः इति वा पाठः ।

"उपर्य्येव भवेन् मध्ये यथा पद्मस्य कर्णिका ।
पार्श्वतश्चाङ्कुरैर्दीर्घैर्नासाचाप्यवसीदति ।
श्लेष्मरक्त समुत्थानं तालुन्यर्बुद संज्ञितम् ॥" इति ४०—

कच्छपः कच्छपाकारश्चिरवृद्धिः कफादरुक् ॥ ४० ॥

कच्छपमाह कच्छप इत्यादि । अरुगित्यवेदनः । —४०

कोलाभः श्लेष्ममेदोभ्यां पुप्पुटो नीरुजः स्थिरः ।

तालुपुप्पुटमाह कोलाभ इत्यादि । कोलाभ इति बदरफलतुल्यः । ४१—

पित्तेन पाकः पाकाख्यः पूयास्रावी महारुजः ॥ ४१ ॥

तालुपाकमाह पित्तेनेत्यादि । —४१

वातपित्तज्वरायासैस्तालुशोषस्तदाह्वयः ॥ ४२ ॥

तालुशोषमाह वातपित्तेत्यादि । तदाह्वय इति तालुशोष संज्ञः । ४२

जिह्वाप्रबन्धजाः कण्ठे दारुणा मार्गरोधिनः ।
मांसाङ्कुराः शीघ्रचया रोहिणी शीघ्रकारिणी ॥ ४३ ॥

तालुगतानभिधाय गलगतानष्टादश व्याधीनाह । तत्र प्रथमं पञ्चानामपि रोहिणीनां सामान्यलक्षणमाह जिह्वाप्रबन्धजा इत्यादि । जिह्वामूलवर्त्तिशिराजालजाः । मार्गरोधिन इति कण्ठवर्त्मरोधिनः । शीघ्रचया इति शीघ्रव्यापकाः । ४३

कण्ठास्यशोषकृद् वातात् सा हनुश्रोत्ररुक्करी ।

वातजरोहिणी लक्षणमाह कण्ठास्येत्यादि । सेति रोहिणी । ४४—

पित्ताज्ज्वरोषा-तृण्मोह-कण्ठधूमायनान्विता ॥ ४४ ॥
क्षिप्रजा क्षिप्रपाकार्तिरागिणी स्पर्शनासहा ।

पैत्तिक रोहिणी लक्षणमाह पित्तादित्यादि । — ४४।४५—

कफेन पिच्छिला पाण्डु

कफजामाह कफेन पिच्छिला पाण्डुरिति । — ४५ —

असृजा स्फोटकाचिता ॥ ४५ ॥

तप्ताङ्गारनिभा कर्णरुक्करी पित्तजाकृतिः ।
गम्भीरपाका निचयात् सर्वलिङ्गसमन्विता ॥ ४६ ॥

रक्तजामाह (असृजेति) गम्भीरेत्यादि । निचयादिति सन्निपातात् । —४५।४६

दोषैः कफोल्बणैः शोफः कोलवद् ग्रथितोन्नतः ।
शूककण्टकवत् कण्ठशालूकोमार्गरोधनः ॥ ४७ ॥

कण्ठशालूकमाह दोषैरित्यादि । शूककण्टकवदिति शूककण्टकवद् वेदनाजनकत्वात् तत्सदृशः । मार्गरोधन इति कण्ठवर्त्मरोधनः । शालूकमोत्पलकन्दः तदाकारतया शालूक संज्ञा । ४७

वृन्दो वृत्तोन्नतो दाहज्वरकृद् गलपार्श्वगः ।
वृन्दमाह वृन्द इत्यादि । ४८—

हनुसन्धाश्रितः कण्ठे कार्पासीफलसन्निभः ।
पिच्छिलो मन्दरुक् शोफः कठिनस्तुण्डिकेरिका ॥ ४८ ॥

तुण्डीकेरिकामाह हनुसन्ध्याश्रित इत्यादि । तुण्डीकेरी वनकार्पासी तत्फलसदृशत्वात् तुण्डीकेरी संज्ञा । —४८

बाह्यान्तः श्वयथुर्घोरो गलमार्गार्गलोपमः ।
गलौघो मूर्द्धगुरुतातन्द्रालालाज्वरप्रदः ॥ ४६ ॥
गलौघमाह बाह्यान्तरित्यादि । ४९

वलयं नातिरुक् शोफस्तद्वदेवायतोन्नतः ।
वलयमाह वलयमित्यादि । अनतिरुक् शोफो वलयमित्युच्यते । तद्वदेवेति गलौघवदायत उन्नतश्च । ५०—

मांसकीलो गले दोषैरेकोऽनेकोऽथवाल्परुक् ।
कृच्छ्रोच्छ्वासाभ्यवहृतिः पृथुमूलो गिलायुकः ॥ ५० ॥
गिलायुमाह मांसकील इत्यादि । —५०

भूरिमांसाङ्कुरवृत्ता तीव्रतृड्ज्वरमूर्द्धरुक् ।
शतघ्नी निचिड़ा (१) वर्तिः शतघ्नो वातिरुक्करी ॥ ५१ ॥

शतघ्नीमाह भूरिमांसेत्यादि । तीव्रास्तृड़ादयो यस्याम् । शतघ्नी निचिड़ा वर्त्तिरिति शतघ्नी अयस्कण्टकसंच्छन्ना महती शिला तद्वन्निचिड़ावयवा मांसवर्त्तिः मांसप्ररोहः । सुश्रुतेऽपि—"वर्त्तिर्घना कण्ठविरोधिनी" (नि १६) इत्युक्तम् । अतिरुक्करी अतिशयेन पीड़ाकारिणी । ५१

(१) निचितेति वा पाठः ।

स्यात्सर्वजः शीघ्रजन्मपाको महाबलः ।
पूतिपूयनिभस्रावी श्वयथुर्गलविद्रधिः ॥ ५२ ॥

गलविद्रधिमाह स्यादित्यादि । पूतिपूयनिभं स्रवतीति । ५२

जिह्वावसाने कण्ठादावपाकं श्वयथुं मलाः ।
जनयन्ति स्थिरं रक्तं नीरुजं तद्गलार्बुदम् ॥ ५३ ॥

गलार्बुदमाह जिह्वावसान इत्यादि । जिह्वावसाने कण्ठादाविति जिह्वान्तकण्ठयोः सन्धिप्रदेश इत्यर्थः । ५३

पवनः श्लेष्ममेदोभिर्गलपार्श्वेऽभिवर्धितः ।
वर्धमानः स कालेन मुष्कवल्लम्बते नीरुक् ॥ ५४ ॥

गलगण्डमाह पवनेत्यादि । पवन श्लेष्म मेदांसि पृथक् गलगण्डकारणानि । तेन त्रयो गलगण्डाः । पैत्तिकस्तु न भवत्येव स्वाभिमतावापृथक्चतुर्थकारणवत् । बहिरिति गलस्य बाह्यप्रदेशे । कालेन वर्धमान इति कालक्रमेणैव वर्धते न सहसा । ५४

कृष्णोऽरुणो वा तोदाढ्यः स वातात् कृष्णराजिमान् ।
वृद्धस्तालुगते शोषं कुर्याच्च विरसास्यताम् ॥ ५५ ॥
स्थिरः सवर्णः कण्डूमान् शीतस्पर्शो गुरुः कफात् ।
वृद्धस्तालुगते लेपं कुर्याच्च मधुरास्यताम् ॥ ५६ ॥

तत्र कृष्ण इत्यादिना विरसास्यता लिङ्गान्तेन वातिकं गलगण्डमाह । स्थिर इत्यादिना मधुरास्यता लिङ्गान्तेन श्लैष्मिकं गलगण्डमाह । स्थिर इत्यचञ्चलः । सवर्ण इति गात्रसमानवर्णः । ५५।५६

मेदस्तः श्लेष्मवद्धानि-वृद्ध्योः सोऽनुविधीयते ।
देहं वृद्धश्च कुरुते गले शब्दं स्वरेऽल्पताम् ॥ ५७ ॥

मेदोजगलगण्डमाह मेदस्त इत्यादि । मेदसः सकाशात् यो गलगण्डो भवति स श्लेष्मवत् श्लेष्मज इव श्लैष्मिकगलगण्डवदित्यर्थः । हानिवृद्ध्योः सोऽनुविधीयते देहमिति स इति मेदोभवो गलगण्डः हानौ वृद्धौ च देह मनुविधीयते देहहानौ हानिं देहवृद्धौ च वृद्धिं यातीत्यर्थः । अनुविधीयत इति कर्मकर्त-

र्थात्मनेपदम्। वृद्धश्च कुरुते गले शब्दं स्वरेऽल्पतामिति स एव गलगण्डो वृद्धः सन् गले शब्दं कुरुते स्वरे च अल्पतां कुरुते। ५७

श्लेष्मरुद्धाऽनिलगतिः शुष्ककण्ठो हतस्वरः।
ताम्यन् प्रसक्तं श्वसिति येन स स्वरहानिलात् ॥ ५८ ॥

स्वरघ्नमाह श्लेष्मरुद्धेत्यादि। शुष्ककण्ठो नीरसकण्ठः। ताम्यन्निति मूर्च्छां गच्छन् किंवा तमः पश्यन्। प्रसक्तमिति निरन्तरम्। स्वरहा इति स्वरघ्नाख्यो-व्याधिः। ५८

करोति वदनस्यान्तर्व्रणान् सर्वसरोऽनिलः।
सञ्चारिणोऽरुणान् रूक्षानोष्ठौ ताम्रौ चलत्वचौ ॥ ५९ ॥
जिह्वा शीतासहा गुर्वी स्फुटिता कण्टकाचिता।
विवृणोति च कृच्छ्रेण मुखं पाको मुखस्य सः ॥ ६० ॥

कण्ठगतानष्टादश व्याधीनभिधाय सर्व्ववक्त्रगतानष्टावाह। करोतीत्यादिना मुखस्य स इत्यन्तेन वातजमुखपाकमाह। वदनस्यान्तरिति मुखस्याभ्यन्तरे गलताल्वादौ। सर्व्वसर इति ओष्ठगलताल्वादि सर्व्वस्थान-व्यापकः। कृच्छ्रेण कष्टेन मुखं विवृणोति प्रकाशयति। ५९।६०

अधः प्रतिहतो वायुरर्शोगुल्मकफादिभिः।
यात्यूर्ध्वं वक्त्रदौर्गन्ध्यं कुर्वन्नूर्ध्वगुदस्तु सः ॥ ६१ ॥

ऊर्ध्वगुदमाह अध इत्यादि। मुखस्य दौर्गन्ध्येन गुदतुल्यत्वाद् ऊर्ध्वगुद इति संज्ञा। ६१

मुखस्य पित्तजे पाके दाहोषे तिक्तवक्त्रता।
क्षारोक्षितक्षतसमा व्रणाः

पित्तज मुखपाकमाह मुखस्येत्यादिना व्रणा इत्यन्तेन। ऊषा समीपस्थेनेव वह्निना दाहः। ६२—

तद्वच्च रक्तजे ॥ ६२ ॥

रक्तजमुखपाकमाह तद्वच्च रक्तज इति। तद्वदिति पैत्तिकमुखपाकवत्। —६२

कफजे मधुरास्यत्वं कण्डूमत्पिच्छिला व्रणाः ॥ ६३ ॥

कफजं मुखपाकमाह कफज इत्यादि। ६३

अन्तःकपोलमाश्रित्य श्यावपाण्डु कफोऽर्बुदम् ।
कुर्यात् तत्पाटितं क्लिन्नं मृदितञ्च विवर्द्धते ॥ ६४ ॥

अर्बुदमाह अन्तःकपोलमित्यादि । अन्तःकपोलमिति कपोलस्याभ्यन्तरे । श्यावपाण्डु त्यर्बुद विशेषणम् । अयञ्च अन्तःकपोल माश्रित्य भवन्नपि क्रमा-जिह्वादि स्थान व्यापकतया सर्व्वसर-व्याधि-मध्ये पठ्यते । ६४

मुखपाको भवेत् सास्रैः सर्वैं सर्वाकृतिर्मलैः ।

सान्निपातिक मुखपाकमाह मुखपाक इत्यादि । ६५—

पूत्यास्यता च तैरेव दन्तकाष्ठादिविद्विषः ॥ ६५ ॥

पूत्यास्यतेत्यादिना पूतिमुखमाह । तैरिति सास्रैर्मलैः । —६५

ओष्ठे गण्डे द्विजे मूले जिह्वायां तालुके गले ।
वक्त्रे सर्वत्र चेत्युक्ताः पञ्चसप्ततिरामयाः ॥ ६६ ॥
एकादशैको दश च त्रयोदश तथा च षट् ।
अष्टावष्टादशाष्टौ च क्रमात्

इदानी मोष्ठाद्याश्रयभेदेन उक्तैः सर्व्वैर्व्याधिभिर्मिलित्वा पञ्चसप्ततिर्मुखरोगा-भवन्तीत्याह ओष्ठ इत्यादि । एकादशादि संख्या ओष्ठादिषु यथासंख्यं बोध्याः । क्रमादिति उक्तेषु ओष्ठादिषु । ६६।६७—

तेष्वनुपक्रमाः ॥ ६७ ॥

करालो मांसरक्तोष्ठावर्बुदानि जलाद्विना ।
कच्छपस्तालुपिड़का गलौघः शुषिरो महान् ॥ ६८ ॥
स्वरघ्नोर्ध्वगुदः श्यावः शतघ्नीवलयालसाः ।
नाड्योष्ठकोपोनिचयात् रक्तात् सर्वैश्च रोहिणी ॥ ६९ ॥
दशने स्फुटिते दन्तभेदः पक्वोपजिह्विका ।
गलगण्डः स्वरभ्रंशः कृच्छ्रोच्छ्वासोऽतिवत्सरः ।
याप्यस्तु हर्षो भेदश्च शेषान् शस्त्रौषधैर्जयेत् ॥ ७० ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायाम् उत्तरतन्त्रे मुखरोग विज्ञानीयो नामैकविंशोऽध्यायः ॥

इदानी मुक्तेषु व्याधिषु मध्ये ये ये प्रत्याख्येयाः ये ये वा साध्याः योवा याप्य-

स्तदाह तेष्वित्यादि। तेषु पञ्चसप्ततिव्याधिषु मध्ये करालादयश्चतुर्विंशतिः व्याधयो अनुपक्रमाः प्रत्याख्येयाः। मांसोष्ठो 'मांसपिण्डोपमं मांसाद्" इत्यादिनोक्तः। रक्तोपसृष्टावित्यादिना तु रक्तौष्ठ उक्तः। जलाद्विनाऽर्बुदानि जलार्बुदाद् विना चत्वार्य्यर्बुदानि ओष्ठार्बुद-ताल्वर्बुद-गलार्बुद-सर्वसरार्बुदानीति। शुषिरो महानिति महाशुषिरः। श्यावेति श्यावदन्तः। निचयान् नाड्योष्ठकोपाविति सान्निपातिक दन्तनाड़ी तथा सान्निपातिकौष्ठकोपश्चेति। रक्तात्सर्व्वैश्च रोहिणीति रक्तजरोहिणी सान्निपातिकरोहिणीच। दशने स्फुटिते सति दन्तभेदोऽसाध्यः। तथा उपजिह्विका च पक्वा सत्यसाध्या। गलगण्डो यदि स्वयं भ्रंशयुक्तः स्यात् तथा कृच्छ्रोच्छ्वासोऽतिक्रान्तसंवत्सरश्च स्यात्तदा असाध्यः। याप्यस्तु भेदो हर्षश्चेति दन्तभेदो याप्यो भवति यदि स्फुटितदन्तो न स्यात्, तथा दन्तहर्षश्च याप्यः। शेषानित्युनपञ्चाशत्। ६७—७०

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
एकविंशोऽध्यायः।

द्वाविंशोऽध्यायः।

अथातो मुखरोगप्रतिषेधं व्याख्यास्यामः
इतिहस्माहुरात्रेयादयो महर्षयः॥ १॥
खण्डोष्ठस्य विलिख्यान्तौ स्यूत्वा व्रणवदाचरेत्॥ २॥

उक्तानां मुखरोगाणां यथाक्रमं चिकित्सामभिधातुं मुखरोगप्रतिषेध उच्यते। स्युत्वेति सिवू तन्तु सन्तान इत्यस्य क्त्वा प्रत्ययरूपम्। १।२

यष्टी-ज्योतिष्मती-रोध्र-श्रावणी-सारिवोत्पलैः।
पटोल्या काकमाच्या च तैलमभ्यञ्जनं पचेत्॥ ३॥
नस्यञ्च तैलं वातघ्नमधुरस्कन्धसाधितम्।

यष्टीत्यादौ यष्टीति यष्टीमधुकं ज्योतिष्मती लतापुटकी, श्रावणी मुण्डितिका, मधुरस्कन्धो रसभेदीयोक्तो मधुरो गणः। ३।४—

महास्नेहेन वातौष्ठे सिद्धेनाक्तः पिचुर्हितः।
देवधूपमधूच्छिष्टगुग्गुल्वमरदारुभिः ॥ ४ ॥
यष्ट्याह्वचूर्णयुक्तेन तेनैव प्रतिसारणम्।

महास्नेहेनेत्यादि। वातोष्ठ इति वातदुष्टे ओष्ठे। महास्नेहेनेति चतुःस्नेहेन। सिद्धेनेति पदं देवधूपादिभिः सम्बध्यते देवधूपादिकल्कपाकेनेत्यर्थः। देवधूपः सर्जरसः, मधूच्छिष्टं सिक्थकम् सुश्रुते तु मधूच्छिष्टस्थाने श्रीवेष्टकं पठ्यते। उभयमपि प्रमाणं स्मृतिद्वैधवत्। तेनैवेति देवधूपादिना। सुश्रुतेऽप्युक्तम् "श्रीवेष्टकं सर्ज्जरसं गुग्गुलं सुरदारु च। यष्टी मधुक चूर्णञ्च विदध्यात् प्रतिसारणम् ॥" इति (चिं २२ अ) प्रतिसारणं घर्षणम्।—४।५—

नाड्योष्ठं स्वेदयेद्दुग्धसिद्धैरेरण्डपल्लवैः ॥ ५ ॥
खण्डोष्ठविहितं नस्यं तस्य मूर्ध्नि च तर्पणम्।

नाड्यौष्ठमित्यादि। नाड्येति नाड़ीस्वेदविधिना। नाड़ीस्वेदविधिस्तु यद्यप्यत्र तन्त्रे नोक्त स्तथापि समानतन्त्रे चरकादौ उक्तोऽनुसर्त्तव्यः। तस्य मुर्ध्नि च तर्पणमिति स्नेहनमभ्यङ्गादि। सर्व्वञ्चेदं मध्यवागभटेऽप्युक्तम्- "वातज ओष्ठकोपे देवदारुगुग्गुलु सर्जरस मधूच्छिष्ट सिद्धेन महास्नेहेनाभ्यङ्गः। तेनैव समधुकचूर्णेन प्रतिसारणम्। एरण्डपल्लवैः क्षीरोत्क्वथितैर्नाड़ीस्वेदः। खण्डौष्ठोक्तञ्च नावनम्, महास्नेहाक्तेन पिचुना प्रच्छादनम्, शिरोऽभ्यङ्गश्च" (१) इति।—६।६—

पित्ताभिघातजावोष्ठौ जलौकोभिरुपाचरेत् ॥ ६ ॥
रोध्र-सर्जरस-क्षौद्र-मधुकैः प्रतिसारणम्।

पित्ताभिघातजाविति पित्तेनाभिघातेन च प्रकुपिताविल्यर्थः।—६।७

गुडुची-यष्टि-पत्तङ्ग-सिद्धमभ्यञ्जने घृतम् ॥ ७ ॥
पित्तविद्रधिवच्चात्र क्रिया

गुड़ूचीत्यादौ यष्टीति यष्टीमधु, पत्तङ्गं रक्तचन्दनम्। अत्रेति पित्ताभिघातजे।—७।८—

(१) अत मध्यवाग्भट इत्युक्तिर्लक्षणीया। अतोऽत्र तपाठस्तु वृद्धवाग्भटापरसंज्ञाष्टाङ्गसंग्रहपाठाद् भिन्नएव।

शोणितजेऽपि च ।

इदमेव नवे कार्यं (१)

पित्ताभिघातजं कर्म्म शोणितजौष्ठरोगेऽपि कार्य्यमित्याह शोणितजेऽपीत्यादि । यद्यपि शोणितौष्ठस्यानुपक्रमत्वमेवोक्तं तथापि तस्य चिरोत्पन्नस्यैव प्रत्याख्येयत्वं ज्ञेयम् । एतदर्थस्फोरणार्थमेव नव इति विशेषणमत्रोक्तम् ।– ८—

कर्म्मौष्ठे तु कफोत्तरे ॥ ८ ॥
पाठा-क्षार-मधु-व्योषैर्हृतास्रे प्रतिसारणम् ।
धूम-नावन-गण्डूषाः प्रयोज्याश्च कफच्छिदः ॥ ९ ॥

कफजौष्ठप्रकोप चिकित्सामाह कर्मौष्ठेत्वित्यादि । कफोत्तरे इति कफरोगयुते ।—८।९

स्विन्नं भिन्नं विमेदस्कं दहेन्मेदोजमग्निना ।
प्रियङ्गु-रोध्र-त्रिफला-माक्षिकैः प्रतिसारयेत् ॥ १० ॥

मेदोजौष्ठकोप चिकित्सामाह स्विन्नमित्यादि । भिन्नं विमेदस्कमिति शस्त्रेण भित्त्वाऽपहृतमेदस्कम् । १०

सक्षौद्रं (२) घर्षणं तीक्ष्णैर्भिन्नशुद्धे जलार्बुदे ।
अवगाढेऽतिवृद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया ॥ ११ ॥

जलार्बुद चिकित्सामाह सक्षौद्रमित्यादि । तीक्ष्णैरिति तीक्ष्णद्रव्यैर्मरिचादिभिः । भिन्नशुद्धे इति आदौ भिन्ने पश्चादपहृतजले इति । अवगाढे अवगाढमूले । ११

आमाद्यवस्थास्वलजीं गण्डे शोफवदाचरेत् ॥ १२ ॥

एकादशानामोष्ठगत रोगाणां चिकित्सितमभिधाय गण्डालजी चिकित्सामाह आमेत्यादि । आमाद्यवस्थास्विति आमविदह्यमानपक्वावस्थासु शोथवदिति व्रणशोथवत् । १२

---

(१) भवेदिति वा पाठः ।

(२) सक्षौद्रा घर्षणं तीक्ष्णा इति वा पाठः ।

स्विन्नस्य शीतदन्तस्य पालीं विलिखितां दहेत् ।
तैलेन प्रतिसार्या च सक्षौद्रघनसैन्धवैः ॥ १३ ॥
दाड़िमत्वग्वरा-तार्क्ष्य-कान्ता-जम्ब्वस्थि-नागरैः ।
कवलः क्षीरिणां क्वाथैरणुतैलञ्च नावनम् ॥ १४ ॥

इदानीं दन्तगतानां व्याधीनां चिकित्सामाह स्विन्नस्येत्यादि । पालीमिति दन्तपालीम् विलिखितां प्रच्छिताम् । तैलेन दहेदित्यन्वयः । प्रतिसार्य्याचेत्यत्र दन्तपालिरिति सम्बध्यते घर्षणीयेत्यर्थः । वरा त्रिफला, तार्क्ष्यं रसाञ्जनम् । कान्ता प्रियङ्गुः । क्षीरिणामिति वटोडुम्बरादीनां वल्कानाम् । अणुतैलं नस्यविधावुक्तम् । १३।१४

दन्तहर्षे तथा भेदे सर्वा वातहरा क्रिया ।
तिलयष्टीमधुश्रृतं क्षीरं गण्डूषधारणम् ॥ १५ ॥

दन्तहर्ष-दन्तभेदयो श्चिकित्सामाह दन्तहर्ष इत्यादिना गण्डूषधारणमित्यन्तेन । १५

सस्नेह दशमूलाम्बु गण्डूषः प्रचलद्द्विजे ।
तुत्थ-रोध्र-कणा-श्रेष्ठा-पत्तङ्ग-पटु-घर्षणम् ॥ १६ ॥
स्निग्धाः शील्या यथावस्थं नस्यान्नकवलादयः ।

चलदन्त चिकित्सामाह सस्नेहेत्यादि । श्रेष्ठा त्रिफला, पत्तङ्गं रक्तचन्दनम्, पटु सैन्धवम् । नस्यादयः शील्या इत्यभ्यसनीयाः । १६।१७—

अधिदन्तकमालिप्तं यदा क्षारेण जर्जरम् ॥ १७ ॥
कृमिदन्तमिवोत्पाट्य तद्वच्चोपचरेत्तदा ॥
अनवस्थितरक्ते च दग्धे व्रण इव क्रिया ॥ १८ ॥

अधिदन्त चिकित्सामाह अधिदन्तकमित्यादि । तद्वदिति क्रिमिदन्तवत् । अनवस्थितेत्यादि दाहोऽत्र रक्तातिस्रुतिनिवारणार्थम् ।—१७।१८

अहिंसन् दन्तमूलानि दन्तेभ्यः शर्करां हरेत् ।
लाक्षाचूर्णै(१)र्मधुयुतैस्ततश्च प्रतिसारयेत् ॥ १९ ॥

दन्तशर्करा चिकित्सामाह अहिंसन् इत्यादि । दन्तमूल हिंसया हि अभिघातजा

(१) चारेति वा पाठः ।

दन्तनाडी स्यात्। क्षारचूर्णैरित्यत्र लाक्षाचूर्णैरित्येव पाठः सर्व्वेष्वेव सुश्रुतपुस्तकेषु दृश्यते, प्रामाणिकटीकाकारैश्च व्याख्यात इति लाक्षापाठ एवास्मत्सम्मत इति । १९

कपालिकायामप्येवं हर्षोत्कश्च समाचरेत् ।

कपालिका चिकित्सामाह कपालिकायामित्यादि । एवमिति दन्तशर्करोक्तम् । २०—

जयेद्विस्रावणैः स्विन्नमचलं कृमिदन्तकम् ॥ २० ॥
स्निग्धैश्चालेप-गण्डूष-नस्याहारैश्चलापहैः ।
गुडेन पूर्णं शुषिरं मधूच्छिष्टेन वा दहेत् ॥ २१ ॥
सप्तच्छदार्कक्षीराभ्यां पूरणं कृमिशूलजित् ।
हिङ्गु-कट्फल-कासीस-स्वर्जिका-कुष्ठ-वेल्लजम् ॥ २२ ॥
रजो रुजं जयत्याशु वस्त्रस्थं दशने धृतम् ।
गण्डूषं धारयेत्तैलमेभिरेव च साधितम् ॥ २३ ॥
क्वाथैर्वा युक्तमेरण्ड-क्षिव्याघ्री-भूकदम्बजैः ।
क्रियायोगैर्बहुविधैरित्यशान्तरुजं भृशम् ॥ २४ ॥
दृढमप्युद्धरेद्दन्तं पूर्वं मूलाद्विमोक्षितम् ॥
सन्दंशकेन लघुना दन्तनिर्घातनेन वा ॥ २५ ॥
तैलं सयष्ट्याह्वरजो गण्डूषो मधुना ततः ।
ततो विदारि-यष्ट्याह्व-शृङ्गाटक-कशेरुभिः ॥ २६ ॥
तैलं दशगुणक्षीरे सिद्धं युञ्जीत नावनम् ।
कृश-दुर्बल-वृद्धानां वातार्तानाञ्च नोद्धरेत् ॥ २७ ॥
नोद्धरेच्चोत्तरं दन्तं बहूपद्रवकृद्धि सः ।
एषामप्युद्धृतैः स्निग्धः स्वादुः शीतः क्रमो हितः ॥ २८ ॥

क्रिमिदन्त चिकित्सामाह जयेदित्यादिना क्रमोहित इत्यन्तेन । विस्रावण क्रिमिदूषित रक्तस्य । चलापहैरिति वातहरैः । गुडेनेत्यादि । शुषिरं क्रिमिकृतं दन्तविवरं गुडेन पूर्णं कृत्वा मधूच्छिष्टेन वा पूर्णं कृत्वा दहेत् । मध्य वागभटेऽप्युक्तम्—"क्रिमिदन्तशुषिरं गुडेन मधूच्छिष्टेन सर्पिषा पूरयित्वा तप्तशलाकया

दहेत्" (१) इति । गुडादिभिः शुषिरपूरणञ्च क्रिमीणामूवक्लेशनार्थम् । सप्तच्छदार्क-क्षीराभ्यामिति सप्तच्छदक्षीरेण अर्कक्षीरेण चेत्यर्थः । वेल्लो विडङ्गः । एभि-रेवेति हिंग्वादिभिः । क्वाथैर्वा युक्त मित्यत्रापि तैलमिति सम्बध्यते । द्विव्याघ्री बृहती कण्टकारिका च, भूकदम्बोऽलम्बुषः । मूलादिति दन्तमूलात् । निर्घातन-मितस्ततश्चालनम् । तैल मित्यादि । तत इति दन्तोद्धरणानन्तरम् । सयष्टयाह्व-रज इति यष्टीमधुकचूर्णसहितं तैलमित्यर्थः । उत्तरं दन्तमित्युपरिजम् । बहूपद्रवकृदिति रक्तातिस्रावजन्यानेकरोगकृत् । एषामप्युद्धृताविति प्रमादा-त्रिपिद्धोद्धरणानामपि दन्तानामुद्धृतावित्यर्थः । २०—२८

विस्राविताल्ले शीतादे सक्षौद्रैः प्रतिसारणम् ।

मुस्ताम्रुनत्वक्त्रिफला-फलिनी-तार्क्ष्य-नागरैः ॥ २९ ॥

तत्क्वाथः कवलो नस्यं तैलं मधुरसाधितम् ।

विस्रावितास्र इत्यादि । फलिनी प्रियङ्गुः, तार्क्ष्यं रसाञ्जनम् । तत्क्वाथ-इति मुस्तादिक्वाथः । मधुरसाधितमिति रसभेदीयोक्त-मधुर-वर्ग-साधितम् । २९।३०—

दन्तमांसान्युपकुशे स्विन्नान्युष्णाम्बुधारणैः ॥ ३० ॥

मण्डलाग्रेण शाकादिपत्रैर्वा बहुशो लिखेत् ।

ततश्च प्रतिसार्याणि घृतमस्तुमधुद्रुतैः (२) ॥ ३१ ॥

लाक्षा-प्रियंगु-पत्तङ्ग-लवणोत्तम-गैरिकैः ।

सकुष्ठ-शुण्ठी-मरिच-यष्टीमधु-रसाञ्जनैः ॥ ३२ ॥

दन्तमांसानीत्यादिना कवलनस्ययो रित्यन्तेनोपकुशचिकित्सा माह । लिखेदिति प्रच्छयित्वा विघृष्य च रक्तं स्रावयेत् । आदिशब्दाच्छाखोटक-फल्गु-पत्रादीनां ग्रहणम् घृतमस्तुमधुभिर्द्रवीकृतैर्लाक्षादिभिः रसाञ्जनान्तैः प्रतिसार्य्या-णीति घर्षणीयानि । पत्तङ्गं रक्तचन्दनं, लवणोत्तमं सैन्धवम् । ३०—३२

सुखोष्णो घृतमण्डोऽनु तैलं वा कवलग्रहः ।

घृतञ्च मधुरैः सिद्धं हितं कवल-नस्ययोः॥ ३३ ॥

सुखोष्ण इत्यादि । अनु इति प्रतिसारणानन्तरम्, सुखोष्णो घृतमण्डः तैलं वा कवड़ग्रहः कार्य्यः । ३३

(१) "ततया कुलशलाकया दहेत्" इति मुद्रित अष्टाङ्ग सग्रहे । इति पाठभेदो लक्षणीयः ।
(२) घृतमस्वे ति वा पाठः ।

दन्तपुप्पुटके स्विन्न-छिन्न-भिन्न-विलेखिते ।
यष्ट्याह्व-स्वर्जिका-शुण्ठी-सैन्धवैः प्रतिसारणम् ॥ ३४ ॥

दन्तपुप्पुटक इत्यादि । विलेखित इति प्रच्छिते, लेखनं प्रच्छानमिति निश्चलः । ३४

विद्रधौ कटुतीक्ष्णोष्णरूक्षैः कवल-लेपनम् ।
घर्षणं कटुका-कुष्ठ-वृश्चिकाली-यवोद्भवैः ॥ ३५ ॥

विद्रधावित्यादिना अवगाढक इत्यन्तेन दन्तविद्रधि चिकित्सामाह । कटुका कटुरोहिणी, वृश्चिकाली वृश्चिकपत्री, यवोद्भवो यवक्षारः । ३५

रक्षेत् पाकं हिमैः पक्वः पाट्यो दाह्योऽवगाढकः ।

रक्षेदित्यादि । हिमैः शीतवीर्य्यद्रव्यैः पाकं रक्षेत् । तथापि यदि पक्वं स्यात्तदा पाट्यः । अवगाढक इति अवगाढमूलो दाह्यः । ३६—

शुषिरे छिन्नलिखिते सक्षौद्रैः प्रतिसारणम् ॥ ३६ ॥
रोध्र-मुस्त-मिसि-श्रेष्ठा-तार्क्ष्य-पत्तङ्ग-किंशुकैः ।
सकट्फलैः कषायैश्च तेषां गण्डूष इष्यते ॥ ३७ ॥

शुषिर इत्यादिना नावनमित्यन्तेन शुषिराख्य दन्तरोगचिकित्सामाह । मिसिर्मधुरिका, श्रेष्ठा त्रिफला, तार्क्ष्यं रसाञ्जनम्, पत्तङ्गं रक्तचन्दनम्, किंशुक-स्थाने सैन्धवं केचित् पठन्ति । कषायैश्च तेषां गण्डुष इति तेषां लोध्रा-दीनाम् ।—३६।३७

यष्टी-रोध्रोत्पलानन्ता-सारिवागुरु-चन्दनैः ।
सगैरिक-सिता-पुण्ड्रैः सिद्धं तैलञ्च नावनम् ॥ ३८ ॥

यष्टीत्यादि । अनन्ता अनन्तमूलम्, शारिवा श्यामालता, पुण्ड्रं प्रपौण्डरीकम् ।३८

छित्त्वाधिमांसकं चूर्णैः सक्षौद्रैः प्रतिसारयेत् ।
वचा-तेजोवती-पाठा-स्वर्जिका-यवशूकजैः ॥ ३९
पटोल-निम्ब-त्रिफला-कषायः कवलो हितः ।

अधिमांस चिकित्सामाह छित्त्वेत्यादि । अधिमांसस्य चिरोत्थितस्यैव छेदनं बोध्यम् नत्वचिरोत्थितस्य । यदाह वृद्ध वागभटः—

"अधिमांसमचिरोत्थितं स्रावयेत् विवृद्धन्तु बड़िशेन मुचुण्ट्या वा गृहीत्वा मण्डलाग्रेण छित्त्वा तीक्ष्णैः प्रतिसारयेद्" इति (उ' २६ अं) तेजोवती चवी मूर्व्वेत्यन्ये किन्तु चव्येव युक्ता उक्त वृद्ध वाग्भटवचने तीक्ष्णै रित्युक्तत्वात्। ३९।४०—

विदर्भे दन्तमूलानि मण्डलाग्रेण शोधयेत् ॥ ४० ॥
क्षारं युञ्ज्यात्ततो नस्यं गण्डूषादि च शीतलम्।
संशोध्योभयतः कार्यं शिरश्चोपचरेत्ततः ॥ ४१ ॥

दन्तविदर्भ चिकित्सामाह विदर्भ इत्यादिना तत इत्यन्तेन। शोधयेदिति निर्गतपूयानि कुर्य्यात्। उभयत इति वमनविरेकाभ्याम्। ४०।४१

नाडीं दन्तानुगां दन्तं समुद्धृत्याग्निना दहेत्।
न्युब्जां (१) नैकगतिं पूर्णां मदनेन गुड़ेन वा ॥ ४२ ॥
धावनं जाति-मदन-खदिर-स्वादुकण्टकैः।
क्षीरिवृक्षाम्बुगण्डूषो नस्यं तैलञ्च तत्कृतम् ॥ ४३ ॥

नाड़ीमित्यादिना तत्कृतमित्यन्तेन दन्तनाड़ी चिकित्सामाह। न्युब्जामित्यधोमुखाम्, 'कुब्जाधोमुखयोर्न्युब्ज' इति मेदिनी। नैकगतिमिति बहु वक्त्राम्। दन्तानुगां न्युब्जां बहुवक्त्राञ्च गतिं गुड़ेन तथा मदनेन मधूच्छिष्टेन पुर्णां कृत्वा अग्निना दहेत्। चरकोत्तर तन्त्रेऽप्युक्तम्—

"बहुवक्त्रां गतिं ज्ञात्वा प्रपूर्य्य गुड़सिकथकैः।
दहेत् पूर्व्वविधानेन कषायैः क्षीरिवृक्षजैः।
गण्डुष स्तैलमेभिर्वा सिद्धं नस्यं प्रकल्पयेत् ॥" इति (२)

धावन मित्यादौ जात्यादिभिर्मुखधावनानि अथानुपपत्त्या तत्कृतैः कषायैरित्यर्थः। चक्रोऽपि "धावनं जातिमदन स्वादुकण्टक खादिरम्। कषायं, जाति मदन कटुका स्वादुकण्टकैः॥" (चिं २२ अं) इत्यादि सौश्रुतग्रन्थ व्याख्याने "कषायमितिच्छेदः। तेन जात्यादि कषायेण धावनम्। जातिमदन कटुकादिभिश्च कृतं तैलम्" इति भानुमत्यां व्याख्यातवान्। अरुणस्तु धावनस्थाने नावनमिति

(१) कुब्जा मिति वा पाठः।

(२) अद्यत्वे चरकसंहितायां मुत्तरतन्त्रस्य सद्भावो न दृश्यते। शिवदासकाले तस्य सत्तासीदित्यनुमीयतेऽनेनोत्तरतन्त्रवचनोद्धारेण।

पठित्वा व्याख्यादिभि र्नावनमिति व्याचष्टे किन्तु धावनपाठ एव प्रामाणिकैः सुश्रुत-टीकाकारैः कार्त्तिककुण्ड गयदासादिभिरपि व्याख्यात इति। मदनं मदनकण्टकं नतु सिक्थकम्। "कण्टकी मदनोयोज्यः" इति वृन्दकुण्ड वचनात्। स्वादुकण्टको विकङ्कतः। क्षीरिवृक्षो वटोडुम्बरादयः। तेषामम्बु क्वाथो गण्डुषः तथा तत्कृतमिति क्षीरिवृक्ष-कल्क-क्वाथ कृतं तैलं नस्य विधेयम्। ४२।४३

कुर्याद्वातोष्ठकोपोक्तं कण्टकेष्वनिलात्मसु।
जिह्वायां

दन्तमूलगतानां व्याधीनां चिकित्सामभिधाय जिह्वागतानां चिकित्सामाह कुर्यादित्यादि। कण्टकेष्विति जिह्वाकण्टकेषु। अनिलात्मस्विति वातजेषु। ४४—

पित्तजातेषु घृष्टेषु रुधिरे स्रुते॥ ४४॥
प्रतिसारण-गण्डूष-नावनं मधुरैर्हितम्।

पैत्तिक-जिह्वा-कण्टकचिकित्सामाह पित्तजातेष्वित्यादि। घृष्टेष्विति गोजी-शेफालिकापत्रै रित्यर्थः। मधुरैरिति रसभेदीयोक्तेन मधुरगणेन। ४४।४५--

तीक्ष्णैः कफोत्थेष्वप्येवं सर्षप-त्र्यूषणादिभिः॥ ४५॥

कफज कण्टक चिकित्सामाह तीक्ष्णैरित्यादि। एवमिति प्रतिसारण-गण्डुष नावनानीत्यर्थः। —४५

नवे जिह्वालसेऽप्येवं तन्तु शस्त्रेण न स्पृशेत्॥ ४६॥

अलस चिकित्सा माह नव इत्यादि। एवमिति कफोत्थकण्टकवच्चिकित्सितमित्यर्थः। अलसस्य यत् प्रत्याख्येयत्वमुक्तं तच्चिरजस्यैव नत्वभिनवस्येति बोधयितुं नवइत्यलसविशेषण मुक्तम्। तन्तु शस्त्रेण न स्पृशेदित्यनेन पूर्व्वोक्तानां शस्त्रसाध्यत्वं बोधयति। ४६

उन्नाम्य जिह्वामाकृष्टां बडिशेनाधिजिह्विकाम्।
छेदयेन्मण्डलाग्रेण तीक्ष्णोष्णैर्घर्षणादि च॥ ४७॥

अधिजिह्वाचिकित्सामाह उन्नाम्येत्यादि। जिह्वामुन्नाम्य वड़िशेनाकृष्टामधिजिह्वां मण्डलाग्रेण छेदयेत्। घर्षणादीत्यादिशब्दात् गण्डूषनावनयोर्ग्रहणम्। ४७

उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्।

उपजिह्वा चिकित्सामाह उपजिह्वामित्यादि। परिस्राव्येति शाकादि-

पत्रेणाङ्गुलिशस्त्रेण वा। मध्यवागभटेऽप्युक्तम्--"उपजिह्विकां शाकपत्रेणाङ्गुलिशस्त्रेण वा परिस्राव्य यवक्षारेण प्रतिसारयेद्" इति (वृं वां उं २६ अं)। ४८—

कफघ्नैः शुण्डिका साध्या नस्य-गण्डूष-घर्षणैः ॥ ४८ ॥
एर्वारुबीजप्रतिमं वृद्धाया मसिराततम् ।
अग्रे निविष्टं जिह्वाया वडिशाद्यवलम्बितम् ॥ ४९ ॥
छेदयेन्मण्डलाग्रेण नात्यग्रे नातिमूलतः ।

जिह्वागतानां चिकित्सामभिधाय साध्यानां तालुगतानां चिकित्सा वाच्या तत्र कफघ्नैरित्यादिना वचाम्बुभि रित्यन्तेन तालुरोगविशेषस्य गलशुण्डिकाख्यस्य चिकित्सामाह। एर्व्वारुः कर्कटी। गलशुण्डिकायां प्रवृद्धायां सत्यां जिह्वायां सन्निविष्टं गलशुण्डिकाया अग्रं किं विशिष्टं एर्व्वारुबीज सदृशं पुनः किं विशिष्टम् असिराततम् शिराभिरव्याप्तं तथा वडिशादिना अवलम्बितं गृहीतं मण्डलाग्रेण छेदयेत्। कुत्र छेदयेत् इत्याह नात्यग्रे नातिमूलत इति। गलशुण्डिकाया नातिशयिताग्रभागे नातिशयितमूलप्रदेशे च। तस्मात् मध्यप्रदेश एव छेदयेद् इत्यर्थः। —४८।५०—

छेदेऽत्यसृक्क्षयान्मृत्युर्हीने व्याधिर्विवर्द्धते ॥ ५० ॥

कुत एवं कार्य्यमित्यत आह छेद इत्यादि। अतिशयित मूलभागे छेदे सत्यसृजो रक्तस्य क्षयान् मृत्युः स्यात्। हीने च्छेदे सति व्याधिः विवर्द्धते यतः।—५०

मरिचातिविषा-पाठा-वचा-कुष्ठ-कुटन्नटैः ।
छिन्नायाः सपटुक्षौद्रैर्घर्षणं कवलः पुनः ।
कटुकातिविषा-पाठा-निम्ब-रास्ना-वचाम्बुभिः ॥ ५१ ॥

छेदानन्तर यद् विधेयं तदाह मरिचेत्यादि। कुटन्नटं कैवर्त्तमुस्तकम्। छिन्नाया— इति गलशुण्डीविशेषणम्। घर्षण मितिच्छेदः। कवलः पुनरिति परेण सम्बध्यते। कटुकादि क्वाथैरित्यर्थः। ५१

संघाते पुप्पुटे कूर्म्मे विलिख्यैवं समाचरेत् ॥ ५२ ॥

तालुसङ्घात-तालुपुप्पुट-कच्छपेष्वपि गलशुण्ड्युक्तां क्रियामतिदिशति सङ्घात इत्यादि। विलिख्येति प्रच्छयित्वा। एवमिति मरिचादिभिर्घर्षणम्।

तथा कटुकादि क्वाथेन तु कवल इत्यर्थः न पुनस्तत्रोक्तं शस्त्रकर्म्म। उक्तञ्च सुश्रुते—

"तुण्डीकेर्य्यध्रुषेकूर्म्मे सङ्घाते तालुपुप्पुटे।

एष एव विधिः कार्य्यो विशेषः शस्त्रकर्म्मणि॥" इति (चिः २२ अं)

यद्यपि कच्छपं प्रत्याख्येयत्वेनोक्तं तथापि तस्य नवोत्थितस्य चिकित्सा बोध्या। अतश्चोक्तं सुश्रुतेऽपि –

"क्रियां वैद्यः प्रत्याख्याय समाचरेत्।" इति (चि २२ अं) ५२

अपक्वे तालुपाके तु कासीस-क्षौद्र-तार्क्ष्यजैः।

घर्षणं कवलः शीतकषायमधुरौषधैः॥ ५३॥

तालुपाक चिकित्सामाह अपक्व इत्यादि। कासीसं धातुकासीसं तार्क्ष्यजं रसाञ्जनम्। ५३

पक्वेऽष्टापदमद्भिन्ने (१) तीक्ष्णोष्णैः प्रतिसारणम्।

वृष-निम्ब-पटोलाद्यैस्तिक्तैः कवलधारणम्॥ ५४॥

पक्वावस्थस्य तालुपाकस्य चिकित्सामाह पक्व इत्यादि। अष्टापदवद्भिन्ने इति अष्टापदं शारिफलं शारीणां कोष्ठकं तद्वद्भिन्ने विदारिते। (क) पटोलाद्यैरित्याद्यशब्दाज्जातीकरवीरादीनां ग्रहणम् उक्तं हि मध्यवाग्भटे—"पक्वस्य मण्डलाग्रेणाष्टापदवद् भेदनं तीक्ष्णैरवघर्षणम्, पटोलारिष्ट जाती-करवीरगुडूची वृष-कटुका हरिद्राद्वय वेलाम्र कण्टकारिका क्वाथः कवलो मधुतैलञ्च।" इति (सू वां उं २६ अं) ५४

तालुशोषे त्वतृष्णस्य सर्पिरुत्तरभक्तिकम्।

कणाशुण्ठीशृतं पानमम्लैर्गण्डूषधारणम्॥ ५५॥

धन्वमांसरसाः स्निग्धाः क्षीरसर्पिश्च नावनम्।

तालुशोषचिकित्सामाह तालुशोष इत्यादि। अत्र अतृष्णस्येति पदेन तृष्णायुक्त तालुशोषे उत्तरभक्तिकमपि सर्पिः पानं न कार्य्यमिति बोधयति। एतेन "तृष्णामूर्च्छा परीताश्च सर्पिष्यस्तालुशोषिणः" इत्यनेन (सू १० अं) चरके

(क) अष्टापदवद् भिन्नं इति रेखाकारेण चतुःकृत्वः शस्त्रपातनेन एकस्मिन् मध्यबिन्दौ परस्पर संवर्त्तन भिन्नं तं शस्त्रपदमष्टापदवद् भवति ⁕ इत्याकारम्। पाश्चात्यास्त्विदं डबल क्रस इनसिशन (Double cross incision) इत्याख्यां वदन्ति।

यस्तालुशोषे स्नेहपाननिषेधः स सतृष्ण-तालुशोष विषयक स्तथाऽनौत्तरभक्तिक-स्नेह-विषयकश्चेति न विरोधः। कणाशुण्ठीश्रृतमिति घृतविशेषणम्। उक्तं हि मध्यवागभटे "तालुशोषे पिप्पली नागरसिद्धमौत्तरभक्तिकं सर्पिरतृष्णः पिवेत। अम्लैश्चास्य गण्डुषः पयस्या-मधुक-मधूलिकाविपक्वं क्षीरसर्पिर्नस्यं स्निग्धो धूम स्तृष्णाघ्नमनुपानम्।" इति (१) अतएव वचनात् पयस्यादि सिद्धस्य क्षीर-सर्पिषोऽत्यन्तयौगिकत्वं बोध्यम्। अत्र पयस्या क्षीरकाकोर्ली, मधुलिका स्वल्प गोधूमः। ५५।५६—

कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादि कर्म च ॥ ५६ ॥
क्राथः पानञ्च दार्वीत्वङ्निम्ब-तार्क्ष्य-कलिङ्गजः।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥ ५७ ॥
श्रेष्ठा-व्योष-यवक्षार-दार्वी-द्वीपि-रसाञ्जनैः।
सपाठा-तेजनी-निम्बैः सूक्तगोमूत्रसाधितैः ॥ ५८ ॥
कवलो गुटिका चात्र कल्पिता प्रतिसारणम् ॥ ५९ ॥

तालुगतानां चिकित्सोक्ता, सम्प्रति कण्ठगतानां वक्तव्या। तत्र प्रथमं सामान्येन कण्ठरोग चिकित्सामाह कण्ठरोगेष्वित्यादि। दार्व्वीत्वगिति षष्ठी-समासः। कलिङ्गम् इन्द्रयवः, श्रेष्ठा त्रिफला। क्वचित्तु श्रेष्ठ इति पाठो दृश्यते। सच नारुणसम्मतः। द्वीपी चित्रकः, तेजनी मूर्व्वा। गुड़िका चात्र कल्पिता प्रतिसारणमिति एषु श्रेष्ठादिकल्पितागुड़िका प्रतिसारणमित्यर्थः। ५६—५९

निचुलं कटभी मुस्तं देवदारु महौषधम्।
वचा दन्ती च मूर्वा च लेपः कोष्णोऽर्तिशोफहा ॥ ६० ॥

निचूल इत्यादि। निचूल इज्जलः। ६०

अथान्तर्बाह्यतः स्विन्नां वातरोहिणिकां लिखेत्।
अङ्गुलिशस्त्रकेणाशु पट्वुयुक्तनखेन वा।
पञ्चमूलाम्बुकवलस्तैलं गण्डूषनावनम् ॥ ६१ ॥

सामान्येन कण्ठरोग चिकित्सामभिधाय विशेषेणाह अथेत्यादि। लिखेदिति प्रच्छयेत्। अङ्गुलिशस्त्रं शस्त्रविधावुक्तम्। पट्वुयुक्तनखेनेति सैन्धवयुक्तेन

(१) इन्दुवागभटे पाठोऽन्यथा दृश्यते। तत्र सतृष्णा इति पठति मध्य वागभटे त्वतृष्णः इति।

नखेन। पद्ममूलाम्बु बृहत्पद्ममूलक्वाथः। तैलंगण्डूषनावनमिति तैलं तिलनखेन। पद्ममूलाम्बु बृहत्पद्ममूलक्वाथः। उक्तंहि मध्यवाग्भटे "वातरोहिणिका-तैलं किंवा पुनर्नवादिपक्वं तैलम्। उक्तंहि मध्यवाग्भटे "वातरोहिणिका-

मन्तर्बहिःस्विन्ना मङ्गुलिशस्त्रेण मधु-लवण-गर्भेण वा नखेन विस्राव्य तीक्ष्णैः प्रतिसारयेत्। महापद्ममूलक्वाथो गण्डुषः, पुनर्णवा सिंही कपित्थकल्कपयो-विपक्वं तैलं गण्डूषो नावनञ्च" (१) इति। ६१

विस्राव्य पित्तसम्भूतां सिता-क्षौद्र-प्रियङ्गुभिः।

घर्षेत् सरोध्रपत्तङ्गैः कवलः कथितैश्च तैः॥ ६२॥

द्राक्षा-परूषक-क्वाथो हितश्च कवलग्रहे।

उपाचरेदेवमेव प्रत्याख्यायास्रसम्भवाम्॥ ६३॥

पैत्तिक रोहिणी चिकित्सामाह विस्राव्येत्यादि। विस्राव्येति रक्तं विस्राव्य। पत्तङ्गं रक्तचन्दनम्। कवलं कथितैश्च तैरिति कथनयोग्यतया प्रियङ्गुलोध्र-पत्तङ्गैरित्यर्थः। सिताक्षौद्रे तु प्रक्षेप्ये। उपाचरेदेवमेचेति पैत्तिकरोहिणीवत्। प्रत्याख्यायेति रक्तजाय। असाध्यत्वेनोक्तत्वात् प्रत्याख्यानं कृत्वैव तत्र चिकित्सा कार्य्येत्यर्थः। ६२।६३

सागारधूमैः कटुकैः कफजां प्रतिसारयेत्।

कफजायाश्चिकित्सामाह सागारधूमैरित्यादि। कटुकैरिति बहुवचना-त्त्रिकटुकेनेत्यर्थः। ६४—

नस्य-गण्डषयोस्तैलं साधितञ्च प्रशस्यते॥ ६४॥

अपामार्ग-फल-श्वेता-दन्ती-जन्तुघ्न-सैन्धवैः।

नस्यगण्डूषयोरित्यादि। अपामार्गफलादिभिः साधितं तैलं नस्ये गण्डुषे च प्रशस्यत इत्यर्थः। अपामार्गस्य फलं बीजम्, श्वेता कटभी अपराजितेत्यन्ये। जन्तुघ्नो विडङ्गः। अपामार्गं फलं विनाप्ययं योगो बोध्यः यदाह सुश्रुतः—

'श्वेता विडङ्गदन्तिषु सिद्धं तैलं ससैन्धवम्।

नस्तः कर्म्मणि दातव्यं कवलश्च कफोच्छ्रये॥" इति (चिं २२ अं)—६४।६५—

तद्वच्च वृन्द-शालूक-तुराडोकेरी-गिलायुषु॥ ६५॥

उक्त-कफज-रोहिणी-चिकित्सितं वृन्दादिष्वप्यतिदिशति तद्वदित्यादि। वृन्दशालूकादिषु कफरोहिणीवच्चिकित्सितं कार्य्यमिति शेषः।—६५

(१) तथैव पाठभेदः वृद्धवाग्भटे। तत्र एवेत्यधिकः।

विद्रधौ स्राविते श्रेष्ठा-रोचना-तार्क्ष्य-गैरिकैः ।
सरोध्र-पटु-पत्तङ्ग-कणैर्गण्डूषघर्षणम् ॥ ६६ ॥

गलविद्रधि चिकित्सामाह विद्रधावित्यादि । स्रावित इति स्रावितरक्ते । श्रेष्ठा त्रिफला । लोध्र-सैन्धव-रक्तचन्दन-पिप्पलीसहितैरित्यर्थः । गण्डुष-घर्षणमिति श्रेष्ठादिक्वाथैर्गण्डुषः तच्चूर्णैस्तु घर्षणमिति । ६६

गलगण्डः पवनजः स्विन्नो निःस्रुतशोणितः ।
तिलैर्बीजैश्च लट्वोमापियालशणसम्भवैः ॥ ६७ ॥
उपनाह्यो व्रणे रूढे प्रलेप्यश्च पुनः पुनः ।
शिग्रु-तिल्वक-तर्कारी-गजकृष्णा-पुनर्नवैः ॥ ६८ ॥
कालामृतार्कमूलैश्च पुष्पैश्च करहाटजैः ।
एकैषिकान्वितैः पिष्टैः सुरया काञ्जिकेन वा ॥ ६९ ॥

गलगण्ड चिकित्सामाह गलगण्ड इत्यादि । तिलैरित्यादि । लट्वा तिक्तालावुः, उमा अतसी, उपनाहनम् उष्णो बहलो लेपः । व्रण इति उपनाहजन्ये व्रणे । प्रलेपश्च पुनः पुनरिति शिग्रुतिल्वकेत्यादिना सम्बध्यते । तिल्वको लोध्रः, तर्कारी जयन्ती, गजकृष्णा गजपिप्पली, काला हिंस्रा, अमृता गुड़ूची, अर्कस्य मूलम्, करघाटो मदनस्तत्पुष्पैः। एकैशिका पाठा त्रिवृदित्यन्ये । ६७—६९

गुडूची-निम्ब कुटज-हंसपादी बलाद्वयैः ।
साधितं पाययेत्तैलं सकृष्णा-देवदारुभिः ॥ ७० ॥

गुडूचीत्यादिना तैलमाह । गुडूच्यादीनां कल्कः जलञ्च चतुर्गुणम् अन्येतु गुडूच्यादीनां क्वाथकल्कैरित्याहुः । ७०

कर्त्तव्यं कफजेऽप्येतत् स्वेदविम्लापने त्वति ।

वातिक गलगण्ड-चिकित्सितं कफज गलगण्डेऽप्यतिदिशति कर्त्तव्यमित्यादि । स्वेदविम्लापने पुन रतिशयेन कर्त्तव्ये इत्यर्थः । ७१—

लेपोऽजगन्धातिविषाविशल्यासविषाणिकाः ॥ ७१ ॥
गुञ्जालावु-शुकाह्वाश्च पलाशक्षारकल्किताः ।

लेप इत्यादिना कल्किता इत्यन्तेन लेपमाह । विशल्या दन्ती काण्डपाटलेत्यन्ये । विषाणिका मेषश्रृङ्गी, अलावुस्तिक्तालावुः । शुकाह्वः कैवर्त्तमुस्तक इति

धन्वन्तरीनिघण्टुः। पलाशक्षारकल्किता इति पलाश-क्षारोदक-पेषिताः। सुश्रुतेऽप्युक्तम्—

"पलाशभस्मोदकपेषिताभिर्दिह्यात् सगुञ्जाभिरशीतलाभिः।" इति (चि १८ अ)—७१।७२—

मूत्रप्लुतं हठक्षारं पक्त्वा कोद्रवभुक् पिबेत् ॥ ७२ ॥

मूत्रप्लुतमित्यादि। हठः 'पाट्ठा' इति ख्यातो जलसम्भवः। तस्य क्षारं मूत्रप्लुतं गोमूत्रप्लावितं कृत्वा तदनन्तरं पेयक्षारवत् पक्त्वा पिबेत्। कोद्रवेति रूक्षभोजनोपलक्षणम्। उक्तं हि—

"दग्ध्वा हठं मूत्रविगालितञ्च पक्त्वा पिबेत् कोद्रवरूक्षभोजी।
गलस्य गण्डं चिरकालजातमतिप्रवृद्धं शमयेदशेषम्॥" इति—७२

साधितं वत्सकाद्यैर्वा तैलं सपटुपञ्चकैः।
कफघ्नान् धूम-वमन-नावनादींश्च शीलयेत् ॥ ७३ ॥

वत्सकाद्यैरिति वत्सकादिगणेन। सपटुपञ्चकैरिति पञ्चलवण सहितैः। ७३

मेदोभवे शिरां विध्येत् कफघ्नञ्च विधिं भजेत्।
असनादिरजश्चैनं प्रातर्मूत्रेण पाययेत् ॥ ७४ ॥
अशान्तौ पाटयित्वा च सर्वान् व्रणवदाचरेत् ॥ ७५ ॥

मेदोजगलगण्डचिकित्सामाह मेदोभव इत्यादि। असनादिरिति असनादिगणः। सर्वानिति वातिकश्लैष्मिकमेदोजान्। ७४।७५

मुखपाकेषु सक्षौद्राः प्रयोज्या मुखधावनाः।
क्वथितास्त्रिफला-पाठा-मृद्वीका-जाति-पल्लवाः ॥ ७६ ॥
निष्ठेव्या भक्षयित्वा वा कुठेरादिगणोऽथवा।

गलरोगाणां चिकित्सामभिधाय सर्व्वसरकृतानां चिकित्सा वाच्या। तत्र सामान्येन मुखपाक चिकित्सामाह मुखपाकेष्वित्यादि। अत्र पाठास्थाने पाशपाठः सर्व्वत्रैव चरकपुस्तके दृश्यते, पाठेति पाठश्च सर्व्वत्रैव वाग्भटपुस्तकेषु दृश्यते टीकाकृतश्चात्र कृतमौनाः तेन नियामकाभावादुभयमपि प्रमाणम्। निष्ठेव्या भक्षयित्वा वेति त्रिफलादय एव सक्षौद्राः निष्ठेव्या इत्यर्थः। कुठेरादिगणोऽथवेति कुठेरादिगणो वा सक्षौद्रः निष्ठेव्य इत्यर्थः। अयञ्च गणो हरितकशाकमध्ये कुठेरः शिग्रु-सुरस-सुमुखासुरिभूस्तृण मित्यादिनोक्तः। ७६।७७ —

मुखपाकेऽनिलात् कृष्णापटोलाः प्रतिसारणम् ॥ ७७ ॥
तैलं वातहरैः सिद्धं हितं कवल-नस्ययोः ।

वातजन्य मुखपाक चिकित्सामाह मुखपाक इत्यादि । अनिलाद् यो मुखपाकः तत्र कृष्णादिभिः प्रतिसारणम् ।—७७।७८—

पित्तास्रे रक्तपित्तघ्नः

पित्तज-रक्तज-मुखपाकयो श्चिकित्सामाह पित्तास्र इत्यादि ।

कफघ्नश्च कफे विधिः ॥ ७८ ॥
लिखेच्छाकादिपत्रैश्च पिडकाः कठिनाः स्थिराः ।

श्लैष्मिकमुखपाक चिकित्सामाह कफघ्नश्चेत्यादि ।—७८।७९—

यथादोषोदयं कुर्यात् सन्निपाते चिकित्सितम् ॥ ७९ ॥

सान्निपातिक मुखपाक चिकित्सामाह यथादोषोदयमित्यादि ।—७९

नवेऽर्बुदे त्वसंवृद्धे छेदिते प्रतिसारणम् ।
सर्जिका-नागर-क्षौद्रैः

अन्तःकपोलमाश्रित्येत्यादिनोक्तस्यार्बुदस्य चिकित्सामाह नवेऽर्बुदे इत्यादि । नव इत्यचिरोत्थे । असंवृद्ध इति नातिप्रवृद्धे । स्वर्जिका-नागरक्षौद्रैः प्रतिसारणमित्यन्वयः । ८०—

क्वाथो गण्डूष इष्यते ॥ ८० ॥
गुडूची-निम्ब-कल्कोत्थोमधु-तैलसमन्वितः ।
यवान्नभुक् तीक्ष्णतैलनस्याभ्यङ्गांस्तथाचरेत् ॥ ८१ ॥

क्वाथ इत्यादि । गुडूचीनिम्ब वल्कलोद्भवः क्वाथो गण्डूष इष्यते इति योज्यम् । तथा यवान्नभोजी स्यात् । तीक्ष्णतैलं सर्षपकरञ्जतैलादि ।—८०।८१

वमिते पूतिवदने धूमस्तीक्ष्णः सनावनः ।
समङ्गा-धातकी-रोध्र-फलिनी-पद्मकैर्जलम् ॥ ८२ ॥
धावनं वदनस्यान्तश्चूर्णैतैरवचूर्णनम् ।
शीतादोपकुशोक्तश्च नावनादि च शीलयेत् ॥ ८३ ॥

पूतिमुखचिकित्सामाह वमितइत्यादि । समङ्गा वराहक्रान्ता, फलिनी

प्रियङ्गुः, पद्मकं पद्मकाष्ठम् एतैः श्रृतं जलं मुखधावनमित्यर्थः। एतैरेव समङ्गादिभिश्चूर्णितैर्वदनस्यान्त रवचूर्णनं कार्य्यम् ।८२।८३

फलत्रय-द्वीपि-किराततिक्त-यष्ट्याह्व-सिद्धार्थ-कटुत्रिकाणि ।
मुस्ता-हरिद्राद्वय-यावशूक-वृक्षाम्लकाम्लाग्रिमवेतसाश्च ॥ ८४ ॥
अश्वत्थ-जम्ब्वाम्र-धनञ्जयत्वक् त्वक् चाहिमारात् खदिरस्य सारः ।
क्वाथेन तेषां घनतां गतेन तच्चूर्णयुक्ता गुड़िका विधेयाः ॥ ८५ ॥
ता धारिता घ्नन्ति मुखेन नित्यं कण्ठौष्ठ-ताल्वादिगदान् सुकृच्छ्रान् ।
विशेषतो रोहिणिकास्यशोषगन्धान् विदेहाधिपतिप्रणीताः ॥ ८६ ॥

फलत्रयेत्यादि। फलत्रयं त्रिफला, द्वीपी चित्रकः, वृक्षाम्लकं महार्द्रकम्, अम्लाग्रिमवेतसो अम्लवेतसः, धनञ्जयोऽर्जुनवृक्षः। त्वक् चाहिमारादिति अहिमारो विट्खदिरः उक्तं हि धन्वन्तरी निघण्टौ "इरिमेदोऽरिमेदश्च अहिमेदोऽहिमारकः।" इति, तच्चूर्णयुक्ता इति फलत्रयादि चूर्णयुक्ताः। ८४—८६

खदिरतुलामम्बुघटे पक्त्वा तोयेन तेन पिष्टैश्च ।
चन्दन-जोङ्गक-कुङ्कुम-परिपेलव-बालकोशीरैः ॥ ८७ ॥
सुरतरु-रोध्र-द्राक्षा-मञ्जिष्ठा-चोच-पद्मक-बिडङ्गैः ।
स्पृक्कानत-नख-कट्फल-सूक्ष्मैला-ध्यामकैः सपत्तङ्गैः ॥ ८८ ॥
तैलप्रस्थं विपचेत् कर्षांशैः पान-नस्य-गण्डूषैस्तत् ।
हत्वास्ये सर्वगदान् जनयति गार्ध्रीं दृशं श्रुतिञ्चवाराहीम् ॥८९॥

खदिरतुलामित्यादि। अम्बुघटो जलद्रोणः। तेन खदिरक्वाथेन तथा पिष्टैश्चन्दनादिभिः तैलप्रस्थं विपचेदित्यन्वयः। चन्दनं श्वेतचन्दनं, जोङ्गकमगुरु, परिपेलवं कैवर्त्तमुस्तकं, सुरतरुर्देवदारु, चोचं गुड़त्वक, ध्यामं गन्धतृणं, पत्तङ्गं रक्तचन्दनम्। गार्ध्रीं दृशमिति गृध्रसम्बन्धि चक्षुः। गृध्रस्येव दृशं वराहस्येव श्रुतिं जनयतीत्यर्थः। ८७—८९

उद्वर्त्तितश्च प्रपुन्नाड़-रोध्र-दार्वीभिरभ्यक्तमनेन वक्त्रम् ।
निर्व्यङ्गनीलीमुखदुषिकादि सञ्जायते चन्द्रसमानकान्ति ॥९०॥

उद्वर्त्तितमित्यादि। प्रपुन्नाड़ एड़गजवीजम्। आदौ प्रपुन्नाड़ादिभिरुद्वर्त्तितं पश्चादनेन तैलेनाभ्यक्तमित्यर्थः। ९०

पलशतं बाणात्तोयघटे पक्त्वा रसेऽस्मिंश्च पलार्द्धिकैः ।
खदिर-जम्बु-यष्ट्यनन्ताम्रैरहिमारनीलोत्पलान्वितैः ॥ ९१ ॥
तैलप्रस्थं पाचयेच्छ्लक्ष्णपिष्टैरेभिर्द्र व्यैर्द्धारितं तन्मुखेन ॥
रोगान् सर्वान् हन्ति वक्त्रे विशेषात् स्थैर्य्यं धत्ते दन्तपंक्तेश्चलायाः ॥९२

पलशतमित्यादि। बाणा नीलझिण्टी। रसेऽस्मिन्निति बाणपलशतक्वाथे पलार्द्धिकैः खदिरादिभिः तैलप्रस्थं पाचयेत्। अनन्ता अनन्तमूलम्, आम्रम् आम्रत्वक्। ९१।९२

खदिरसाराद् द्वे तुले पचेद्वल्कात्तुलाञ्चारिमेदसः ।
घटचतुष्के पादशेषेऽस्मिन् पूते पुनः क्वथनाद् घने ॥ ९३ ॥
आक्षिकं क्षिपेत् सुसूक्ष्मं रजः सेव्याम्बु पत्तङ्ग-गैरिकम् ।
चन्दनद्वय-रोध्र-पुण्ड्राह्व यष्ट्याह्वलाक्षाञ्जनद्वयम् ॥ ९४ ॥
धातकी-कट्फल-द्विनिशा-त्रिफला-चतुर्जात-जोङ्गकम् ।
मुस्त-मञ्जिष्ठा-न्यग्रोध-प्ररोह-मांसी-यवासकम् ॥ ९५ ॥
पद्मकैलेय-समङ्गाश्च शीते तस्मिंस्तथा पालिकां पृथक् ।
जातिपत्रिकां सजातीफलां सहलवङ्ग-कङ्कोलकाम् ॥ ॥ ९६ ॥
स्फटिक-शुभ्र-सुरभि-कर्पूर-कुडवञ्च तत्रावपेत्ततः ।
कारयेद्गुड़िकाः सदा चैता धार्या मुखे तद्गदापहाः ॥९७॥

खदिरसारादित्यादि। घन इति तस्मिन् क्वाथे पुनः पाकाद् घने सति सेव्यादीनां रजश्चूर्णम् आक्षिकमिति कार्षिकं क्षिपेत्। सेव्य मुशीरम्, अम्बु बालकं, पत्तङ्गं रक्तचन्दनभेद इति धन्वन्तरिनिघण्टुः। चन्दनद्वयं श्वेतचन्दनं तथा कालीयकञ्चेति। पुण्ड्राह्वं प्रपौण्डरीकम्। अञ्जनद्वयं रसाञ्जनं सौवीराञ्जनञ्च निश्चलेनापि चरकोक्त-खदिर-गुड़िकायां सौवीराञ्जनमिति व्याख्यातम्। जोङ्गक मगुरु, ऐलेय मेलवालुकं। चरके तु ऐलेय स्थाने शैलेयमिति पठ्यते किन्तु मध्यवाग्भटेऽप्यैलेयमित्येव पठ्यते तस्मान् मतभेद एवायम्। समङ्गा वराहक्रान्ता, जातिपत्रिका जातिकोषः। जातिकोषपर्य्याये जाति पत्रिकेति द्रव्यावली धन्वन्तरि निघण्टुः। चरकेऽपि "लवङ्गं जाति कक्कोल जाति कोषान् पलोन्मितान्" इति। तद्गदापहा इति मुखगदापहाः। ९३—९७

काथौषधव्यत्यययोजनेन तैलं पचेत् कल्पनयाऽनयैव ।

स्वर्वास्यरोगोद्भूतये तदाहुर्दन्तास्थिरत्वेऽथिदमेव मुख्यम् ॥९८॥

काथौषधेत्यादि । व्यत्ययो वैपरीत्यम् । तच्च अरिमेदःसारस्य पलशतं खदिरवल्कलस्य तु द्वे तुले इत्यर्थः । व्यत्यययोजितेन काथौषधेन अनयैव कल्पनया तैलं पचेत् । तेन खदिरवल्कलारिमेदःसारयोः काथः, सेव्यादीनां समङ्गान्तानां कल्कः, जातिपत्रिकादयः कर्पूरान्ताश्च पत्रकल्क इति । परमिति श्रेष्ठम् । ९८

खदिरेणोता गुडिकास्तैलमिदं चारिमेदसा प्रथितम् ।

अनुशीलयन् प्रतिदिनं स्वस्थोऽपि दृढद्विजो भवति ॥९९॥

एतद् योगद्वयमपि स्वस्थेनापि प्रत्यहं सेव्यमित्याह खदिरेणेत्यादि । खदिरेण अरिमेदेन च कृता एताः गुडिकाः तथा ताभ्यामेव कृतं तैलं स्वस्थोऽपि प्रतिदिनमनुशीलयन् दृढदन्तः स्यात् । ९९

क्षुद्रा-गुडूची-सुमनः प्रवाल-दार्वी-यवास-त्रिफला-कषायः ।

क्षौद्रेण युक्तः कवलग्रहोऽयं सर्वामयान् वक्त्रगतान्निहन्ति ॥ १०० ॥

क्षुद्रेत्यादौ क्षुद्रा कण्टकारी, सुमनः प्रवालाः जाति पल्लवाः, यवासो दुरालभा ।१००

पाठा-दार्वी-त्वक्कुष्ठ-मुस्ता-समङ्गा तिक्तापीताङ्गीरोध्रतेजोवतीनाम् ।

चूर्णः सक्षौद्रो दन्तमांसार्तिकण्डुपाकस्रावाणां नाशनो धार्यमाणः ॥ १०१

पाठेत्यादौ दार्वत्वारस्वगिति समासः । तिक्ता कटुकी, पीताङ्गी हरिद्रा, तेजोवती चवी । १०१

गृहधूम-तार्क्ष्य-पाठा-व्योष-क्षाराग्न्ययोवरा-तेजोह्वैः ।

मुखदन्तगलविकारे सक्षौद्रः कालको विधार्यश्चूर्णः ॥ १०२ ॥

गृहधूमेत्यादौ तार्क्ष्यं रसाञ्जनं, क्षारो यवक्षारः, अग्निश्चित्रकः । अय इति लौहचूर्णम् अयुक्तमित्यन्ये व्यवहारः पुन कृष्यथैव (रयसैव) दृश्यते । वरा त्रिफला, तेजोह्वा चवी, अस्य चूर्णस्य लौहचूर्ण रसाञ्जन योगात् कृष्णत्वेन कालकसंज्ञा । एवं वक्ष्यमाण योगेऽपि पीतक संज्ञा व्याख्येया । १०२

दार्वीत्वक्सिन्धूद्भव-मनःशिला-यावशूक-हरितालैः ।

धार्यः पीतकचूर्णो दन्तास्यगलामये समध्वाज्यः ॥ १०३ ॥

दार्वीत्यादि । अयं योगो घृतव्यतिरेकेणापि तन्त्रान्तरे दृश्यते । यथा —

शिलालक्षार सिन्धूत्थ दार्व्वीचूर्णं समाक्षिकम् ।
धारयेद् वदने चैतत् कण्ठवक्त्रामयापहम् ॥" इति । १०३

द्विक्षार-धूम-वरा-पञ्चपटु-व्योष-वेल्ल-गिरि-तार्क्ष्यैः ।
गोमूत्रेण विपक्वा गलामयघ्नी रसक्रियैषा ॥ १०४ ॥

गोमूत्र-क्वथन-विलीन-विग्रहाणां पथ्यानां जल-मिसि-कुष्ठ-भावितानाम् ।
अत्तारं नरमणवोऽपि वक्त्ररोगाः श्रोतारं नृपमिव न स्पृशन्त्यनर्थाः ॥ १०५

गोमूत्रेत्यादि । गोमूत्रेण क्वथनं पाकस्तेन विलीनः क्लिन्नो विग्रहः शरीरं यासां । जलं बालकं, मिसिः शतपुष्पा । बालकादि चूर्णैः सह गोमूत्रेणैव भाविताना-मित्यर्थः । अत्तारमिति भक्षयितारम् अणवः इति अल्पाः । १०४।१०५

सप्तच्छदोशीर-पटोल-मुस्त-हरीतकी-तिक्तकरोहिणीभिः ।
यष्ट्याह्व-राजद्रुम-चन्दनैश्च क्वाथं पिबेत् पाकहरं मुखस्य ॥१०६॥

सप्तच्छदेत्यादि । राजद्रुम आरग्वधः । १०६

पटोल-शुण्ठी-त्रिफला-विशाला-त्रायन्ति-तिक्ता-द्विनिशामृतानाम् ।
पीतः कषायो मधुमान् निहन्ति मुखस्थितश्चास्यगदानशेषान् ॥ १०७ ॥

पटोलेत्यादौ मधुमानिति मधुयुक्तः । मधुनेति पाठे मधुना सहपीत-इत्यन्वयः । १०७

स्वरसः क्वथितो दार्व्या घनीभूतः सगैरिकः ।
आस्यस्थः समधुर्वक्त्रपाकनाड़ीव्रणापहः ॥ १०८ ॥

स्वरस इत्यादौ चरके गैरिकं विनाप्ययं योग उक्तः । यथा—
"स्वरसः क्वथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाड़ीव्रणापहा ॥" इति (चि २६ अं) । १०८

पटोल-निम्ब-यष्ट्याह्व-वासा-जात्यरिमेदसाम् ।
खदिरस्य वरायाश्च पृथगेवं प्रकल्पना ॥ १०९ ॥

उक्तदार्व्वी कल्पनां पटोलादिष्वत्यतिदिशति पटोलेत्यादि । पृथग् विभक्ति-निर्देशाद् योगत्रयमिदम् । १०९

खदिरायोवरा-पार्थ-मदयन्तयहिमारकैः ।
गण्डूषोऽम्बुशृतैर्धार्यो दुर्बलद्विजशान्तये ॥ ११० ॥

खदिरेत्यादि । अय इत्यगुरु । वरा त्रिफला, पार्थोऽर्जुनः, मदयन्ती मल्लिकाभेदः, अहिमारोऽरिमेदः । अम्बुना जलेन श्रृतैः ।

मुखदन्तमूलगलजाः प्रायो रोगाः कफास्रभूयिष्ठाः ।
तस्मात्तेषामसकृद् रुधिरं विस्रावयेद्द्रुतम् ॥ १११ ॥
कायशिरसोर्विरेको वमनं कवलग्रहाश्च कटुतिक्ताः ।
प्रायः शस्तं तेषां कफरक्तहरं तथा कर्म ॥ ११२ ॥
यवतृणधान्यं भक्तं विदलैः क्षारोषितैरपस्नेहाः ।
यूषा भक्ष्याश्च हिता यच्चान्यच्छ्लेष्मनाशाय ॥ ११३ ॥

मुखदन्तेत्यादि सुबोधम् । तृणधान्यं नीवारादि । क्षारोषितैरिति क्षारोदकभावितैः । अपस्नेहा इति स्नेहशून्याः । १११—११३

प्राणानिलपथसंस्थाः श्वसितमपि निरुन्धते प्रमादवतः ।
कण्ठामयाश्चिकित्सितमतो द्रुतं तेषु कुर्वीत ॥ ११४ ॥

इति श्रीमद् वाग्भट विरचितायां मष्टाङ्गहृदय संहितायामुत्तरतन्त्रे
मुखरोगप्रतिषेधोनाम द्वाविंशोऽध्यायः ।

कण्ठरोगाणां शीघ्रप्रतिकर्त्तव्यतां सोपपत्तिकमाह प्रगानिलेत्यादि । ११४

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे द्वाविंशोऽध्यायः ।

त्रयोविंशोऽध्यायः।

अथातः शिरोरोगविज्ञानीयं व्याख्यास्यामः
इतिहस्माहुरात्रेयादयोमहर्षयः ॥ १ ॥
धूमातप-तुषाराम्बुक्रीडातिस्वप्न-जागरैः।
उत्स्वेदाधिपुरोवातवाष्पनिग्रहरोदनैः ॥ २ ॥
अत्यम्बुमद्यपानेन कृमिभिर्वेगधारणैः।
उपधानमृजाभ्यङ्गद्वेषाधःप्रततेक्षणैः ॥ ३ ॥
असात्म्यगन्धदुष्टामभाष्याद्यैश्च शिरोगताः।
जनयन्त्यामयान् दोषाः

चक्षुरादीन्द्रियविकारानभिधाय तदाश्रयस्य शिरसो रोगानभिधातुं शिरोरोग-विज्ञानीयो अभिधीयते। तत्र शिरोरोगाणां निदानमाह धूमेत्यादि। तुषारो नीहारः। अम्बुक्रीडा जलविहारः अतिशब्दो जागरेणापि सम्बध्यते। उत्स्वेदः स्वेदातियोगः, आधिर्मनस्तापः। चरकेऽपि मनस्तापादित्युक्तम्। बाष्पो नेत्रजलम् तस्य निग्रहः। अत्यम्बुपानेन अतिमद्यपानेन च। उपधानं गण्डुः द्वेषशब्दः उपधानादिभिः प्रत्येकं सम्बध्यते। अधःप्रततेक्षणम् अधो दृष्ट्या निरन्तरमीक्षण-मित्यर्थः। आद्यशब्दात् मेघागम-देशकालविपर्ययादीनां ग्रहणम्। २—४—

तत्र मारुतकोपतः ॥ ४ ॥

निस्तुद्येते भृशं शङ्खौ घाटा सम्भिद्यते तथा।
भ्रुवोर्मध्यं ललाटञ्च पततीवातिवेदनम् ॥ ५ ॥
बध्येते स्वनतः श्रोत्रे निष्कृष्येते इवाक्षिणी।
घूर्णतीव शिरः सर्व्वं सन्धिभ्य इव मुच्यते ॥ ६ ॥
स्फुरत्यतिशिराजालं कन्धराहनुसंग्रहः।
प्रकाशासहता घ्राणस्रावोऽकस्माद्व्यथाशमौ ॥ ७ ॥
मार्द्दवं मर्दन-स्नेह-स्वेद-बन्धैश्च जायते।

तत्र वातिक शिरोरोग लक्षणमाह तत्रेत्यादि। बध्येते इति अत्यर्थं पीडायुक्तत्वेन। स्वनतः इति शब्दं कुरुतः। प्रकाशासहतेति आतपदर्शनासहत्वम्। घ्राणस्य

स्रावः। अकस्मादेव व्यथा तदुपशमश्चेत्यर्थः। मार्द्दवमिति शिरोरुजाया-अल्पत्वम्। बन्धो वस्त्रादिभिर्बन्धनम्।—४—८—

शिरस्तापोऽयमर्धे तु मूर्ध्नः सोऽर्द्धावभेदकः॥ ८॥
पत्तात् कुप्यति मासाद्वा स्वयमेव च शाम्यति।
अतिवृद्धस्तु नयनं श्रवणं वा विनाशयेत्॥ ६॥

अर्द्धावभेदकाख्यस्य शिरोरोगविशेषस्य लक्षणमाह शिरस्ताप इत्यादि। अयमेव शिरस्तापो व्यथा यदि शिरसोऽर्द्धे स्यात तदा सोऽर्द्धावभेदक इत्युच्यते। अयञ्च प्रायेण शुद्धवातजः। आगन्तु दोषान्तर सम्बन्धस्तु कदाचिदेवात्र ज्ञेयः। अतएव सुश्रुतः "केवलं सकफो वार्द्धम्" इति वा शब्द उक्तः। अयञ्चोपेक्षया नयनादिकं हन्यादित्याह अतिवृद्ध इत्यादि। ८।९—

शिरोऽभितापे पित्तोत्थे शिरो धूमायनं ज्वरः।
स्वेदोऽक्षिदहनं मूर्छा निशि शीतैश्च मार्दवम्॥ १०॥

पैत्तिक शिरोरोग लक्षणमाह शिरोभिताप इत्यादि। शिरोधूमायनं शिरसि धूमनिर्गमवद् वेदना निशि मार्दवं शीतैश्च मार्दवमित्यर्थः। १०

अरुचिः कफजे मूर्ध्नो गुरुस्तिमितशीतता।
शिरानिस्पन्दतालस्यं रुङ् मन्दा ह्यधिका निशि॥ ११॥
तन्द्राशूनाक्षिकूटत्वं कर्णकण्डूयनं वमिः।

कफजशिरोरोगलक्षणमाह अरुचिरित्यादि। स्तिमितत्वं स्तब्धत्वम् शिरोगतशिराणां निस्पन्दता अवशत्वम्। अह्नि दिवसे मन्दरुक् निशि रात्रौ पुनरधिका स्यात्। ११।१२—

रक्तात् पित्ताधिकरुजः

रक्तज शिरोरोग लक्षणमाह रक्तात् पित्ताधिका रुज इति। पैत्तिकशिरोरोगा-पेक्षयाऽपि दुःसहवेदनः। तेन रक्तज-शिरोरोग-लक्षणान्येव अति दुःसहानि भवन्तीर्थः। —१२—

सर्व्वैः स्यात् सर्व्वलक्षणः॥ १२॥

सान्निपातिकमाह सर्व्वैः स्यात् सर्व्व लक्षण इति। —१२

सङ्कीर्णैर्भोजनैर्मूर्ध्नि क्लेदिते रुधिरामिषे ।
कोपिते सन्निपाते च जायन्ते मूर्ध्नि जन्तवः ॥ १३ ॥
शिरसस्ते पिबन्तोऽस्रं घोराः कुर्वन्ति वेदनाः ।
चित्तविभ्रंशजननीर्ज्वरः कासो बलक्षयः ॥ १४ ॥
रौक्ष्यशोफव्यधच्छेददाहस्फुटनपूतिताः ।
कपाले तालुशिरसोः कण्डूः शोषप्रमीलकः ॥ १५ ॥
ताम्राच्छसिङ्घाणकता कर्णनादश्च जन्तुजे ।

सङ्कीर्णैरित्यादिना जन्तुज इत्यन्तेन क्रिमिज-शिरोरोग-लक्षणमाह । सङ्कीर्णैरिति विरुद्धैः । सन्निपात इति दोषत्रयमेलके कोपिते सति जन्तवः क्रिमयो मूर्ध्नि जायन्ते । १३—१६—

वातोल्बणाः शिरःकम्पं तत्संज्ञं कुर्वते मलाः ॥ १६ ॥

शिरःकम्पमाह वातोल्वणा इत्यादि । ततसंज्ञमिति शिरःकम्पसंज्ञम् । तन्त्रान्तरे तु अस्या अपराण्यपि लक्षणान्युक्तानि यथा—

"स्कन्धः शिरः कम्पति घूर्णतीव मूर्च्छां प्रलापं तथैव निद्राम् ।
संज्ञाप्रणाशं जनयेद्धि तन्द्रां भ्रान्तं ततः पश्यति चापि चित्रितम् ॥
गृह्णाति मन्या हृदयञ्च रूपैः सर्व्वैरमीभिः समभिद्रुतञ्च ।
तिस्रो हि रात्री र्न स जातु जीवेत्तं शीर्षकम्पं प्रवदन्ति रोगम् ॥" इति—१६

पित्तप्रधानैर्वाताद्यैः शङ्खे शोफः सशोणितैः ।
तीव्र-दाह-रुजा-राग-प्रलाप-ज्वर-तृड्भ्रमाः ॥ १७ ॥
तिक्तास्यः पीतवदनः क्षिप्रकारी सशङ्खकः ।
त्रिरात्राज् जीवितं हन्ति सिध्यत्यप्याशु साधितः ॥ १८ ॥

शङ्खकमाह पित्तप्रधानैरित्यादि । त्रिरात्रादित्यनन्तरं परमिति शेषः । तेन त्रिरात्रादूर्ध्वं जीवितं हन्तीत्यर्थः । आश्विति त्रिरात्राभ्यन्तरे साधित श्चिकित्सितो यदा भवति तदा कदाचित् सिध्यतीत्यर्थः । यदाह विदेहः--

"चीयते तु यदा पित्तं शङ्खयोरनिलेरितम् ।
निरुणद्धि ततोमर्म परिशोषित मुष्मणा ॥
ततः शङ्खौ प्ररुध्येते दह्येते इव वह्निना ।
सूचीभि रिव तुद्येते निकृत्येते इवासिना ॥

शङ्खको नाम शिरसि व्याधिरेषः सुदारुणः।
तृष्णामूर्च्छा ज्वरकरस्त्रिरात्रात् पर मन्तकृत्॥
कुशलेन ह्युपक्रान्त स्त्रिरात्रादेव जीवति॥" इति

अत्र त्रिरात्रादिति ल्यब्लोपे पञ्चमी तेन त्रिरात्रं प्राप्यैव जीवतीत्यर्थः किंवा चिकित्सायामक्रियमाणायां त्रिरात्रावधिकमेव निश्चितं मरणम्। यदि पुनः शीघ्रं प्रतीकारं क्रियते तदा कदाचिज्जीवत्यपीत्यर्थः। अपिशब्दाच्चिकित्सायां क्रियामाणायामपि कदाचिन्न जीवत्यपीति बोधयति। १७।१८

पित्तानुबन्धः शङ्खाक्षि-भ्रू-ललाटेषु मारुतः।
रुजं सस्पन्दनां कुर्यादनुसूर्योदयोदयाम्॥ १९॥
आमध्याह्नं विवर्द्धिष्णुः क्षुद्वतः सा विशेषतः।
अव्यवस्थितशीतोष्णसुखा शाम्यत्यतः परम्॥ २०॥
सूर्यावर्तः स

पित्तानुवन्ध इत्यादिना सूर्य्यावर्त्तमाह। स्पन्दनं शिरोगतशिरायाः तत्सहिताम् अनुसूर्य्योदयोदयामिति अनुसूर्य्योदयं सूर्य्योदयक्रमेण उदयो वृद्धिर्यस्या रुजस्ताम्। आमध्याह्नमिति मध्याह्न मवधीकृत्य वर्द्धिष्णुः। क्षुद्वतः सा विशेषत इति सा रुजा क्षुधायां सत्यां विशेषतोऽतिशयेन भवतीत्यर्थः। अव्यवस्थितशीतोष्णसुखेति अव्यवस्थितम् अनियतं शीतोष्णाभ्यां सुखं यस्याः। शाम्यत्यतः परमिति अत्र क्रमेणेति शेषः। अतो मध्याह्नात् परं क्रमेण शाम्यतीत्यर्थः। १९—२१—

इत्युक्ता दश रोगाः शिरोगताः।
शिरस्येवञ्च वक्ष्यन्ते कपाले व्याधयो नव॥ २१॥

एवमुक्तरीत्या शिरोगता दश रोगा उक्ताः। इदानीं शिरःकपालगतान् नव व्याधीनाह शिरस्येवेत्यादि। जानुनितम्बगतान्यस्थीनि कपालसंज्ञकानि। यदुक्तं सुश्रुते—"जानुनितम्बांसगण्डतालु शङ्ख वंक्षण शिरःसु कपालानीति" (१) तेन शिरस्येव कपाल इत्यनेन जानुनितम्बादिगतानां कपालानां निरासः। तेन शिरोगत एव कपाले नव व्याधयो वक्ष्यन्त इत्यर्थः। —२१

(१) अथ वङ्क्षणी कपालाख्यः सत्ता नाद्यर्वे कचित् सुश्रुतपाठे दृश्यते।

कपाले पवने दुष्टे गर्भस्थस्यापि जायते ।
सवर्णो नीरुजः शोफस्तं विद्यादुपशीर्षकम् ॥ २२ ॥

तत्र कपाल इत्यादिना उपशीर्षकमाह । गर्भस्थस्यापीत्यपि शब्दाद् गर्भान्निर्गतस्यापि भवतीत्यर्थः । २२

यथादोषोदयं ब्रूयात् पिड़कार्बुदविद्रधीन् ॥ २३ ॥

यथादोषोदयमित्यादिना पिड़कादीन् त्रीन् व्याधीनाह । यस्य दोषस्य उदयः आधिक्यं दृश्यते तेन दोषेण पिड़कादित्रयं निर्दिशेदित्यर्थः । २३

कपाले क्लेदबहुलाः पित्तास्टक्श्लेष्मजन्तुभिः ।
कंगुसिद्धार्थकनिभाः पिड़काः स्यु ररुंषिकाः ॥ २४ ॥

अरुंषिकामाह कपाल इत्यादि । २४

कण्डु-केशच्युति-स्वाप-रौक्ष्यकृत् स्फुटनं त्वचः ।
सुसूक्ष्मः कफ-वाताभ्यां विद्याद्दारुणकन्तु तत् ॥ २५ ॥

दारुणकमाह कण्डूकेशेत्यादि । दारुणकं 'उखी' इति संज्ञया लोके प्रसिद्धम् ।२५

रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ॥ २६ ॥
रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ।
तदिन्द्रलुप्तं रुह्याञ्च प्राहुश्चाचेति चापरे ॥ २७ ॥

इन्द्रलुप्तमाह रोमकूपेत्यादि । अन्येषामिति लोम्नाम् । तस्यैव इन्द्रलुप्तस्य व्यवहारार्थं संज्ञाद्वय माह रुह्या प्राहुश्चाचेति चापर इति । अत्र प्राहुः खल्लीति चापरे इत्यपि पाठान्तरं केचित् पठन्ति । भोजेऽप्युक्तम्—

"तमिन्द्रलुप्तमित्याहुः खल्लीं रुह्याञ्च केचन ।" इति २६।२७

खलतेरपि जन्मैवं सदनं तत्र तु क्रमात् ।

खलति माह खलतेरित्यादि । सदनमिति लोमच्युतिः । २८—

सा वातादग्निदग्धाभा पित्तात् स्विन्नशिरावृता ॥ २८ ॥
कफाद्घनत्वग्वर्णांश्च यथास्वं निर्दिशेत् त्वचि ।

दोषैः सर्वाकृतिः सर्वैरसाध्या सा नखप्रभा ।

दग्धाग्निनेव निर्लोमा सदाहा या च जायते ॥ २६ ॥

तस्या एव वातादिभेदेन लक्षणमाह सा वातादित्यादि । सेति खलतिः । खिन्नशिरावृतेति स्वेदयुक्तशिराभिर्वृता । घनस्येव त्वग्वर्णो यस्याः (सा घनत्वग्वर्णा) । —२८।२९

शोक-श्रम-क्रोधकृतः शरीरोष्मा शिरोगतः ।

केशान् सदोषः पचति पलितं सम्भवत्यतः ॥ ३० ॥

पलितमाह शोकेत्यादि । शरीरोष्मा शरीराग्नितेजः । सदोष इति वातपित्त-कफ सहितः । तेन दोषत्रययुक्तं शारीरं तेजः शिरोगतं सत् पलितकारकमित्यर्थः युक्तञ्चैतत् । शोकश्रमजनितवातेन विना उष्मा शिरोगतो न भवतीति वायोस्तथा पित्तं विना न च पाकः इति पित्तस्य, तथा केशशौक्ल्यञ्च न कफं विनेति कफस्य लाभाद्दोषत्रयस्यैव पलितकारकत्वमिति । चरकेऽप्युक्तम्—

"तेजोऽनिलाद्यैः सहकेशभूमिं दग्ध्वा तु कुर्य्यात् खलतिं नरस्य ।

किञ्चित्तु दग्ध्वा पलितानि कुर्य्याद्धरिप्रभत्वञ्च शिरोरुहाणाम् ॥" इति

(चिं २६ अं)

एतच्च कालजाकालजपलितव्यापकं लक्षणम् । कालजेतु शोकश्रमादिकारणान्तरोपलक्षणं तेन वयःपरिणामकृतश्चोष्मा दोषत्रयसहितः कालजपलितकारणम् । अन्यथा कालजं पलितमसंगृहीतं स्यादिति । ३०

तद्वातात् स्फुटितं श्यावं खरं रुक्षं जलप्रभम् ।

पित्तात् सदाहं पीताभं कफात् स्निग्धं विवृद्धिमत् ॥ ३१ ॥

स्थूलं सुशुक्लं

अस्यैव पलितस्य उल्बणदोषभेदेन लक्षणमाह तद्वातादित्यादि । सुशुक्लमित्यन्तं कफजपलितलक्षणम् । ३१।३२—

सर्वैस्तु विद्याद्व्यामिश्रलक्षणम् ॥

सान्निपातिक पलितमाह सर्व्वैस्त्वित्यादि । —३२ —

शिरोरुजोद्भवं चान्यद्विवर्णं स्पर्शनासहम् ॥ ३२ ॥

शिरोरुजाभवं पलित माह शिरोरुजोद्भव मित्यादि । —३२

असाध्या सन्निपातेन खलतिः पलितानि च ।
शरीरपरिणामोत्थान्यपेक्षन्ते रसायनम् ॥ ३३ ॥

इति श्रीमद् वाग्भट विरचितायामष्टाङ्गहृदयसंहितायामुत्तरे तन्त्रे शिरोरोगविज्ञानीयो नाम त्रयोविंशोऽध्यायः ।

असाध्येत्यादि । सन्निपातेन या खलतिः सा असाध्या । तथा सन्निपातेन यानि पलितानि तान्यप्यसाध्यानीत्यर्थः । शरीरपरिणामोत्थानि पलितानि रसायन मपेक्षन्ते । तान्यपि रसायनाद् विनाऽसाध्यान्येवेत्यर्थः । ३३

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे त्रयोविंशोऽध्यायः ।

चतुर्विंशोऽध्यायः ।

अथातः शिरोरोगप्रतिषेधं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥ १ ॥
शिरोऽभितापेऽनिलजे वातव्याधिविधिं चरेत् ।
घृतभ्यक्तशिरा रात्रौ पिबेदुष्णपयोऽनुपः ॥ २ ॥
माषान् मुद्गान् कुलत्थान् वा तद्वत् खादेद्घृतान्वितान् ।
तैलं तिलानां कल्कं वा क्षीरेण सह पाययेत् ॥ ३ ॥
पिण्डोपनाहस्वेदाश्च मांसधान्यकृता हिताः ।

उक्तानां शिरोरोगाणां चिकित्सितमभिधातु शिरोरोगप्रतिषेध उच्यते—शिरोभिताप इत्यादि । भ्यक्तशिरा इत्यभ्यक्तशिराः । तद्वदिति रात्रौ उष्णपयोनुपः । सुश्रुतेऽप्युक्तम्—

"मुद्गान्माषान्कुलत्थांश्च खादेद्वा निशि केवलान् ।
कटुकोष्णान् ससर्पिष्कान् उष्णञ्चानु पिबेत् पयः ॥

पिबेद्वा पयसा तैलं तत्कल्कञ्चापि मानवः।" इति (उ' २६ अ')
पिण्डोपनाहस्वेदा इति पिण्डस्वेदा उपनाहस्वेदाश्च । २—४—

वातघ्नदशमूलादिसिद्धक्षीरेण सेचनम् ॥ ४ ॥
स्निग्धं नस्यं तथा धूमः शिरःश्रवणतर्पणम् ।

वातघ्नेत्यादि । आदिशब्दाद् भद्रदार्व्वादि प्रभृतीनां वातघ्नगणानां ग्रहणम् । क्षीरमत्र कदुष्णं बोध्यं वातहरत्वात् । सुश्रुतेऽप्युक्तम्—

"वातघ्नसिद्धैः क्षीरैश्च सुखोष्णैः सेकमाचरेत् ।" इति (उ' २६ अ')

स्निग्धशब्दो धूमेनापि सम्बध्यते । सुश्रुतेऽप्युक्तम्—

"धूमश्चास्य यथाकालं योजयेत् स्नैहिकं भिषक् ।" इति (उ' २६ अ')—३।५—

वरुणादौ गणे क्षुण्णे क्षीरमर्द्धोदकं पचेत् ॥ ५ ॥
क्षीरावशिष्टं तच्छीतं मथित्वा सारमाहरेत् ।
ततो मधुरकैः सिद्धं नस्यं तत् पूजितं हविः ।

वरुणादावित्यादि । क्षुण्णे इति पिष्टे —५।६—

वर्गेऽत्र पक्वं क्षीरे च पेयं सर्पिः सशर्करम् ॥ ६ ॥

वर्गेऽत्रेत्यादि । अत्र वर्गे इति वरुणादिवर्गे कल्करूप इत्यर्थः । क्षीरञ्च सर्पिरपेक्षया चतुर्गुणम् । ६

कार्पासमज्जात्वङ्मुस्तासुमनः कोरकाणि च ।
नस्यमुष्णाम्बुपिष्टानि सर्वमूर्द्धरुजापहम् ॥ ७ ॥
शर्कराकुङ्कुमश्रृतं घृतं पित्तासृगन्वये ।
प्रलेपः सघृतैः कुष्ठ-कुटिलोत्पल-चन्दनैः ॥ ८ ॥
वातोद्रेकभयाद्रक्तं न चास्मिन्नवसेचयेत् ॥

कार्पासमज्जेत्यादि । कार्पासास्थिमज्जा । सुमनःकोरकानि जातीकलिकाः । शर्कराकुङ्कुमं कल्कः । अत्रापि पूर्व्वोक्तं नस्यमितिपदं सम्बध्यते । तन्त्रान्तरे तु "शर्कराकुङ्कुमं नस्यं घृतभृष्टं शिरोऽर्त्तिनुद्" इत्युक्तम् । तेन घृतभृष्टशर्कराकुङ्कुमेनापि नस्यं बोध्यम् । पित्तासृगन्वये इति वातिक एव शिरोरोगे पित्तरक्तसम्बन्धे सतीत्यर्थः । कुटिलं तगरम् । ७—९—

इत्यशान्तौ चले दाहः कफे चेष्टो यथोदितः ॥ ९ ॥

इत्यशान्तावित्यादि । इत्युक्तरीत्या यदि शिरोरुक् न शाम्यति तदा दाहः कार्य्यः । कस्मिन् रोगे दाहः कार्य्य इत्याह चले कफेचेति । चल इति वायुः । तेन वायुविषयकः कफविषयक एव दाहो न तु रक्तपित्तविषयक इत्युक्तं भवति । यथोदित इति अग्निकर्म्मविधौ (सू ३० अ) यथोक्त इत्यर्थः । —९

अर्द्धावभेदकेऽप्येषा तथा दोषान्वयात् क्रिया ॥ १० ॥ (१)

अर्द्धावभेदक इत्यादि । तथा दोषान्वयादिति उक्तप्रकार वातकफरूपदोष-सम्बन्धादित्यर्थः । चरकेऽप्युक्तम्—

"रूक्षाशनाध्यशनप्राग् वातावश्यायमैथुनैः ।
वेगसन्धारणायास व्यायामैः कुपितोऽनिलः ॥
केवलः सकफोवार्द्धं गृहीत्वा शिरसो बली ।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धे तु वेदनाम् ॥
शस्त्रारणिनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः ॥" इति (चि २६ अ) १०

शिरीशबीजापामार्गमूलं नस्यं विडान्वितम् ।
स्थिरारसो वा लेपे तु प्रपुन्नाड़ोऽम्लकल्कितः ॥ ११ ॥

शिरीषबीजेत्यादि । विड़ान्वितमिति विड़्लवणान्वितम् । स्थिरा शालपर्णी तस्या रसः क्वाथो वा विड़ान्वितो नस्यमित्यर्थः । लेपे तु प्रपुन्नाड़ोऽम्लकल्कित इति एड़गजबीजं काञ्जिकपिष्टमित्यर्थः । ११

सूर्य्यावर्त्तेऽपि तस्मिंस्तु सिरयापहरेदसृक ॥ १२ ॥

अयमुक्त उपक्रमः सूर्य्यावर्त्तेऽपि कार्य्य इत्याह सूर्य्यावर्त्तेऽपीति । विशेषमाह तस्मिंस्त्विति सूर्य्यावर्त्ते पुनः सिरयासृगपहरेत् । १२

शिरोऽभितापे पित्तोत्थे स्निग्धस्य व्यधयेच्छिराम् ।
शीताः शिरोमुखालेप-सेक-शोधन-वस्तयः ।
जीवनीयशृते क्षीरसर्पिषी पान-नस्ययोः ॥ १३ ॥
कर्त्तव्यं रक्तजेऽप्येतत्

पैत्तिकशिरोरोग चिकित्सामाह शिरोभिताप इत्यादि । शीता इति शीतवीर्य्य-द्रव्यकृताः । शोधनेति वस्तिविशेषणम् । १३।१४—

(१) यथादोषान्वयक्रियेति वा पाठः ।

प्रत्याख्याय च शङ्कके ।

प्रत्याख्याय च शङ्कक इति शङ्ककस्य विकल्पितासाध्यत्वादेतदेव चिकित्सितं प्रत्याख्याय कर्त्तव्यमित्यर्थः । —१४—

श्लेष्माभितापेजीर्णाज्यस्नेहितः कटुकैर्वमेत् ॥ १४ ॥

स्वेद-प्रलेप-नस्याद्या रूक्षतीक्ष्णोष्णभेषजैः ।

शस्यन्ते चोपवासोऽत्र

श्लैष्मिक शिरोरोग चिकित्सामाह श्लेष्माभिताप इत्यादि । अत्रेति श्लैष्मिक-शिरोरोगे । १४।१५—

निचये मिश्रमाचरेत् ॥ १५ ॥

निचय इति सन्निपातिके मिश्रमिति वातिकादि शिरोरोगोक्तमेवौषधं संमिश्र्य योजयेदित्यर्थः । —१५

क्रिमिजे शोणितं नस्यं तेन मूर्च्छन्ति जन्तवः ।

मत्ताः शोणितगन्धेन निर्यान्ति घ्राण-वक्त्रयोः ॥ १६ ॥

सुतीक्ष्णनस्यधूमाभ्यां कुर्यान्निर्हरणं ततः ।

क्रिमिज-शिरोरोग चिकित्सामाह क्रिमिज इत्यादि । तेनेति शोणितनस्येन जन्तवः क्रिमयो मूर्च्छन्ति एकत्र बहुलिता भवन्ति । १६।१७—

विडङ्ग-स्वर्जिका-दन्ती-हिंगु-गोमूत्रसाधितम् ॥ १७ ॥

कटु-निम्बेङ्गुदी-पीलु-तैल नस्यैः पृथक् पृथक् ।

विड़ङ्गेत्यादि । विड़ङ्गादीनां कल्कः गोमूत्रन्तु पाकार्थं चतुर्गुणम् । तैलशब्दस्य कटुनिम्बेङ्गुदीपीलुभिः सह प्रत्येकमन्वयः । तेन कटुतैलं सर्षपतैलम् । इङ्गुदी पुत्रञ्जीवकः, पीलु औत्तरपथिकम् एषां तैलम् । —१७।१८ —

अजामूत्रद्रुतं नस्ये क्रिमिजित् क्रिमिजित्परम् ॥ १८ ॥

पूतिमत्स्ययुतैः कुर्याद् धूमं नावनभेषजैः ।

क्रिमिभिः पीतरक्तत्वाद्रक्तमत्र न निर्हरेत् ॥ १९ ॥

अजामूत्रद्रुतमित्यादि । क्रिमिजिद् विड़ङ्गमजामूत्रेण द्रवीकृतं यन्नस्यं तत् क्रिमिजित् क्रिमिहरम् । तथा पूतिमत्स्ययुतैरित्यादावपि नस्यमिति सम्बध्यते ।

पूतिमत्स्यसंयुक्तैर्धूमनस्योक्तभेषजद्रव्यैर्नस्यं क्रिमिजिद् भवतीत्यर्थः। अत्रेति क्रिमिजशिरोरोगे। —१८।१९

वाताभितापविहितः कम्पे दाहाद्विना क्रमः ॥ २० ॥

शिरःकम्प चिकित्सामाह वाताभितापविहित इत्यादि। वाताभितापो वातिक शिरोरोगः। २०

नवे जन्मोत्तरं जाते योजयेदुपशीर्षके।
वातव्याधिक्रियां

नव इत्यादिना वातव्याधिक्रियामित्यन्तेनामस्य उपशीर्षकस्य चिकित्सामाह। नव इत्यचिरोत्थे। जन्मोत्तरं जाते जन्मान्तर मुत्पन्ने। तेन गर्भस्थस्य बालकस्य जातो य उपशीर्षकः सोऽसाध्य इति दर्शितम्। २१—

पक्वे कर्म विद्रधिचोदितम्।

पक्वस्य उपशीर्षकस्य चिकित्सामाह पक्वे कर्म विद्रधिचोदितमिति। पक्वे उपशीर्षके योग्यतया पक्वविद्रध्युक्तं कर्म योजयेदित्यर्थः। —२१—

आमपक्वे यथायोग्यं विद्रधिपिड़कार्बुदे ॥ २१ ॥

आमपक्वे इत्यादिना विद्रधिपिड़कार्बुदानां चिकित्सामाह। यथायोग्यमिति तेन आमेषु विद्रध्यादिषु आमविद्रध्यादिचिकित्सितं पक्वेषु तु पक्वविद्रध्यादि-चिकित् सितं कार्य्यमित्यर्थः। —२१

अरूंषिकाजलौकोभिर्हृतास्रा निम्बवारिणा।
सिक्ता प्रभूतलवणैर्लिम्पेदश्वशकृद्रसैः ॥ २२ ॥
पटोलनिम्बपत्रैर्वा सहरिद्रैः सुकल्कितैः।
गोमूत्र-जीर्णपिण्याक-कृकवाकुमलै-रपि ॥ २३ ॥
कपालभृष्टं कुष्ठं वा चूर्णितं तैलसंयुतम्।
रूंषिकालेपनं कण्डू-क्लेद-दाहार्तिनाशनम् ॥ २४ ॥

अरुंषिका चिकित्सामाह अरुंषिका इत्यादि। पटोलेत्यादिना कल्कितै-रित्यन्तेन द्वितीयं योगमाह। सुकल्कितैरिति सुपिष्टैः। गोमूत्रेत्यादिना मलै-रित्यन्तेन तृतीयं योगमाह। पिण्याकस्तिलखलिः। कृकवाकुः कुक्कुटः। रुंषिकेति निरुक्त विधिना अकारलोपः। २२—२४

मालती-चित्रकाश्वघ्न-नक्तमाल-प्रसाधितम् ।
चाचारूंषिकयोस्तैलमभ्यङ्गः क्षुरघृष्टयोः ॥ २५ ॥
अशान्तौ शिरसः शुद्ध्यै यतेत वमनादिभिः ।

मालतीत्यादि । नक्तमालः करञ्जः । चाचमिन्द्रलुप्तम् । २५—२६

विध्येच्छिरां दारुणके ललाट्यां शीलयेन्मृजाम् ॥ २६ ॥
नावनं मूर्ध्नि वस्तिश्च लेपयेच्च समाक्षिकैः ।
पियालबीज-मधुक-कुष्ठ-माषैः ससर्षपैः ॥ २७ ॥
लाक्षा-शम्पाकपत्रैडगज-धात्रीफलैस्तथा ।
कोरदूष-तृण-क्षार वारि-प्रक्षालनं हितम् ॥ २८ ॥

दारणचिकित्सामाह विध्येदित्यादि ललाट्यामिति ललाटभवाम् । मृजामिति शिरोमल प्रक्षालनेन शुद्धिम् । शिरसो वस्तिमिति । शिरोवस्तिविधानञ्च शालाक्ये यथा

"द्वादशाङ्गुल विस्तीर्णं चर्म्मपट्टं शिरःसमम् ।
आकर्णं बन्धनस्थानं ललाटेवस्त्रवेष्टिते ॥
चेलवेष्टिकया बद्ध्वा माषकल्केन लेपयेत् ।
ततो यथाव्याधिश्टतं स्नेहं कोष्णं निषेचयेत् ॥
ऊर्ध्वं केशस्तरो यावदङ्गुलं धारयेच्च तम् । (१)
आवक्तृनासिकाक्लेदाद्दशाष्टौषट्चलादिषु ॥
मात्रासहस्राण्यरुजे त्वेकं स्कन्धादिमर्द्दयेत् ।
युक्तस्नेहस्य परमं सप्ताहं तस्य सेवनम् ॥" इति

लेपयेच्च समाक्षिकैरिति धात्रीफलान्तैः सम्बध्यते । तत्र पियालबीजेत्यादि सर्षपान्त एको योगः । ससर्षपैरित्यत्र ससैन्धवैरिति पाठः चन्द्राटादौ सर्व्वत्र दृश्यते लाक्षादिस्तु धात्रीफलान्तो द्वितीय इति । २७।२८

इन्द्रलुप्ते यथासन्नं शिरां विद्ध्वा प्रलेपयेत् ।
प्रच्छाय गाढं कासीस-मनोह्वा-तुत्थकोषणैः ॥ २९ ॥
वन्यामरतरुभ्यां वा गुञ्जामूलफलैस्तथा ।
तथा लाङ्गलिकामूलैः करवीररसेन वा ॥ ३० ॥

(१) अत्र काचित् पाठत्रुटि रनुमीयते ।

सक्षौद्र-क्षुद्रवार्ताकस्वरसेन रसेन वा ।
पत्तूरकस्य पत्राणां भल्लातकरसेन वा ॥ ३१ ॥
अथवा माक्षिक-हविस्तिलपुष्प-त्रिकण्टकैः ।
तैलाक्ता हस्तिदन्तस्य मषी चात्रौषधं परम् ॥ ३२ ॥
शुक्ररोमोद्गमे तद्वन्मषी मेषविषाणजा ।
वर्जयेद्वारिणा सेकं यावद्रोमसमुद्भवः ॥ ३३ ॥

इन्द्रलुप्त इत्यादि । प्रच्छाय गाढमिति अवगाढपदं यथा स्यात्तथा प्रच्छाय प्रच्छानं कृत्वा काशीशादिभिः प्रलेपयेत् । प्रच्छाय इति 'छो' छेदने इत्यस्य ल्यपि रूपम् । काशीशं धातुकाशीशम्, ऊषणं मरिचं, वन्यं कैवर्त्तमुस्तकम्, अमरतरुः देवदारुः अयं द्वितीयो योगः । गुञ्जामूलफलैस्तथेति तृतीयः, तथा लाङ्गलिका-मूलैरिति चतुर्थः । करवीररसेन वेति पञ्चमः । सक्षौद्रक्षुद्रवार्ताकुस्वरसेनेति षष्ठः । अत्र क्षुद्रवार्ताकं कण्टकारीफलम् । रसेन वेति परेण सम्बध्यते । चात्रौषधमिति इन्द्रलुप्तौषधम् । शुक्ररोमोद्गम इति इन्द्रलुप्तस्थाने यदि शुक्ल-रोमोद्गमः स्यात्तत्र तैलाक्ता मेषविषाणजा मसी औषधम् । २९—३३

खलतौ पलिते खल्यां हरिलोम्नि च शोधितम् ।
नस्यवक्त्रशिरोऽभ्यङ्गप्रदेहैः समुपाचरेत् ॥ ३४ ॥

खलतावित्यादि । हरिलोम्नि कपिललोम्नि । खलत्यादिषु वमनादिभिः शोधित-मातुरं नस्यादिभि रुपक्रमैः समुपाचरेत् । ३४

सिद्धं तैलं बृहत्याद्यैर्जीवनीयैश्च नावनम् ।

सिद्धमित्यादि बृहत्याद्यैरिति स्वल्पपञ्चमूलेन । ३५—

मासं वा निम्बजं तैलं क्षीरभुङ् नावयेद्यतिः ॥ ३५ ॥

मासं वेत्यादि । यतिरिति ब्रह्मचारी । —३५

नीली-शिरीष-कोरण्ट-भृङ्गस्वरसभावितम् ।
शैल्वन्त-तिल-रामाणां बीजं काकाण्डकीसमम् ॥ ३६ ॥
पिष्ट्वाजपयसा लोहाल्लिप्तादर्कांशुतापितात् ।
तैलं श्रृतं क्षीरभुजो नावनात् पलितान्तकृत् ॥ ३७ ॥

नीलीत्यादि । नीली नेलीनाम्ना ख्याता वस्त्ररञ्जनलता, भृङ्गो भृङ्गराजः,

शेलुर्बहुवारः, अक्षं विभीतकम्, रामा प्रियङ्गुः एषां बीजम्। काकाण्डकी-समिति काकाण्डकी शूकशिम्बा तत्समं तत्तुल्यम्। एतत् सर्वं पिष्ट्वा लौहं प्रलिप्य रौद्रे स्थापयेत् तस्माद् यत्तैलं स्रवति तेन नावनमित्यर्थः। ३६।३७

क्षीरात् सहचराद् भृङ्गरजसः सौरसाद्रसात्।
प्रस्थैस्तैलस्य कुडवः सिद्धो यष्टीपलान्वितः॥ ३८॥
नस्यं शैलोद्भवे भाण्डे शृङ्गे मेषस्य वा स्थितः।

क्षीरादित्यादि। सहचरो झिण्टी, भृङ्गरजो भृङ्गराजः, सुरसः कृष्णतुलसी, यष्टीमधुकपलं कल्कः। शैलासने भाण्ड इति शिलामये पात्रे, असनः पीतशालः तत्काष्ठघटिते वा पात्रे स्थितः तथा मेषशृङ्गे वा स्थित इति सम्बन्धः। अस्मादेव वचनात् पात्रविशेषमहिम्ना अस्य शक्त्युत्कर्षो भवतीत्युन्नीयते। ३८।३९—

क्षीरेण श्लक्ष्णपिष्टौ वा दुग्धिका-करवीरकौ॥ ३९॥
उत्पाट्य पलितं देयावाशये पलितापहौ।

क्षीरेणेत्यादि। पलितम् उत्पाट्य आशय इति उत्पाटित-पलित-स्थाने देयौ। —३९।४०—

क्षीरं पियालं यष्ट्याह्वं जीवनीयो गणास्तिलाः॥ ४०॥
कृष्णाः प्रलेपो वक्त्रस्य हरिलोमवलीहितः।
तिलाः सामलकाः पद्मकिञ्जल्को मधुकं मधु॥ ४१॥
बृंहयेच्च रजेच्चैतत् केशान्मूर्द्धप्रलेपनात्।
मांसी कुष्ठं तिलाः कृष्णाः सारिवा नीलमुत्पलम्।
क्षौद्रञ्च क्षीरमिष्टानि केशसंवर्द्धनं परम्॥ ४२॥

क्षीर मित्यादौ कृष्णा इति तिलविशेषणम्। तिलाः सामलका इत्यादौ बृंहयेदिति वर्द्धयेत्। मांसीत्यादौ कृष्णा इति तिलविशेषणम्। —४०—४२

अयोरजो भृङ्गरजस्त्रिफला कृष्णमृत्तिका।
स्थितमिक्षुरसे मासं समूलं पलितं रजेत्॥ ४३॥

अयो रज इत्यादि। कृष्णमृत्तिका पद्मिनीतडागस्थितकर्दमः। ४३

माषकोद्रवधान्याम्लैर्यवागूस्त्रिदिनोषिता ।
लोहे शुक्लोत्कटा पिष्टा बलाकामपि रञ्जयेत् ॥ ४४ ॥

माषेत्यादि । माषकोद्रवाभ्यां धान्याम्लेन काञ्जिकेन सिद्धा यवागूर्लोहपात्रे त्रिदिनोषिता सती बलाकामपि रञ्जयेत् । किं विशिष्टा शुक्तेनाम्लेन उत्कटा । किंवा बहुशुक्तसन्धानं दत्त्वा पिष्टा । ४४

प्रपौण्डरीक-मधुक-पिप्पली-चन्दनोत्पलैः ।
सिद्धं धात्रीरसे तैलं नस्येनाभ्यञ्जनेन च ॥ ४५ ॥
सर्वान् मूर्द्धगदान् हन्ति पलितानि च शीलितम् ।

प्रपौण्डरीकेत्यादि । धात्रीरसस्तैलाच्चतुर्गुणः । विदेहेऽप्युक्तम्

"धात्रीफलरस प्रस्थे तैलस्य कुडवं पचेत् ।
प्रपौण्डरीक मधुक पिप्पली चन्दनोत्पलैः ।
शिरो रुजां सपलितां नावनाभ्यञ्जनाज्जयेत् ॥" इति

चरके तु द्विगुणेनामलकीरसेन पाकउक्तः । यथा—

"प्रपौण्डरीक मधुयष्टि पिप्पली चन्दनोत्पलैः ।
कार्षिकैस्तैल कुडवो द्विगुणामलकीरसः ।
साध्यः स प्रतिमर्षः स्यात् सर्वशीर्षगदापहः ॥" इति (चि २६ अ)

तेन द्वयमपि प्रमाणं स्मृति द्वैधवत् । ४५।४६—

वरी-जीवन्ती-निर्यास-पयोभिर्यमकं पचेत् ॥ ४६ ॥
जीवनीयैश्च तन्नस्यं सर्वजत्रूर्ध्वरोगजित् ॥ ४७ ॥

वरीत्यादि । शतावरीरस जीवन्तीरस क्षीरैः यमकमिति घृततैलं जीवनीयगणः कल्कः । अत्र जीवन्त्याः स्वरसाभावे क्वाथ एव ग्राह्यः । —४६।४७

मयूरं पक्षपित्तान्त्रपादविट्तुण्डवर्जितम् ।
दशमूल-बला-रास्ना-मधुकैस्त्रिपलैर्युतम् ॥ ४८ ॥
जले पक्त्वा घृतप्रस्थं तस्मिन् क्षीरसमं पचेत् ।
कल्कितैर्मधुरद्रव्यैः सर्वजत्रूर्ध्वरोगजित् ॥ ४९ ॥
तदभ्यासीकृतं पानवस्त्यभ्यञ्जननावनैः ॥ ५० ॥

मयूरमित्यादि । अत्र दशमूलस्य प्रत्येकं पलत्रयम् एवं बलादीनां त्रयाणामपि एवं मिलित्वा द्वचत्वारिंशत्पलानि भवन्ति एतैः सह तरुणमयूरएकमेकं पक्षादि-

वर्जितं जलद्रोणे पचेत्। जलद्रोणोऽत्र पादावशेषः सन् पचनीय-घृत-प्रस्था-चतुर्गुणो भवतीति। कल्कितैर्मधुरैर्द्रव्यैरिति जीवनीयदशकेन। जीवनीयानि हि मधुरत्व-मधुरविपाकत्व-प्रकर्षान् मधुरशब्देनेहोच्यन्ते। ४८—५०

एतेनैव कषायेण घृतप्रस्थं विपाचयेत्।
चतुर्गुणेन पयसा कल्कैरेभिश्च कार्षिकैः।
जीवन्ती-त्रिफला-मेदा-मृद्वीकर्द्धि-परूषकैः ॥ ५१ ॥
समङ्गा-चविका-भार्गी-काश्मरी-कर्कटाह्वयैः।
आत्मगुप्ता-महामेदा-ताल-खर्जूरमस्तकैः ॥ ५२ ॥
मृणाल-विस-खर्जूर-यष्टीमधुक-जीवकैः।
शतावरी-विदारीक्षु-बृहती-सारिवायुगैः ॥ ५३ ॥
दूर्वा-श्वदंष्ट्रर्षभक-शृङ्गाटक-कसेरुकैः।
रास्ना-स्थिरा-तामलकी-सूक्ष्मैला-शठि-पौष्करैः ॥ ५४ ॥
पुनर्नवा-तुगाक्षीरी-काकोली-धन्वयासकैः।
मधूकाक्षोड़-वाताम-मुञ्जानाभिषुकैरपि ॥ ५५ ॥
महामायूरमित्येतन्मायूरादधिकं गुणैः।
धात्विन्द्रिय-स्वरभ्रंश-श्वास-कासार्दितापहम् ॥ ५६ ॥
यान्यसृक्शुक्रदोषेषु शस्तं बन्ध्यासुतप्रदम् ॥ ५७ ॥

एतेनैवेत्यादिना महामायूरघृतमाह। एतेनैवेति उक्त-दशमूलादि-कषायेण मयूर-मांस-कषायेण च। विसम् अल्पमृणालम्। बृहतीयुगं शारिवायुगञ्चेत्यर्थः। अक्षोड़ादीन्यौत्तरपथिकानि। मधूको मधूकसारः। मायुरादिति पूर्वोक्त-मायूर-घृतात्। ५१—५७

आखुभिः कर्कटैर्हंसैः शशैश्चेति प्रकल्पयेत्।

एतत् मायूरघृतद्वयं मयूरस्थाने मूषकादीन् दत्त्वापि कार्य्यमित्याह आखुभिरित्यादि। ५८—

जत्रूर्ध्वजानां व्याधीनामेकत्रिंशशतद्वयम्।
परस्परमसङ्कीर्णं विस्तरेण प्रकाशितम् ॥ ५८ ॥

इह तन्त्रे शालाक्यविषयत्वेनोक्तानां व्याधीनां संकलय्य संख्यां दर्शयति जत्रूर्ध्वजानामित्यादि। एकत्रिंशं शतद्वयमिति एकत्रिंशता अधिकं शतद्वयमित्यर्थः।

तदधिकमित्यर्थः शदन्तविंशतेश्चेति डः । तत्र चतुर्णवतिर्नेत्ररोगाः, पञ्चविंशतिः कर्णरोगाः, अष्टादश नासारोगाः, पञ्चसप्ततिर्मुखरोगाः, ऊनविंशतिः शिरोरोगाः इति एकत्रिंशं शतद्वय मित्यर्थः । —५८

ऊर्ध्वमूलमधः शाखमृषयः पुरुषं विदुः ।
मूलप्रहारिणस्तस्माद् रोगान् शीघ्रतरं जयेत् ॥ ५९ ॥
सर्वेन्द्रियाणि येनास्मिन् प्राणा येन च संश्रिताः ।
तेन तस्योत्तमाङ्गस्य रक्षायामादृतो भवेत् ॥ ६० ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायामुत्तरे तन्त्रे
शिरोरोग प्रतिषेधो नाम चतुर्विंशोऽध्यायः ।

ऊर्ध्वजत्रुगतानां रोगाणां शीघ्रप्रतिकर्त्तव्यताया मुपपत्तिमाह ऊर्ध्वमूलमित्यादि । ५९।६०

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे चतुर्विंशोऽध्यायः ।
समाप्तञ्च शालाक्यमिति

पञ्चविंशोऽध्यायः ।

अथातो व्रणप्रतिषेधं व्याख्यास्यामः

इतिहस्माहुरात्रेयादयो महर्षयः ।

व्रणो द्विधा निजागन्तु-दुष्टशुद्धविभेदतः ।

निजो दोषैः शरीरोत्थैरागन्तुर्बाह्यहेतुजः ॥ १ ॥

दोषैरधिष्ठितो दुष्टः शुद्धस्तैरनधिष्ठितः ।

इदानीं शालाक्यतन्त्रं समाप्य उद्देशक्रमप्राप्तं शल्यतन्त्रमाह । अथात इत्यादि । शरीरोत्थैरित्यनेन मानसदोषजानां व्याधीनां न निजत्वमिति बोधयति बाह्यहेतवो बधबन्धप्रपतनादयः । दोषैरधिष्ठितो दुष्ट इत्यत्र दोषैः पूति-पूयादिभिः ॥ १।२—

संवृतत्वं विवृतता काठिन्यं मृदुतापि वा ॥ २ ॥

अत्युत्सन्नावसन्नत्वमत्यौष्ण्यमतिशीतता ।

रक्तत्वं पाण्डुता कार्ष्ण्यं पूतिपूयपरिस्रुतिः ॥ ३ ॥

पूतिमांस-शिरा-स्नायुच्छन्नतोत्सङ्गितातिरुक् ।

संरम्भ-दाह-श्वयथु-कण्ड्वादिभिरुपद्रुतिः ॥ ४ ॥

दीर्घकालानुबन्धश्च विद्याद्दुष्टव्रणाकृतिम् ।

दुष्टव्रण लिङ्गमाह संवृतत्वमित्यादि । संवृतत्वं संवृतमुखता अतिशब्दस्य सर्व्वत्रान्वयः । उत्सन्नत्वं उन्नतमांसत्वम् । अत्यवसन्नत्वमतिगम्भीरत्वम् । उत्सङ्गितेति कोटरवत्त्वम् ॥ —२—५—

स पञ्चदशधा दोषैः सरक्तैः—

स पञ्चदशधेत्यादि । तत्र पृथग्दोषैस्त्रयः, द्वन्द्वजाश्च त्रयः, सन्निपातेनैक इति सप्त । सर्व्वत्रैव रक्तसम्बन्धादपरे सप्त, तथा केवलेन रक्तेनैक इति पञ्चदशेत्यर्थः । —५—

तत्र मारुतात् ।

श्यावः कृष्णोऽरुणो भस्मकपोतास्थिनिभोऽपि च ।

मस्तु-मांस-पुलाकाम्बु-तुल्यतन्वल्पसंस्रुतिः ॥ ६ ॥

निर्मांसस्तोदभेदाढ्यो रूक्षश्चटचटायते ।

पित्तेन क्षिप्रजः पीतो नीलः कपिलपिङ्गलः ॥ ७ ॥

मूत्रकिंशुकभस्माम्बुतैलाभोष्णबहुस्रुतिः ।

क्षारोक्षितक्षतसमव्यथो रागोष्मपाकवान् ॥ ८ ॥

कफेन पाण्डुः कण्डूमान् बहुश्वेतघनस्रुतिः ।

स्थूलौष्ठः कठिनः स्नायुशिराजालततोऽल्परुक् ॥ ९ ॥

प्रवालरक्तो रक्तेन सरक्तं पूयमुद्गिरेत् ।

वाजिस्थानसमो गन्धैर्युक्तो लिङ्गैश्च पैत्तिकैः ॥ १० ॥

वातजादीनां लक्षणमाह तत्रेत्यादि । पुलाको गवेधुकान्नमिति ब्रह्मदेवश्च । अन्ये तु पुलाकस्तुच्छधान्यं तत् प्रक्षालनाम्बु इत्याहुः । गन्धैर्वाजिस्थानसम इति तुरगस्थान-तुल्य-गन्ध इत्यरुणः । —५—१०

द्वाभ्यां त्रिभिश्च सर्वैश्च विद्याल्लक्षणसङ्करात् ।

अवशिष्टानेकादशभेदानाह द्वाभ्यामित्यादि । सर्व्वैरिति चतुर्भिः । उक्त-वातादि लक्षण संकरात् अवशिष्टानेकादश विद्यादित्यर्थः । अत्र द्वाभ्यां षट् यथा वातरक्त-पित्तरक्त कफरक्त वातपित्त-वातकफ पित्तकफाः । तथा त्रिभिश्चत्वारः यथा वातपित्तरक्त वातकफरक्त-पित्तकफरक्त-वातपित्तकफाः तथा सर्व्वैरिति वात-पित्तकफरक्तैरेक इति लक्षण साङ्कर्यादेकादशेत्यर्थः । ११—

जिह्वाप्रभो मृदुः श्लक्ष्णः श्यावौष्ठपिडकः समः ॥ ११

किञ्चिदुन्नतमध्यो वा व्रणः शुद्धोऽनुपद्रवः ।

शुद्धव्रणलिङ्गमाह जिह्वाप्रभ इत्यादि । जिह्वाप्रभशब्दश्च मृदुश्लक्ष्ण-शब्दाभ्यां प्रत्येकमभिसम्बध्यते । जिह्वावन्मृदुः श्लक्ष्णश्चेत्यर्थः । ओष्ठो व्रण-प्रान्तभागः । श्याववर्णे ओष्ठपिडके यस्य । सम इत्युत्सन्नोत्सङ्गरहितः । अनुपद्रव इति व्रणोपद्रवाश्च विसर्पादयः । तदुक्तं चरके

"विसर्पः पक्षघातश्च शिरास्तम्भोऽपतानकः ।
मोहोन्माद व्रणरुजा ज्वरतृष्णाहनुग्रहाः ॥
कासश्छर्दिरतीसारोहिक्काश्वासः सवेपथुः ।
षोड़शोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ॥" इति (चि २५ अं)—११।१२—

त्वगामिषशिरा-स्नायु-सन्ध्यस्थीनि व्रणाशयाः ॥ १२ ॥
कोष्ठो मर्म च तान्यष्टौ दुःसाध्यान्युत्तरोत्तरम् ।

त्वगामिषेत्यादिना अष्टौ व्रणस्थानान्याह । —१२।१३—

सुसाध्यः सत्त्वमांसाग्निवयोबलवति व्रणः ॥ १३
वृत्तो दीर्घस्त्रिपुटकश्चतुरस्राकृतिश्च यः ।
तथा स्फिक्पायु-मेढ्रोष्ठ-पृष्ठान्तर्वक्त्र-गण्डगः ॥ १४ ॥

सुखसाध्यादि लक्षणमाह—सुसाध्य इत्यादि । त्रिपुटक इति त्रिकोण इति ब्रह्मदेवः । —१३।१४

कृच्छ्रसाध्योऽक्षि-दशन-नासिकापाङ्ग-नाभिषु ।
सेवनी जठर-श्रोत्र-पार्श्व-कक्षा-स्तनेषु च ॥ १५ ॥
फेनपूयानिलवहः शल्यवानूर्ध्वनिर्वमी ।
भगन्दरोऽन्तर्वदनस्तथा कट्यस्थिसंश्रितः ॥ १६ ॥

कृच्छ्रसाध्यव्रणलक्षण माह कृच्छ्रसाध्य इत्यादि । ऊर्ध्वनिर्वमीति ऊर्ध्वमुखत्वेन यो व्रणः ऊर्ध्वं पूयं निर्वमति । यो भगन्दरोऽन्तर्वदनोऽन्तर्मुखः । १५।१६

कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ।
व्रणाः कृच्छ्रेण सिध्यन्ति येषाञ्च स्युर्व्रणे व्रणाः ॥ १७ ॥

व्याधिविशेषसम्बन्धेनापि व्रणस्य कृच्छ्रसाध्यत्वमाह कुष्ठिनामित्यादि । विषजुष्टानामिति दूषीविषार्त्तानाम् । १७

नैव सिध्यन्ति वीसर्प-ज्वरातीसार-कासिनाम् ।
पिपासूनामनिद्राणां श्वासिनामविपाकिनाम् ॥ १८ ॥
भिन्ने शिरःकपाले वा मस्तुलुङ्गस्य दर्शने ।
स्नायुक्लेदाच्छिराच्छेदाद् गाम्भीर्यात् कृमिभक्षणात् ॥ १९ ॥
अस्थिभेदात् सशल्यत्वात् सविषत्वादतर्कितात् ।
मिथ्याबन्धादतिस्नेहाद् रौक्ष्याद्रोमातिघट्टनात् ॥ २० ॥

क्षोभादशुद्धकोष्ठत्वात् सौहित्यादतिकर्शनात् ।
मद्यपानाद्दिवास्वापाद् व्यवायाद्रात्रिजागरात् ।
व्रणो मिथ्योपचाराच्च नैव साध्योऽपि रोहति ॥ २१ ॥

असाध्यलक्षणमाह नैव सिध्यन्तीत्यादि । अतर्कणं व्रणवर्जनीयस्य निषेधः । १८—२१

कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः ।
स्थिराश्चिपिटिकावन्तो रोहतीति तमादिशेत् ॥ २२ ॥

कपोतवर्णप्रतिमा इति पाण्डुधूसराः । चिपिटिका मांसाङ्कुरः । २२

अथात्र शोफावस्थायां यथासन्नं विशोधनम् ।
योऽयं शोफो हि शुद्धानां व्रणश्चाशु प्रशाम्यति ॥ २३ ॥
कुर्याच्छीतोपचारन्तु शोफावस्थस्य सन्ततम् ।
दोषाग्निरग्निवत्तेन प्रयाति सहसा शमम् ॥ २४ ॥
शोफे व्रणे च कठिने विवर्णे वेदनान्विते ।
विषयुक्ते विशेषेण जलजाद्यैर्हरेदसृक् (१) ॥ २५ ॥
दुष्टास्रेऽपगते सद्यः शोफरागरुजां शमः ।
हृते हृते च रुधिरे सुशीतैः स्पर्शवीर्ययोः ॥ २६ ॥
सुश्लक्ष्णैस्तदहःपिष्टैः क्षीरेक्षुस्वरसद्रवैः ॥
शतधौतघृतोपेतैर्मुहुरन्यैरशोषिभिः ।
प्रतिलोमं हितो लेपः सेकाभ्यङ्गाश्च तत् कृताः ॥ २७ ॥
न्यग्रोधोदुम्बराश्वत्थ प्लक्ष-वेतस-वल्कलैः ।
प्रदेहो भूरिसर्पिर्भिः शोफनिर्वापणः परम् ॥ २८ ॥

अथेत्यादिना व्रणचिकित्सामाह । यथासन्नमिति ऊर्ध्वभागस्थं वमनैः अधोभागस्थं विरेकेणेत्यर्थः । जलजो जलौकाः आद्यशब्दात् शृङ्गादीनां ग्रहणम् । अविशोषिभिरिति एतच्च पीडनं विहाय बोध्यम् । पीडने विशोषिण एव लेपस्य युक्तत्वात् । प्रतिलोममिति लोमाभिमुखं प्रतिलोमलेपदान प्रयोजनञ्च सुश्रुतेनोक्तं यथा—"प्रतिलोम मालिम्पेन्नानुलोमम् । प्रतिलोमे हि सम्यगौषधमवतिष्ठते

(१) जलौकाद्यै रिति वा पाठः ।

अनुप्रविशति च लोमकूपैः स्वेदवाहिभिः सिरामुखैर्वीर्य्यम्" इति । (सू॰ १८ अ॰) सेकाभ्यङ्गाश्च तत् कृता इति शीतलस्पर्शवीर्य्यद्रव्यकृताः सेकाभ्यङ्गाश्च हिता इत्यर्थः । शोफनिर्व्वापण इति शोफप्रशमनः । २३–२८

> वातोल्बणानां स्तब्धानां कठिनानां महारुजाम् ।
> स्रुतास्रृजाञ्च शोफानां व्रणानामपि चेदृशाम् ॥ २९
> आनूपवेसवाराद्यैः स्वेदः, सांमास्तिलाः पुनः ।
> भृष्टा निर्वापिताः क्षीरे तत्पिष्टाद्दाहरुग्धराः ॥ ३० ॥

वातोल्बणानामित्यादिना स्वेदरूपं विम्लापनमाह । शोफानामिति व्रणपूर्व्वरूपशोथानां । व्रणानामपीति व्रणशोथा एव भिन्नाः सन्तो व्रणा इत्युच्यन्ते ।२९।३०

> स्थिरान् मन्दरुजः शोफान् स्नेहैर्वातकफापहैः ।
> अभ्यज्य स्वेदयित्वा च वेणुनाड्या शनैः शनैः ।
> विम्लापनार्थं मृद्नीयात् तलेनाङ्गुष्ठकेन वा ॥ ३१ ॥
> यव-गोधूम-मुद्गैश्च सिद्धपिष्टैः प्रलेपयेत् ।

शोथ विशेषे विम्लापन विशेष माह स्थिरानित्यादि । वेणुनाड्येति वेणुदण्डेन । विम्लापनार्थमिति शोथविलयनार्थम् । तलेनेति करतलेन । ३१।३२—

> विलीयते स चेन्नैवं ततस्तमुपनाहयेत् ॥ ३२ ॥
> अविदग्धस्तथा शान्तिं विदग्धः पाकमश्नुते ।

विलीयत इत्यादि । स इति व्रणशोथः । एवमिति विम्लापनाद्येनोपक्रमेण । सोष्णबहल-सबन्धलेपस्य उपनाह इति संज्ञा । उपनाहस्य फलमाह अविदग्ध-इत्यादि । —३२।३३—

> सकोलतिलवल्लोमा दध्याम्ला सक्तुपिण्डिका ॥ ३३ ॥
> सकिण्वकुष्ठलवणा कोष्णा शस्तोपनाहने ।

तमेवोपनाह माह सकोलेत्यादि । किण्वं सुराबीजम् । — ३३।३४ —

> सुपक्वे पिण्डिते शोफे पीडनैरुपपीडिते ॥ ३४ ॥
> दारणं दारणार्हस्य सुकुमारस्य चेष्यते ।

दारणाख्यस्योपक्रमस्य विषय माह सुपक्व इत्यादि । पिण्डिते इति एकत्र

पिण्डीभूते । पीडनैरिति वक्ष्यमाण कलायादिभिः । दारणार्हस्येति मर्म्मणि जातस्य सुकुमारस्येति बालवृद्धादेः । ३४।३५—

> गुग्गुल्वतसि-गोदन्त-स्वर्णक्षीरी-कपोतविट् ।
> क्षारौषधानि क्षाराश्च पक्वशोफविदारणम् ॥ ३५ ॥

तान्येव दारणद्रव्याण्याह गुग्गुल्वित्यादि । क्षारौषधानीति घण्टापाटल्यादीनि । क्षार इति (क्षार) तन्त्र व्याहृतः । —३५

> पूयगर्भानणुद्वारान् सोत्सङ्गान्मर्मगानपि ।
> निःस्नेहैः पीडनद्रव्यैः समन्तात् प्रतिपीडयेत् ॥ ३६ ॥

पीडनविषयमाह पूयगर्भानित्यादि । निःस्नेहैरिति स्नेहदानेन हि प्रलेपो न शुष्यतीति व्रणपीडनं न स्यादिति भावः । परिपीडयेदिति पीडनद्रव्येण लिम्पेत् । ३६

> शुष्यन्तं समुपेक्षेत प्रलेपं पीडनं प्रति ।
> न मुखे चैनमालिम्पेत् तथा दोषः प्रसिच्यते ॥ ३७ ॥

शुष्यन्तमित्यादि । पीडनं परिपीडनमुद्दिश्य यः प्रलेपः तं शुष्यन्तं समुपेक्षेत । यावच्छुष्कतां याति तावन्न दूरीकुर्य्यादित्यर्थः । यतः पीडनलेपः स एव भवति यः शुष्कः सन् व्रणमुखं पीडयित्वा पूयं स्रावयति । तेन शोषपर्य्यन्तमेव पीडन-लेपं स्थापयेदिति भावः । एनमिति व्रणं । व्रणमुखे लेपदानस्य फलमाह । तथेत्यादि । दोष इति पूयः । ३७

> कलाय-यव-गोधूम-माष-मुद्ग-हरेणवः ।
> द्रव्याणां पिच्छिलानाञ्च त्वङ्मूलानि प्रपीडनम् ॥ ३८ ॥

पीडन द्रव्याण्याह कलायेत्यादि । पिच्छिलानामिति शेलुशाल्मली-प्रभृतीनाम् । ३८

> सप्तसु क्षालनाद्येषु सुरसारग्वधादिकौ ।
> भृशं दुष्टे व्रणे योज्यौ मेहकुष्ठव्रणेषु च ॥ ३९ ॥

सप्तसु क्षालनाद्येष्विति । क्षालनालेप-घृत-तैल-रसक्रिया-चूर्ण-वर्त्तिष्वित्यर्थः । सुरसारग्वधादिकाविति । सुरसादिगण मारग्वधादिगणश्चेत्यर्थः । ३९

अथवा क्षालनः क्वाथः पटोलीनिम्बपत्रजः ।
अविशुद्धे, विशुद्धे तु न्यग्रोधादित्वगुद्भवः ॥ ४० ॥

अथवेत्यादि । पटोलीपत्रं पटोलपत्रमेव । अविशुद्ध इतिच्छेदः । न्यग्रोधादिगणस्तस्य त्वगुद्भवः क्वाथः । ४०

पटोली-तिल-यष्ट्याह्व-त्रिवृद्दन्ती-निशाद्वयम् ।
निम्बपत्राणि चालेपः सपटुर्व्रणशोधनः ॥ ४१ ॥

पटोलीत्यादौ सपटुः ससैन्धवः । ४१

व्रणान् विशोधयेद् वर्त्या सूक्ष्मास्यान् सन्धिमर्मगान् ।
कृतया त्रिवृता-दन्ती-लाङ्गली-मधु-सैन्धवैः ॥ ४२ ॥

व्रणानित्यादौ कृतयेत्यत्र अभयेति पाठः क्वचिद् दृश्यते । ४२

वाताभिभूतान् सास्रावान् धूपयेदुग्रवेदनान् ।
यवाज्य-भूर्ज-मदन-श्रीवेष्टक-सुराह्वयैः ॥ ४३ ॥
निर्वापयेद् भृशं शीतैः पित्तरक्तविषोल्बणान् ।

धूपविषयाभिधानपूर्वकं धूपमाह । वाताभिभूतानित्यादि । सास्रावानित्यल्पस्रावान् । भूर्जो भूर्जग्रन्थिः । मदनः सिक्थकः । श्रीवेष्टको नवनीतखोटिः । निर्वापयेदिति शमयेत् । ४३।४४—

शुष्काल्पमांसे गम्भीरे व्रण उत्सादनं हितम् ॥ ४४ ॥
न्यग्रोध-पद्मकादिभ्यामश्वगन्धा बला तिलैः ।
अद्यान्मांसादमांसानि विधिनोपहितानि च ॥ ४५ ॥
मांसं मांसादमांसेन वर्द्धते शुद्धचेतसः ।

उत्सादनविषयाभिधानपूर्वकमुत्सादनद्रव्याण्याह । शुष्केत्यादि । उत्सादनं निम्नव्रणोत्थापनम् । न्यग्रोधादिगणपद्मकादिगणाभ्यामित्यर्थः । मांसादाः श्येनादयः । —४४।४६—

उत्सन्नमृदुमांसानां व्रणानामवसादनम् ॥ ४६ ॥
जाती-मुकुल-कासीस-मनोह्वाल-पुराग्निकैः ।

अवसादनाख्यमुपक्रममाह । उत्सन्नेत्यादि । उद्गतमृदुमांसानामित्यर्थः । अवसादनमिति उत्सन्नव्रणमांसक्षपकरम् । किन्तदवसादनद्रव्यमित्याह जातीत्यादि । कासीसं धातु कासीसम् । अग्निको लाङ्गलिका । —४६।४७—

उत्सन्नमांसान् कठिनान् कण्डूयुक्तांश्चिरोत्थितान् ।
व्रणान् सुदुःखशोध्यांश्च शोधयेत् क्षारकर्मणा ॥ ४७ ॥

क्षार विषयमाह उत्सन्नेत्यादि । (उत्सन्नमांसान्) उद्गतमांसान् । ४७

स्रवन्तोऽश्मरिजा मूत्रं ये चान्ये रक्तवाहिनः ।
छिन्नाश्च सन्धयो येषां यथोक्तैर्ये च शोधनैः ॥ ४८ ॥
शोध्यमाना न शुध्यन्ति शोध्याः स्युस्तेऽग्निकर्मणा ॥

अग्निकर्म्मविषयान् व्रणानाह स्रवन्त इत्यादि । अश्मरिजा इत्यत्र व्रणा इति शेषः । मूत्रं स्रवन्त इत्यन्वयः । ४८।४९—

शुद्धानां रोपणं योज्यमुत्सादाय यदीरितम् ॥ ४९ ॥
अश्वगन्धारुहारोध्रं कट्फलं मधुयष्टिका ।
समङ्गा-धातकीपुष्पं परमं व्रणरोपणम् ॥ ५० ॥

रोपणमाह शुद्धानामित्यादि । अश्वगन्धेत्यादौ रुहा दुर्वा चर्म्मकसेत्यन्ये । —४९।५०

अपेतपूतिमांसानां मांसस्थानामरोहताम् ।
कल्कं संरोहणं कुर्यात् तिलानां मधुकान्वितम् ॥ ५१ ॥

अपेतेत्यादौ सुश्रुते 'तिलजो मधुसंयुत' इति दर्शनात् मधुकान्वितमित्यत्र मधुनान्वितमिति केचित् पठन्ति । ५१

स्निग्धोष्णतिक्तमधुरकषायत्वैः स सर्वजित् ।

तिलकल्कस्य सर्वदोषहरत्वं सहेतुकमाह । स्निग्धोष्णेत्यादि । स इति तिलकल्कः । सर्वजिदिति सर्वदोषजित् । एतच्च तिलस्य व्रणे सर्व्वदोषहरत्वं प्रलेपविषयैव न तु भक्षणविषया । अतएव सुश्रुते व्रणालेपन एव पथ्य इत्युक्ता व्रणे तिलानामालेपन एव पथ्यत्व मस्य व्यवहारेण पुनरपथ्यत्वमेवेति दर्शितम् । अनेनैवाभिप्रायेण व्रणविरुद्धवर्गे नवधान्यादौ तिलः पठितः । सेयं स्वभावोपजनितैवाधारशक्तिरस्य । यदुक्तं यत्र कुर्व्वन्ति "तदधिकरणम"इति । धान्याम्बुनो बहिरन्तःप्रयोगे दाहहरणकरणत्ववदिति । ५२ —

सक्षौद्रनिम्बपत्राभ्यां युक्तः संशोधनं परम् ॥ ५२ ॥
पूर्वाभ्यां सर्पिषा चासौ युक्तः स्यादाशुरोपणः ।

तस्यैव तिलकल्कस्य मधुनिम्बपत्रयोगेनातिशयेन व्रणशोधनत्वं, तथा मधुनिम्ब-पत्रघृतयोगेनाशु रोपणत्वञ्चाह सक्षौद्रेत्यादि । स इति तिलकल्कः । पूर्व्वाभ्यामिति क्षौद्रनिम्बपत्राभ्याम् । —५२।५३—

तिलवद्यवकल्कन्तु केचिदिच्छन्ति तद्विदः ॥ ५३ ॥
उक्त तिलकल्कविधिं यवकल्केऽप्यतिदिशति । तिलवदित्यादि । —५३

साम्रपित्तविषागन्तुगम्भीरान् सोष्मणो व्रणान् ।
क्षीररोपणभैषज्यशृतेनाज्येन रोपयेत् ॥ ५४ ॥
रोपणौषधसिद्धेन तैलेन कफवातजान् ।

व्रणविशेषे रोपणविशेषमाह साम्रपित्तेत्यादि । क्षीरं द्रवस्थाने रोपणौषधञ्च कल्कः । रोपणौषधसिद्धेनेति कल्क-कषाय विधयेति भावः । ५४।५५—

काक्षी-रोध्राभया-सर्ज-सिन्दूराञ्जन-तुत्थकम् ॥ ५५ ॥
चूर्णितं तैलमदनैर्युक्तं रोपणमुत्तमम् ।

काक्षीत्यादि । काक्षी सौराष्ट्रीमृत । काच्छीति पाठे स एवार्थः । मदनं सिक्थकम् । —५५।५६—

समानां स्थिरमांसानां त्वक्स्थानां चूर्ण इष्यते ॥ ५६ ॥
ये व्रणा श्चूर्णेन रोपणीयास्तानाह समानामित्यादि । चूर्ण इत्यत्रापि रोपण इति सम्बध्यते । सुश्रुतेऽप्युक्तम्
"समानां स्थिर मांसानां त्वक्स्थानां चूर्णरोपणम्" इति (चि १ अ) । —५६

ककुभोदुम्बराश्वत्थ-जम्बू-कट्फल-रोध्रजैः ।
त्वचमाशु निगृह्णन्ति त्वक्चूर्णैश्चूर्णिता व्रणाः ॥ ५७ ॥

ककुभेत्यादिना त्वग्जनकं व्रणावचूर्णनमाह त्वचमाशुनिगृह्णन्तीति । निश्चयेन गृह्णन्ति उत्पादयन्तीत्यर्थः । ५७

लाक्षा-मनोह्वा-मञ्जिष्ठा-हरिताल-निशाद्वयैः ।
प्रलेपः सघृतक्षौद्रस्त्वग्विशुद्धिकरः परम् ॥ ५८ ॥

लाक्षेत्यादिना त्वक्सवर्णताजनकमुपक्रममाह । परमित्यतिशयेन । ५८

कालीयकलताम्रास्थिहेमकालारसोत्तमैः ।
लेपः सगोमयरसः सवर्णकरणः परम् ॥ ५९ ॥

कालीयकेत्यादौ लता प्रियङ्गुः । हेम नागकेशरचूर्णम् । काला मञ्जिष्ठा । रसोत्तमः पारदः घृतमित्यन्ये । गोमयरसः पेषणार्थम् । ५९

दग्धो वारणदन्तोऽन्तर्धूमं तैलं रसाञ्जनम् ।
रोमसञ्जननो लेपः—

लोमजननमुपक्रममाह दग्ध इत्यादि । अन्तर्धूमं यथा स्यात्तथा दग्धो वारण-दन्त इत्यन्वयः । ६०—

तद्वत्तैलपरिप्लुता ॥ ६० ॥
चतुष्पाच्चर्मरोमास्थित्वक् शृङ्गखुरजा मषी ।

तद्वदित्यादि योगान्तरम् । तद्वदिति लोमसञ्जननीत्यर्थः । —६०।६१—

व्रणिनः शस्त्रकर्मोक्तं पथ्यापथ्यान्नमादिशेत् ॥ ६१ ॥

व्रणिन इत्यादि । शस्त्रकर्मोक्तमिति शस्त्रकर्माध्याये सूत्रस्थाने (२६ अ) उक्तम् । —६१

द्वे पञ्चमूले वर्गश्च वातघ्नो वातिके हितः ।
न्यग्रोध-पद्मकाद्यौ तु तद्वत्पित्तप्रदूषिते ।
आरग्वधादिः श्लेष्मघ्नः कफे मिश्रस्तु मिश्रके ॥ ६२ ॥

द्वे पञ्चमूले इति दशमूलम् । वातघ्नो वर्गो भद्रदार्वादिः । न्यग्रोध-पद्म-काद्याविति न्यग्रोधादिपद्मकादौ वर्गौ तद्वदिति हिताविल्यर्थः । श्लेष्मघ्नो वर्गो वत्सकादिः । ६२

एभिः प्रक्षालनालेपघृततैलरसक्रियाः ।
चूर्णो वर्तिश्च संयोज्या व्रणे सप्त यथायथम् ॥ ६३ ॥

एते चौषधवर्गा येन येन प्रकारेणोपयोज्यास्तमाह । एभिरित्यादि । ६३

जाती-निम्ब-पटोलपत्र-कटुका-दार्वी-निशा सारिवा-
मञ्जिष्ठाभय-सिक्थ-तुत्थ-मधुकैर्नक्ताह्वबीजान्वितैः।
सर्पिःसाध्यमनेन सूक्ष्मवदना मर्माश्रिताः क्लेदिनो
गम्भीराः सरुजो व्रणाः सगतयः शुध्यन्ति रोहन्ति च॥ ६४॥

इति श्रीमद् वाग्भटविरचितायामष्टाङ्गहृदय संहितायाम्
उत्तरे तन्त्रे व्रणप्रतिषेधो नाम पञ्चविंशोऽध्यायः।

जातीत्यादि। पत्रं जात्यादीनां त्रयाणां, दार्व्वी दारुहरिद्रा, अभयमूशीरं नक्ताह्वबीजम् करञ्जबीजं गतिर्नाड़ी। ६४

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
पञ्चविंशोऽध्यायः।

षड्विंशोऽध्यायः।

अथातः सद्योव्रणप्रतिषेधं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः।
सद्योव्रणा ये सहसा सम्भवन्त्यभिघाततः।
अनन्तैरपि तैरङ्गमुच्यते तुष्ममष्टधा॥ १॥

शारीर व्रणप्रतिषेधमभिधाय व्रणत्वसाजात्यात् सद्योव्रणप्रतिषेधमाह अथात—इत्यादि। १

घृष्टावकृत्त-विच्छिन्न-प्रविलम्बित-पातितम्।
विद्धं भिन्नं विदलितम्

तस्यैवाष्टविधत्वं विवृणोति घृष्टेत्यादि। २—

तत्र घृष्टं लसीकया॥ २॥
रक्तक्लेशेन वा युक्तं सप्लोषम्—

घृष्टलक्षणमाह तत्रेत्यादि। घृष्टमिति कर्कशपत्रादिना घर्षणादल्पविदीर्णत्वग् भागम्। अतएवानवगाढ़त्वात् लसीकया रक्तक्लेशेन वा युक्तम्। सप्लोषमिति ईषद्दाहयुक्तम्। —२—३—

छेदनात् त्वचाम् (१)।
अवगाढं ततः कृत्तम्—

छेदनादित्यादि कृत्तलक्षणम्। त्वचामिति सप्तानां त्वचां छेदनात् कृत्तम्। अतएव ततो घृष्टादवगाढम्। —३—

विच्छिन्नं स्यात्ततोऽपि च॥ ३॥

विच्छिन्न लक्षणमाह विच्छिन्नमित्यादि। तत इति कृत्तादपि अवगाढं यत्तद् विच्छिन्नं स्यात्। तेन किञ्चित्तङ्मांसच्छेदाद् विच्छिन्नमित्यर्थः। —३

(१) सर्वेदिति वा पाठः।

प्रविलम्बि सशेषास्थि

प्रविलम्बिलक्षणमाह प्रविलम्बि सशेषास्थीति। किञ्चिदस्थिशेषयुक्तं भूत्वा यदङ्गं लम्बनशीलं तत् प्रविलम्बि। ४—

पातितं पतितं तनोः।

पातित लक्षणमाह पातितं पतितं तनोरिति। तनोः सकाशाद् यदङ्गं पतितं तत्पातितसंज्ञम्। —४—

सूक्ष्मास्य शल्यविद्धन्तुविद्धं कोष्ठविवर्जितम् ॥ ४ ॥

विद्धलक्षणमाह सूक्ष्मास्येत्यादि। कोष्ठविवर्जितमिति। कोष्ठमामाशयादि तद्व्यतिरिक्ते प्रदेशे यदङ्गं सूक्ष्ममुखशल्येन विद्धं भवति तद्विद्धमुच्यते इत्यर्थः। —४

भिन्नमन्यद्—

भिन्न लक्षणमाह भिन्नमन्यदिति। कोष्ठविवर्जित प्रदेशादन्यदङ्गं कोष्ठमेवेत्यर्थः। तत् कोष्ठं यदि विद्धं भवति तदा भिन्नमुच्यते। ५—

विदलितं मज्जरक्तपरिप्लुतम्।
प्रहारपीडनोत्पेषात् सहास्थ्ना पृथुतां गतम् ॥ ५ ॥

विदलितमित्यादिना पृथुतां गतमित्यन्तेन विदलित लक्षणमाह। प्रहारो मुद्गरादिना। ताभ्यमुत्पेशः सञ्चूर्णनं सत् यदङ्गं पृथुतां गतं चिपिटतां गतम् अतएव मज्जरक्ताभ्यां परिप्लुतं व्याप्तं विदलितमित्युच्यते। —५

सद्यः सद्योव्रणं सिञ्चेदथ यष्ट्याह्वसर्पिषा।
तीव्रव्यथं कवोष्णेन बलातैलेन वा पुनः ॥ ६ ॥

सद्योव्रणस्य सामान्यं चिकित्सितमाह सद्य इत्यादि। सद्य इति सप्ताहाभ्यन्तरे। तीव्रव्यथं सद्योव्रणं यष्ट्याह्वकल्कसिद्धेन सर्पिषा सिञ्चेत्। यदि पुनस्त्वरया यथाविधि घृतमिदं पक्तुं न शक्यते, तदा घृतं पलद्वयं जलपलचतुष्टयेन यष्टीमधुकर्षद्वयेन किञ्चित् पक्त्वावतार्य्य सिञ्चेदित्यप्याहुः। ६

क्षतोष्मणो निग्रहार्थं तत्कालं विसृतस्य च।
कषायशीतमधुरस्निग्धा लेपादयो हिताः ॥ ७ ॥

सद्योव्रणेष्वायतेषु सन्धानार्थं विशेषतः। (१)
मधुसर्पिश्च युञ्जीत पित्तघ्नाश्च हिमाः क्रियाः ॥ ८ ॥
ससंरम्भेषु कर्त्तव्यमूर्ध्वं चाधश्च शोधनम्।
उपवासो हितं भुक्तं प्रततं रक्तमोक्षणम् ॥ ९ ॥

क्षतोष्मण इत्यादौ कषाय इति रसतः। आयतेष्विति विस्तृतेषु। ससंरम्भेषु सशोथेषु। उपवास इत्यवस्थावशात्। हितं भक्तमिति हित आहारः। स च शस्त्रकर्म्मविधौ (२६ अं) सूत्रस्थाने उक्तः। ७—९

घृष्टे विदलिते चैव सुतरामिष्यते विधिः।
तयोर्ह्यल्पं स्रवत्यस्रं पाकस्तेनाशु जायते ॥ १० ॥
अत्यर्थमस्रं स्रवति प्रायशोऽन्यत्र विक्षते।
ततो रक्तक्षयाद्वायौ कुपितेऽतिरुजाकरे ॥ ११ ॥
स्नेह-पान-परीषेक-स्वेद-लेपोपनाहनम्।
स्नेह-वस्तिञ्च कुर्वीत वातघ्नौषधसाधितम् ॥ १२ ॥

घृष्ट इत्यादौ एष विधिरिति रक्तमोक्षणरूपः। अत्रैव हेतुमाह तयोरित्यादि। तयोरिति घृष्टविदलितयोः। तेनेति अभिघात कुपितस्य रक्तस्य सम्यगस्रावेण। अन्यत्रेति घृष्ट विदलित व्यतिरिक्ते क्षते। स्नेहपानेत्यत्र स्नेह शब्दस्य पानादिषु प्रत्येकमन्वयः। अन्येतु सुश्रुत दर्शनात् स्वेद शब्देन धान्यस्वेद माहुः। १०—१२

इति साप्ताहिकः प्रोक्तः सद्योव्रणहितो विधिः।
सप्ताहाद्गतवेगे तु पूर्वोक्तं विधिमाचरेत् ॥ १३ ॥
प्रायः सामान्यकर्मेदं वक्ष्यते तु पृथक् पृथक्।

साप्ताहिकं सद्योव्रणचिकित्सितमुपसंहरति इतीत्यादि। सप्ताहादिति सप्ताहानन्तरं पूर्वोक्तमिति व्रणप्रतिषेधोक्तं विधिं शारीरव्रण चिकित्सितम् आचरेदित्यर्थः। गतवेग इति गतो दूरीभूतः तत्कालोद्भूत क्षतोष्मवेगो यत्र व्रणे तस्मिन्। १३।१४—

(१) घाततेषु इति वा पाठः।

घृष्टे रुजं निगृह्याशु व्रणे चूर्णानि योजयेत् ॥ १४ ॥

घृष्ट इत्यादौ रुजं निगृह्येति घृतादिसेकादिभिः। चूर्णानीति पञ्चवल्कलादि चूर्णानि।—१४

कल्कादीन्यवकृत्ते तु

अवकृत्ते तु कल्कादीनीत्यादिशब्दात् कषायादीनां ग्रहणम्। १५—

विच्छिन्नप्रविलम्बिनोः।
सीवनं विधिनोक्तेन बन्धनञ्चावपीडनम् ॥ १५ ॥

विधिनोक्तेन बन्धनञ्चावपीड़नमिति सूत्रस्थानोक्त विधिना बन्धनम्। अवपीड़नञ्च पीड़येदित्यादिना वक्ष्यमाणम्।—१५

असाध्यं स्फुटितं नेत्रमदीर्णं लम्बते तु यत्।
सन्निवेश्य यथास्थानमव्याविद्धशिरं भिषक् ॥१६ ॥
पीडयेत् पाणिना पद्मपलाशान्तरितेन तत् ॥
ततोऽस्य सेचने नस्ये तर्पणे च हितं हविः ॥ १७ ॥
विपक्कमाजं यष्ट्याह्वजीवकर्षभकोत्पलैः।
सपयस्कैः परं तद्धि सर्वव्रत्राभिघातजित् ॥ १८ ॥

प्रविलम्बिनेत्रं द्विविधं भवति स्फुटितास्फुटितभेदेन। तत्र यत् स्फुटितं नेत्रं तदसाध्यमेव। अदीर्णमित्यस्फुटितं यन्नेत्रं लम्बते तन्नेत्रं अव्याविद्धशिरम् अकुटिलशिरं यथा स्यात्तथा यथास्थानं सन्निवेश्य पद्मपत्राच्छादितेन पाणिना पीड़येत्। यष्ट्याह्वादीनां कल्कः पय इति दुग्धं अजाया एव सान्निध्यात्। तच्च घृताच्चतुर्गुणम्। घृतन्तु अनुक्तमानत्वात् प्रस्थमेव। सुश्रुतेऽप्युक्तम्।

"आजं घृतं क्षीरपात्रं मधुकञ्चोत्पलानि च।
जीवकर्षभकौ चापि पिष्ट्वा सर्पिर्विपाचयेत्।
सर्वनेत्राभिघातेषु सर्पिरेतत् प्रशस्यते" इति। (चि २ अं) १६—१८

गलपीड़ावसन्नेऽक्षिणि वमनोत्क्लेशनक्षवाः।
प्राणायामोऽथवा कार्यः क्रिया च क्षतनेत्रवत् ॥ १९ ॥

गलेत्यादि। गलपीड़नेन यदा अक्षि अवसन्नं वहिर्निगतं भवति तत्र वमनादयः कार्य्याः। १९

कर्णे स्थानाच्च्युते स्यूते स्रोतस्तैलेन पूरयेत् ॥ २० ॥

कर्ण इत्यादि। कर्णच्छेदादिना कर्णे स्वस्थानात् च्युते पतितं कर्णं यथास्थानं स्थापयित्वा सीव्येदिति शेषः। तस्मिन् कर्णे स्यूते सति कर्णस्रोतः कर्णकुहरं तैलेन पूरयेत्। २०

कृकाटिकायां छिन्नायां निर्गच्छत्यपि मारुते।
समं निवेश्य बध्नीयात् स्यूत्वा शीघ्रं निरन्तरम् ॥ २१ ॥
आजेन सर्पिषा चात्र परिषेकः प्रशस्यते।
उत्तानोऽन्नानि भुञ्जीत शयीत च सुयन्त्रितः ॥ २२ ॥

कृकाटिकायामित्यादि। कृकाटिका ग्रीवा। निरन्तर माजेन सर्पिषा परिषेक इत्यन्वयः। सुयन्त्रित इत्यनेन यथा ग्रीवासञ्चालनं न स्यात्तथा कार्य्यमिति दर्शयति। २१।२२

घातं शाखासु तिर्यक्स्थं गात्रे सम्यङ् निवेशिते।
स्यूत्वा वेल्लितबन्धेन बध्नीयाद् घनवाससा ॥ २३ ॥
चर्मणा गोष्फणाबन्धः कार्यश्चांसगते व्रणे।

घातमित्यादौ घातमिति खड्गादिप्रहारम्। वेल्लितादयो बन्धाः शस्त्रकर्म्मविधावुक्ताः (सू २६ अं)। २३।२४—

पादौ विलम्बिमुष्कस्य प्रोक्ष्य नेत्रे च वारिणा।
प्रवेश्य वृषणौ सीव्येत् सेवन्या तुन्नसंज्ञया ॥ २४ ॥
कार्यश्च गोष्फणाबन्धः कट्यामावेश्य पट्टकम्।
स्नेहसेकं न कुर्वीत तत्र क्लिद्यति हि व्रणः ॥ २५ ॥
कालानुसार्यगुर्वेला-जाती-चन्दन-पर्प्पटैः।
शिलादार्व्यमृतातुत्थैः सिद्धं तैलञ्च रोपणम् ॥ २६ ॥

पादावित्यादौ पादौ नेत्रे च वारिणा प्रोक्ष्येत्यन्वयः। विलम्बिमुष्कस्येति स्वस्थानात् स्खलितवृषणस्य सेवन्येति सहार्थे तृतीया। कट्यां पट्टकमावेश्येति घटोपरिधानविधया। तत्र स्नेहसेकं न कुर्व्वीतेत्यन्वयः। कालानुसारी तगर-

पादिका। पर्पटैरित्यत्र पद्मकैरिति पाठः क्वचित् क्वचित् सुश्रुतपुस्तके दृश्यते।—२४—२६

छिन्नां निःशेषतः शाखां दग्ध्वा तैलेन युक्तितः।
बध्नीयात् कोषबन्धेन ततो व्रणवदाचरेत् ॥ २७ ॥

छिन्नामित्यादि। निःशेषतश्छिन्नां शाखां तैलेन दग्ध्वा कोषबन्धाख्येन बन्धेन बध्नीयात्। शाखा शब्देनात्र हस्तौ पादौ चाभिधीयेते। २७

कार्या शल्याहृते विद्धे भङ्गाद्विदलिते क्रिया।

कार्य्येत्यादि। शल्याहृतेरिति शल्याहरणमुद्दिश्य या चिकित्सा सा विद्धे कार्य्या। भङ्गमुद्दिश्य या क्रिया वक्ष्यमाणा सा विदलिते कार्य्येत्यर्थः। २८—

शिरसोऽपहृते शल्ये वालवर्त्तिं प्रवेशयेत् ॥ २८ ॥
मस्तुलुङ्गस्रुते क्रुद्धो हन्यादेनं चलोऽन्यथा।
व्रणे रोहति चैकैकं शनैरपनयेत् कचम् ॥ २९ ॥
मस्तुलुङ्गस्रुतौ खादेन्मस्तिष्कानन्यजीवजान् ॥

शिरस इत्यादि। शिरसः सकाशात् शल्ये अपहृते सति मस्तुलुङ्ग—स्राव-निवारणार्थं शल्यकृते वर्त्मनि वालैः केशैः रचितां वर्त्तिं प्रवेशयेत्। अन्यथा यदि मस्तुलुङ्ग-स्राव-निवारणं न क्रियते तदा एनमातुरं मस्तुलुङ्गस्रावेण क्रुद्धश्चलो वायुर्हन्यते। व्रणे रोहतीत्यादि। यथा यथा व्रणो रोहति तथा तथा एकैकं कचं शनैरपनयेत्। अन्यजीवजानिति छागादिजान्।—२८—३०—

शल्ये हृतेऽङ्गादन्यस्मात् स्नेहवर्त्तिं निधापयेत् ॥ ३० ॥
दूरावगाढाः सूक्ष्मास्या ये व्रणाः स्नुतशोणिताः।
सेचयेच्चक्रतैलेन सूक्ष्मनेत्रार्पितेन तान् ॥ ३१ ॥

शल्ये हृते इत्यादि। अन्यस्मादङ्गात् शिरोव्यतिरिक्तादङ्गात् शल्ये अपहृते सति शल्यकृते वर्त्मनि स्नेहसंयुक्तां वर्त्तिं निधापयेत्। नतु वालवर्त्तिमित्यर्थः। दूरावगाढा इति अत्यर्थमवगाढाः। चक्रतैलं तत्कालचक्रोद्धृतमप्रदुष्टसर्षपतैलम्। अन्ये तु चक्रकाष्ठोद्भवं तैलमाहुः। नेत्रं नलिका।—३०—३१

भिन्ने कोष्ठेऽसृजापूर्णे मूर्च्छा हृत्पार्श्ववेदनाः।
ज्वरोदाहतृडाध्मानं भक्तस्यानभिनन्दनम् ॥ ३२ ॥
सङ्गोविरामूत्रमरुतां श्वासः स्वेदोऽक्षिरक्तताम्।
लोहगन्धित्वमास्यस्य स्याद् गात्रे च विगन्धता ॥ ३३ ॥

भिन्नाख्ये सद्योव्रणे यदा कोष्ठमसृक्पूर्णं भवति तदा यानि लक्षणानि भवन्ति तान्याह। भिन्न इत्यादि। ३२।३३

आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि।
आध्मानेनातिमात्रेण शूलेन च विशस्यते ॥ ३४ ॥
पक्वाशयस्थे रुधिरे सशूलं गौरवं भवेत्।
नाभेरधस्ताच्छीतत्वं खेभ्यो रक्तस्य चागमः ॥ ३५ ॥

सामान्येनासृक्पूर्णकोष्ठलक्षणानि अभिधाय कोष्ठावयवभेदेनापि तल्लक्षणमाह आमाशयस्थ इत्यादि। विशस्यत इति पीड्यते। खेभ्य इति गुदमेढ्रेभ्यः। ३४।३५

अभिन्नोऽप्याशयः सूक्ष्मैः स्रोतोभिरभिपूर्य्यते।
असृजा स्यन्दमानेन पार्श्वे मूत्रेण वस्तिवत् ॥ ३६ ॥

आमाशयादि भेदाद्विनाप्यसृक्-पूर्ण-कोष्ठता भवतीत्याह। अभिन्नोऽपीत्यादि। भेदं न प्राप्तोऽप्याशयः इति कोष्ठं सूक्ष्मैः स्रोतोभिः स्यन्दमानेनासृजा पूर्य्यते। पार्श्वे मूत्रेण वस्तिवदिति सूक्ष्मैः स्रोतोभिः वस्तिपार्श्वे स्यन्दमानेन मूत्रेण वस्तिरिव। ३६

तत्रान्तर्लोहितं शीतपादोच्छ्वासकराननम्।
रक्ताक्षं पाण्डुवदनमानद्धञ्च विवर्जयेत् ॥ ३७ ॥

असाध्य कोष्ठभेद लक्षणमाह तत्रेत्यादि। तत्रेति कोष्ठे। अन्तर्लोहितमिति अभ्यन्तरस्थितरक्तं अनिःसृतरक्तमिति यावत्। आनद्धमित्यानाहवन्तम्। ३७

आमाशयस्थे वमनं हितं पक्वाशयाश्रये।
विरेचनं निरूहञ्च निःस्नेहोष्णैर्विशोधनैः ॥ ३८ ॥
यव-कोल-कुलत्थानां रसैः स्नेहविवर्जितैः।
भुञ्जीतान्नं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥ ३९ ॥

अतिनिःस्रुतरक्तस्तु भिन्नकोष्ठः पिबेदसृक् ।

आमाशयस्थ इत्यादौ रक्त इति शेषः। पक्वाशयस्थं रक्तं विरेचनेन सुखं निर्हर्तुं शक्यते इत्यभिप्रायेण विरेचनविधानम् नतु पित्तप्रत्यनीकतया। पक्वाशयस्य वातस्थानत्वात्। भिन्नकोष्ठ इति विद्धकोष्ठः। ३८-३९

क्लिष्टच्छिन्नान्त्रभेदेन कोष्ठभेदो द्विधा स्मृतः ॥ ४० ॥
मूर्च्छादयोऽल्पाः प्रथमे द्वितीये त्वतिबाधकाः।
क्लिष्टान्त्रः संशयी देही छिन्नान्त्रो नैव जीवति ॥ ४१ ॥
यथास्वं मार्गमापन्ना यस्य विण्मूत्रमारुताः।
व्युपद्रवः स भिन्नेऽपि कोष्ठे जीवत्यसंशयम् ॥ ४२ ॥
अभिन्नमन्त्रं निष्क्रान्तं प्रवेश्यं न त्वतोऽन्यथा।

साध्यासाध्य विभागार्थं कोष्ठभेदस्य द्वैविध्यमाह। क्लिष्टच्छिन्नान्त्रभेदेनेत्यादि। क्लिष्टान्त्रो व्याकुलितान्त्रः। प्रथमे इति क्लिष्टान्त्रे। द्वितीये इति छिन्नान्त्रे अतिबाधका अतिशयेन पीड़ाजनकाः। संशयीति कदाचित् कश्चिज्जीवति च। व्युपद्रव इति मूर्च्छाद्युपद्रवरहितः। नत्वतोऽन्यथेति भिन्नं न प्रवेश्यमित्यर्थः। ४०—४३—

उपङ्क्लिशिरोग्रस्तं तदप्येके वदन्ति तु ॥ ४३ ॥
प्रक्षाल्य पयसा दिग्धं तृणशोणितपांशुभिः।
प्रवेशयेत् कृत्तनखो घृतेनाक्तं शनैः शनैः ॥ ४४ ॥
क्षीरेणार्द्रीकृतं शुष्कं भूरिसर्पि परिप्लुतम्।
अङ्गुल्या प्रमृशेत् कण्ठं जलेनोद्वेजयेदपि ॥ ४५
तथान्त्राणि विशन्त्यन्तस्तत्कलां पीड़यन्ति च।

उपलिङ्गेत्यादि। भिन्न मन्त्रमपि उपलिङ्गशिरसा ग्रस्तं कवलितं प्रवेशयेदित्येके वदन्ति। उपलिङ्गः पिपीलिकाभेदो'डाही'ति ख्यातः। तृणशोणित-पांशुभिर्दिग्धं यदि भवति तदा पयसा प्रक्षाल्य घृतेनाक्तं कृत्वा शनैः शनैः प्रवेशयेत्। शुष्कं यदन्त्रं तत क्षीरेणार्द्रीकृतं भूरि सर्पिषा परिप्लुतञ्च कृत्वा प्रवेशयेत्।—४३—४६—

व्रणसौक्ष्म्याद्बहुत्वाद्वा कोष्ठमन्त्रमनाविशत् ॥ ४६ ॥
तत् प्रमाणेन जठरं पाटयित्वा प्रवेशयेत्।
यथास्थानं स्थिते सम्यगन्त्रे सीव्येदनुव्रणम् ॥ ४७ ॥

व्रणसौक्ष्म्यादित्यादि। व्रणावकाशस्याल्पत्वादन्त्रस्य च बहुत्वात् कोष्ठमनाविशदन्त्रं तत्प्रमाणेनान्त्रप्रमाणेन जठरं पाटयित्वा प्रवेशयेत्। —४६।४७

स्थानादपेतमादत्ते जीवितं गुंपितञ्च तत्।

स्थानादित्यादि। तदन्त्रं यदि स्वस्थानादपेतं भवति गुम्पितं व्याकुलितं च भवति तदा जीवितं आदत्ते। ४८—

वेष्टयित्वानुपट्टेन घृतेन परिषेचयेत् ॥ ४८ ॥
पाययेत्तं ततः कोष्णं चित्रातैलयुतं पयः।
मृदुक्रियार्थं शकृतो वायोश्चाधः प्रवृत्तये ॥ ४९ ॥

वेष्टयित्वेत्यादि। अन्विति सीवनानन्तरं पट्टेन धटिकया व्रणप्रदेशं वेष्टयित्वा घृतेन परिषेचयेत। चित्रातैलं दन्तीबीजोद्भवं तैलं (१) तदभावे दन्तीक्वाथ-कल्क-साधितं तैलमित्यप्याहुः। मृदुक्रियार्थमिति मृदुकरणार्थमित्यर्थः। - ४८।४९

अनुवर्तेत वर्षञ्च यथोक्तां व्रणयन्त्रणाम् ॥ ५० ॥

अनुवर्त्तेतेत्यादि। वर्षमिति संवत्सरं यावत् यथोक्तां व्रणयन्त्रणाम् अपथ्य-परिहार-पथ्योपादानरूपामनुवर्त्तेत सेवेतेत्यर्थः। ५०

उदरान्मेदसो वर्तिं निर्गतां भस्मना मृदा।
अवकीर्य कषायैर्वा श्लक्ष्णैर्मूलैस्ततः समम् ॥ ५१
दृढं बद्ध्वा च सूत्रेण वर्द्धयेत् कुशलो भिषक्।
तीक्ष्णेनाग्निप्रतप्तेन शस्त्रेण सकृदेव तु ॥ ५२ ॥
स्यादन्यथा रुगाटोपौ मृत्युर्वा छिद्यमानया।
सक्षौद्रे च व्रणे बद्धे सुजीर्णेऽन्ने घृतं पिबेत् ॥ ५३ ॥

(१) चित्रातैलमेरण्डतैलमित्यर्थः साधीयान्।

क्षीरं वा शर्करा-चित्रा-लाक्षा-गोक्षुरकैः शृतम् ।
कुम्भाह्वजित्सयष्ट्याह्वैः परं पूर्वोदितो विधिः ॥ ५४ ॥
मेदोग्रन्थ्युदितं तत्र तैलमभ्यञ्जने हितम् ।

अन्त्रनिर्गम चिकित्सामभिधाय मेदोवर्त्तिनिर्गम चिकित्सामाह उदरादित्यादि । कषायैरिति पञ्चवल्कलादिचूर्णैः । वर्द्धयेदिति छिन्द्यात् । वर्द्ध छेदनपूरणयोरित्यस्य रूपम् । सक्षौद्रे इति क्षौद्रेणाभ्यक्ते । परं पूर्वोदितो विधिरिति परमित्यनन्तरं पूर्वोदितः व्रणप्रतिषेधोक्तो विधिः कार्य्यः । मेदोग्रन्थ्युदितमिति मेदोग्रन्थौ वक्ष्यमाणम् । ५१–५५–

तालीसं पद्मकं मांसीहरेणुगुरुचन्दनम् ॥ ५५ ॥
हरिद्रे पद्मबीजानि सोशीरं मधुकं च तैः ।
पक्वं सद्योव्रणेषूक्तं तैलं रोपणमुत्तमम् ॥ ५६ ॥

तालीशमित्यादि । स्पष्टं ।—५५।५६

गुदप्रहाराभिहते पतिते विषमोच्चकैः ।
कार्यं वातास्रजित् तृप्तिमर्दनाभ्यञ्जनादिकम् ॥ ५७ ॥
विच्छिन्नदेहं मथितं क्षीणं मर्माहतं हतम् ।
वासयेत्तैलपूर्णायां द्रोण्यां मांसरसाशिनम् ॥ ५८ ॥

इति श्रीमद्वाग्भटविरचितायां अष्टाङ्गहृदयसंहितायामुत्तरे
तन्त्रे सद्योव्रण प्रतिषेधोनाम षड्विंशोऽध्यायः ।

गुदेत्यादि । गुदोऽनुचितो यः प्रहारः तेन व्यायाममल्लयुद्धादौ यः प्रहारस्तं निरस्यति । पतिते विषमोच्चकैरिति । विषमपतिते उच्चकैश्च पतिते इत्यर्थः । तृप्तिरिति तर्पणम् । मर्माहतं हतमिति यो हतो मर्मणि हतो न भवति तत् मर्महतस्यासाध्यत्वात् । ५६–५८

इति (श्रीशिवदास सेन कृते अष्टाङ्ग हृदय तत्त्वबोधे)
उत्तरे तन्त्रे षड्विंशोऽध्यायः ।

सप्तविंशोऽध्यायः ।

अथातो भङ्गप्रतिषेधं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः ॥ १ ॥
पातघातादिभिर्द्विधा भङ्गोऽस्थ्नां सन्ध्यसन्धितः ।

आगन्तुत्वसामान्यात् सद्योव्रणानन्तरं भङ्गप्रतिषेध उच्यते । पातघातादिभिरित्यादि । आदि शब्दात् बलवद्विग्रहादीनां ग्रहणम् । सन्ध्यसन्धित इति एको भङ्गः सन्धौ अपरस्तु असन्धौ काण्ड इत्यर्थः । काण्डेन च नलक-कपाल-तरुण-वलय-रुचकानां ग्रहणम् । ननु यदि अस्थ्नां भङ्ग एव भग्नं तत् कथं सन्धिमुक्तं भग्नमुच्यते, नैवं, सन्धिना हि द्वयोरस्थ्नोरेकीभावः क्रियते स च सन्धिमोक्षेण भज्यत इतिकृत्वा सन्धिमुक्तमपि सन्धीयमानास्थिद्वय विकृतिकारकं भग्नमेव भवति । १।२–

प्रसारणाकुञ्चनयोरशक्तिः सन्धिमुक्तता ॥ २ ॥

सन्धिमुक्तस्य सामान्यलक्षणमाह प्रसारणेत्यादि । सन्धिमुक्तता सन्धिविश्लेषः ।—२

इतरस्मिन् भृशं शोफः सर्वावस्थास्वतिव्यथा ।
अशक्तिश्चर्षितेऽप्येऽपि पीड्यमाने सशब्दता ॥ ३ ॥
समासादिति भङ्गस्य लक्षणम्—

काण्डभग्नस्य सामान्यलक्षणमाह इतरस्मिन्नित्यादि । इतरस्मिन्निति काण्डभङ्गे । ३।४–

बहुधा तु तत् ।
भिद्यते भङ्गभेदेन

समासेन भङ्गस्य द्वैविध्यमभिधाय भङ्गस्यैव तत्तदवान्तरविशेषेण बहुविधत्वमपि भवतीत्याह बहुधा तु तदित्यादि । ते च भङ्गभेदाः, षड्विधं सन्धिमुक्तं द्वादशविधन्तु काण्डभग्नमित्यादिना सुश्रुतेनोक्ता अनुसन्धेयाः । इह तु विस्तरभयान्नोक्ताः ।—४—

तस्य सर्वस्य साधनम् ।
यथा स्यादुपयोगाय तथा तदुपदेक्ष्यते ॥ ४ ॥

तस्येत्यादि । उपयोगायेति चिकित्साव्यवहाराय ।– ४

प्राज्याणुदारि यत्त्वस्थि स्पर्शे शब्दं करोति यत् ॥ ५ ॥
यत्रास्थिलेशः प्रविशेन्मध्यमस्थ्नो विदारितः ।
भग्नं यच्चाभिघातेन किञ्चिदेवावशेषितम् ॥ ६ ॥
उन्नम्यमानं क्षतवद्यच्च मज्जनि मज्जति ।
तद्दुःसाध्यम्

तत्र कृच्छ्रसाध्यान् भङ्गानाह प्राज्याणुदारीति क्षुद्रबहुविदारणवत् । अत्र बहुव्रीहि प्राप्तावपि मत्वर्थीयो भवति एकदेशेनेति पाणिनि वचनादेव । एवम्भूतं यदस्थि तद्दुःसाध्यम् । तथा यदस्थि स्पर्शे सति शब्दं करोति तदपि दुःसाध्यम् । तथा यत्र भग्नेऽस्थिलेशोऽस्थ्नः सूक्ष्मोऽवयवः विदारणयुक्तस्योऽस्थ्नोमध्यमनुप्रविशेत्तदपि दुःसाध्यम् । तथा यच्च भग्नमस्थि अभिघातेन किञ्चिदेवावशेषितं भवति तच्च दुःसाध्यम् । उन्नम्यमान इत्यादि । यद्भग्नमुन्नम्यमाने ऊर्ध्वमुत्तिष्ठति मज्जनि मज्जति तदपि दुःसाध्यम् । भग्नं हि द्विविधं सव्रणमव्रणञ्च । तत्र क्षतवदित्यनेन व्रणभग्नस्य निरासः । क्षतवदिति क्षतयुक्तं व्रणमित्यर्थः । सुश्रुतेप्युक्तं "क्षतभग्नमुन्नम्यमानं यच्च मज्जानुगतम्" इति । ५।७ –

कृशाशक्तवातलाल्पाशिनामपि ॥ ७ ॥

न केवलमेतदेव भग्नं दुःसाध्यं किन्तर्हि कृशादीनां यद् भग्नं तदपि दुःसाध्यमित्याह कृशाशक्तेत्यादि । अशक्तो वेदनां सोढुमसमर्थो यः । —७

भिन्नं कपालं यत् कट्यां सन्धिमुक्तं च्युतञ्च यत् ।
जघनं प्रतिपिष्टञ्च भग्नं यत्तद्विवर्जयेत् ॥ ८ ॥
असंश्लिष्टकपालञ्च ललाटं चूर्णितं तथा ।
यच्च भग्नं भवेच्छङ्खशिरःपृष्ठस्तनान्तरे ॥ ९ ॥

कृच्छ्रसाध्यानि भग्नान्यभिधाय असाध्यानाह । भिन्नमित्यादि । भग्नमिति वाच्ये भिन्नमिति यदुक्तं तत् कपालानां प्रायशो भेदात् । अतएव वक्ष्यति

'कपालानि विभिद्यन्ते' इति । ननु कट्यस्थ्नः कपाल संज्ञाया अभावात् कथमुच्यते भिन्नं कपालं कट्यामिति । यदुक्तं सुश्रुते "जानुनितम्बांस गण्डतालुशङ्ख वङ्क्षणशिरःसु कपालानि"(१) इति (शां ५ अं) । उच्यते । अत्र नितम्बग्रहणेन कटी ग्रहणाददोषः । सन्धिमुक्तमिति । सर्व्वमेव सन्धिमुक्तं कट्यां यदि भवति तदा विवर्जयेत् । च्युतञ्च यदिति च्युतमिति विश्लिष्टाख्यं सन्धिमुक्तं भग्नं कट्यां यद् भवति तद्विवर्जयेत् । एतच्च यद्यपि सन्धिमुक्तं कट्यां विवर्जयेदित्यनेनैव लभ्यते तथापि विशेषार्थमुक्तम् । विश्लिष्टञ्च मनाक् सन्धिविश्लेषः । अन्ये तु च्युतशब्देन अधःक्षिप्ताख्यं काण्डभग्नविशेषमाहुः । जघनं प्रतीति । जघनस्थले यत् पिष्टाख्यं सन्धिमुक्तभग्नं तदपि वर्जयेत् । एतदपि पूर्व्ववद्विशेषार्थमुक्तम् । पिष्टञ्च द्वाभ्यामस्थिभ्यां सन्धौ घर्षणम् । असंश्लिष्टेत्यादौ अविद्यमानसंश्लेषं यत् कपालं तद्विवर्जयेत् । तथा ललाटे चूर्णिताख्यं यद् भग्नं तदपि विवर्जयेत् । चूर्णितमिति क्षुण्णमित्यर्थः । यच्च भग्नं भवेच्छङ्खेत्यादौ भग्नशब्देनाविशेषेण सन्धिमुक्तं काण्डभग्नञ्चोच्यते । ८।९

सम्यग्यमितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ।
सङ्क्षोभादपि यद्गच्छेद्विक्रियां तद्विवर्जयेत् ॥ १० ॥

सर्व्वेषामेव भग्नानामनवधानतोऽसाध्यतामाह । सम्यगित्यादि । सम्यग् यमितं सम्यक् संयमितं बद्धमित्यर्थः । अयमर्थः । सम्यग् यमितमप्यस्थि दुर्न्यासात् दुःस्थापनात् यद्विक्रियां गच्छेत्, तथा सुन्यस्तमपि दुर्बन्धनाद् यद् विक्रियां गच्छेत्, तथा सुन्यस्तं तथा सुबद्धमपि यद्भग्नं संक्षोभादिति व्यवायादिसंक्षोभाद् विक्रियां गच्छेत् विकारं प्राप्नुयात्तद् भग्नं विवर्जयेत् । १०

आदितो यच्च दुर्जातमस्थिसन्धिरथापि वा ॥ ११ ॥

आदित इत्यादि । यदस्थि आदित इति शरीरोत्पत्तिकाल एव दुर्जातमसम्यगुत्पन्नं तथा यश्च सन्धिरादित एव दुर्जातः तदपि भग्नं सत् विवर्जयेत् । दुर्जातञ्च दुर्जातश्चेति नपुंसक मनपुंसकेनेत्येकशेषः । ११

तरुणास्थीनि नम्यन्ते (२) भज्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्त्यन्यानि भूयसा ॥ १२ ॥

अस्थि विशेषे भङ्गविशेष माह तरुणास्थीनीत्यादि । तरुणास्थीनीति कोमला-

(१) साम्प्रतं मुद्रिते सुश्रुतेऽत्र वंक्षणस्योल्लेखो नोपलभ्यते ।
(२) भुज्यन्ते इति वा पाठः ।

स्थीनि तानि च घ्राणकर्णादिस्थीनि नम्यन्त इति वक्रीभवन्ति। तेन कोमलास्थिषु वक्रतालक्षणो भङ्गः। भज्यन्ते नलकानीति। नलकानीत्यन्तः-शुषिराणि। अस्थ्यन्तरानुप्रवेशात् भज्यन्ते विदीर्य्यन्ते। कपालानि विभज्यन्त-इति कपालेषु विदरणलक्षणो भङ्गः प्रायेण भवति। विभिद्यन्ते इति पाठे स एवार्थः। स्फुटन्त्यन्यानि भूयसेति अन्यानीति कपालनलकतरुणेभ्योऽन्यानि वलयरुचकानीत्यर्थः। वलयं वलयाकारमस्थि रुचकानि दन्ताः तेषु स्फुटन-लक्षणो भङ्गः। एतेन कपालतरुणनलकवलयरुचकभेदेन पञ्चविधमेवास्थि संगृहीतं भवति। १२

अथावनतमुन्नम्यमुन्नतञ्चावपीडयेत्।
आञ्छेदतिक्षिप्तमधोगतञ्चोपरि वर्त्तयेत्॥ १३॥
आञ्छनोत्पीडनोन्नामचर्मसंक्षेपबन्धनैः।
सन्धीन् शरीरगान् सर्वान् चलानप्यचलानपि॥ १४॥
इत्येतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम्।
पट्टैः प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखैस्ततः॥ १५॥
कदम्बोदुम्बराश्वत्थ-सर्जार्जुन-पलाशजैः।
वंशोद्भवैर्वा पृथुभिस्तनुभिः सुनिवेशितैः॥ १६॥
सुश्लक्ष्णैः सप्रतिष्टम्भैर्वल्कलैः शकलैरपि।
कुशाह्वयैः समं बन्धं पट्टस्योपरि योजयेत्॥ १७॥

अथेत्यादिना चिकित्सामाह। अवनत मस्थिभग्नाख्यं उत्तोलनीयम्। अवपीडयेत् अवनामयेत्। अतिक्षिप्तमधऊर्ध्वं वा अतिनिर्गतम् आञ्छेदिति प्रसारयेत्। आञ्छि आयाम इत्यस्य रूपम्। अधोगत मधःक्षिप्तास्थि उपरि वर्त्तये-दित्याकर्षेत्। चर्म्मसंक्षेपः भग्नविस्तृतस्य चर्म्मणः सङ्कोचः। एतैरित्याञ्छना-दिभिः। पट्टैरिति वस्त्रपटिकाभिः। तनुभिरिति पत्तलैः। प्रतिष्टम्भो रज्जुजालः तत् सहितैः। वंशोद्भवैः शकलैः खण्डैरित्यन्वयः। कुशाह्वयैरिति कुशासंज्ञकैः। कुशेति भग्नास्थिबन्ध-साधन-कदम्बादित्वचः पारिभाषिकीयं संज्ञा। समं बन्ध-मिति साधारणं बन्धं नातिशिथिलं नातिगाढञ्चेत्यर्थः। १३—१७

शिथिलेन हि बन्धेन सन्धेः स्थैर्य्यं न जायते।
गाढेनातिरुजादाहपाकश्वयथुसम्भवः॥ १८॥

त्र्यहात्त्र्यहाद्दतौ घर्मे सप्ताहान्मोक्षयेद्धिमे।
साधारणे तु पञ्चाहाद् भङ्गदोषवशेन वा॥ १९॥
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत्।
तं पञ्चमूलपक्वेन पयसा तु सवेदनम्॥ २०॥
सुखोष्णं वाचचार्यं स्याच्चक्रतैलं विजानता।

कस्मात् साधारणं बन्धं योजयेदित्याह। शिथिलेन हीत्यादि। घर्म्मं इति उष्णकाले। हिम इति शीतकाले। साधारण इति अनतिशीतोष्णे। तमिति भग्नम्। पञ्चमूलमत्र स्वल्पं वदन्ति। चक्रतैलमिति सद्यःपीडितं तैलम्। अन्ये तु सुश्रुत-वातव्याधि-चिकित्सितोक्ताणुतैलविधान-गृहीतं तैलमिति वदन्ति। शीतोपचारोचितेऽपि भग्ने सुखोष्णस्य विधानमनिले बलीयसि ज्ञेयम्। अतएव विजिता (विज्ञा) नतेत्युक्तम्। १८–२१—

विभज्य देशं कालञ्च वातघ्नौषधसंयुतम्॥ २१॥
प्रततं सेकलेपांश्च विदध्याद् भृशशीतलान्॥ २२॥
गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम्।
प्रातः प्रातः पिबेद्भग्नः शीतलं लाक्षयायुतम्॥ २३॥

किं कृत्वावचार्य्यमित्याह विभज्येत्यादि। गृष्टिरेकवारप्रसूता धेनुः। मधुरौषधं मधुरोगणः। सर्पिर्लाक्षे प्रक्षेप्ये। —२१—२३

सव्रणस्य तु भग्नस्य व्रणो मधुघृतोत्तरैः।
कषायैः प्रतिसार्योऽथ शेषो भङ्गोदितः क्रमः॥ २४॥
लम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा।
सन्दधीत व्रणान् वैद्यो बन्धनैश्चोपपादयेत्॥ २५॥
तान् समान् सुस्थितान् ज्ञात्वा फलिनीरोध्रकट्फलैः।
समङ्गा-धातकीयुक्तैश्चूर्णितैरवचूर्णयेत्॥ २६॥
पञ्चवल्कल चूर्णैर्वा शुक्तिचूर्ण समन्वितैः।
धातकी-रोध्र-चूर्णैर्वा रोहन्त्याशु तथा व्रणाः॥ २७॥

सव्रणभग्न चिकित्सा माह सव्रणस्येत्यादि। कषायैरिति। न्यग्रोधादि-कषायद्रव्यकृतकल्कैः प्रतिसार्य्यः प्रलेपनीयः। अन्ये तु कषायैरिति मधुरौषध-

कार्यैः प्रतिसार्य्यः प्रसेच्यः धातूनामनेकार्थत्वादिति व्याचक्षते। शेष इत्याहारादिः। फलिनी प्रियङ्गुः। शुक्तिर्बदरीवल्कलचूर्णम्। अरुणस्तु पञ्चवल्कलेत्यादिकमर्द्धश्लोकं न पठति। २४—२७

इति भग्न उपक्रान्तः स्थिरधातोः ऋतौ हिमे।
मांसलस्याल्पदोषस्य सुसाध्यो दारुणोऽन्यथा ॥ २८ ॥

भग्नस्य सुखसाध्यता यथा भवति तदाह इतीत्यादि। २८

पूर्वमध्यान्तवयसामेकद्वित्रिगुणैः क्रमात्।
मासैः स्थैर्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ॥ २९ ॥

इदानीं यस्मिन् वयसि यावत्कालेन सन्धेः स्थैर्य्यं भवति तदाह। पूर्व्वे वयसि एकेन मासेन, मध्ये वयसि मासद्वयेन, अन्ते वयसि मासत्रयेण सन्धेः स्थैर्य्यं भवेदित्यर्थः। २९

कटी-जङ्घोरुभग्नानां कपाटशयनं हितम्।
यन्त्रणार्थं तथा कीलाः पञ्च कार्या निबन्धनाः ॥ ३० ॥
जङ्घोर्वोः पार्श्वयोर्द्वौ द्वौ तले एकश्च कीलकः।
श्रोण्यां वा पृष्ठवंशे वा वक्षस्यंसकयोस्तथा(१) ॥ ३१ ॥

भग्न विशेषे विधिविशेषमाह। कटीत्यादि। कपाट शब्देन कपाटाकारं दारुरचित शयनीयविशेषं वदन्ति। तस्मिन्नेव कपाटे जङ्घादीनां यन्त्रणार्थं पञ्च कीलाः कार्य्याः। निबन्धना इति जङ्घादयो निबध्यन्ते येषु कीलेषु ते निबन्धनाः, एतच्च भग्नस्य चलनं मा भूदित्येतदर्थं विधेयम्। उक्तं हि सुश्रुते "यथा भग्नं न चलति प्रयतेत तथा भिषग्" (चिं ३ अ॰) इति। तानेव पञ्च कीलकानङ्गभेदेनाह जङ्घोर्व्वोरित्यादि। जङ्घा सम्बन्धि भग्नस्य पार्श्वद्वये द्वौ तथा ऊरुसम्बन्धिभग्नस्य पार्श्वद्वये द्वौ तले एक इति पञ्च। तथा श्रोणिभग्ने एकः पृष्ठवंशभग्नेऽप्येकः वक्षसि भग्ने एकः अंसयोश्च भग्ने प्रत्येकमेक इति पञ्च। वक्षस्यंसकयोस्तथेत्यत्र सुश्रुते वक्षः कक्षयोस्तथेति पाठो दृश्यते। ३०।३१

विमोक्षे भग्नसन्धीनां विधिमेवं समाचरेत् ॥ ३२ ॥

विमोक्ष इत्यादि। भग्नसन्धीनां विमोक्षे सति एवमुक्तप्रकारं विधिं समाचरेत्। ३२

(१) वक्षस्यकक्षयो रिति वा पाठः।

सन्धींश्चिरविमुक्तांस्तु स्निग्धस्विन्नान् मृदूकृतान्।
उक्तैर्विधानैर्बुद्ध्या च यथास्वं स्थानमानयेत् ॥ ३३ ॥

अचिरोत्थितानां सन्धिभग्नानां चिकित्सामभिधाय चिरविमुक्त सन्धीनां चिकित्सामाह सन्धीनित्यादि। उक्तैर्विधानैरिति पूर्व्वोक्त प्रकारैराञ्छनोत्पीडनादिभिः। ३३

असन्धिभग्ने रूढे तु विषमोल्बणसाधिते।
आपोथ्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥ ३४ ॥

सन्धिभग्नचिकित्सामभिधाय वैषम्येन रूढस्य काण्डभग्नस्य चिकित्सामाह असन्धिभग्न इत्यादि। असन्धिभग्ने काण्डभग्ने इत्यर्थः। रूढे इति शुष्के। विषमोल्बण साधितइति असम्यक् स्थापनेन भग्नस्यास्थिखण्डस्य वैषम्येण निर्गमात् विषमोल्बणं वैषम्येण नाधिकं यथा स्यात् तथा साधिते चिकित्सिते। आपोथ्य भग्नमिति विषमनिर्गतं भग्नमस्थिखण्डं आपोथ्येति भंक्त्वा। ३४

भग्नं नैति यथा पाकं प्रयतेत तथा भिषक्।
पक्व-मांस-शिरा-स्नायु-सन्धिः श्लेषं न गच्छति ॥ ३५ ॥
वातव्याधिविनिर्दिष्टान् स्नेहान् भग्नस्य योजयेत्।
चतुःप्रयोगान् बल्यांश्च बस्तिकर्म च शीलयेत् ॥ ३६ ॥

भग्नमित्यादि। भग्नं यथा पाकं न गच्छति तथा प्रयतेत। कुत इत्याह पक्वेत्यादि। पक्वाः पाकं गताः मांस शिरा स्नायु सन्धयो यत्र एतादृशं भग्नं यतः श्लेषमिति संश्लेषं न गच्छति अत इत्यर्थः। चतुःप्रयोगानिति। पानाभ्यञ्जन नस्यानुवासनरूपाश्चत्वारः प्रयोगा येषां तान् बल्यानिति बलजनकान्। बस्तिकर्म निरूहः क्रिया बस्तिः शिरोबस्तिः। ३५।३६

शाल्याज्यरसदुग्धाद्यैः पौष्टिकैरविदाहिभिः।
मात्रयोपचरेद्भग्नं सन्धिसंश्लेषकारिभिः ॥
ग्लानिर्न शस्यते तस्य सन्धिविश्लेषकृद्धि सा ॥ ३७ ॥
लवणं कटुकं क्षारमम्लं मैथुनमातपम्।
व्यायामञ्च न सेवेत भग्नो रूक्षञ्च भोजनम् ॥ ३८ ॥

भग्नहितमन्नपानमाह। शाल्यीत्यादि। ३७।३८

कृष्णांस्तिलान् विरजसो दृढवस्त्रबद्धान्
सप्त क्षपा वहति वारिणि वासयेत ।
संशोषयेदनुदिनं प्रविसार्य्य चैतान्
क्षीरे तथैव मधुककथिते च तोये ॥ ३९ ॥
पुनरपि पीतपयस्कांस्तान् पूर्ववदेव शोषितान् बाढम् ।
विगततुषानरजस्कान् सञ्चूर्ण्य सुचूर्णितेषु अथात् ॥ ४० ॥
नलद-बालक-लोहितयष्टिका-नख-मिशि-ग्रुव-कुष्ठ-बलात्रयैः ।
अगुरु-चन्दन-कुङ्कुम-सारिवा-सरल-सर्जरसामरदारुभिः ॥ ४१ ॥
पद्मकादिगणोपेतैस्तिलपिष्टं ततश्च तत् ।
समस्तगन्धभैषज्यसिद्धदुग्धेन पीडयेत् ॥ ४२ ॥
शैलेय-रास्नांशुमती-कसेरु-कालानुसारी-नत-पत्र-रोध्रैः ।
सक्षीरयुक्तैः सपयःसदूर्वैस्तैलं पचेत्तन्नलदादिभिश्च ॥ ४३ ॥
गन्धतैलमिदमुत्तममस्थिस्थैर्यकृज्जयति चाशु विकारान् ।
वातपित्तजनितानतिवीर्यान् व्यापिनोऽपि विविधैरुपयोगैः ॥ ४४ ॥

इति श्रीमद् वागभट विरचितायां मष्टाङ्गहृदय संहितायां मुत्तरे
तन्त्रे भङ्गप्रतिषेधो नाम सप्तविंशोऽध्यायः ।

गन्धतैलमाह । कृष्णानिति । विरजस इति धूलिरहितान् । सप्तक्षपाइति सप्तरात्रम् । वहति वारिणीति स्रोतोजले । वासयेत स्थापयेत् । अनुदिनमिति प्रत्यहम् । मधुक कथिततोय इति यष्टीमधुककाथे । पीतपयस्कानिति पुनरपि क्षीरे भावितान् । पूर्व्वं वदेव शोषितान् अतिप्रशोषितान् । बाढमित्यतिशयेन । नलदं मांसी । लोहितयष्टिका मञ्जिष्ठा । मिसिः शतपुष्पा । बलात्रयं पीतबला श्वेतबला नागबला च । तिलपिष्टं तिलचूर्णम् । समस्तगन्धाः एलादिगणः "चातुर्जातक कर्पूरककोलागुरु सिल्हकम् । लवङ्ग सहितञ्चैव सर्व्वगन्धं विनिर्दिशेत्" इत्याहुः । क्षीर साधनञ्च क्षीरसाधन परिभाषया । तैल साधनार्थं कल्कमाह । शैलेयेत्यादि । अंशुमती शालपर्णी, कालानुसारी तगरपादिका, नतं तगरवृक्षमूलं, पत्रं तेजपत्रं, क्षीरशुक्ला क्षीरविदारी । सपय इति तैलविशेषणं । नलदादिभिरिति नलदबालक लोहितयष्टिके-

त्यादिनाऽत्रैवोक्तैः । एतत्तैल साधन परिपाटी च संक्षेपेण लिख्यते ; चतुःशरावतैलोचित कृष्णतिलान् गृहीत्वा वस्त्रेण पोट्टलीं बद्ध्वा स्रोतो जले प्रक्षिप्य रात्रौ स्थापयेत् । ततो दिवसे आतपे शोषयेत् एवं सप्त दिनानि यावत् । तदनु तिलतुल्यपरिमाण गव्यक्षीरे रात्रौ तिलान्निक्षिप्य दिवा प्रसार्य्य आतपे शोषयेत् । एवं सप्तदिनानि यावत् । तदनु "भाव्यद्रव्य समं क्वाथ्यम्" इति वचन बलात् तिलतुल्य परिमाणं यष्टीमधु गृहीत्वा अष्टगुणं जलं दत्वा अष्टमभागावशिष्टे जले तिलान् रात्रौ प्रक्षिप्य दिवातपे शोषयेत् । एवमपि सप्ताहं यावत् । एवं गवां क्षीरेऽपि सप्ताहम् । तदनु तिलान् निस्तुषीकृत्य चूर्णयेत् । ततश्च तेषां तिलचूर्णानां चत्वारो भागाः भागश्चैको नलदादि पद्मकादिगणान्त-मिलित-चूर्णस्य एतस्यैव चूर्णस्य पीडनार्थं मृत्स्वेदने कर्त्तव्ये आर्द्रताकरणार्थं सर्व्वगन्धशृतं क्षीरं तावन्मात्रं ग्राह्यं यावता क्षीरेण चूर्णमार्द्रं भवति । एवमुक्त प्रकारेण गृहीतस्य तैलस्य च चत्वारः शरावाः । एतत् पाकार्थञ्च गव्यदुग्धस्य षोडश शरावा ग्राह्याः । शैलेयादि नलदाद्यन्त कल्कञ्च तैलात् पादिका इति । विविधैरुपयोगैरिति पानाभ्यङ्गादिभिः । ३८—४४

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे
सप्तविंशोऽध्यायः ।

———

अष्टाविंशोऽध्यायः ।

अथातो भगन्दरप्रतिषेधं व्याख्यास्यामः

इति ह स्माहु रात्रेयादयो महर्षयः ॥ १ ॥

हस्त्यश्वपृष्ठगमनकठिनोत्कटुकासनैः ।

अर्शोनिदानाभिहितैरपरैश्च निषेवितैः ॥ २ ॥

अनिष्टाद्दृष्टपाकेन सद्यो वा साधुगर्हणैः ।

प्रायेण पिड़कापूर्व्वो योऽङ्गुले द्व्यङ्गुलेऽपि वा ॥ ३ ॥

पायोर्व्रणोऽन्तर्बाह्यो वा दुष्टास्टङ्मांसगो भवेत् ।

वस्तिमूत्राशयाभ्यासगतत्वात् स्यन्दनात्मकः ॥ ४ ॥

भगन्दरः सः सर्वश्च दारयत्यक्रियावतः ।

भगवस्तिगुदान्

भग्नोऽपि पाकाद व्रणभावमुपैतीति व्रणत्वसामान्याद् भग्न प्रतिषेधानन्तरं भगन्दर प्रतिषेध उच्यते। अर्शोनिदानाभिहितैरपरैरिति अर्शोनिदानत्वेनोक्तै-रपरैर्वस्तिनेत्रसंघर्षणादिभिः। अनिष्टादृष्टपाकेन सद्य इति अनिष्टमित्यशुभं पुराकृतं कर्म तस्य सद्यः पाकेन तत्काल कृत परिणामेन। किंवा सद्यः साधुगर्हणैः एतज्जन्मकृत सल्लोकनिन्दाभिः। पिड़कापूर्व्वं इत्यनेन पिड़काया भगन्दर-सामान्य पूर्व्वरूपत्वं दर्शितम्। प्रायेणेति वचनात् पिड़कामन्तरेणापि शस्त्रादि-क्षताद् भगन्दरो जायत इति दर्शयति। पायोर्गुदस्य अन्तर्बाह्ये वा एकाङ्गुले द्व्यङ्गुले वा क्षेत्रे। वस्तिमूत्राशयाभ्यासगतत्वात् सर्व्वएव भगन्दरः स्यन्दनात्मकः क्लेदबहुलः सन् अक्रियावतः पुरुषस्य भगादीन् दारयतीति कृत्वा भगन्दर इत्युच्यते। एतेनास्यां निरुक्तौ भगशब्दोगुदाद्युपलक्षणः। १—५—

तेषु दीर्यमाणेषु भूरिभिः ॥ ५ ॥

वातमूत्रशकृच्छुक्रं खैः सूक्ष्मैर्वमति क्रमात् ।

तेष्वित्यादि। तेष्विति भगादिषु। खैरिति छिद्रैः क्रमात् वातादीन् वमतीत्यन्वयः। —५।६—

दोषैः पृथग्युतैः सर्वैरागन्तुः सोऽष्टमः स्मृतः ॥ ६ ॥

दोषैरित्यादि। पृथक् त्रयः, युतैरिति द्वन्द्वै त्रयः, सर्व्वैरिति सन्निपतितैरेकः।—६

अपक्वं पिड़कामाहुः पाकप्राप्तं भगन्दरम् ।

अपक्वमित्यादि। अपक्वं शोथं पिड़कामाहुः। पाकप्राप्तन्तु शोथं भगन्दर-माहुः। ७—

गूढमूलां ससंरम्भां रुगाढ्यां रूढकोपनीम् ।

भगन्दरकरीं विद्यात् पिड़कां न त्वतोऽन्यथा ॥ ७ ॥

भगन्दर क्षेत्र एव भगन्दरकरी अभगन्दरकरी च पिड़का जायते। तयोर्ज्ञानार्थं लक्षणमाह गूढमूलामित्यादि। गूढमूलामिति गूढवास्तुम्। संरम्भः शोथः, रुगाढ्यामिति वेदनाबहुलां, रूढकोपनीमिति रूढापि कुप्यतीति रूढकोपनी। नत्वतोऽन्यथेति अतोऽन्यथातु पिड़कां न भगन्दरकरीं विद्यादित्यर्थः। —७

तत्र श्यावारुणा तोदभेदस्फुरणरुक्करी ।

पिड़का मारुतात्

तत्र भगन्दर पूर्व्वरूपाणां पिड़काणां वातादिभेदेन लक्षणमाह तत्रेत्यादि। मारुतादिति च्छेदः। ८—

पित्तादुष्ट्रग्रीवावदुच्छ्रिता ॥ ८ ॥

रागिणी तनुरुष्माढ्या ज्वरधूमायनान्विता ।

पित्तादित्यादि धूमायनान्वितेत्यन्तं पित्तपिड़कालक्षणम्। —८।९—

स्थिरा स्निग्धा महामूला पाण्डुः कण्डुमती कफात् ॥ ९ ॥

श्यावा ताम्रा सदाहोषा घोररुग् वातपित्तजा ।

पाण्डुरा किञ्चिदाश्यावा कृच्छ्रपाका कफानिलात् ॥ १० ॥

पादाङ्गुष्ठसमा सर्वैर्दोषैर्नानाविधव्यथा ।

शूलारोचक-तृड्दाह-ज्वर-छर्दिरुपद्रुता ॥ ११ ॥

स्थिरेत्यादि कफादित्यन्तं कफजपिड़कायाः। श्यावेत्यादि वातपित्तजायाः। पाण्डुरेत्यादि कफवातजायाः। कफपित्तजस्तु भगन्दरोऽर्शोभगन्दरः तत् पूर्व्वरूपञ्च श्वयथुं तत्रैव वक्ष्यतीति कृत्वा पिड़का कथन प्रसङ्गे तन्नकृत्योक्तवान्। पादाङ्गुष्ठेत्यादि त्रिदोषज पिड़का लक्षणम्। छर्दिस् शब्दः सान्तोऽपि।—९—११

व्रणतां यान्ति ताः पक्वाः प्रमादात्

व्रणतामित्यादि। प्रमादादित्यनवधानात्। १२—

तत्र वातजा।

दीर्यतेऽणुमुखैश्छिद्रैः शतपोनकवत् क्रमात्॥ १२॥

अच्छं स्रवद्भिरास्रावमजस्रं फेनसंयुतम्।

शतपोनकसंज्ञोऽयम्

उक्त वातजादि पिड़कानां पाकाद् व्रणभावमापन्नानां भगन्दर संज्ञकानां क्रमेण लक्षणविशेषं सञ्ज्ञाविशेषञ्चाह तत्रेत्यादि। शतपोनकवदनेकाणुमुखत्वे तु वातकृत भगन्दरमहिमैव हेतुः। —१२।१३—

उष्ट्रग्रीवस्तु पित्तजः॥ १३॥

उष्ट्रग्रीवस्तु पित्तज इति। पित्तजस्तु भगन्दर उष्ट्रग्रीववदुन्नतत्वादुष्ट्रग्रीव-संज्ञः। —१३

बहुपिच्छापरिस्रावी परिस्रावी कफोद्भवः।

कफोद्भवो भगन्दरो बहुपिच्छास्राव योगात् परिस्राविसंज्ञः। १४—

वातपित्तात् परिक्षेपी परिक्षिप्य गुदं गतिः॥ १४॥

जायते परितस्तत्र प्राकारपरिखेव च।

वात पित्तादित्यादि। वातपित्ताद् यो भगन्दर स गुदं परिक्षिप्य सर्व्वतो व्याप्य यतो जायते अतः परिक्षेपीत्युच्यते। एतदेव विशदयति गतिरित्यादि। गतिर्नाड़ी गुदं परितः गुदस्य चतुःपार्श्वे जायते। यथा प्राकारं परितः प्राकारस्य चतुःपार्श्वे परिखा तद्वत्। —१५।१६—

ऋजुर्वातकफादृज्व्या गुदो गत्या तु दीर्यते॥ १५॥

ऋजुरित्यादि। वातकफाद् यो भगन्दरः स ऋजुरित्युच्यते। यस्मादृज्व्या अवक्रया गत्या नाड्या गुदं दीर्य्यते। —१५

कफपित्ते तु पूर्वोत्थं दुर्नामाश्रित्य कुप्यतः।

अर्शोमूले ततः शोफः कण्डूदाहादिमान् भवेत्॥ १६॥

स शीघ्रं पक्वभिन्नोऽस्य क्लेदयन्मूलमर्शसः।

स्रवत्यजस्रं गतिभिरयमर्शोभगन्दरः॥ १७॥

अर्शोभगन्दराख्यं कफपित्तजं भगन्दरमाह। कफपित्तेत्यादि। गतिभिरिति नाड़ीभिः। १६।१७

सर्वजः शम्बुकावर्तः शम्बुकावर्तसन्निभः।

गतयोदारयन्तश्चास्मिन् रुग्वेगैर्दारुणैर्गुदम्॥ १८॥

शम्बुकावर्त्ताख्यं सान्निपातिकं भगन्दरमाह सर्व्वज इत्यादि। शम्बुकावर्त्त-सन्निभ इति शम्बुकाकारत्वात् शम्बुकावर्त्तः। किंवा शम्बुकावर्त्त सन्निभैरिति पाठः। एतच्च रुग्वेगैरित्यस्य विशेषणम्। शम्बुकस्य यथा आवर्त्तः तथैवावर्त्तेन वेदनाविशेषा यत्र दोषगतिविशेषाद् भवन्ति स शम्बुकावर्त्त इत्यर्थः। उक्तं हि सुश्रुते "शम्बुकावर्त्तवच्चात्राभ्युत्तिष्ठन्ति वेदना विशेषाः" इति (निः ४)। १८

अस्थिलेशोऽभ्यवहृतो मांसगृद्ध्या यदा गुदम्।

क्षिणोति तिर्यङ् निर्गच्छन्नुन्मार्गं क्षततो गतिः॥ १९॥

स्यात्ततः पूयदीर्णायां मांसकोथेन तत्र च।

जायन्ते कृमयस्तस्य खादन्तः परितो गुदम्॥ २०॥

विदारयन्ति न चिरादुन्मार्गी क्षतजश्च सः।

आगन्तुज मष्टमं भगन्दरमाह अस्थिलेश इत्यादि। मांसगृद्ध्यातिमांस-लोभेन। क्षिणोतीति भिनत्ति। तिर्य्यगुन्मार्गं निर्गच्छनिति गुदवर्त्म विहाय मार्गान्तरे तिर्य्यङ् निर्गच्छनित्यर्थः। तस्मात् क्षततो गतिर्नाड़ी स्यात्। ततोऽनन्तरं तत्र पूयदीनायां गतौ मांसस्य कोथेन पूतिभावेन क्रिमयो जायन्ते। उन्मार्गीति तत्रोन्मार्गेण कृमिकृतमार्गेण पुरीषादिगमनादुन्मार्गिसंज्ञा ज्ञेया। सुश्रुतेऽप्युक्तं—"तस्य तैः कृमिकृतैर्मार्गैं र्वातमूत्रपुरीष रेतांस्यभिप्रपद्यन्ते तं भगन्दर मुन्मार्गिणमित्याचक्षते" इति (निं ४)। १९—२१—

तेषु रुग्दाहकण्ड्वादीन् विद्याद् व्रणनिषेधतः॥ २१॥

तेष्वित्यादि। तेष्विति पूर्व्वोक्तेषु भगन्दरेषु व्रणनिषेधत इति व्रणप्रतिषेधे वातादिभेदेन ये रुग्दाहकण्ड्वादय उक्ता स्तानत्रापि तद्दोषजभगन्दरेषु विद्यादित्यर्थः। —२१

षट्कृच्छ्रसाधनास्तेषां निचयक्षतजौ त्यजेत् ।
प्रवाहिनीं वलीं प्राप्तं सेवनीं वा समाश्रितम् ॥ २२ ॥

षट् कृच्छ्रसाधना इत्यादि । शतपोनकादयोऽर्शोभगन्दरान्ताः षट् । निचयक्षतजाविति । निचयः सन्निपात स्तद् भवं तथा क्षतजञ्च त्यजेदित्यर्थः । २२

अथास्य पिडकामेव तथा यत्नादुपाचरेत् ।
शुद्ध्यसृक्स्रुतिसेकाद्यैर्यथा पाकं न गच्छति ॥ २३ ॥
पाके पुनरुपस्निग्धं स्वेदितञ्चावगाहतः ।
यन्त्रयित्वार्शसामिव पश्येत् सम्यग्भगन्दरम् ॥ २४ ॥
अर्वाचीनं पराचीनमन्तर्मुखं बहिर्मुखम् ।
अथान्तर्मुखमेषित्वा सम्यक् शस्त्रेण पाटयेत् ॥ २५ ॥
बहिर्मुखञ्च निःशेषं ततः क्षारेण साधयेत् ॥
अग्निना वा भिषक् साधु क्षारेणैवोष्ट्रकन्धरम् ॥ २६ ॥
नाडीरेकान्तराः कृत्वा पाटयेच्छतपोनकम् ।
तासु रूढासु शेषाश्च मृत्युर्दीर्णे गुदेऽन्यथा ॥ २७ ॥

अथेत्यादिना चिकित्सामाह । शुद्धिर्वमनादि । स्वेदितञ्चावगाहत इति अवगाहस्वेदेन स्वेदितमित्यर्थः । यन्त्रयित्वेति यन्त्रं प्रणिधाय अर्वाचीनमित्यधोमुखम् । पराचीनमिति परिवृत्त मुखम् । एषित्वेति एषण्या इति शेषः । निःशेषं पाटयेदित्यन्वयः । तत इति पाटनान्तरं क्षारेणाग्निना वा साधु यथा स्यात्तथा साधयेत् चिकित्सेत् । क्षारेणैवोष्ट्रकन्धरमिति उष्ट्रग्रीवाख्यं भगन्दरं क्षारेणैव चिकित्सेत् न पुनरग्निना । एकान्तरा इति एकैकां नाडीं परित्यज्य पाटयेत् । तासु रूढास्विति पाटिता या नाड्यः तासु रूढासु सतीषु शेषाश्च नाडीः पाटयेत् । मृत्युर्दीर्णे गुदेऽन्यथेति अन्यथा यद्येकदैव सर्व्वनाड्यः पाटिताः स्यु तदा गुदे दीर्णे सति मृत्युः स्यात् । २३—२७

परिक्षेपिणि चाप्येवं नाडुचकैः क्षारसूत्रकैः ।
अर्शोभगन्दरे पूर्वमर्शांसि प्रतिसारयेत् ॥ २८ ॥

परिक्षेपिणीत्यादि । परिक्षेपिणि भगन्दरेऽपि एवमुक्तरीत्या नाडीमणोक

क्षारसूत्रैः नाडीं पाटयेदित्यर्थः । प्रतिसारयेदिति—अर्शोहर कोशातक्यादि चूर्णेनेत्यर्थः । २८

त्यक्तोपचर्यः क्षतजः शल्यं शल्यवतस्ततः ।
आहरेच्च तथा दद्यात् कृमिघ्नं लेपभोजनम् ॥ २९ ॥
पिण्डनाड्यादयः स्वेदाः सुस्निग्धा रुजि पूजिताः ।
सर्वत्र च बहुच्छिद्रे छेदानालोच्य योजयेत् ।
गोतीर्थ-सर्वतोभद्र-दललाङ्गल-लाङ्गलान् ॥ ३० ॥

त्यक्तेत्यादौ त्यक्तेति प्रत्याख्यायेत्यर्थः । पिण्डनाड्यादय इति पिण्डस्वेद-नाडीस्वेदादयः । रुजीति वेदनायां सत्यामित्यर्थः । सर्व्वत्रेत्यादौ भगन्दर इति शेषः । गोतीर्थादीन् छेदानालोच्येति विचार्य्य योजयेत् । दललाङ्गलेत्यत्र दलशब्दोऽर्द्धवचनः अर्द्धलाङ्गल इत्यर्थः । २९।३०

पार्श्वं गतेन शस्त्रेण छेदो गोतीर्थको मतः ।
सर्वतः सर्वतोभद्रः पार्श्वच्छेदोऽर्द्धलाङ्गलः ॥ ३१ ॥
पार्श्वद्वये लाङ्गलकः समस्तांश्चाग्निना दहेत् ।
आम्नायमार्गांस्त्रिःशेषाश्चैवं विकृन्तेत् पुनः ॥ ३२ ॥
यतेत कोष्ठशुद्धौ च भिषक् तस्यान्तरान्तरा ।
लेपो व्रणे बिडालास्थि त्रिफलारसकल्कितम् ॥ ३३ ॥

गोतीर्थादि छेदानां लक्षणमाह पार्श्वंगतेनेत्यादि । सर्व्वत इति चतुःपार्श्वे । एकस्मिन् पार्श्वे छेदः योऽर्द्धलाङ्गलः । ३१—३३

ज्योतिष्मती-मलयु-लाङ्गलि-शेलु-पाठा-
कुम्भाग्नि-सर्ज-करवीर-वचा-सुधार्कैः ।
अभ्यञ्जनाय विपचेत भगन्दराणां
तैलं वदन्ति परमं हितमेतदेषाम् ॥ ३४ ॥

ज्योतिष्मतीत्यादौ ज्योतिष्मती लताफटकी । मलयुः काष्ठोदुम्बरः तस्य मूलं रक्तपित्तादावेव फलम् । कुम्भ स्त्रिवृता । अग्निश्चित्रकः एषां कल्को जलन्तु चतुर्गुणम् । ३४

मधुक-रोध्र-कणा-त्रुटि-रेणुका-द्विरजनी-फलिनी-पटु-सारिवाः।
कमलकेशर पद्मक-धातकी-मदन-सर्जरसामय-रोध्रकाः ॥ ३५ ॥
सबीजपूरच्छदनैरभिस्तै लंविपाचितम्।
भगन्दरापची-कुष्ठ-मधुमेह-व्रणापहम् ॥ ३६ ॥

मधुकेत्यादौ त्रुटिः सूक्ष्मैला। पटु सैन्धवम्। कमलकेशरं पद्मकेशरम्। मदनं मधुच्छिष्टं ननु मदनफलं सुश्रुते मधुच्छिष्ट पाठात्। आमयः, कुष्ठं लोहिता मञ्जिष्ठा। सुश्रुतेऽप्यस्मिन् योगे समङ्गा पठ्यते। अन्येतु लोध्रक इति पठित्वा लोध्रद्वयं गृह्णन्ति। बीजपूरो मातुलुङ्गः तस्य छदनं पत्रम्। ३५।३६

मधुतैलयुताविडङ्गसार-त्रिफला-मागधिकाकणाश्च लीढाः।
कृमि-कुष्ठ-भगन्दर-प्रमेह-क्षत-नाडीव्रणरोहणा भवन्ति ॥ ३७ ॥

मधुतैलेत्यादि। कणा इति विडङ्गादीनां मागधिकान्तानां चूर्णानि। किंवा मागधिकाकणाः पिप्पली तण्डुलाः। ३७

अमृता-त्रुटि-वेल्ल-वत्सकं कलि-पथ्यामलकानि गुग्गुलुः।
क्रमवृद्धमिदं मधुद्रुतं पिड़का-स्थौल्य-भगन्दरान् जयेत् ॥ ३८ ॥

अमृतेत्यादौ त्रुटिः सूक्ष्मैला। वेल्लो विडङ्गः। वत्सकः कुटजः कलिर्विभीतक-फलं, अन्येतु कलिङ्गमिति पठन्ति। क्रमवृद्धमिति। अमृताया एकोभागः द्वौ त्रुटेः त्रयो विडङ्गस्येत्यादि। ततो मधुनालोड्य पेयम्। ३८

मागधिकाग्नि-कलिङ्ग-विडङ्गैर्विल्वघृतैः सवरापलपट्कैः।
गुग्गुलुना सदृशेन समेतैः क्षौद्रयुतैः सकलामयनाशः ॥ ३९ ॥

मागधिकेत्यादि। मागधिकादि मिलितचूर्णापेक्षया त्रिफलाया मिलित्वाऽर्द्धं-भागः। गुग्गुलुना सदृशेनेति मिलित सर्व्वंचूर्णं समो गुग्गुलुः क्षौद्रन्तु वटक-करणोचितं ग्राह्यमित्याहुः। ३९

गुग्गुलुपञ्चपलं पलिकांशा मागधिका त्रिफला च पृथक्स्यात्।
त्वक्त्रुटिकर्षयुतं मधुलीढं कुष्ठ-भगन्दर-गुल्मगतिघ्नम् ॥ ४० ॥

गुग्गुलुपञ्चपलमित्यादि। त्रिफला च पृथक् पलिकांशेत्यन्वयः। त्वगेलयो-र्मिलित्वा कर्षः निर्देशस्य मानप्रधानत्वात्। तन्त्रान्तरेऽयं स्वायम्भुव गुग्गुलु-नाम्ना ख्यातः। दोधकाख्यं छन्दः। ४०

शृङ्गवेररजोयुक्तं तदेव च सुभावितम्।
क्वाथेन दशमूलस्य विशेषाद्वातरोगजित् ॥ ४१ ॥

शृङ्गवेरेत्यादि। तदेव गुग्गुलु पञ्चपलमित्यादिनोक्तमौषधं शृङ्गवेर रजश्च पलांशिकं गृह्णन्ति। ४१

उत्तमा-खदिरसारजं रजः शोलयश्चसनवारिभावितम्।
हन्ति तुल्यमहिषाक्षमाक्षिकं कुष्ठमेह-पिड़का-भगन्दरान् ॥ ४२ ॥

उत्तमेत्यादौ उत्तमा त्रिफला। महिषाक्षं गुग्गुलुरभिधीयते। एतद् यं त्रिफलादि चूर्णतुल्यम्। ४२

भगन्दरेष्वेष विशेष उक्तः शेषाणि तु व्यञ्जनसाधनानि।
व्रणाधिकारात् परिशीलनाच्च सम्यग्विदित्वौपयिकं विदध्यात् ॥४३॥

भगन्दरेष्वित्यादि। एष विशेष इति व्रणान्तरापेक्षया। शेषाणि तु व्यञ्जन-साधनानीति व्यञ्जनं लक्षणम् साधनं चिकित्सितम्। उक्त भगन्दर प्रतिनियत-लक्षणापेक्षया शेषाणि अनुक्तानि यानि लक्षणानि तथा शेषाणि यानि चिकित्सितानि शोधन-रोपण-सवर्णकरणादीनि तानि व्रणाधिकारात् समान्यव्रणोक्त लक्षण-चिकित्सितानुसारात् तथा परिशीलनादिभिः वैद्यव्यवहाराच्च सम्यग् विदित्वा यदुपयुक्तं भवति तद्विदध्यात्। ४३

अश्वपृष्ठगमनं चलरोधं मद्यमैथुनमजीर्णमसात्म्यम्।
साहसानि विविधानि च रूढे वत्सरं परिहरेदधिकं वा ॥ ४४ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहिताया मुत्तरे तन्त्रे
भगन्दर प्रतिषेधो नामाष्टाविंशोऽध्यायः ॥

निदान परिवर्जनरूपां चिकित्सामाह। अश्वपृष्ठेत्यादि। अश्वपृष्ठेत्युपलक्षणं तेन पृष्ठयान मात्रस्यैव निषेधः। चलानि गतिमन्ति वातमूत्र पुरीषानि तेषां रोधम्। अजीर्ण इत्यजीर्ण भोजनम्। चकारो रूढ इत्यन्तरं द्रष्टव्यः। रूढे च व्रण इत्यर्थः।

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे अष्टाविंशोऽध्यायः ॥

एकोनत्रिंशोऽध्यायः।

अथातो ग्रन्थ्यर्बुद-श्लीपदापची-नाडी-विज्ञानीयं व्याख्यास्यामः

इति ह स्माहु रात्रेयादयो महर्षयः ॥ १ ॥

कफप्रधानाः कुर्वन्ति मेदोमांसास्रगा मलाः।

वृत्तोन्नतं यं श्वयथुं स ग्रन्थिर्ग्रथनात् स्मृतः ॥ २ ॥

दोषास्र-मांस-मेदोऽस्थि-शिरा-व्रणभवा नव।

ते—

उत्सेध सामान्यात् पाकाद्व्रणभावापत्तेश्च व्रणत्व सामान्यात् भगन्दरानन्तरं ग्रन्थ्यादीनाह कफप्रधाना इत्यादि। ग्रथनादिति ग्रन्थिलत्वात्। दोषास्रेत्यादि। दोषैं स्त्रयः। अस्रादि दूष्य भेदेन षट् इति मिलित्वा ते ग्रन्थयो नव। २।३—

तत्र वातादायाम-तोद-भेदान्वितोऽसितः ॥ ३ ॥

स्थानात् स्थानान्तरगतिरकस्माद्धानिवृद्धिमान्।

मृदुर्वस्तिरिवानद्धो विभिन्नोऽच्छं स्रवत्यसृक् ॥ ४ ॥

वातिक ग्रन्थि लक्षणमाह तत्रेत्यादि। आयाम आकर्षणवद्वेदना। वस्तिश्चर्म्मपुटकः आनद्धो वायुपूर्णो वस्तिरिव मृदुस्पर्श इत्यर्थः। —३।४

पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम्।

भिन्नोऽस्रमुष्णो स्रवति

पित्तादित्यादिना स्रवतीत्यन्तेन पित्तग्रन्थि लक्षणमाह। ५—

श्लेष्मणा नीरुजो घनः ॥ ५ ॥

शीतः सवर्णः कण्डुमान् पक्वः पूयं स्रवेद् घनम्।

श्लेष्मलेत्यादि घनमित्यन्तं कफग्रन्थि लक्षणम्। सवर्ण इति गात्रसमानवर्णः। —५।६—

दोषैर्दुष्टेऽसृजि ग्रन्थिर्भवेत् मूर्च्छत्सु जन्तुषु।

शिरामांसञ्च संश्रित्य सस्वापः पित्तलक्षणः ॥ ६ ॥

दोषैरित्यादिना पित्त लक्षण इत्यन्तेन रक्तजग्रन्थिलक्षणमाह। जन्तुष्विति क्रिमिषु। शिरां मांसञ्च संश्रित्य जन्तुषु मूर्च्छत्सु सत्स्वित्यर्थः। स्वापः स्पर्शाज्ञता। ६

मांसलैर्दूषितं मांसमाहारैर्ग्रन्थिमावहेत्।

स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ॥ ७ ॥

मांसलैरित्यादिना कफाकृतिमित्यन्तेन मांसग्रन्थिमाह। मांसलैरिति मांसजनकैः। अन्येतु रक्तजं मांसजञ्च ग्रन्थि मनार्षमाहुः सुश्रुतादिष्वदृष्टत्वात्। किन्तु तन्त्रान्तरेऽपि "मांसास्रजञ्चाप्युदलक्षणेन तुल्यं हि दृष्टं स्वय लक्षणैश्च" इति दृश्यते। तस्मान् मतभेद एवायं न पुनरनार्षं इति। ७

प्रवृद्धं मेदुरैर्मेदोनीतं मांसेऽथवा त्वचि।

वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम् ॥ ८ ॥

श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम्।

स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत् ॥ ९ ॥

प्रवृद्धमित्यादिना स्रवेदित्यन्तेन मेदोजग्रन्थिमाह। मेदुरैरिति मेदोजनकैराहारैः प्रवृद्धं मेदो वायुना मांसे त्वचि वा नीतं सत् ग्रन्थिं कुरुते। देहक्षयवृद्धिभ्यां यथाक्रमं क्षयोदयौ क्षयवृद्धी यस्य तम्। ८।९

अस्थिभङ्गाभिघाताभ्यामुन्नतावनतन्तु यत्।

सोऽस्थिग्रन्थिः

अस्थि भङ्गेत्यादिना सोऽस्थिग्रन्थिरित्यन्तेनास्थिग्रन्थिमाह। भङ्गाभिघाताभ्यां यदस्थि उन्नतावनतं कुरुते सोऽस्थिग्रन्थिः। १०—

पदातेस्तु सहसाम्भोऽवगाहनात् ॥ १० ॥

व्यायामाद्वा प्रतान्तस्य शिराजालं सशोणितम्।

वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च ॥ ११ ॥

निःस्फुरं नीरुजं ग्रन्थिं कुरुते सशिराह्वयः ॥ १२ ॥

पदातेरित्यादिना शिराह्वय इत्यन्तेन शिराजं ग्रन्थिमाह। पदातेरिति पद्भ्यामटतः। संपिण्ड्येति संहतीकृत्य। निस्फुरत्वं नीरुजत्वञ्च साध्य-शिराज ग्रन्थि लक्षणतया बोध्यम्। उक्तं हि सुश्रुते। "सचारुजश्चाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्जनीयः" (नि ११ अ) इति। —१०—१२

अरूढे रूढमात्रे वा व्रणे सर्वरसाशिनः।

सद्यो वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा ॥ १३ ॥

वातोऽस्रं मस्तुतं दुष्टं संशोष्य ग्रथितं व्रणम् ।
कुर्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥ १४ ॥

व्रणग्रन्थिमाह अरूढ इत्यादि । सद्यो वा बन्धरहिते इति सद्योव्रणे बन्धरहिते सतीत्यर्थ । सार्द्रे इति पाठेऽपि ईषदार्द्रे सद्योव्रणे बन्धरहिते इत्यर्थः । ग्रथितमिति ग्रन्थिलम् । १३।१४

साध्यादोषास्रमेदोजा न तु स्थूलखराश्चलाः ।
मर्मकण्ठोदरस्थाश्च

ग्रन्थीनां साध्यासाध्य विभागं कुर्व्वंन्नाह । साध्या इत्यादि । स्थूलादयस्तु नसाध्या इत्यर्थः । १५—

महत्तु ग्रन्थितोऽर्व्वुदम् ॥ १५ ॥
तल्लक्षणाञ्च मेदोऽन्तैः षोढादोषादिभिस्तु तत् ।

मांस शोणित दूष्यसामान्यात् प्रायस्तुल्यलक्षणत्वाच्च ग्रन्थ्यन्तरमर्व्वुदमाह महत्त्वित्यादि । अर्व्वुदं ग्रन्थेः सकाशान्महद् भवति । एतेन ग्रन्थिमपेक्ष्यार्व्वुदं महदित्येव लक्षणं ग्रन्थ्यर्व्वुदयोर्भेदकम् अन्यत् सर्व्वं लक्षणं ग्रन्थेस्तुल्यमेवेत्यर्थः । तथा तल्लक्षणमित्यर्व्वुदलक्षणं दोषादिभिर्मेदोऽन्तैः षोढा भवति । एतेन वात-पित्त-कफ-शोणित-मांस-मेदोज भेदादर्व्वुदं षड्विधं भवतीत्यर्थः ।—१५।१६ —

प्रायो मेदः कफाढ्यत्वात् स्थिरत्वाच्च न पच्यते ॥ १६ ॥

अर्व्वुदस्य पाकाभावे हेतुमाह प्राय इत्यादि । मेदःकफाढ्यत्वादिति मेदःकफाधिकत्वात् । ननु अपच्यामपि विशेषतः कफमेदसी अधिके अथच तस्याः पाको अस्त्येवेत्याह स्थिरत्वादिति दोषस्थिरत्वादित्यर्थः । (तेन) कालान्तरेण हि रक्तं पित्तञ्चाधिकं भूत्वैव पाकमारभते । इह तु दोषस्थिरत्वात् सदा अनधिकपित्तत्वात् न पाक इत्यर्थः । चकाराद् व्याधिस्वभावोऽप्यत्र हेतुः समुच्चीयते । तेन व्याधिस्वभावपरिगृहीतावेतौ हेतू अव्यभिचारिणाविति बोध्यम् । भोजेऽप्युक्तं "न पच्यते स्थिरत्वाच्च ग्रथितत्वात् स्वभावतः" इति । —१६

शिरास्थं शोणितं दोषः सङ्कोच्यान्तः प्रपीड्य च ।
पाचयेत तदानद्धं सास्रावं मांसपिण्डितम् ॥ १७ ॥

मांसाङ्कुरैश्चितं याति वृद्धिञ्चाशु स्रवेत्ततः ।
अजस्रं दुष्टरुधिरं भूरि तच्छोणितार्वुदम् ॥ १८ ॥
तेष्वसृग्मांसजे वर्ज्ये चत्वार्य्यान्यानि साधयेत् ।

शोणितार्व्वुदस्योत्पत्तिक्रममाह शिरास्थमित्यादि । दोषो वातादीनामेकतमः संकोच्येत्यत्र शिरा इति शेषः । प्रपीड्येति शिरास्वेव शोणितं बहलीकृत्येत्यर्थः । पाचयेतेति धात्वग्निरेव शोणितं पचति । दोषस्तु शोणितबहलीकरणादिना कर्म्मणा साहाय्यं विधाय तत् पाचयतीत्यर्थः । तदानद्धमित्यादि । तच्छोणितं शिरासु दोषेण आनद्धमवरुद्धं सत् पाकवशात् मांसपिण्डतां याति । सास्रावमितीषत्स्रावम् । (१) न केवलं मांस पिण्डतां याति मांसांकुरैश्चितं तदाशु शीघ्रं वृद्धिञ्च याति ततोऽनन्तरं अजस्रं भूरि दुष्टरुधिरं स्रवति । तच्छोणितार्वुदं विद्यादिति शेषः । तेष्विति षट्स्वर्व्वुदेषु मध्ये । १७—१९—

प्रस्थिता वंक्षणोर्वादिमधः कायं कफोल्बणाः ॥ १९ ॥
दोषा मांसास्रगाः पादौ कालेनाश्रित्य कुर्वते ।
शनैः शनैर्घनं शोफं श्लीपदं तत् प्रचक्षते ॥ २० ॥

उत्सेध साधर्म्मात् अर्वुदवत् कफसम्बन्धाव्यभिचाराच्चार्व्वुदानन्तरं श्लीपदमाह । प्रस्थिता इत्यादि । शनैः शनैरिति क्रमेण । —१९।२०

परिपोटयुतं कृष्णमनिमित्तरुजं खरम् ।
रूक्षञ्च वातात् पित्तात्तु पीतं दाहज्वरान्वितम् ॥ २१ ॥
कफाद् गुरुस्निग्धमरुक्चितं मांसाङ्कुरैर्बृहत् ।

तेषां त्रयाणां श्लीपदानां क्रमेण लक्षणमाह परिपोटयुतमित्यादि । परिपोटः त्वचः किञ्चिद्विदारणम् । बृहदिति वातज पित्तजापेक्षया महाप्रमाणमित्यर्थः । २१।२२—

तत्त्यजेद्वत्सरातीतं सुमहत्सुपरिस्रुतम् ॥ २२ ॥ (२)

असाध्यलक्षणमाह तत्त्यजेदित्यादि । सुमहदिति अत्यन्तमुच्छूनम् । सुपरिस्रुतमिति अत्यन्तस्रावयुक्तम् । —२२

(१) षत्स्रावमिति चिन्त्यम् । अजस्रं भूरि स्रवेदिति हि मूलम् ।
(२) सुपरिस्रुतीति वा पाठः ।

पाणिनासौष्ठकर्णेषु वदन्त्येके तु पादवत् ।
श्लीपदं जायते

शरीर प्रदेशान्तरेऽपि श्लीपदसम्भवमेकीयमतेनाह पाणिनासौष्ठेत्यादिना श्लीपदं जायते इत्यन्तेन । एतेन प्रस्थिता वङ्क्षणोर्व्वादिमित्यादिना या संप्राप्तिरुक्ता सा प्राधान्येन श्लीपद व्यवहार विषयस्य पादगतस्यैव ज्ञेया । श्लीपदे प्रकोपज्वरो भवति तेन पाणिनासादौ श्लीपद सन्देहे प्रकोपज्वरे सति तत्र तत्र श्लीपदावधारणं कर्त्तव्यमिति वदन्ति । २३

तच्च देशेऽनूपे भृशं भृशम् ॥ २३ ॥

प्रायः श्लीपदकारणं देशमाह तच्चेत्यादि । –२३

मेदःस्थाः कण्ठ-मन्याक्ष-कक्षा-वंक्षणगा मलाः ।
सवर्णान् कठिनान् स्निग्धान् वार्ताकामलकाकृतीन् ॥ २४ ॥
अवगाढान् बहून् गण्डांश्चिरपाकांश्च कुर्वते ।
पच्यन्तेऽल्परुजस्त्वन्ये स्रवन्त्यन्येऽतिकण्डुराः ॥ २५ ॥
नश्यन्त्यन्ये भवन्त्यन्ये दीर्घकालानुबन्धिनः ।
गण्डमालापची चेयं दूर्वेव क्षयवृद्धिभाक् ॥ २६ ॥

गण्डमालामाह मेदःस्था इत्यादि । अक्षो बाहुंस-जत्रुसन्धेः कीलकरूपमस्थि । अवगाढानिति दूरप्रविष्टमूलान् । अपचीचेयं दूर्व्वेव क्षयवृद्धिभागिति इयमेव गण्डमाला दूर्व्वेव यदि पुनः क्षयं भजते पुनः पुनश्च वृद्धिं भजते तदाऽपचीत्युच्यते । तेन चीयते अपचीयते चेत्यपचीति निरुक्तिर्दर्शिता । अपची शब्दश्च नैरुक्तेन विधिना साध्यः । वचनं हि

"वर्णागमो वर्णविपर्य्ययश्च द्वौचापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग स्तदुच्यते पञ्चविधं निरुक्तम्" इति ॥ २४–२६

तां त्यजेत् सज्वर-छर्दि-पार्श्वरुक्कास-पीनसाम् ।

तस्याएव ज्वराद्युपद्रवयोगादसाध्यतामाह तामित्यादि । २७—

अभेदात् पक्वशोफस्य व्रणे चापथ्यसेविनः ॥ २७ ॥
अनुप्रविश्य मांसादीन् दूरं पूयोऽभिधावति ।

गतिः सा दूरगमनान्नाडी नाडीव संस्रुतेः ॥ २८ ॥

व्रणत्व सामान्यात् नाडीव्रणमप्यत्रैवाह अभेदादित्यादि । अभेदादिति पक्वएवापक्वभ्रमेणापाटनात् । आदिशब्दात् त्वक् शिरा स्नाय्वादीन् । नाडीव संस्रुतेरिति अन्तःशुषिर नलादि नाडीवत् संस्रवणात् । –२७।२८

नाड्येकानृजुरन्येषां सैवानेकगतिर्गतिः ।

मतान्तरमाह नाड्येकेत्यादि । अन्येषां तन्त्रकाराणां मते एका तथा अनृजुर्वक्रा या सा नाडीत्युच्यते । सैव नाडी यद्यनेकगतिरित्यनेकमार्गा भवति तदा गतिरित्युच्यते । २९–

सा दोषैः पृथगेकस्थैः शल्यहेतुश्च पञ्चमी ॥ २९ ॥

सा दोषैरित्यादि । सा नाडी पृथक् दोषै स्त्रिविधा भवति । एकस्थैरिति मिलितैश्चतुर्थी भवति । शल्यनिमित्तजा तु पञ्चमीति । –२९

वातात् सरुक्सूक्ष्ममुखी विवर्णा फेनिलोद्वमा ।
स्रवत्यभ्यधिकं रात्रौ

तत्र वातादित्यादिना रात्राविन्यन्तेन वातिकनाड्या लक्षणमाह । अत्र रात्रावधिक स्रवणं शैत्येन वातवृद्धेः । ३०—

पित्तात्तृड्ज्वरदाहकृत् ॥ ३० ॥
पीतोष्णपूतिपूयस्रुद्दिवा चाति निषिञ्चति ॥ ३१ ॥

पित्तादित्यादिना निषिञ्चतीत्यन्तेन पैत्तिक नाडी लक्षणमाह । पीतोष्णं पूतिपूयं स्रवतीति क्विप् । निषिञ्चति स्रवति । –३०।३१

घनपिच्छिलसंस्रावा कण्डुला कठिना कफात् ।
निशि चाभ्यधिकक्लेदा

घनेत्यादिना क्लेदेत्यन्तेन कफनाडी लक्षणमाह । ३२—

सर्वैः सर्वाकृतिस्त्यजेत् ॥ ३२ ॥

सर्व्वजामाह सर्व्वैरित्यादि ।–३२

अन्तःस्थितं शल्यमनाहृतन्तु करोति नाडीं वहते च साऽस्य ।
फेनानुविद्धं तनुमल्पमुष्णं सास्रञ्च पूयं सरुजञ्च नित्यम् ॥ ३३ ॥

इति श्रीमद् वाग्भट विरचितायां मष्टाङ्गहृदय संहितायां मुत्तरे
तन्त्रे ग्रन्थ्यर्बुद श्लीपदापची नाडी विज्ञानीयं
नामैकोनत्रिंशोऽध्यायः ।

शल्यजामाह अन्तः स्थितमित्यादि । वहते च साऽस्येति अस्य पुंसः सा नाडी नित्यं पूयं वहते इत्यन्वयः । एते च फेनानुविद्धसास्रत्वादयो धर्माः प्रसारणादौ चलता शल्येन मांसादिक्षोभाद् भवन्ति । ३३

इति (श्रीशिवदास सेन कृते अष्टाङ्ग हृदय तत्त्वबोधे)
उत्तरे तन्त्रे एकोनत्रिंशोऽध्यायः ।

त्रिंशोऽध्यायः ।

अथातो ग्रन्थ्यर्बुद श्लीपदापची-नाडीप्रतिषेधं व्याख्यास्यामः
इति ह स्माह आत्रेयादयो महर्षयः ॥ १ ॥
ग्रन्थिष्वामेषु कर्तव्या यथास्वं शोफवत् क्रिया ।
बृहती-चित्रक-व्याघ्री-कणासिद्धेन सर्पिषा ॥ २ ॥
स्नेहयेच्छुद्धिकामञ्च तीक्ष्णैः शुद्धस्य लेपनम् ।
संस्वेद्य बहुशो ग्रन्थिं विमृद्नीयात् पुनः पुनः ॥ ३ ॥
एष वाते विशेषेण क्रमः

चिकित्सितस्य रोगज्ञानाधीनत्वात् ग्रन्थ्यादि विज्ञानीयानन्तरं ग्रन्थ्यादि प्रतिषेध उच्यते । शोफवदिति आमशोफवत् । तीक्ष्णैर्लेपनमित्यन्वयः । विमृद्नीयादिति अङ्गुष्ठवेणुनाड्यादिभिः । १—३

पित्तास्रजे पुनः ।
जलौकसो हिमं सर्वं कफजे वातिको विधिः ॥ ४ ॥

पित्तास्रजइत्यादौ हिममिति शीतवीर्य्यप्रलेपसेकादि । उक्तं हि सुश्रुते
"जलायुकाः पित्तकृतेहितास्तु क्षीरोदकाभ्यां परिषेचनञ्च ।
काकोलिवर्गस्य च शीतलानिपिबेत् कषायाणि सशर्कराणि" ॥ (चि॰ १८ अ॰)
इत्यादि । ४

तथाप्यपक्वं छित्त्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्वशेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥ ५ ॥
मांसव्रणोद्भवौ ग्रन्थी पाटयेदेवमेव च ।
कार्यं मेदोभवेऽप्येतत्तप्तैः फालादिभिश्च तम् ॥ ६ ॥
प्रमृज्यात्तिलदिग्धं न क्षुण्णं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सूद्धृते ॥ ७ ॥

तथापीत्यादि । तथापि यद्यपक्वो भवति ग्रन्थिस्तदा एनं ग्रन्थिं साध्वशेषं छित्त्वा रक्ते स्थिते सत्यग्निना दहेत् । किंवा तथापीत्यनन्तरमनुपशाम्यमानमिति शेषः । सुश्रुतेऽप्युक्तम्

"असमंजञ्चानुपशाम्यमानमपक्कमेवापहरेद्विदार्य्यं ।
दहेत् स्थिते चासृजि सिद्धकर्म्मा सद्यः क्षतोक्तञ्च विधिं विदध्यात्" ॥ (चिं १८)

इति । आप्याय्यते इति वर्द्धते । यापयेदिति मांसव्रणभवयोरसाध्यत्वात् । तमिति मेदोभवं ग्रन्थिम् । तिलदिग्धेन द्विगुणीकृतेन वाससा छन्नमावृतं कृत्वा तप्तैः फालादिभिः प्रमृद्यात् विम्लापयेत् । एतञ्च तथा कर्त्तव्यं यथा दाहो न स्यात । उक्तं हि सुश्रुते

"मेदः समुत्थे तिलकल्कदिग्धं दत्त्वोपरिष्टाद द्विगुणं पटान्तम् ।
हुताशतप्तेन मुहुः प्रमृद्यात् कालेन धीमान्दहनं हिताय ॥" (चिं १८)

इति । सूद्धृत इति गम्यगुद्धृते । ५—७

शिराग्रन्थौ नवे पेयं तैलं साहचरं तथा ।
उपनाहोऽनिलहरैर्वस्तिकर्मशिराव्यधः ॥ ८ ॥

शिराग्रन्थावित्यादौ साहचरं तैलमिति वातव्याध्युक्तम् । ८

अर्वुदे ग्रन्थिवत् कुर्यात् यथास्वं सुतरां हितम् ॥ ९ ॥

अर्वुदइत्यादौ हितमिति चिकित्सितम् । ९

श्लीपदेऽनिलजे विध्येत् स्निग्धस्विन्नोपनाहिते ।
शिरामुपरि गुल्फस्य द्व्यङ्गुले पाययेच्च तम् ॥ १० ॥
मासमैरण्डजं तैलं गोमूत्रेण समन्वितम् ।
जोर्णे जीर्णान्नमश्नीयाच्छुण्ठीशृतपयोन्वितम् ॥ ११ ॥
त्रैवृतं वा पिवेदेवमशान्तावग्निना दहेत् ।

श्लीपद चिकित्सामाह श्लीपद इत्यादि । जीर्णे चैरण्डतैले जीर्णान्नमिति पुराणमन्नमश्नीयात् शुण्ठीशृतक्षीरसहितम् । त्रिवृतम् इति स्नेहत्रयम् । एतदपि शुण्ठीशृतमिति ज्ञेयम् । १०—१२—

गुल्फस्याधः शिरामोक्षः पैत्ते सर्वञ्च पित्तजित् ॥ १२ ॥

गुल्फस्याध इत्यादिना पैत्तिक श्लीपद चिकित्सामाह । चकारात्कफजित्कर्म्मकार्य्यं श्लीपदे कफसम्बन्धस्यावश्यकत्वादित्याहुः । —१२

शिरामङ्गुष्ठके विद्ध्वा कफजे शीलयेद्यवान् ।
सक्षौद्राणि कषायाणि वर्द्धमानास्तथाभयाः ॥
लिम्पेत् सर्षप-वार्ताकी-मूलाभ्यां धान्ययाथवा ॥ १३ ॥

शिरामित्यादिना कफश्लीपद चिकित्सा माह । अङ्गुष्ठक इति पादाङ्गुष्ठसन्निधौ । कषायानीति कफहरारग्वधादिगणकृतानि, अरुणस्तु-कषायरस युक्तानि द्रव्याणीत्याह । वर्द्धमानास्तथाऽभया इति द्व्यादि क्रमेण वर्द्धमाना हरीतक्यो हिताइत्यरुणः । अन्येतु वर्द्धमान शब्दोऽत्र एरण्डतैलमुच्यते । तद्योगाद् वर्द्धमाना हरीतक्यइत्याहुः । वार्त्ताकी वृहती, धान्यं धनीयकम् । १३

ऊर्ध्वाधः शोधनं पेयमपच्यां साधितं घृतम् ।
दन्ती-द्रवन्ती-त्रिवृता-जालिनी-देवदालिभिः ॥ १४ ॥
शीलयेत् कफमेदोघ्नं धूमगण्डुषनावनम् ।
शिरयाऽपहरेद्रक्तं पिवेन्मूत्रेण तार्क्ष्यजम् ॥ १५ ॥
ग्रन्थीनपक्कानालिम्पेन्नाकुलीपटुनागरैः ।

ऊर्ध्वाधइत्यादिना अपचीचिकित्सामाह । अपच्यामूर्ध्वशोधनं वमनमधःशोधनञ्च विरेचनं पेयम् । तथा दन्त्यादिभिः साधितं घृतं वा शीलयेत् । जालिनी ज्योत्स्निका । देवदाली हस्तिकोपातकी । तथा धूम गण्डुष नावनञ्च शीलयेत् । तार्क्ष्यजं रसाञ्जनम् । नाकुली रास्ना, पटु सैन्धवम् । १४—१६—

स्विन्नान् लवणपोटल्या कठिनाननुमर्दयेत् ॥ १६ ॥
शण-मूलक-शिग्रूमा (१) बीजैः सयवसर्षपैः ।
लेपः पिष्टोऽम्लतक्रेण ग्रन्थिगण्डविलापनः ॥ १७ ॥

स्विन्नानित्यादि । कठिनान् ग्रन्थीन् लवणपोटल्या स्विन्नान् अनन्तरं मर्दयेदङ्गुष्ठादिभिः । शणेत्यादौ शणस्थाने केचित् शमीं पठन्ति । उमा अतसी । —१६।१७

पाकोन्मुखान् स्रुतास्रस्य पित्तश्लेष्महरैर्जयेत् ।
अपक्कानेव चोद्धृत्य क्षाराग्निभ्यामुपाचरेत् ॥ १८ ॥

पाकोन्मूखानित्यादौ ग्रन्थीनित्यर्थः । १८

(१) शिग्रूणामिति वा पाठः ।

काकादनी-लाङ्गलिकामहिकातुण्डिकाफलैः ।
जीमूतबीजकर्कोटीविशालाकृतवेधनैः ॥ १९ ॥
पाठान्वितैः पलार्द्धांशैर्विषकर्षयुतैः पचेत् ।
प्रस्थं करञ्जतैलस्य निर्गुण्डीस्वरसाढकैः ॥ २० ॥
अनेन माला गण्डानां चिरजा पूयवाहिनी ।
सिध्यत्यसाध्यकल्पापि पानाभ्यञ्जननावनैः ॥ २१ ॥

काकादनीत्यादौ काकादनी श्वेतगुञ्जा । लाङ्गलिका 'ईशलाङ्गलिकेति' ख्याता । महिका रेणुका, यतो हिमाह्वेति रेणुका पर्य्यायः महिकाशब्दश्च हिमवचन इति । तुण्डिका विम्बी तस्याः फलम् । जीमूतः पीतघोषकस्तस्य बीजम् । कर्कोटी महाजालिनी घोषकभेदः तत्फलम् । विशाला गोरक्षकर्कटी । कृतवेधनं ज्योत्स्निका । १९।२१

तैलं लाङ्गलिकीकन्द कल्कपादे चतुर्गुणे ।
निर्गुण्डीस्वरसे पक्वं नस्याद्यैरपचीप्रणुत् ॥ २२ ॥

तैलमित्यादि स्पष्टम् । २२

भद्रश्री-दारु-मरिच-द्विहरिद्रा-त्रिवृद्घनैः ।
मनःशिलाल-नलद-विशाला-करवीरकैः ॥ २३ ॥
गोमूत्रपिष्टैः पलिकैर्विषस्यार्द्धपलेन च ।
ब्राह्मीरसार्कजक्षीरगोशकृद्रस संयुतम् ॥ २४ ॥
प्रस्थं सर्षपतैलस्य सिद्धमाशु व्यपोहति ।
पानाद्यैः शीलितं कुष्ठ-दुष्टनाडीव्रणापचीः ॥ २५ ॥

भद्रश्रीः श्वेतचन्दनम् । दारु देवदारु । घनो मुस्तकः । ब्राह्मीरसादीनां त्रयाणां द्रवाणां मिलित्वा तैलापेक्षया चातुर्गुण्यम् । २३—२५

वचाहरीतकी-लाक्षा-कटुरोहिणि-चन्दनैः ।
तैलं प्रसाधितं पीतं समूलामपचीं जयेत् ॥ २६ ॥
शरपुङ्खोद्भवं मूलं पिष्टं तण्डुलवारिणा ।
नस्याल्लेपाच्च दुष्टारुरपचीविषजन्तुजित् ॥ २७ ॥

वचत्यादौ वचादीनां कल्कः । २६।२७

मूलैरुत्तमकारण्याः पीलुपर्ण्याः सहाचरात् ।
सरोध्राभय-यष्ट्याह्व-शताह्वा-द्वीपि-दारुभिः ।
तैलं क्षीरसमं सिद्धं नस्येऽभ्यङ्गे च पूजितम् ॥ २८ ॥

मूलैरित्यादौ उत्तमकारणी करम्भइत्यरुणः । अन्येतु उत्तमकारणी लता देशान्तर प्रसिद्धेत्याहुः । पीलुपर्णी मूर्वा । अभयमुशीरं, द्वीपी चित्रकः । अत्र चतुर्गुणद्रवत्वं पाकस्योत्सर्गसिद्ध मितिकृत्वा जलमपि त्रिगुणं देयमित्याहुः । २८

गोव्यजाश्वखुरा दग्धा कटुतैलेन लेपनम् ।
पेङ्गुदेन तु कृष्णाहिर्वायसो वा स्वयं मृतः ॥ २९ ॥

गोव्यजाश्वेत्यादि । गवादीनां खुरान् दग्ध्वा कटुतैलेन लेपनं हितम् । तथा स्वयं मृतं कृष्णसर्पं वायसं वा दग्ध्वा इङ्गुदीभवेन तैलेन लेपनं हितम् । इङ्गुदी तु पुत्रञ्जीवकः । २९

इत्याशान्तौ गदस्यान्यपार्श्वजङ्घासमाश्रितम् ।
वस्तेरूर्ध्वमधस्ताद्वा मेदो हृत्वाग्निना दहेत् ॥ ३० ॥

इत्यशान्तावित्यादि । अन्यपार्श्वजङ्घासमाश्रितमिति । यस्मिन् पार्श्वे अपची तदन्यपार्श्वे जङ्घा समाश्रितं मेद इत्यर्थः । वस्तेरितीन्द्रवस्तेः । ३०

स्थितस्यार्द्धं पदं मित्वा तन्माने च पार्ष्णितः ।
तत ऊर्ध्वं हरेद्ग्रन्थीनित्याह भगवान्निमिः ॥ ३१ ॥

स्थितस्येत्यादि । स्थितस्य दण्डायमानस्य अर्द्धं पदं मित्वा परिमाय तन्मानेन पार्ष्णि प्रदेशात्तावन्मात्रं मित्वा तत ऊर्ध्वं ग्रन्थीन् हरेत् इति भगवान्निमिराह । ३१

पार्ष्णिं प्रति द्वादशचाङ्गुलानि मुक्त्वेन्द्रवस्तिञ्च गदान्यपार्श्वे ।
विदार्य मत्स्याण्डनिभानि मध्याज्जालानि कर्षेदिति सुश्रुतोक्तिः ॥३२॥

सौश्रुतं मतमाह पार्ष्णिं गुल्फस्य पश्चाद्भागमारभ्य द्वादश चाङ्गुलानि मुक्त्वा इन्द्रवस्तिञ्च द्व्यङ्गुल परिमितं मुक्त्वा गदान्यपार्श्वे इति यस्मिन् पार्श्वे अपची तदन्यपार्श्वे विदार्य्य मत्स्याण्डनिभानि जालानि मेदोजालानि मत्स्याण्ड-सदृशान्याकर्षेदिति सुश्रोतोक्तिः । ३२

आगुल्फकर्णात् सुमितस्य जन्तोस्तस्याष्टभागं खुडकाद्विभज्य ।
घ्राणार्जवेऽधः सुरराजबस्तेर्मित्वाङ्गमात्रं त्वपरे वदन्ति ॥ ३३ ॥

मतान्तर माह आगुल्फकर्णादित्यादि । कर्णादारभ्य गुल्फं यावत् सुष्ठु मितस्य जन्तोः प्राणिनः खुडकात् गुल्फात् अष्टमं भागं विभज्य पृथक्कृत्वा सुरराज-बस्तेरिन्द्रबस्त्याख्यमर्मणोऽधः अङ्गिमात्रं अङ्गिप्रमाणं मित्वा सन्धानदहनमपि कर्णादित्यपरे वदन्ति । कर्णान्तो ह्रस्वदीर्घत्वेनानियतत्वात् स्थाननियमं कर्णमान-क्रियाविशेषणमाह घ्राणार्जव इति । नासाग्र मपेक्ष्य ऋजु यथा स्यात्तथा कर्णा-दारभ्यागुल्फं सुमितस्येत्यर्थः । ३३

उपनाह्यानिलान्नाडीं पाटितां साधु लेपयेत् ।
प्रत्यक्पुष्पीफलयुतैस्तिलैः पिष्टैः ससैन्धवैः ॥ ३४ ॥

उपनाह्येत्यादिना नाडीव्रण चिकित्सामाह । साधु पाटितामित्यन्वयः । प्रत्यक् पुष्प्याः फलं अपामार्गस्य बीजम् । ३४

पित्तजां तिल-मञ्जिष्ठा-नागदन्ती-निशाद्वयैः ।

पित्तजामित्यादौ नागदन्ती स्थूलमूला दन्ती । ३५—

श्लेष्मजां तिलसौराष्ट्रीनिकुम्भारिष्टसैन्धवैः ॥ ३५ ॥

श्लेष्मजामित्यादौ सौराष्ट्री सुराष्ट्र देशजा मृत्तिका । निकुम्भो दन्ती । अरिष्टो निम्बवृक्षः । —३५

शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ।

शल्यजामित्यादौ छिन्न शोधितामिति आदौ छिन्नामिति पाटितां पश्चाच्छल्यं निर्हृत्य शोधितामित्यर्थः । ३६—

अशस्त्रकृत्यामेषण्या भित्त्वान्ते सम्यगेषिताम् ॥ ३६ ॥
क्षारपीतेन सूत्रेण बहुशो दारयेद् गतिम् ।

अशस्त्रकृत्यामित्यादि । अशस्त्रकृत्या तु नाडी या कृशदुर्बलभीरूणां, मर्माश्रिता च या भवति । एषण्या सम्यगेषितामित्यन्वयः । अन्ते भित्त्वेत्यत्र सूच्येति शेषः । क्षारपीतेनेति क्षारोदक भावितेन । —३६।३७—

व्रणेषु दुष्टसूक्ष्मास्यगम्भीरादिषु साधनम् ॥ ३७ ॥
या वर्त्यो यानि तैलानि तन्नाडीष्वपि शस्यते ।

दुष्टव्रणचिकित्सितं नाडीष्वप्यतिदिशति व्रणेष्वित्यादि । —३७।३८—

पिष्टं चञ्चुफलं (१) लेपान्नाडीव्रणहरं परम् ॥ ३८ ॥

पिष्टमित्यादौ चञ्चु र्नाडीचः । —३८

घोण्टाफलत्वग्लवणं सलाक्षं पूगात् फलञ्चालवणञ्च पत्रम् ।
स्नुगर्कदुग्धान्वित एष कल्को वर्तीकृतो हन्त्यचिरेण नाडीम् ॥ ३९ ॥

घोण्टेत्यादौ घोण्टा वन्यं बदरं तस्याः फलं त्वक् च । लवणं सैन्धवं सामान्यात् प्रसिद्धेः । पूगात् फलमिति शुष्कं पूगफलम् । आलवणञ्च पत्रमिति अलवणा ज्योतिष्मती तस्याः पत्रमालवणम् । अन्येतु "घोण्टाफलत्वग् लवणं सलाक्षं पूगस्य पत्रं वनितापयश्च" इति पठन्ति । अपरेतु "घोण्टाफलत्वक् मदनात् फलानि" इति पठन्ति । किन्तु पूर्वपाठ एव प्राचीन टीकाकारसम्मत इति । —३९

सामुद्र-सौवर्चल-सिन्धुजन्म-सुपक्वघोण्टाफल-वेश्मधूमाः ।
आम्रातगायत्रिजपल्लवाश्च कटङ्कटेर्याश्च चेतकी च ॥
कल्कोऽयमङ्गे चूर्णं वर्ती तैलेषु सेव्यमानेषु ।
श्रान्तिरिव नश्यति गतिश्चपला चपलेषु भूतिरिव ॥ ४१ ॥

इति श्रीमद्वाग्भट विरचितायां अष्टाङ्गहृदय संहितायामुत्तरे तन्त्रे
ग्रन्थ्यर्बुद श्लीपदापची नाडी प्रतिषेधो नाम त्रिंशोऽध्यायः ॥

सामुद्रेत्यादि । वेश्मधूम आगारधूमः । कटङ्कटेरी दार्वीहरिद्रा । ४०।४१

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदयतत्त्वबोधे) उत्तरे तन्त्रे त्रिंशोऽध्यायः ॥

---

(१) चञ्चुफल मिति वा पाठः । चञ्चुफलमिति 'कारीर्द इ' इति भट्टीका । सिद्ध-कर्णीति टीका ।

एकत्रिंशोऽध्यायः ।

अथातः क्षुद्ररोगविज्ञानीयं व्याख्यास्यामः

इति ह स्माहुरात्रेयादयो महर्षयः ॥ १ ॥

रोगगणाभिधायकत्वसामान्यात् ग्रन्थ्यादि प्रतिपादिताध्यायानन्तरं क्षुद्ररोगाध्याय उच्यते । किं वा ग्रन्थ्यादीनामनति क्षुद्रहेतु लक्षण चिकित्सितत्वेनोक्तानामनन्तरं क्षुद्रहेतु-लक्षण-चिकित्सितानां व्याधीनामभिधानाय क्षुद्ररोग विज्ञानीयमुच्यते । १

स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।

पिडका कफ-वाताभ्यां बालानामजगल्लिका ॥ २ ॥

तत्र स्निग्धेत्यादिना अजगल्लिकामाह । बालानामिति प्रायोभावित्वादुक्तम् तेनाबालानामपि कदाचिद् भवतीति ज्ञेयम् । २

यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।

यवप्रख्येति यववत् मध्ये स्थूलतया यवसदृशी या पिडका सा यवप्रख्येत्युच्यते । ताभ्यामिति कफवाताभ्यां । घनेति कठिना । ३—

अवक्त्राश्चालजीवृत्तास्तोकपूया घनोन्नताः ॥ ३ ॥

अलजीमाह अवक्त्रेत्यादि । —३

ग्रन्थयः पञ्च वा षड् वा कच्छपी कच्छपोन्नता ।

कच्छपिकामाह ग्रन्थय इत्यादि । ग्रन्थय इति ग्रन्थ्याकाराः पिडकाः । कच्छपोन्नता इति कच्छपवत् मध्ये उन्नता । ४—

कर्णस्योर्ध्वं समन्ताद्वा पिडका कठिनोग्ररुक् ॥ ४ ॥

शालूकाभा पनसिका

कर्णस्येत्यादिना पनसिकेत्यन्तेन पनसिकामाह । इयमपि कफवाताभ्यां ज्ञेया । उक्तं हि भोजे

"कफवातौ प्रकुपितौ मांसमाश्रित्य कर्णयोः ।

समन्ततः परिक्षिप्तां कुरुतः पिडकां स्थिराम् ॥

विषमां दाह संयुक्तां विद्यात् पनसिकान्तुताम्" ॥ इति

दाहश्चात्र वात कफजायामप्यधिष्ठान भूतरक्त प्रभावादवगन्तव्यः । —४।१—

शोफस्त्वल्परुजः स्थिरः ।

हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्दभः ॥ ५ ॥

शोफ इत्यादिना पाषाणगर्दभमाह । अयञ्च लोके 'गालफाडुआ' इति ख्यातः । ताभ्यामिति वातकफाभ्याम् । —५

शाल्मलीकण्टकाकाराः पिडकाः सरुजो घनाः ।

मेदोगर्भा मुखे यूनां ताभ्याञ्च मुखदूषिकाः ॥ ६ ॥

ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।

चीयते नीरुजैश्श्वेतैः शरीरं कफवातजैः ॥ ७ ॥

शाल्मलीत्यादिना युवानपिडकामाह । घना इति कठिनाः । मुखे यूनामित्यनेनास्या युवानपिडका संज्ञा सूचिता यतो यूनामाननपिडका युवानपिडकेति तस्या निरुक्तिः । पद्मपिडिकाञ्च चीयत इत्यादि नैरुक्तविधिना । ताभ्यामिति कफ वाताभ्यां । मुखमेव दूषयन्तीति मुखदूषिकाः । ते पद्मकण्टका इत्यादि स्पष्टम् । ६।७

पित्तेन पिडका वृत्ता पक्वोदुम्बरसन्निभा ।

महादाहज्वरकरी विवृता विवृतानना ॥ ८ ॥

विवृतामाह पित्तेनेत्यादि । पित्तकृत पाकभूयस्त्वेन विवृतमुखतया विवृता संज्ञा । ८

गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।

मसूरमात्रास्तद्वर्णास्तत्संज्ञाः पिडका घनाः ॥ ९ ॥

गात्रेष्वन्तरित्यादिना मसूरीमाह । तद्वर्णा इति मसूरवर्णाः । अत्र दाहान्वितत्वेन मसूरवत्ताम्रवर्णत्वेन च रक्तदुष्टिरपि सूचिता । तदुक्तं भोजे- "मसूरिका स्तु ताः ज्ञेया पिडकाः पित्तरक्तजाः" इति । ९

ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः ।

विस्फोटानाह तत इत्यादि । तत इति मसूरिकातः । केचिदमुं विसर्पभेदत्वान्न पठन्ति । पठनीय स्त्वयं सुश्रुते क्षुद्ररोगोद्देशे दर्शितत्वात् । भोजेऽप्यस्य लक्षणं पठ्यते यथा—

"पित्तं रक्तञ्च कुपितं वातेनानुगतं त्वचि ।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेहगान् ।
सज्वरान् सपरीदाहान् विद्याद्विस्फोटकांस्तु तान्" ॥ इति

अत्र त्वचीति वचनात् कुष्ठवत् विसर्पवच्च नास्य साप्तधातुकत्वमिति दर्शयन् ततोभेदेन क्षुद्ररोगत्वं दर्शयति । १० —

या पद्मकर्णिकाकारा पिड़का पिड़कान्विता ॥ १० ॥
सा वृद्धा (१) वात-पित्ताभ्यां

या पद्मकर्णिकाकारेत्यादिना वृद्धामाह । पद्मकर्णिका पद्मवराटः । इयमेव सुश्रुते इन्द्रविद्धेति नाम्ना पठ्यते यथा—

"पद्मकर्णिकवन्मध्ये पिड़काभिः समाचितम् ।
इन्द्रविद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥" इति ।
(नि॑ १३ अ॑) —१०।११—

ताभ्यामेव च गर्दभी ।
मण्डला विपुलोत्सन्ना सरागपिड़काचिता ॥ ११ ॥

ताभ्यामित्यादिना गर्दभीमाह । ताभ्यामिति वातपित्ताभ्याम् । मण्डलेति मण्डलाकृतिः विपुला विस्तीर्णा । उत्सन्ना उन्नता । —११

कच्चेति कत्तासन्नेषु प्रायो देशेषु सानिलात् ।
पित्ताद्भवन्ति पिड़काः सूक्ष्मा लाजोपमा घनाः ॥ १२ ॥

कक्षेत्यादिना घना इत्यन्तेन कक्षामाह । कक्षासन्नेषु देशेषु बाहुपार्श्वांसेषु सानिलात् वायुसहितात् पित्तात् लाजोपमाः सूक्ष्माः पिड़का भवन्ति सा कक्षेत्युच्यते । यद्यपि सुश्रुते

"बाहु पार्श्वांस कक्षेषु कृष्णाः स्फोटाः सवेदनाः ।
पित्त प्रकोप सम्भूतां कक्षामित्यभि निर्द्दिशेत् ॥" (नि॑ १३ अ॑)

इत्यनेन पित्तजत्व मेवास्या उक्तम् तथापि सवेदना इति वचनात् वात-सम्बन्धोऽपि तस्य बोध्य इति न विरोधः । १२

(१) विद्धामितिवा पाठः ।

तादृशी महती त्वेका गन्धनामेति कीर्तिता ।

तादृशीत्यादिना गन्धनामामाह । तादृशीति कक्षोक्त स्फोट सदृशी यद्येका भवति तदा गन्धनामेत्युच्यते । १३—

घर्मस्वेदपरीतेऽङ्गे पिड़का सरुजो घनाः ॥ १३ ॥
राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः ।

घर्म्मस्वेदेत्यादिना राजिकाख्यां पिड़कामाह । सरुज इति ईषद्रुजः । इयमेव लोके "घामाची"इत्युच्यते । —१३।१४—

दोषैः पित्तोल्बणैर्मन्दैर्विसर्पति विसर्पवत् ॥ १४ ॥
शोफोऽपाकस्तनुस्ताम्रो ज्वरकृज्जालगर्दभः ।

दोषैरित्यादिना जालगर्दभमाह । अपाक इतीषत्पाकः । पित्तोल्बणत्वेन सर्व्वथा पाकाभावस्यायुक्तत्वात् । जालगर्दभः लोके 'आगियाबात' इति ख्यातः । अन्येतु 'वराहदाड़' इति नाम्ना ख्यातं वदन्ति । —१४।१५

मलैः पित्तोल्बणैः स्फोटा ज्वरिणो मांसदारणाः ॥ १५ ॥
कक्षाभागेषु जायन्ते येऽग्न्याभाः साग्निरोहिणी ।
पञ्चाहात् सप्तरात्राद्वा पक्षाद्वा हन्ति जीवितम् ॥ १६ ॥

मलैरित्यादिना अग्निरोहिणीमाह । अत्र पञ्चाहादि विकल्पो यथाक्रमं वातपित्तकफाधिक्यात् ज्ञेयः । एतच्चासाध्यत्वाभिधानं अनुपक्रमात् मिथ्योपक्रमाद्वा बोध्यम् । उपक्रमात्तु साध्यैव अतएव पित्तविसर्पवदित्यनेनास्याश्चिकित्सामभिधास्यति । तन्त्रान्तरेऽप्युक्तम् –

"पित्तरक्तोत्कटा दोषाः प्रदीप्ताङ्गारसन्निभाम् ।
कक्षाभागेषु कुर्व्वन्ति तीव्रदाहरुजाज्वरान् ।
मांसावदारणान् स्फोटान् ये हन्युरनुपक्रमात्" । इति —१५।१६

त्रिलिङ्गा पिड़का वृत्ता जत्रूर्ध्वमिरिवेल्लिका ।

त्रिलिङ्गेत्यादिना इरिवेल्लिकामाह । त्रिलिङ्ग इति दोषत्रयलिङ्गयुक्ता जत्रूर्ध्वमिति शिरसीत्यर्थः । १७—

विदारीकन्दकठिना विदारीकक्षवंक्षणे ॥ १७ ॥

विदारीत्यादिना विदारीमाह । अस्याश्च विदारिकाया विदारीकन्द कठिनत्वेन उद्भूत वातकफत्वं बोध्यम् । उक्तञ्च चरके

"ज्वरान्विताबङ्क्षण कक्षजा या वर्त्तिर्निरत्तिः कठिनायता च ।
विदारिकासा कफमारुताभ्याम्" इति । (चि १२ अं)

अत्र हि ज्वरयुक्तत्वेनाल्पपित्तसम्बन्धोऽपि बोध्यः । तेन सुश्रुते सर्व्वजेति यदुक्तं तेन सह न विरोधः । —१७

मेदोऽनिलकफैर्ग्रन्थिः स्नायु-मांस-शिराश्रयैः ।
भिन्नो वसाज्यमध्वाभं स्रवेत्तत्रोल्बणोऽनिलः ॥ १८ ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ।

मेदोऽनिलेत्यादिना शर्करा(मुपपादयेत्)इत्यन्तेन शर्करार्बुद हेतुभूतां शर्करामाह । ग्रन्थिरित्यनन्तरं जनित इति शेषः । स्नाय्वादि संश्रयैः मेदःप्रभृतिभिर्जनितो ग्रन्थिर्भिन्नः सन् वसादिसदृशं स्रावं स्रवेत् । तत्रेति ग्रन्थौ । उल्बणोऽनिल इति धातुक्षयेण वृद्धिं गत इत्यर्थः । १८।१९—

दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥ १९ ॥
तां स्रावयन्ति निचितं विद्यात्तच्छर्करार्बुदम् ।

शर्करामभिधाय शर्करा कार्य्यस्य शर्करार्बुदस्य लक्षणमाह दुर्गन्धमित्यादि । तामिति ग्रन्थिरूपां शर्करां तमिति पाठे तं ग्रन्थिमित्यर्थः । निचिता इति प्रवृद्धाः मला इत्यन्वयः । भोजेतु पठ्यते ।

"वायुः श्लेष्माणमादायमेदः स्नायु शिरा गतः ॥
करोति विषमं ग्रन्थिं ज्वरदाह समन्वितम् ।
अवगाढं सुकठिनं शर्करान्तां विदुर्बुधाः ॥
स्रवन्ति स्रावमनिशं विद्यात्तां शर्करार्बुदम्" ॥ इति

एतेन शर्कराया-एवावस्थाविशेषः शर्करार्बुद इति न वक्ष्यमाण संख्याऽतिरेक इति ज्ञेयम् । —१९।२०—

पाणि पादतले सन्धौ जत्रूर्ध्वं वोपचीयते ॥ २० ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वद्बहुभिर्मुखैः ।
रुग्दाहकण्डूक्लेदाढ्यो वल्मीकोऽसौ समस्तजः ॥ २१ ॥

पाणिपादेत्यादिना वल्मीकमाह । वल्मीकवदित्यनेन बहुतरोर्ध्वं शिखरत्वं दूरावगाढमूलत्वञ्च दृश्यते । अतएवावगाढमूलशोधनार्थमग्निक्षारचिकित्सितं

वक्ष्यति । तद्वदिति वल्मीकवद् बहुभिर्मुखैश्च चीयते । समस्तज इति सर्व्वदोषजः । —२०।२१

शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
ग्रन्थिः कीलवदुत्सन्नो जायते कदरन्तु तत् ॥ २२ ॥

कदरमाह शर्करेत्यादि । कीलवदित्यत्र कोलवदिति पाठे वदरवत् । भोजेतु हस्तयोरपि कदरमुक्तम्—

"हस्तयोः पादयोश्चापि गम्भीरानुगतं स्वरम् ।
मांसकीलं जनयतः कुपितौ कफमारुतौ ॥
सशल्यमिव तं देशं मन्यते तेन पीड़ितः ।
शर्करा कदरं केचिन्मन्यन्ते वात कण्टकम् ॥ इति । २२

वेगसन्धारणाद्वायुरपानोऽपानसंश्रयम् ।
अणूकरोति बाह्यान्तर्मार्गमस्य ततः शकृत् ॥ २३ ॥
कृच्छ्रान्निर्गच्छति व्याधिरयं बद्धगुदो (१) मतः ।

वेगसन्धारणादित्यादिना बद्धगुदमाह । अपान संश्रयं गुदसंश्रयं वाह्यान्तमार्गं अणूकरोति सूक्ष्मं करोति । शकृदिति पुरीषम् । २३।२४

कुर्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम् ॥ २४ ॥
चिप्पमक्षतरोगञ्च विद्यादुपनखञ्च तम् ।

कुर्य्यादित्यादिना चिप्पमाह । चिप्पोऽङ्गुलिवेष्टक इति ख्यातः । पित्तञ्च अनिलञ्च पित्तानिलं कर्तृ पाकं कुर्य्यात् । अस्यैव पर्य्यायद्वयमाह अक्षतरोगमित्यादि । —२४।२५—

कृष्णोऽभिघाताद्रुक्षश्च खरश्च कुनखो नखः ॥ २५ ॥

कृष्ण इत्यादिना कुनखमाह । अभिघाताद् यो नखः कृष्णो रुक्षः खरश्च स्यात् स कुनखः । —२५

दुष्टकर्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तराः ।
अङ्गुल्योऽलसमित्याहुः

दुष्टकर्दमेत्यादिनाऽलसमित्यन्तेनालसमाह । कण्डूक्लेदान्वितमन्तरं मध्यप्रदेशो यासां । अयञ्च वातरक्तजः । २६—

(१) रुद्धगद इति वा पाठः ।

तिलाभांस्तिलकालकान् ॥ २६ ॥

कृष्णानवेदनांस्त्वक्स्थान्

तिलाभानित्यादिना त्वक्स्थानित्यन्तेन तिलकालकानाह। तिलाभानिति तिल सदृशान्। तन्त्रान्तरे त्वस्य संप्राप्तिरुक्ता

"मारुतः पित्तमादाय कफरक्त समाश्रितः।
चिनोति तिलमात्राणि त्वचि ते तिलकालकाः" इति। —२६।२७—

मसांस्तानेव चोन्नतान्। (१)

मसानाह मसां स्तानेव चोन्नतानिति। तानेव तिलकालकान् उन्नतान् मसानाहुः। तत्र कफो वातश्च दोषः। मेदस्तु दूष्यम्। यदाह भोजः—

'वातेरितेत्वचि यदा दूष्येते कफ मेदसी।
श्लक्ष्णं मृदु सवर्णञ्च कुरुतस्तं मसं वदेत्' इति॥ —२७—

मसेभ्यस्तून्नततरांश्चर्मकीलान् सितासितान् ॥ २७ ॥

चर्म्मकीलानाह मसेभ्य इत्यादि। —२७

तथाविधो जतुमणिः सहजो लोहितस्तु सः।

तथाविध इत्यादिना जतुमणिमाह। अयञ्च लोके "जटुल" इत्युच्यते। तथाविध इति तिलकालकमसवदवेदनत्वादिधर्म्मयुक्तः। सहज इति शरीरेण सह जातः जन्मकालप्रवृत्तः। २८—

कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ॥ २८ ॥

कृष्णमित्यादिना लाञ्छनमाह। इदमेव तन्त्रान्तरे न्यच्छसंज्ञया पठ्यते। यथा—

"महद्वा यदिवाल्यल्पं श्यावंवा यदि वा सितम्।
सहजं मण्डलं गात्रे न्यच्छं लाञ्छन मुच्यते" इति॥—२८

शोकक्रोधादिकुपिताद्वातपित्तान्मुखे तनु।
श्यामलं मण्डलं व्यङ्गं

शोकेत्यादिना व्यङ्गमित्यन्तेन व्यङ्गमाह। २९—

वक्त्रादन्यत्र नीलिका ॥ २९ ॥

वक्त्रादन्यत्रेत्यनेन नीलिकामाह। तत्सदृशमेव मण्डलं वक्त्रादन्यत्र प्रदेशे यदि स्यात्तदा नीलिकेत्युच्यते। भोजेप्युक्तम्—

(१) मासानिति वा पाठः।

'मारुतः क्रोध शोकाद्वा मूर्द्धगो मुखमाश्रितः।
पित्तेन सह संयुक्तः करोति वदनत्वचि॥
नीरुजं तनुकं श्यावं व्यङ्गं तमिति निर्दिशेत्।
कृष्णमेवं गुणं गात्रे नीलिकान्तां विनिर्दिशेत्' इति। —२९

परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात्।
पित्तात्ताम्रान्तमानीलं श्वेतान्तं कण्डुमत् कफात् ॥ ३० ॥
रक्ताद्रक्तान्तमाताम्रं सोषं चिमचिमायते।

व्यङ्गस्य वातादि भेदेन लक्षणमाह परुषमित्यादि। सोषमिति ऊषा दाहः तत्सहितम्। चिमि चिमि सर्षपलिप्तवद्वेदना। ३०।३१—

वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति ॥ ३१ ॥
ततस्त्वग्जायते पाण्डुः क्रमेण च विचेतना।
अल्पकण्डूरविक्लेदा सा प्रसुप्तितः प्रसुप्तिः ॥ ३२ ॥

वायुनेत्यादिना सुप्तिमाह। प्रसुप्तित इति सुप्तवदचेतनत्वात्। —३१।३२

असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥ ३३ ॥
उत्कोठः

असम्यग् वमनेत्यादिना उत्कोठमाह। असम्यग् वमनेन उदीर्णौ तथा अन्ननिग्रहश्छर्दिवेगनिग्रहः तैर्हेतुभिर्यानि मण्डलानि जायन्ते स उत्कोठः। ३३।३४—

सोऽनुबन्धात्तु कोठ इत्यभिधीयते।
प्रोक्ताः षट्त्रिंशदित्येते क्षुद्ररोगा विभागशः ॥ ३४

इति श्रीमद् वाग्भट विरचितायामष्टाङ्गहृदय संहितायामुत्तरे
तन्त्रे क्षुद्र रोगविज्ञानीयं नामैकत्रिंशोऽध्यायः ॥

कोठ माह स इत्यादि। सएव उत्कोठ अनुबन्धात् पुनः पुनर्भवनात् कोठइत्यभिधीयते। उपसंहरति प्रोक्ता इत्यादि। — ३४

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे एकत्रिंशोऽध्यायः ॥

द्वात्रिंशोऽध्यायः।

अथातः क्षुद्ररोगप्रतिषेधं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः।

विस्रावयेज्जलौकोभिरपक्वामजगल्लिकाम्।
स्वेदयित्वा यवप्रख्यां विलापाय प्रलेपयेत् ॥ १ ॥
दारु-कुष्ठ-मनोह्वालैः इत्यापाषाणगर्दभात्।
विधिः

विलापायेति विलापनार्थं। मनोह्वा मनःशिला। आलं हरितालम्। आपाषाणगर्दभादिति तेन यवप्रख्यामारभ्य अलजी कच्छपी पनसिका पाषाणगर्दभ पर्यन्त इति पूर्वोक्तो विधिरित्यर्थः। १।२ –

तांश्चाचरेत् पक्वान् व्रणवत् साजगल्लिकान् ॥ २ ॥
रोध्र-कुस्तुम्बुरु-वचा-प्रलेपो मुखदूषिके।
वटपल्लवयुक्ता वा नारीकेलोत्थशुक्तयः ॥ ३ ॥
अशान्तौ वमनं नस्यं ललाटे च शिराव्यधः।
निम्बाम्बुवान्तो निम्बाम्बुसाधितं पद्मकण्टके ॥ ४ ॥
पिबेत् क्षौद्रान्वितं सर्पिर्निम्बारग्वधलेपनम्।

अपक्वानां तेषां चिकित्सामभिधाय पक्वानाञ्चिकित्सामाह तानित्यादि। आचरेदिति चिकित्सेत्। कुस्तुम्बुरु धनीयकम्। मुखदूषके युवानपिड़कायाम्। नारिकेलोत्थशुक्तय इति नारिकेलसम्भवा शुक्त्याकारामञ्जरी नारिकेल शुक्तिः। निम्बाम्बुसाधितमिति निम्बक्वाथेन साधितम्। निम्बारग्वधलेपन इति निम्बारग्वधपत्राभ्यां लिम्पतीति निम्बारग्वध लेपनः पुरुषः। – २–५ –

विवृतादींस्तु जालान्तांश्चिकित्सेत्सेरिवेल्लिकान् ॥ ५ ॥
पित्तवीसर्पवत्

विवृतादीनित्यादि। जालान्तानिति जालगर्दभान्तान्। आदि शब्दान्मसूरी विस्फोट वृद्धागर्दभी कक्षागन्धनामा राजिकानां ग्रहणम्। –५।६–

तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥ ६ ॥

तद्वदित्यादि। अग्निरोहिणीमपि तद्वदिति पित्तविसर्पवच्चिकित्सेत्। –६

विलङ्घनं रक्तविमोक्षणञ्च विरूक्षणं कायविशोधनञ्च।
धात्रीप्रयोगान् शिशिरप्रदेहान् कुर्यात् सदा जालकगर्दभस्य ॥ ७ ॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत्।
मेदोऽर्बुदक्रियां कुर्यात् सुतरां शर्करार्बुदे ॥ ८ ॥

विलङ्घन मित्यादि। जालकगर्दभस्य विलङ्घनादि यथावस्थं कुर्य्यात्। धात्री प्रयोगानिति आमलकप्रधानान् रसायनवक्ष्यमाणान् योगान्। ७।८

प्रवृद्धं सुबहुच्छिद्रं सशोफं मर्मणि स्थितम्।
वल्मीकं हस्तपादे च वर्जयेदितरत् पुनः ॥ ९ ॥
शुद्धस्यास्रे हृते लिम्पेत् सपट्वारेवतामृतैः।
श्यामा-कुलत्थिका-मूलदन्ती-पलल-सक्तुभिः ॥ १० ॥
पक्वेतु दुष्टमांसानि गतीः सर्वाश्च शोधयेत्।
शस्त्रेण सम्यगनु च क्षारेण ज्वलनेन वा ॥ ११ ॥
शस्त्रेणोत्कृत्य निःशेषं स्नेहेन कदरं दहेत्।

वल्मीकस्यासाध्यलक्षणाभिधानपूर्व्विकां चिकित्सामाह। प्रवृद्धमित्यादि। पटु सैन्धवम्। आरेवत आरग्वधः तस्य मूलम्। एवं दन्त्या अपि "आरग्वधस्य मूलैश्च दन्त्यामूलैस्तथैवच" इति सुश्रुतवचनात्। अमृतं गुड़ूची। श्यामा श्याममूला त्रिवृत्। पललस्तिलकल्कः। क्षारेण ज्वलनेन वेत्यत्रापि साधयेदित्यन्वयः। स्नेहेनेति तैलेन। ९–१२–

निरुद्धमणिवत् कार्यं रुद्धपायोश्चिकित्सितम् ॥ १२ ॥

निरुद्धेत्यादि। निरुद्धमणिर्निरुद्धप्रकशसंज्ञया तन्त्रान्तरे ख्यातः। स च गुह्यरोगे वक्ष्यमाणः। रुद्धपायोरिति रुद्ध गुदस्य। –१२

चिप्पं शुद्ध्या जितोष्माणं साधयेच्छस्त्रकर्मणा।
दुष्टं कुनखमप्येवम्

चिप्पमित्यादि। शुद्ध्या विरेकेन जितोष्माणं जितपित्तभागम्। एवमिति चिप्पोक्त विधिना। १३–

चरणावलसे पुनः ॥ १३ ॥

धान्याम्लसिक्तौ कासीसपटोलीरोचनातिलैः ।

सनिम्बपत्रैरालिम्पेद्

चरणावित्यादिना आलिम्पेदित्यन्तेनाऽलस चिकित्सामाह । —१३।१४—

दहेत्तु तिलकालकान् ॥ १४ ॥

मसांश्च सूर्यकान्तेन क्षारेण यदि वाऽग्निना ।

दहेदित्यादिना तिलकालकस्य मसस्य च चिकित्सामाह । —१४।१५—

तद्वदुत्कृत्य शस्त्रेण चर्मकीलजतूमणी ॥ १५ ॥

न्यच्छादित्रितये (१) कुर्याद्यथासन्नं शिराव्यधम् ।

लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षत्वगङ्कुरैः ॥ १६ ॥

व्यङ्गेषु चार्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका ।

लेपः सनवनीता वा श्वेताश्वखुरजा मसी ॥ १७ ॥

चर्मकील जतुमण्योश्चिकित्सामाह तद्वदित्यादि । तद्वदिति सूर्य्यकान्तादिभिः दहेदित्यर्थः । न्यच्छादित्रितय इति लाञ्छनस्यैव न्यच्छसंज्ञेति पूर्व्वमेवोक्तम् । तेन न्यच्छादित्रितय इत्यनेन लाञ्छनव्यङ्गनीलिकानां ग्रहणम् । अरुणस्तु न्यच्छशब्दस्यार्थमबद्ध्वा व्यङ्गादि त्रितय इति पठित्वा व्यङ्गनीलिकापरुषेष्विति व्याचष्टे । तन्न परुषाख्यस्य क्षुद्ररोगस्य कुत्राप्यनुक्तत्वात् । सुश्रुते "न्यच्छनीलिकाव्यङ्गेषु यथासन्नं ललाटेषु शिरा विध्येत्" इत्युक्तम् । यत्पुनरत्र परुषमित्युक्तं तत्वातिकव्यङ्गलक्षणमिति पूर्व्वमेवोक्तम् । क्षीरिवृक्षत्वगङ्कुरैरिति क्षीरिणो वटोदुम्बरादयः तेषां त्वग्भिरङ्कुरैश्चेत्यर्थः । श्वेताश्वखुरजा मसीति श्वेता अपराजिता तथा अश्वस्य घोटकस्य खुरः तयोर्मसी भस्म । अन्ये तु श्वेतेत्यश्वविशेषणमाहुः । —१५—१७

रक्तचन्दन-मञ्जिष्ठा-कुष्ठ-रोध्र-प्रियङ्गवः ।

वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ १८ ॥

द्वे जीरके कृष्णतिलाः सर्षपाः पयसा सह ।

पिष्टाः कुर्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥ १९ ॥

(१) लाञ्छनादित्रय इति वा पाठः ।

क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः ।

मसूराः

रक्तचन्दनेत्यादौ बहुवचनाद् व्यस्तत्वमपीति वदन्ति । वटस्याङ्कुरा अभिनवाः पत्रमुकुलाः । द्वे जीरके इत्यादि लाञ्छनान्त एको योगः । मसूरा इत्यन्तस्तु द्वितीयः । १८—२०—

क्षीरपिष्टा वा तीक्ष्णाः शाल्मलिकण्टकाः ॥ २० ॥

क्षीरपिष्टा इत्यादौ तीक्ष्णा इति विशेषणमभिनवशाल्मलीकण्टक ग्रहणार्थम् ।—२०

सगुडः कोलमज्जा वा शशासृक्क्षौद्रकल्कितः ।

सगुड इत्यादौ कोलमज्जा वदरास्थिमज्जा । २१—

सप्ताहं मातुलुङ्गस्थं कुष्ठं वा मधुनान्वितम् ॥ २१ ॥

पिष्टा वा छागपयसा सक्षौद्रा मौशली जटा ।

गवास्थिमुशलीमूलयुक्तं वासाज्यमाक्षिकम् ॥ २२ ॥

जम्ब्वाम्रपल्लवा मस्तु हरिद्रे द्वे नवो गुडः ।

लेपः सवर्णकृत् पिष्टं स्वरसेन च तिन्दुकम् ॥ २३ ॥

उत्पलपत्रं तगरं प्रियङ्गु-कालीय-कन्द-बदरमज्जा ।

इदमुद्वर्त्तनमास्यं करोति शतपत्रसङ्काशम् ॥ २४ ॥

एभिरेवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत् ।

यथादोषर्त्तुकान् स्नेहान् मधुककाथसंयुतैः ॥ २५ ॥

यवान् सर्जरसं रोध्रमुशीरं चन्दनं मधु ।

घृतं गुडञ्च गोमूत्रे पचेदादर्वि लेपनात् ॥ २६ ॥

तदभ्यङ्गाद्विहन्त्याशु नीलिकाव्यङ्गदूषिकान् ।

मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥ २७ ॥

सप्ताहमित्यादौ मातुलुङ्गफलाभ्यन्तरस्थम् । अन्ये तु मातुलुङ्ग रसस्थ मित्याहुः । मौशली तालमूली तस्या जटा मूलम् । तिन्दुकं तिन्दुकस्वरसेनैव पिष्टमित्यर्थः । शतपत्रं पद्मम् एभिरेवौषधैरिति लेपसाधनौषधैः । यथादोषर्त्तुकानिति दोषर्त्तुप्रत्यनीकानित्यर्थः । यवानिति यवशक्तून । मदनं सिक्थकम् । दूषकानिति मुखदूषकान् युवानपिड़का इत्यर्थः ।—२१—२७

कुङ्कुमोशीर-कालीय-लाक्षा-यष्ट्याह्व-चन्दनम् ।
न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेशरम् ॥ २८ ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सतिलाढके ।
पक्त्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥ २९ ॥
लाक्षा-पत्तङ्ग-मञ्जिष्ठा-यष्टीमधुक-कुङ्कुमैः ।
अजाक्षीरद्विगुणितं तैलस्य कुडवं पचेत् ॥ ३० ॥
नीलिका-पलित-व्यङ्ग-वली-तिलकदूषिकान् ।
हन्ति तन्नस्यमभ्यस्तं मुखोपचयवर्णकृत् ॥ ३१ ॥

कुङ्कुमेत्यादौ न्यग्रोधस्य वटस्य पादाः शुङ्गाः । पलिकमिति प्रत्येकं, पत्तङ्गं रक्तचन्दनम् । मुखस्य उपचयः पुष्टिः । २८—३१

मञ्जिष्ठा-शबरोद्भव-स्तुवरिका-लाक्षा-हरिद्राद्वयं
नैपालीहरिताल-कुङ्कुम-गदा-गोरोचना-गैरिकम् ॥
पत्रं पाण्डुवटस्य चन्दनयुगं कालीयकं पारदं
पत्तङ्गं कनकत्वचं कमलजं बीजं तथा केशरम् ॥ ३२ ॥
सिक्थं तुत्थं पद्मकाद्यं वसाज्यं मज्जा क्षीरं क्षीरिवृक्षाम्बुचाग्नौ ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशे वक्त्रे छायामैन्दवीञ्चाशु धत्ते ॥ ३३ ॥
मार्कवस्वरस-क्षीर-तोय-पिष्टानि नावने ॥ ३४ ॥

मञ्जिष्ठेत्यादौ शबरोद्भवः श्वेतरोध्रः । तुवरिका सौराष्ट्रीमृत्तिका । नैपाली मनःशिला । पाण्डुवटोऽर्जुनः तस्य पत्रमिति निश्चलः । अन्येतु पाण्डिति पत्रविशेषणमाहुः । पारदो रसः । पत्तङ्गं कुचन्दनाख्यो रक्तचन्दनभेदः । कनकं नागकेशरं त्वचं गुडत्वगिति निश्चलः । कमलजमिति बीजस्य केशरस्य विशेषणं । पद्मकाद्यम् इति पद्मकादिगणः । एषां मिलित्वा स्नेहात् पादिकः कल्कः । आज्यं घृतं वसादि त्रयस्य मिलित्वा प्रस्थः । क्षीरीणो वृक्षाः वटोदुम्बराश्वत्थ-प्लक्ष-कपीतनाः तेषामम्बु क्वाथं क्षीरक्वाथयोर्मिलित्वा स्नेहापेक्षया चातुर्गुण्यम् । व्यङ्गनील्यादिनाशे सिद्धमिति प्रसिद्धं । छायामिति कान्तिं । तन्त्रान्तरे तु एभिरेव कल्ककार्थे स्तैल साधनञ्च दृश्यते । ३२—३४

प्रसुप्तौ वातकुष्ठोक्तं कुर्याद्दाहञ्च वह्निना ।
उत्कोठे कफपित्तोक्तं कोठे सर्वञ्च कौष्ठिकम् ॥ ३५ ॥

इति श्रीमद्वाग्भट विरचितायामष्टाङ्गहृदय संहितायामुत्तरे तन्त्रे क्षुद्ररोग प्रतिषेधो नाम द्वात्रिंशोऽध्यायः ।

प्रसुप्त्यादि चिकित्सामाह प्रसुप्तावित्यादि । ३५

इति (श्रीशिवदास सेन कृते अष्टाङ्ग हृदय तत्त्वबोधे)
उत्तरे तन्त्रे द्वात्रिंशोऽध्यायः ।

त्रयस्त्रिंशोऽध्यायः ।

अथातो गुह्यरोगविज्ञानीयं व्याख्यास्यामः
इति ह स्माहुरात्रेयादयो महर्षयः ।
स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाध्युषितसङ्कीर्णां मलिनाणुरजःपथाम् ॥ १ ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा ॥ २ ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टि-दन्त-नखोत्पीडाविषवच्छूकपातनैः ॥ ३ ॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान् ॥ ४ ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।

पूर्वोक्तसङ्गत्यैव गुह्यरोग विज्ञानीय उच्यते । गुह्य शब्देन पुरुषस्य नार्य्याश्चोपस्थ उच्यते । स्त्री ग्रहणं स्त्रीव्यतिरिक्त नपुंसकादि व्यवाय निरासार्थम् ।

सहसेत्यक्रमेण व्यवायं भजत इत्यर्थः। अथवेत्यादिना निदानान्तरमाह। दोषैर्वातादिभिरध्युषितः तथा संकीर्णोऽशुद्धः तथा मलिनो मलदिग्धयोनिम् अनिच्छन्तीमकामामन्यकामां वा अगम्यामिति वर्णिन्यादिं, नवसूतिकामिति नवप्रसूताम्। दूषितमिति विषादिदूषितं तोयमुपस्थेन स्पृशत इत्यर्थः। विवर्द्धयिषयेति उपस्थवर्द्धनेच्छया। अत्र पीड़ा शब्दस्य मुष्ट्यादिभिः प्रत्येकमन्वयः। विषवच्छूकपातनैरिति विषयुक्ता ये शूकाः जलजन्तुविशेषा स्तेषां पातनैः। दीर्घाणि अति खराणि च यानि योनिलोमानि तेषां विघट्टनैः। त्रयोविंशतिमिति उपदंशोऽर्शांसि तथा विवृत्तं अवपाटिका निरुद्धमणिरिति पञ्च। तथाऽष्टादश शूकदोषा इति त्रयोविंशतिरित्यर्थः। १—५—

पृथग्दोषैः सरुधिरैः समस्तैश्चात्र मारुतात् ॥ ५ ॥
मेढ्रशोफे रुजश्चित्राः स्तम्भस्त्वक्परिपोटनम्।

पञ्चविधत्वमेव विवृणोति पृथगित्यादि। चित्रा इति नानाविधा स्तोदभेदादिकाः। त्वक् परिपोटनं त्वचः किञ्चिद्विदारणम्। —५—६—

पक्वोदुम्बरसङ्काशः पित्तेन श्वयथुर्ज्वरः ॥ ६ ॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः।
शोणितेनासितस्फोटसम्भवोऽस्रस्रुतिज्वरः ॥ ७ ॥

पक्वोडुम्बरेत्यादि पैत्तिक लक्षणम्। —६।७

सर्वजे सर्वलिङ्गत्वं श्वयथुर्मुष्कयोरपि।
तीव्रारुगाशुपचनं दरणं क्रिमिसम्भवः।
याप्यो रक्तोद्भवस्तेषां मृत्यवे सन्निपातजः ॥ ८ ॥

सर्व्वज इत्यादि सन्निपातोपदंशलक्षणम्।८

जायन्ते कुपितैर्दोषैर्गुह्यासृक्पिशिताश्रयैः।
अन्तर्बहिर्वा मेढ्रस्य कण्डूला मांसकीलकाः ॥ ९ ॥
पिच्छिलास्रस्रवा योनौ तद्वच्च छत्रसन्निभाः।
तेऽर्शांस्युपेक्षया घ्नन्ति मेढ्रपुंस्त्वभगार्तवम् ॥ १० ॥

जायन्त इत्यादिना छत्र सन्निभा इत्यन्तेनार्शांस्याहुः। तद्वदित्यनेन गुह्यांशूक(?) पिशिताश्रय दोषजन्यत्वादिकं सर्व्वमतिदिशति। ९।१०

गुह्यस्य बहिरन्तर्वा पिड़काः कफरक्तजाः।
सर्षपाकारसंस्थाना (१) घनाः सर्षपिकाः स्मृताः ॥ ११ ॥

इदानीं शूकदोषा वाच्याः तत्र प्रथमं गुह्यस्येत्यादिना सर्षपिकामाह। सुश्रुते त्वियं कफवाताभ्यां पठ्यते तेनात्रापि कफरक्तजा इत्यत्र कफवातजा इति केचित् पठन्ति। सर्षपस्येव आकारः आकृति स्तथा संस्थानं प्रमाणं यस्याः। ११

पिड़का बहवो दीर्घा दीर्यन्ते मध्यतश्च याः।
सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षवान् ॥ १२ ॥

पिड़का इत्यादिना अवमन्थमाह। कफासृग्भ्यामिति शूकपातजनित कफासृग्भ्यां एवमन्यत्रापि सामान्येन शूकदोषजे शूकपातोऽनुक्तोऽपि बोध्यः। वेदनारोमहर्षवानिति वेदनाजनित रोमहर्षवान्। १२

कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ॥ १३ ॥

कुम्भीकामाह कुम्भीकेत्यादि। अत्र अशुभेति शुभशब्दोच्यमान शुक्रविपरीता कृष्णेत्यर्थः। आशुजेति पाठे तु शीघ्रोत्पत्तिरित्यर्थः। १३

अलजीं मेहवद्विद्यात्

अलजीमाह अलजीं मेहवद्विद्यादिति। प्रमेहपिड़कामध्ये या अलजी पठिता तद्वदिमामपि विद्यादित्यर्थः। एषा च कारणभेदात् चिकित्साभेदाच्च तथा प्रमेहं विना लिङ्ग एव सम्भवाच्च पृथक् कृत्वा निर्दिष्टा। १४—

उत्तमां रक्तपित्तजाम्।
पिड़कां माषमुद्गाभां

उत्तमामित्यादिना माष मुद्गाभामित्यन्तेनोत्तमाख्यां पिड़कामाह। —१४—

पिड़का पिड़काचिता ॥ १४ ॥
कर्णिका पुष्करस्येव ज्ञेया पुष्करिकेति सा।

पिड़केत्यादिना पुष्करिकामाह। पुष्करस्य पद्मकर्णिकावद् या पिड़का पिड़काभिश्चिता भवति सा पुष्करिका। —१४।१५—

पाणिभ्यां भृशसंमूढ़े संमूढपिड़का (२) भवेत् ॥ १५ ॥

पाणिभ्यामित्यादिना संमूढ़पिड़का माह। पाणिभ्यां भृशसंमूढ इति अत्रापि

(१) सर्षपामानसंस्थानेति वा पाठः।

(२) संव्यूढ़पिड़केति वा पाठः।

शुकदोषस्याधिकृतत्वात् पातितशुके लिङ्गे पाणिभ्यां भृशसंमृदे पीड़ितावनते इत्यर्थः। वात कोपत इत्यत्रापि सम्बध्यते। —१५

मृदितं मृदितं वस्त्रसंरब्धं वातकोपतः।

मृदितमाह मृदितमित्यादि। मृदितमिति शुकपातानन्तरं पीड़ितं लिङ्गमित्यर्थः। संरब्धमिति सशोथम्। १६—

विषमा कठिना भुग्ना वायुनाऽष्ठीलिका स्मृता ॥ १६ ॥

अष्ठीलिकामाह विषमेत्यादि। भुग्नेति कुटिला। अष्ठीलिका लोहकारस्य भाण्डविशेषः तत्तुल्यत्वादष्ठीलिका। —१६

विमर्द्दनादिदुष्टेन वायुना चर्ममेढ्रजम्।
विवर्तते(१) सरुग्दाहं कचित्पाकञ्च गच्छति ॥ १७ ॥
पिणिडतं ग्रथितं चर्म तत्प्रलम्बमधोमणेः।
विवृत्तसंज्ञं(२) सकफं कण्डूकाठिन्यवत्तु तत् ॥ १८ ॥

समानस्थानत्वात् शुकदोषमध्य एव विवृत्तोऽवपाटिका निरुद्धमणिश्चेति व्याधित्रयं वाच्यम्। तत्र विमर्द्दनादीत्यादिना विवृत्ताख्यं व्याधिमाह। विवर्त्तत-इति परिवर्त्तते। सरुग्दाहं क्वचित् पाकञ्च गच्छतीति वातजेऽप्यस्मिन् व्याधौ यदि पित्तानुबन्धः स्यात्तदा दाहपाकौ च क्वचित् भवत इत्यर्थः। पिण्डितमित्यादि। तदेव परिवृत्तं मेढ्रचर्म्मं पिण्डितं तथा ग्रथितमिति ग्रन्थिरूपं भूत्वा यदा मणेरधः प्रलम्बते तदा विवृत्तसंज्ञं निर्द्दिशेदित्यनेन वक्ष्यमाणेनान्वयः। अयमेव व्याधिस्तन्त्रान्तरे परिवर्त्तिकेति संज्ञया पठ्यते। अत्रैव कफसम्बन्धाद् यल्लक्षणं भवति तदाह। सकफमित्यादि। १७।१८

दूरूढं स्फुटितं चर्म निर्द्दिशेदवपाटिकाम्।

अवपाटिकामाह दुरूढमित्यादि। चर्म्मेति-मेढ्रचर्म्मं। स्फुटितमिति मर्दनकन्यायोनिपीड़नादिना किञ्चिद्दीर्णं तथा दुरूढञ्च कृच्छ्रेण रूढञ्च अवपाटिकां निर्द्दिशेत्। इयञ्चोत्पन्ना त्रिभिरेव दोषैरनुबध्यते उक्तञ्च भोजे—

(१) निवर्त्तते इति वा पाठः।

(२) निवृत्तसंज्ञम् इति वा पाठः।

"मर्दनादभिघाताच्च कन्यायोनि प्रपीड़नात्।
लक्ष्यते यदि मेढ्रस्य चर्म्मंदर्भैरिव क्षतम् ॥
अवपाटिकेति तां विद्यात् पृथक्दोषैः समन्विताम्।
वातात् सा परुषा रुक्षा शूल निस्तोद कारिका ॥
पित्तात् सदाहा रक्ता वा दाह तृष्णा समन्विता।
श्लैष्मिकी कठिना स्निग्धा कण्डूमत्यल्पवेदना ॥" इति १९—

वातेन दूषितं चर्म मणौ सक्तं रुणद्धि चेत् ॥ १९ ॥
स्रोतोमूत्रं ततोऽभ्येति मन्दधारमवेदनम्।
मणेर्विकाशरोधश्च स निरुद्धमणिर्गदः ॥ २० ॥

वातेनेत्यादिना निरुद्धमणिमाह। वातेन दूषितं मेढ्रचर्म्मं मणौ सक्तं संसक्तं भूत्वा यदि स्रोत इति मूत्रमार्गं रुणद्धि तदा मूत्रं मन्दधारं अभ्येति। संकुचितचर्म्मपीड़नेन मणेः संकुचितद्वारत्वादिति भाव। अवेदन स्थाने सवेदन इति केचित् पठन्ति। मणे विकाशरोध इति मणिविवररोधः (१)। —१९।२०

लिङ्गं शुकैरिवापूर्णं ग्रथिताख्यं कफाद्भवम्।

ग्रथिताख्यं शुकदोषमाह लिङ्गमित्यादि। अत्र ग्रथितमित्यध्याहार्य्यम्। यत्र व्याधौ लिङ्गं मेहनं शुकैराकीर्णं व्याप्तं सत् ग्रथितमिव भवति तं ग्रथिताख्य विद्यात्। २१—

शुकदूषितरक्तोत्था स्पर्शहानिस्तदाह्वया ॥ २१ ॥

स्पर्शहानिमाह शुकदूषितेत्यादि। तदाह्वयेति स्पर्शहानि नामधेया। —२१

छिद्रैरणुमुखैर्यत्तु मेहनं सर्वतश्चितम्।
वातशोणितकोपेन तं विद्याच्छतपोनकम् ॥ २२ ॥

छिद्रैरित्यादिना शतपोनकमाह। चितमिति व्याप्तं। शतपोनकं "चालनिका" इति वदन्ति (वंगीयाः)। तेन शतपोनकतुल्यत्वात् शतपोनक संज्ञा। अन्येतु रूपैरियं संज्ञेत्याहुः।२२

पित्तासृग्भ्यां त्वचः पाकस्त्वक्पाको ज्वरदाहवान्।

पित्तासृग्भ्यामित्यादि त्वक्पाक लक्षणम्। २३—

(१) मणे विकाश रोध इति मणे लिङ्गाग्रभागस्य विकाशः चर्मापसारणात् प्रकाशस्तस्य रोधः इत्यर्थः साधीयान् "मणिर्विशोयते न च" इति सुश्रुत पाठात्।

मांसपाकः सर्वजः सर्ववेदनो मांसशातनः ॥ २३ ॥

मांस पाकमाह मांसपाक इत्यादि । "वास्य युङ्नणोः पचिमांसस्य" इत्यनेन विकल्पेनाकारलोपः । सर्वज इति साम्निपातिकः । सर्ववेदन इति वातादिकृत-वेदनायुक्तः । मांसशातन इति विशीर्यमान मांसः । —२३

सरागैरसितैः स्फोटैः पिडकाभिश्च पीडितम् ।
मेहनं वेदनाश्चोग्रास्तं विद्यादसृगर्बुदम् ॥ २४ ॥

रक्तार्बुदमाह सरागैरित्यादि । पिडकाभिरिति स्वरूपाभिः । २४

मांसार्बुदं प्रागुदितं विद्रधिश्च त्रिदोषजः ॥ २५ ॥

मांसार्बुदमित्यादि । त्रिदोषज इत्यनेन विद्रध्यन्तरं शूकदोषत्वेन निरस्यति । प्रागिति ग्रन्थ्यादि विज्ञाने मांसार्बुदमुक्तम् । विद्रध्यादि निदाने च विद्रधिरुक्तम् । २५

कृष्णानि भूत्वा मांसानि विशीर्यन्ते समन्ततः ।
पक्वानि सन्निपातेन तान् विद्यात्तिलकालकान् ॥ २६ ॥

तिलकालकानाह कृष्णानीत्यादि । विशीर्यन्त इति गलन्ति । कृष्णतिल-तुल्यत्वात् तिलकालक संज्ञा । २६

मांसोत्थमर्बुदं पाकं विद्रधिं तिलकालकान् ।
चतुरो वर्जयेदेषां शेषाञ्छीघ्रमुपाचरेत् ॥ २७ ॥

शूकदोषेष्वसाध्यानाह मांसोत्थमित्यादि । मांसोत्थमित्यर्बुदपाकयो-र्विशेषणम् । तेन मांसार्बुदं मांसपाकश्चेत्यर्थः । २७

विंशतिर्व्यापदो योनेर्जायन्ते दुष्टभोजनात् ।
विषमस्थाङ्गशयनभृशमैथुनसेवनैः ॥ २८ ॥
दुष्टार्तवादपद्रव्यैर्बीजदोषेण दैवतः ।

इदानीं मेहनरूपगुह्योद्भवान् व्याधीनभिधाय योनिरूप गुह्यभवान् व्याधी-नाह । विंशतिरित्यादि । विषमस्थाङ्गशयनेति अङ्गं विषमस्थं कृत्वा शयन-मित्यर्थः । दुष्टार्तवादिति वातादि दुष्टरजसः । बीजदोषेणेति स्त्रीशरीरा-रम्भक बीजे य आर्तवभागो विद्यते तद्दोषेणेत्यर्थः । आर्तवरूपबीजदोषादेव वन्ध्याया सम्भवात् । दैवत इति प्राक्तनकर्मवशात् । यद्यपि दैवं सर्वत्रैव कारणं तथापि यत्र तथाविधं विशिष्ट दृष्टकारणं न दृश्यते तत्र दैवस्यैव प्राधान्येन कारणत्वमिति ज्ञेयम् । २८।२९—

योनौ क्रुद्धोऽनिलः कुर्याद्रुक्तोदायामसुप्तताः ॥ २९ ॥
पिपीलिकासृप्तिमिव स्तम्भं कर्कशतां स्वनम् ।
फेनिलारुणकृष्णाल्पतनुरूक्षार्तवस्रुतिम् ॥ ३० ॥
स्रंसं वङ्क्षणपार्श्वादौ व्यथां गुल्मं क्रमेण च ।
तांस्तांश्च स्वान् गदान् व्यापद्वातिकी नाम सा स्मृता ॥ ३१ ॥

सामान्येन योनिव्यापन्निदानमभिधाय वातिकव्यापदो लिङ्गान्याह योना-वित्यादि । पिपीलिका सृप्तिमिवेति पिपीलिका सर्पणाकारां वेदनाम् । तां-स्तांश्च स्वान् गदानिति वातजन्यान् गद्नाक्षेपकादीन् । व्यापदिति योनि-व्यापत् । — २९ - ३१

सैवात्यचरणा शोफसंयुक्ताऽतिव्यवायतः ।

सैवेत्यादिना अतिचरणामाह । सैव वातिकी योनिव्यापत् अतिव्यवायतः शोफसंयुक्ता सती अतिचरणेत्युच्यते । अतिव्यवायाचरणेनोत्पन्नत्वात् अति-चरणेति संज्ञा ज्ञेया । ३२

मैथुनादतिबालायाः पृष्ठजङ्घोरुवङ्क्षणम् ॥ ३२ ॥
रुजन् सन्दूषयेद्योनिं वायुः प्राक्चरणेति सा ॥ ३३ ॥

प्राक्चरणामाह मैथुनादित्यादि । रुजन्निति पीडयन् । उचित व्यवायकालात् प्राग् व्यवायाचरणात् प्राक्चरणेत्युच्यते । —३२।३३

वेगोदावर्तनाद्योनिं प्रपीडयति मारुतः ।
सा फेनिलं रजः कृच्छ्रादुदावृत्तं विमुञ्चति ॥ ३४ ॥
इयं व्यापदुदावृत्ता

वेगोदावर्तनादित्यादिना उदावृत्तेत्यन्तेनोदावृत्तामाह । वेगोदावर्तनादिति वेगानामूर्ध्वनयनात् धारणादित्यर्थः । उदावृत्तमिति वायुना ऊर्ध्वं नीत-मित्यर्थः । एतच्च कृच्छ्रान् मुञ्चतीत्यत्र हेतुः । ३४।३५—

जातघ्नी तु यदानिलः ।
जातं जातं सुतं हन्ति रौक्ष्याद्दुष्टार्तवोद्भवम् ॥ ३५ ॥

जातघ्नीमाह जातघ्नीत्यादि । रौक्ष्यादिति रूक्षगुणोत्कर्षात् । —३५

अत्याशितायां विषमं स्थितायाः सुरते मरुत् ।
अन्नेनोत्पीडितो योनेः स्थितः स्रोतसि वक्रयेत् ॥ ३६ ॥
साऽस्थिमांसं मुखं तीव्ररुजमन्तर्मुखीति सा ।

अन्तर्मुखीमाह अत्याशिताया इत्यादि । विषमं स्थिताया इति विषमस्थित-शरीराया योनेर्मुखं वक्रयेदित्यन्वयः । स्रोतसीति योनि स्रोतसि । ३६।३७—

वातलाहारसेविन्यां जनन्यां कुपितोऽनिलः ॥ ३७ ॥
स्त्रिया योनिमणुद्वारां कुर्यात् सूचीमुखीति सा ।

सूचीमुखीमाह वातलाहारेत्यादि । स्त्रिया इति गर्भस्थायाः स्त्रिया इत्यर्थः । —३७—३८—

वेगरोधादृतौ वायुर्दुष्टो विण्मूत्रसंग्रहम् ॥ ३८ ॥
करोति योनेः शोषञ्च शुष्काख्या सातिवेदना ।

वेगरोधादित्यादिना शुष्काख्यां योनिव्यापदमाह । ऋताविति सुरतकाले । विण्मूत्रयोः संग्रहमप्रवृत्तिम् । —३८।३९—

षडहात् सप्तरात्राद्वा शुक्रं गर्भाशयान्मरुत् ॥ ३९ ॥
वमेत् सरुङ् नीरुजो वा यस्याः सा वामिनी मता ।

षडहादित्यादिना वामिनीमाह । वमेदिति स्रावयेत् । —३९—४०—

योनौ वातोपतप्तायां स्त्रीगर्भे बीजदोषतः ॥ ४० ॥
नृद्वेषिण्यस्तनी च स्यात् षण्ढसंज्ञाऽनुपक्रमा ।

योनावित्यादिना षण्डीमाह । योनाविति योन्यारम्भक बीजभागेच वातेनोप-तप्ते सति । एतदेवाह बीजदोषत इति । यद्यपि शुक्र शोणित समुदाय एव बीजं तथाप्यत्रार्त्तव रूपबीज दोष एव ज्ञेयः । तद्दोषस्यैव गर्भाशयोपघातकत्वात् । उक्तं हि 'यदा ह्यस्याः शोणिते गर्भाशयबीजभागः प्रदोषमापद्यते तदा वन्ध्यां जनय-तीति ।" स्त्रीति गर्भस्था स्त्री षण्डसंज्ञिका जायत इत्यर्थः । अस्तनीति ईषत्-स्तनी । —४०—४१—

दुष्टो विष्टभ्य योन्यास्यं गर्भकोष्ठञ्च मारुतः ॥ ४१ ॥
कुरुते विवृतां स्रस्तां वातिकीमिव दुःखिताम् ।
उत्सन्नमांसां तामाहुर्महायोनिं महारुजाम् ॥ ४२ ॥

दुष्ट इत्यादिना महायोनिमाह । विष्टभ्येत्याक्रम्य । गर्भकोष्ठमिति गर्भाशयम् ।

विवृतामित्यसंवृतमुखीं । स्रस्तामिति स्वस्थानाच्च्युतां । वातिकीमिव दुःखितामिति पूर्वोक्त वातिकवत् पिपीलिका सर्पणादि वेदनायुक्तामित्यर्थः । उत्सन्नमांसामिति उद्गत मांसखण्डाम् । तां महायोनिमाहुः । ४१।४२

यथास्वैर्दुष्टं पित्तं योनिमुपाश्रितम् ।
करोति दाहपाकोषापूतिगन्धज्वरान्विताम् ॥ ४३ ॥
भृशोष्णभूरिकुणपनीलपीतासितार्तवाम् ।
सा व्यापत् पैत्तिकी

पैत्तिकीं योनिव्यापदमाह यथास्वैरित्यादिना पैत्तिकीत्यन्तेन । कुणपः शवगन्धः । ४३।४४—

रक्तयोन्याख्यासृगतिस्रुतेः ॥ ४४ ॥

रक्तयोनिमाह (रक्त योन्येत्यादि) । —४४

कफोऽभिष्यन्दिभिः क्रुद्धः कुर्याद्योनिमवेदनाम् ।
शीतलां कण्डुलां पाण्डुपिच्छिलां तद्विधस्रुतिम् ॥ ४५ ॥
सा व्यापच्छ्लैष्मिकी

श्लैष्मिकीं योनिव्यापदमाह कफ इत्यादि । तद्विधस्रुतिमिति पाण्डु-पिच्छिल-स्रुतिम् । ४५—४६—

वातपित्ताभ्यां क्षीयते रजः ।
सदाहकार्श्यवैवर्ण्यं यस्यां सा लोहितक्षया ॥ ४६ ॥

वातपित्ताभ्यामित्यादिना लोहितक्षयामाह । क्षीयते रज इति अति प्रवृत्या ।—४६

पित्तलाया नृसंवासे क्षवथूद्गारधारणात् ।
पित्तयुक्तेन मरुता योनिर्भवति दूषिता ॥ ४७ ॥
शूनास्पर्शासहा सार्तिर्नीलपीतास्रवाहिनी ।
बस्तिकुक्षिगुरुत्वातीसारारोचककारिणी ॥ ४८ ॥
श्रोणिवंक्षणरुक्तोदज्वरकृत्सा परिप्लुता ।

पित्तलाया इत्यादिना परिप्लुतामाह । नृसंवास इति गौरवित जन सान्निध्ये । वातपित्त विकारैः परितः सर्वतः प्लुतत्वात् परिप्लुता । ४७—४९—

वातश्लेष्मामयव्याप्ता श्वेतपिच्छिलवाहिनी ॥ ४९ ॥
उपप्लुता स्मृता योनिः

उपप्लुतामाह वातश्लेष्मेत्यादि। योनिरिति योनिव्यापत्। —४९।५०—

विप्लुताख्या त्वधावनात्।
सञ्जातजन्तुः कण्डूला कण्डूा चातिरतिप्रिया ॥ ५० ॥

विप्लुतामाह विप्लुताख्येत्यादि। अधावनादप्रक्षालनात्। जन्तुः क्रिमिः। कण्डुवशादतिशयेन सुरतप्रियेत्यर्थः। इयमेव तन्त्रान्तरे अचरणेत्युच्यते। —५०

अकालवाहनाद्वायुः श्लेष्मरक्तविमूर्छितः।
कर्णिकाञ्जनयेद्योनौ रजोमार्गनिरोधिनी ॥ ५१ ॥
सा कर्णिनी त्रिभिर्दोषैर्योनिगर्भाशयाश्रितैः।
यथास्वोपद्रवकरैर्व्यापत्सा सान्निपातिकी ॥ ५२ ॥

अकाल वाहनादित्यादिना कर्णिनीमाह। अकाल वाहनादिति अप्राप्तगर्भ-निष्क्रमण काले गर्भ निष्क्रमनार्थं प्रवाहनादित्यर्थः। श्लेष्मरक्त विमूर्च्छित इति श्लेष्मरक्तसम्बन्धः। कर्णिकामिति मांसग्रन्थिम्। ५१।५२

इति योनिगदा नारी यैः शुक्रं न प्रतीच्छति।
ततो गर्भं न गृह्णाति रोगांश्चाप्नोति दारुणान्।
असृग्दरार्शोगुल्मादीनाबाधांश्चानिलादिभिः ॥ ५३ ॥

इति श्रीमद् वाग्भट विरचितायां मष्टाङ्गहृदय संहितायां मुत्तरे तन्त्रे गुह्यरोगविज्ञानीयोनाम त्रयस्त्रिंशोऽध्यायः ॥

उपसंहरति इत्यादि। योनिगदा इति योनि व्यापदः। ५३

इति (श्रीशिवदाससेनकृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे त्रयस्त्रिंशोऽध्यायः।

चतुस्त्रिंशोऽध्यायः।

अथातो गुह्यरोग प्रतिषेधं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥
मेढ्मध्ये शिरां विध्येदुपदंशे नवोत्थिते।
शीतां कुर्य्यात्क्रियां शुद्धिं विरेकेण विशेषतः ॥ १ ॥
तिल कल्क घृतक्षौद्रै र्लेपः पक्वे तु पाटिते।

शुद्धिं विरेकेण विशेषत इति दोषस्याधोगत्वादिति भावः। विरेचनासहत्वे तु निरूहोऽपि देयः। तदुक्तं सुश्रुते

"यदि वा दुर्बलोजन्तुर्नसहेत विरेचनम्।
निरूहेण हरेत्तस्य दोषानत्यर्थ मूर्च्छितान्" ॥ इति ॥ १।२—

जम्ब्वाम्रसुमनोनीप श्वेत काम्बोजिकाङ्कुरान् ॥ २ ॥
शल्लकी बदरी बिल्व पलाश तिनिशोद्भवाः।
त्वचः क्षीरिद्रुमाणाञ्च त्रिफलाञ्च पचेज्जले ॥ ३ ॥
स क्वाथः क्षालनं तेन पक्वं तैलञ्च रोपणम्।
तुत्थ-गैरिक-लोध्रैला-मनोह्वालरसाञ्जनैः ॥ ४ ॥
हरेणु-पुष्पकासीस-सौराष्ट्री-लवणोत्तमैः।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥ ५ ॥

जम्ब्वाम्रेत्यादौ सुमना मालती, काम्बोजिका माषपर्णी, एषां जम्ब्वादीना-मङ्कुरानिति पल्लवान्। त्वच इति शल्लक्यादिभिः तथा क्षीरिद्रुमैश्च सम्बध्यते तुत्थेत्यादौ हरेणु रेणुका। लवणोत्तमं सैन्धवम्। सूक्ष्मैरिति सूक्ष्मचूर्णीकृतैः। सुश्रुतेऽपि "तच्चूर्णं क्षौद्रसंयुक्तमुपदंशेषुपूजितम्" इत्युक्तम्। —२—५

कपाले त्रिफला दग्ध्वा सघृता रोपणं परम्।
सामान्यं साधनमिदं प्रतिदोषन्तु शोफवत् ॥ ६ ॥

कपाल इत्यादौ घृतस्थाने मधु दत्त्वापि योगोऽयं बोध्यः। यदाह भेलः—

''बृहत्कट्वाले त्रिफला सा सखी मधुसंयुता।
व्यपंसे प्रक्षेपोऽयं सद्यो रोपयति व्रणम्'' ॥ इति (१)

शोफवदिति व्रणशोफवत्। ६

न च याति यथा पाकं प्रयतेत तथा भृशम्।
पक्वाः स्नायुशिरामांसाः प्रायो नश्यन्ति हि ध्वजाः ॥ ७ ॥
अर्शसां छिन्नदग्धानां क्रिया कार्योपदंशवत्।

ध्वजा इति मेढ्राणि। अर्शसामिति लिङ्गार्शसाम्। ७-८-

सर्षपीं लिखितां सूक्ष्मैः कषायैरवचूर्णयेत् ॥ ८ ॥
तैरेवाभ्यञ्जनं तैलं साधयेद् व्रणरोपणम्।
क्रियेयमवमन्थेऽपि रक्तं स्राव्यं तथोभयोः ॥ ९ ॥

सर्षपा इति सर्षपिका। कषायैरिति स्वस्वरोगे कषायवर्गोक्तैः न्यग्रोधादिभिः रोपादिभिः शोधनादिसामान्यसंशोधनप्रयोगादिभिश्च सूक्ष्मैरिति सूक्ष्मचूर्णीकृतैः। तैरेवेति कषायैः। उभयोरिति सर्षपिकाऽवमन्थयोः। ८-९

कुम्भीकायां हरेद्रक्तं पक्वायां शोधिते व्रणे।
तिन्दुकत्रिफलारोध्रलेपस्तैलञ्च रोपणम् ॥ १० ॥

कुम्भीकायां हरेद्रक्तमित्यामावस्थायाम्। तैलञ्च रोपणमिति तच्च तिन्दुकादिकल्कसिद्धम्। १०

अलज्यां स्रुतरक्तायामयमेव क्रियाक्रमः।
अलज्यामित्यादौ अयमेवेति कुम्भीकोक्तः। ११-

उत्तमाख्यान्तु पिडकां सञ्छिद्य बडिशोद्धृताम् ॥ ११ ॥
कल्कैश्चूर्णैः कषायाणां क्षौद्रयुक्तैरुपाचरेत्।

उत्तमाख्यामित्यादौ कषायाणामिति पूर्ववद् व्याख्येयम्। -११।१२-

क्रमः पित्तविसर्पोक्तः पुष्करीमूढयोर्हितः ॥ १२ ॥
पुष्करी मूढयोरिति पुष्करिका संमूढपीडकयोः। -१२

(१) वाग्भटे सुश्रुते अधिकमिदं उपदंशचिकित्सा शोधयन्ति।

त्वक्पाके स्पर्शहान्याञ्च

त्वक्पाके स्पर्शहान्यां चेति पूर्वेण सम्बध्यते। तेनैतयोरपि पित्तविसर्पोक्तः क्रमः कार्यः। १२-

सेचयेन्मृदितं पुनः।
बलातैलेन कोष्णेन मधुरैश्चोपनाहयेत् ॥ १३ ॥

मृदितं पुनर्बलातैलेन सेचयेदिति योजना। बलातैलञ्च वातव्याध्युक्तं गर्भव्यापच्छारीरोक्तं वा ग्राह्यम्। मधुरैरिति मधुरवर्गोक्तैः। -१३

अष्ठीलिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत्।

अष्ठीलिकामित्यादि। वातजायामष्ठीलायां श्लेष्मपित्तरक्तस्यावस्थाभावात् रक्तनिर्हरणं युक्तमेव। १४-

निवृत्तं सर्पिषाऽभ्यज्य स्वेदयित्वोपनाहयेत् ॥ १४ ॥
त्रिरात्रं पञ्चरात्रं वा सुस्निग्धैः शाल्वणादिभिः।
स्वेदयित्वा ततो भूयः स्निग्धं चर्म समानयेत् ॥ १५ ॥
मणिं प्रपीड्य शनकैः प्रविष्टे चोपनाहनम्।
मणौ पुनः पुनः स्निग्धं भोजनं चात्र शस्यते ॥ १६ ॥
अयमेव प्रयोज्यः स्यादवपाट्यामपि क्रमः।

निवृत्ताख्यव्याधेः परिवर्तिकापरपर्यायस्य चिकित्सामाह निवृत्तमित्यादि। समानयेदिति प्रवेशयेत्। प्रविष्टे मणावित्यन्वयः। -१४-१७-

नाडीमुभयतो द्वारां निरुद्धे जतुना कृताम् ॥ १७ ॥
क्षिप्त्वा स्रोतसि मूत्रस्य सिञ्चेत् स्नेहैश्चलापहैः।
त्र्यहात्त्र्यहात् स्थूलतरां न्यस्य नाडीं विवर्धयेत् ॥ १८ ॥
स्रोतोद्वारम्

नाडी मित्यादिना निरुद्धमणिचिकित्सामाह। नाडीमिति कनकत्रपुसीसादीनामन्यतमेन कृताम्। जतुना कृतां लिप्ताम्। स्रोतसीति मूत्रस्रोतसि। स्नेहैश्चलापहैरिति वातघ्नैः स्नेहैः तिलतैलादिभिः। उक्तं हि सुश्रुते -
''निरुद्धप्रकशे तु सुवर्णादीनां नाडीमुभयतोमुखीं दारवीं वा जतुकृतां सर्पिषाऽ

म्यज्य स्रोतसि प्रणिधाय शिशुमार वसा वराहमज्जभिः परिषेचयेत्" इति (१) विवर्द्धयेदिति स्रोतोद्वारमित्यन्वयः । —१७—१९—

अथवा सिद्धौ वा विद्वान् शस्त्रेण पाटयेत् ।
सेवनीं वर्जयन् युञ्ज्यात् सद्यःक्षतविधिं ततः ॥ १९ ॥

असिद्धौ वेत्यादि । यद्युक्तरूपया चिकित्सया न सिध्यति तदा सेवनीं वर्जयन् शस्त्रेण पाटयेत् मूत्रद्वारावरकं चर्म्म इति शेषः । तत इति पाटनानन्तरं सद्यः—क्षतविधिमिति सद्योव्रणचिकित्सितं युञ्ज्यात् । —१९

ग्रथितं स्वेदितं नाड्या स्निग्धोष्णैरुपनाहयेत् ।

ग्रथित चिकित्सामाह ग्रथितमित्यादि । ग्रथिताख्यं शुकदोषं नाड्येति नाडीस्वेद विधिना । स्निग्धोष्णैरित्यनन्तरं कफहर द्रव्यकृतैः रुपनाहैरिति शेषः ग्रथितस्य कफजत्वादिति भावः । २०—

लिम्पेत् कषायैः सञ्चोद्रैर्लिखित्वा शतपोनकम् ॥ २० ॥
रक्तविद्रधिवत् कार्या चिकित्सा शोणितार्बुदे ।
व्रणोपचारं सर्वेषु यथावस्थं प्रयोजयेत् ॥ २१ ॥

शतपोनक चिकित्सामाह लिम्पेदित्यादि । कषायैरिति न्यग्रोधादिगण-प्रभृतिभिः । व्रणोपचारमिति व्रणचिकित्सितम् । सर्व्वेष्विति शुकदोषेषु । यथावस्थमिति शोधनावस्थायां शोधनं रोपणावस्थायाञ्च रोपणमित्यादि । २०।२१

योनिव्यापत्सु भूयिष्ठं शस्यते कर्म वातजित् ।
स्नेहन-स्वेद-वस्त्यादि वातजासु विशेषतः ॥ २२ ॥
नहि वातादृते योनिर्वनितानां प्रदुष्यति ।
अतो जित्वा तमन्यस्य कुर्याद्दोषस्य भेषजम् ॥ २३ ॥
पाययेत बलातैलं मिश्रकं सुकुमारकम् ।

योनिव्यापच्चिकित्सामाह योनिव्यापत्स्वित्यादि । बलातैलं वातव्याध्युक्तम् । मिश्रकस्नेहो गुल्मोक्तः । सुकुमारकं वृद्ध्युक्तम् । २२—२४—

स्निग्धस्विन्नां तथा योनिं दुःस्थितां स्थापयेत् समाम् ॥ २४ ॥

स्निग्धस्विन्नामित्यादि । दुःस्थितां वैषम्येण स्थितां योनिं समं यथा स्यात्तथा स्थापयेत् । —२४

(१) साम्प्रतं सुश्रुते पाठोऽयं टीकाकारेण निबद्ध आस्ते । अष्टाङ्गहृदयपाठस्तु प्रायस्तथैव गद्यं नेति लक्षणीयम् ।

पाणिनोन्नमयेज्जिह्मां संवृतां वर्धयेत् पुनः ।
प्रवेशयेन्निःसृताञ्च विवृतां परिवर्त्तयेत् ॥ २५ ॥

तमेव स्थापन प्रकारमाह पाणिनेत्यादि । स्निग्धस्विन्नामिति सर्व्वत्रानुवर्त्तते । जिह्मामिति वक्रमुखीम् । संवृताञ्च वर्द्धयेत् प्रसारयेत् । विवृतामिति विवृतमुखीं परिवर्त्तयेदिति परितो वर्त्तनेन संवृतां कुर्य्यात् । २५

स्थानापवृत्ता योनिर्हि शल्यभूता स्त्रियो भवेत् ॥ २६ ॥

कुतः पुनरेवं कुर्य्यादित्याह स्थानापवृत्ता हीत्यादि । स्थानं सम्यगवस्थानं ततोऽपवृत्ता च्युता दुःस्थितेत्यर्थः । २६

कर्मभिर्वमनाद्यैश्च मृदुभिर्योजयेत् स्त्रियम् ।
सर्वतः सुविशुद्धायाः शेषं कर्म विधीयते ॥
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥ २७ ॥

कर्म्मभिरित्यादि । स्त्रियमिति व्यापन्नयोनिं स्त्रियमित्यर्थः । शेषं कर्म्मेति शोधनापेक्षया शेषं कर्म्म शमनमित्यर्थः । एतदेवाह वस्त्यभ्यङ्गेत्यादि । २७

काश्मर्य-त्रिफला-द्राक्षा-कासमर्द-निशाद्वयैः ।
गुडूची-शैर्यकाभीरु-शुकनासा-पुनर्नवैः ॥ २८ ॥
परूषकैश्च विपचेत् प्रस्थमक्षसमैर्घृतात् ।
योनिवातविकारघ्नं तत्पीतं गर्भदं परम् ॥ २९ ॥

काश्मर्य्येत्यादौ शैर्य्यको झिण्टी, अभीरुः शतावरी शुकनासा कुब्जक-इति ख्याता । २८।२९

वचोपकुञ्चिकाजाजी-कृष्णा-वृषक-सैन्धवम् ।
अजमोदा-यवक्षार-शर्करा-चित्रकान्वितम् ॥ ३० ॥
पिष्ट्वा प्रसन्नयाऽऽलोड्यखादेत्तद्घृतभर्जितम् ।
योनि-पार्श्वार्ति-हृद्रोग गुल्मार्शोविनिवृत्तये ॥ ३१ ॥

वचेत्यादौ उपकुञ्चिका कृष्णजीरकम्, वृषको वासकमूलम् । प्रसन्ना मदिराया-उपरितनो भागः । ३०।३१

वृषकं मातुलुङ्गस्य मूलानि मदयन्तिकाम् ।
पिबेन्मद्यैः सलवणैस्तथा कृष्णोपकुञ्चिकः ॥ ३२ ॥

वृषकमित्यादौ मदयन्तिका मल्लिकाभेदः । ३२

रास्ना-श्वदंष्ट्रा-वृषकैः शृतं शूलहरं पयः ।

रास्नेत्यादौ शूलहरमिति योनिशूलहरम् । ३३—

गुडूची-त्रिफला-दन्तीक्वाथैश्च परिषेचनम् ॥ ३३ ॥

गुडूचीत्यादौ परिषेचनमित्यत्रापि शूलहरमिति सम्बध्यते । —३३

नत-वार्ताकिनी-कुष्ठ-सैन्धवामरदारुभिः ।
तैलात् प्रसाधिताद्धार्यः पिचुर्योनौ रुजापहः ॥ ३४ ॥

नतेत्यादौ वार्त्ताकिनी कण्टकारी गोष्ठवार्त्ताकुरित्यन्ये । ३४

पित्तलानान्तु योनीनां सेकाभ्यङ्गपिचुक्रियाः ।
शीताः पित्तहराः कार्याः स्नेहनार्थं घृतानि च ॥ ३५ ॥

पित्तलानामित्यादौ शीता इति कृत्वापि यत् पित्तहरा इति करोति तद्दोष-प्रत्यनीकतां स्मारयति । ३५

शतावरीमूलतुलाचतुष्कात् क्षुण्णपीडितात् ।
रसेन क्षीरतुल्येन पाचयेत घृताढकम् ॥ ३६ ॥
जीवनीयैः शतावर्या मृद्वीकाभिः परूषकैः ।
पिष्टैः पियालैश्चार्द्धांशैर्मधुकद्विबलान्वितैः ॥ ३७ ॥
सिद्धशीते तु मधुनः पिप्पल्याश्च पलाष्टकम् ।
शर्कराया दशपलं क्षिपेल्लिह्यात् पिचुं ततः ॥ ३८ ॥
योन्यसृक्शुक्रदोषघ्नं वृष्यं पुंसवनं परम् ।
क्षतं क्षयमसृक्पित्तं कासं श्वासं हलीमकम् ॥ ३९ ॥
कामलां वातरुधिरं विसर्पं हृच्छिरोग्रहम् ।
अपस्मारार्दितायाममदोन्मादांश्च नाशयेत् ॥ ४० ॥

शतावरीत्यादौ आर्द्रं चतुःशतपलशतावरीमूल पीडनेन यावान् रसः प्राप्यते तेन समक्षीरेण घृताढकं जीवनीयादिकल्कैः पक्तव्यम् । चरके तु द्विबलामधुकैरित्यत्र द्वियष्टीमधुकैरिति पठ्यते । ३६—४०

एवमेव क्षीर सर्पिर्जीवनीयोपसाधितम् ।
गर्भदं पित्तलानाञ्च रोगाणां परमं हितम् ॥ ४१ ॥

एवमेवेति शतावरीचतुःशतस्वरसेन क्षीरसमेनेत्यर्थः । क्षीरोत्थितं सर्पिः क्षीरसर्पिः । जीवनीयान्यत्र कल्कः । ४१

बलाद्रोणद्वयक्वाथे घृततैलाढकं पचेत् ।
क्षीरे चतुर्गुणे कृष्णाकाकनासासितान्वितैः ॥ ४२ ॥
जीवन्ती-क्षीर-काकोली-स्थिरा-वीरर्द्धिजीरकैः ।
पयस्या-श्रावणी-मुद्ग-पीलु-माषाख्यपर्णिभिः ॥ ४३ ॥
वातपित्तामयान् हत्वा पानाद् गर्भं दधाति तत् ॥ ४४ ॥

बलेत्यादौ बलाद्रोणद्वयस्य क्वाथः । बलाया द्रोणद्वयप्रमाणे क्वाथइति वा । उभयथाऽपि त्रिद्रोणमान एव क्वाथो भवति । घृततैलयोर्मिलित्वा आढकमेकम् । काकनासा काकतुण्डाकृति द्रव्यम् । सिता शर्करा, स्थिरा शालपर्णी, वीरा पृश्निपर्णी जालन्धर शाको वा । ऋद्धिः स्वनामख्याता चरकेतु ऋद्धि स्थाने ऋषभः पठ्यते । पयस्या अर्कपुष्पी, श्रावणी मुण्डितिका । मुद्गपीलुमाषाख्य-पर्णीभिरिति मुद्गपर्णी पीलुपर्णीमाषपर्णीभिरित्यर्थः । तत्र पीलुपर्णी मोरटो मुर्व्वा वा । आखुपर्णीभिरिति च क्वापि पाठः । ४२—४४

रक्तयोन्यामसृग्वर्णैरनुबन्धमवेक्ष्य च ।
यथादोषोदयं युञ्ज्याद् रक्तस्थापनमौषधम् ॥ ४५ ॥

इदानीं रक्तयोन्याश्चिकित्सामाह रक्तयोन्यामित्यादि । असृग्वर्णविशेषै-र्दोषानुबन्धं परीक्ष्येत्यर्थः । इयमेवासृग्दर संज्ञया तन्त्रान्तरे पठ्यते । अत्रान्तरे यष्टीमधुकदलीमूलेत्यादि योगं केचित् पठन्ति । किन्त्वसावरुणेन न धृत इति । ४५

पाठाजम्ब्वाम्रयोरस्थिशिलोद्भेदं रसाञ्जनम् ।
अम्बष्ठां शाल्मलीपिच्छां समङ्गां वत्सकत्वचम् ॥ ४६ ॥
वाह्लीक-बिल्वातिविषा-रोध्र-तोयदगैरिकम् ।
शुण्ठी-मधूक-माचिक-रक्तचन्दन-कट्फलम् ॥ ४७ ॥
कट्वङ्ग-वत्सकानन्ता-धातकी-मधुकार्जुनम् ।
पुष्ये गृहीत्वा सञ्चूर्ण्य सक्षौद्रं तण्डुलाम्भसा ॥ ४८ ॥

पिवेदर्शःस्वतीसारे रक्तं यश्चोपवेश्यते ।
दोषा जन्तुकृता ये च बालानां तांश्च नाशयेत् ॥ ४९ ॥
योनिदोषं रजोदोषं श्यावश्वेतारुणासितम् ।
चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम् ॥ ५० ॥

पाठेत्यादौ शिलोद्भेदः पाषाण भेदी । अम्बष्ठा दक्षिणापथे कन्दविशेषः तदभावे पाठैव द्विगुणा ग्राह्येत्याहुः अन्ये तु लक्ष्मणामाहुः । शाल्मलीपिच्छा शाल्मलीवेष्टकम् । वत्सकत्वचमित्यत्र पद्मकेशरमिति केचित् पठन्ति । वाह्लीकं कुङ्कुमम्, माचीकं देवदारु, वत्सकम् इन्द्रयवः । पुष्य इति पुष्यनक्षत्रे । ४६—५०

योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधम् ॥ ५१ ॥
धातक्य मलकीपत्रस्रोतोजमधुकोत्पलैः ।
जम्ब्वाम्रसार-कासीस-रोध्र-कट्फल-तिन्दुकैः ॥ ५२ ॥
सौराष्ट्रिकादाडिमत्वगुदुम्बर-शलाटुभिः ।
अक्षमात्रैरजामूत्रे क्षीरे च द्विगुणे पचेत् ॥ ५३ ॥
तैलप्रस्थं तदभ्यङ्गपिचुवस्तिषु योजयेत् ।
शूनोत्तानोन्नता स्तब्धा पिच्छिला स्राविणी तथा ॥
विप्लुतोपप्लुता योनिः सिद्धेयत् सस्फोटशूलिनी ॥ ५४ ॥
यवान्नमभयारिष्टं सीधुतैलञ्च शीलयेत् ।

धातकीत्यादौ सौराष्ट्रिका सौराष्ट्रीमृत् । अजामूत्रे क्षीरे चेति अजामूत्रसाहचर्य्यादजाक्षीरस्य ग्रहणम् । द्विगुण इति प्रत्येकं तैलाद् द्विगुणे । उत्तानेत्युद्वृत्ता । उन्नतेत्युत्सेधमांसा । अभयारिष्टमर्शः श्चिकित्सितोक्तम् । ५१—५५—

पिप्पल्ययोरजः पथ्याप्रयोगांश्च समाचिकान् ॥ ५५ ॥

पिप्पलीत्यादौ प्रयोगशब्दस्य पिप्पल्यादिभिः प्रत्येक मन्वयः । —५५

कासीसं त्रिफलाकाच्छीसाम्रजम्ब्वस्थिधातुकी । (१)
पैच्छिल्ये क्षौद्रसंयुक्तश्चूर्णो वैशद्यकारकः ॥ ५६ ॥

कासीसमित्यादौ चूर्ण इत्यत्र एषामिति शेषः । काच्छी सौराष्ट्रीमृत् । वैशद्यं पैच्छिल्यविपरीतो गुणः । ५६

(१) काञ्चीति वा पाठः ।

पलाश-धातकी-जम्बू-समङ्गा-मोच-सर्जजः ।
दुर्गन्धे पिच्छिले क्लेदस्तम्भनश्चूर्ण इष्यते ।
आरग्वधादिवर्गस्य कषायः परिषेचनम् ॥ ५७ ॥

पलाशेत्यादौ स्तम्भनमिति निवारणम् । ५७

स्तब्धानां कर्कशानाञ्च कार्यं मार्दवकारकम् ।
धारणं वेसवारस्य कृसरा पायसस्य च ॥ ५८ ॥
दुर्गन्धानां कषायः स्यात्तैलं वा कल्क एव वा ।
चूर्णो वा सर्वगन्धानां पूतिगन्धापकर्षणः ॥ ५९ ॥

किन्तन् मार्दवकारकमित्याह धारणमित्यादि । दुर्गन्धानामित्यत्र योनीनामित्यर्थः । सर्व्वगन्धानामिति शब्दः कषायादिभिः सम्बध्यते । सर्व्वगन्धानामिति अगुरुचन्दन कुष्ठ प्रभृतीनाम् । ५८।५९

श्लेष्मलानां कटुप्रायाः समूत्रा वस्तयो हिताः ।
पित्ते समधुकक्षीरा वाते तैलाम्लसंयुताः ॥ ६० ॥
सन्निपातसमुत्थायाः कर्म साधारणं हितम् ॥ ६१ ॥
एवं योनिषु शुद्धासु गर्भं विन्दति योषितः ।

श्लेष्मलानामित्यादिना दोष प्रत्यनीकां चिकित्सामाह । ६०—६२—

अदुष्टे प्राकृते वीजे जीवोपक्रमणे सति ॥ ६२ ॥

अदुष्टे प्राकृते वीजे इत्यादि । प्राकृते सहज गुणसम्पन्ने वीजे शुक्रशोणितमेलकरूपे अदुष्टे यावज्जीवोपक्रामणं कर्म्म प्रेरितजीवाधिष्ठानं तस्मिन् सतीत्यर्थः । इयत्र गर्भोत्पाद सामग्री निरुक्ता । अदुष्टे वीजे सत्येव गर्भोत्पाद इत्युक्तम् । वीजञ्च शुक्रार्त्तवरूपम् । —६२

पञ्चकर्मविशुद्धस्य पुरुषस्यापि चेन्द्रियम् ।
परीक्ष्य वर्णैर्दोषाणां दुष्टं तद्घ्नैरुपाचरेत् ॥ ६३ ॥

अत्र आर्त्तवशुद्धिप्रकारः पूर्व्वमेवोक्तः । अतः परिशिष्टस्य शुक्रस्यापि शुद्धत्वं तत्परीक्षापूर्व्विकाञ्चिकित्सामाह पञ्चकर्म्मेत्यादि । पुरुषस्यापि इन्द्रियं शुक्रं वातादिदोष नियत वर्णयोगाद् वातादिदुष्टमिति परीक्ष्य ज्ञात्वा पञ्चकर्म्मविशुद्धस्य पुंसः तद्घ्नैः वातादिदोषहरभेषजै रुपाचरेदित्यर्थः । ६३

मञ्जिष्ठा कुष्ठ-तगर-त्रिफला-शर्करा-वचाः ।
द्वे निशे मधुकं मेदा दीप्यकः कटुरोहिणी ॥ ६४ ॥
पयस्या-हिङ्गु-काकोली वाजिगन्धा-शतावरीः ।
पिष्ट्वाक्षांशैर्घृतप्रस्थं पचेत् क्षीराच्चतुर्गुणम् ॥ ६५ ॥
योनिशुक्रप्रदोषेषु तत् सर्वेषु च शस्यते ।
आयुष्यं पौष्टिकं मेध्यं धन्यं पुंसवनं परम् ।
फलसर्पिरिति ख्यातं पुष्ये पीतं पलाय यत् ॥ ६६ ॥
म्रियमाणप्रजानाञ्च गर्भिणीनाञ्च पूजितम् ।
एतत्परञ्च बालानां ग्रहघ्नं देहवर्द्धनम् ॥ ६७ ॥

इति श्रीमद्वाग्भट विरचितायामष्टाङ्गहृदय संहितायामुत्तरे
तन्त्रे गुह्यरोग प्रतिषेधो नाम चतुस्त्रिंशोऽध्यायः ॥

मञ्जिष्ठेत्यादौ पयस्या क्षीरविदारी । ६४—६७

इति (श्रीशिवदास सेन कृते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे
तन्त्रे चतुस्त्रिंशोऽध्यायः ।
शल्यतन्त्रं समाप्तम् ।

पञ्चत्रिंशोऽध्यायः ।

अथातो विषप्रतिषेधं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥
मथ्यमाने जलनिधावमृतार्थं सुरासुरैः ।
जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥ १ ॥
दीप्ततेजाश्चतुर्द्रंष्ट्रो हरिकेशोऽनलेक्षणः । (१)

इदानीमुद्देशक्रमानुरोधाच्छल्यतन्त्रमनु विषतन्त्रं वाच्यं तत्र प्रथमं विषस्य प्रागुत्पत्तिमाह मथ्यमान इत्यादि । हरिकेश इति कपिलकेशः । १।२—

जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः ॥ २ ॥
हुंकृतो ब्रह्मणा मूर्तो स्ततः स्थावरजङ्गमाः ।
सोऽव्यतिष्ठन्निजं रूपमुज्झित्वा वञ्चनार्थकः ॥ ३ ॥

जगदित्यादि । तं पुरुषं दृष्टा जगद् विषण्णमभूत । अतो विषाद जननाद्धेतो-रसौ पुरुषो ब्रह्मणा हुंकृतः सन् ब्रह्मणो हुंकारेण भीतः सन् निजं रूपमुज्झित्वा पुरुषरूपं परित्यज्य स्थावरजङ्गमा मूर्त्तो रव्यतिष्ठद् प्रविवेश । वञ्चनार्थक इति मायावी । —२।३

स्थिरमत्युल्वणं वीर्यं यत् कन्देषु प्रतिष्ठितम् ।
कालकूटेन्द्रवत्साख्य-शृङ्गी-हालाहलादिकम् ॥ ४ ॥

तत्र स्थावरं विषं विवृणोति स्थिरमित्यादि । कन्देषु प्रतिष्ठितं यद् विषं तत् स्थिरमिति स्थावरम् । किं विशिष्टं वीर्य्येऽत्युल्वणम् । कन्देष्विति बहुवचनेन गणः सूच्यते तेन मूलादीनां ग्रहणम् । उक्तं हि सुश्रुते —

"मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एवच ।
निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥" इति (कं २ अ)

मूलं ससारम्, कन्दस्त्वसारः कच्चीवत् । हालाहलादिकमित्यादिशब्दात् सर्षपक वलाहकादीनां ग्रहणम् । ४

(१) हरित्केश इति वा पाठः ।

सर्पलूतादिदंष्ट्रासु दारुणं जङ्गमं विषम् ।

जङ्गमं विषं विवृणोति सर्पेत्यादि । आदि शब्दाद् वृश्चिकगृहगोधिकादीनां ग्रहणम् । ५—

स्थावरं जङ्गमञ्चेति विषं प्रोक्तमकृत्रिमम् ॥ ५ ॥

उक्तस्य द्विविधविषस्याकृत्रिमत्वमाह स्थावरमित्यादि ।— ५

कृत्रिमं गरसंज्ञन्तु क्रियते विविधौषधैः ।

कृत्रिमं विषमाह कृत्रिममित्यादि । विविधौषधैर्यद्विषं क्रियते तद्गरसंज्ञः । विविधौषध संयोगजं गरसंज्ञं कृत्रिममित्यर्थः । ६—

हन्ति योगवशेनाशु चिराच्चिरतराच्च तत् ॥ ६ ॥
शोफ-पाण्डूदरोन्माद-दुर्नामादीन् करोति च ॥ ७ ॥

हन्तीत्यादि । अत्र गरसंज्ञं विषं योगवशेन द्रव्यसंयोगमहिम्ना कदाचिदाशु हन्ति कदाचिच्चिरात् कदाचिच्च चिरतरादिति । यदि वा न हन्ति तदा शोफादीन् करोति । चरकेप्युक्तम् (चिं २३ अं)
"गरसंयोगजं चान्यं गरसंज्ञं गरप्रदम् ।" इति —६।७

तीक्ष्णोष्णरूक्षविशदं व्यवाय्याशुकरं लघु ।
विकाशि सूक्ष्ममव्यक्तरसं विषमपाकि च ॥ ८ ॥
ओजसो विपरीतं तत् तीक्ष्णाद्यैरन्वितं गुणैः ।
वातपित्तोत्तरं नृणां सद्यो हरति जीवितम् ॥ ९ ॥

विषगुणानाह तीक्ष्णेत्यादि । व्यवायि सर्व्वतः प्रसरणशीलम् । विकाशीति धातुहिंसकम् । सूक्ष्ममिति सूक्ष्ममार्गं स्रोतोऽनुसारि । तथा जलवदव्यक्तरसम् । विषस्याशुकारित्वात् स्वकार्य्यं जनने पाककालापेक्षा नास्तीत्यर्थः । किं विशिष्टम् ओजसो विपरीतम् ओजोगुण विपरीतगुणम् । अत्रैव हेतुमाह तीक्ष्णाद्यै रन्वितं गुणैरिति । पुनः किं विशिष्टं वातपित्तोद्भवम् वातपित्ते उत्कर्षेणातिशयेन भवतः प्रकुप्यतो यस्मात् तद् वातपित्तोद्भवम् । एतेन कफ प्रकोपकत्वमपि अस्य उक्तं भवति । ८।९

विषं हि देहं सम्प्राप्य प्राग् दूषयति शोणितम् ।
कफपित्तानिलांश्चानु समं दोषान् सहाश्रयान् ॥ १० ॥(२)
ततो हृदयमास्थाय देहोच्छेदाय कल्पते ॥ ११ ॥

सद्यो हरति जीवितमिति यदुक्तं तदेवोपपादयति विषं हीत्यादि । विषं हि पूर्व्वं शोणितं दूषयति अनु पश्चात् कफपित्तानिलान् दोषान् सममित्येकत्रैव दूषयति । सहाश्रयानिति आश्रया वातादिवहधमन्यः तत्सहितान् । ततोऽनन्तरं हृदयमास्थाय हृदयं व्याप्य देहोच्छेदाय कल्पत इत्यर्थः । १०।११

स्थावरस्योपयुक्तस्य वेगे पूर्वे प्रजायते ।
जिह्वायाः श्यावता स्तम्भो मूर्च्छा त्रासः क्लमो वमिः ॥ १२ ॥
द्वितीये वेपथुः स्वेदो दाहः कण्ठे च वेदना ।
विषञ्चामाशयं प्राप्तं कुरुते हृदि वेदनाम् ॥ १३ ॥
तालुशोषस्तृतीये तु शूलञ्चामाशये भृशम् ।
दुर्बले हरिते शूने जायेते चास्य लोचने ॥ १४ ॥
पक्वाशयगते तोद-हिक्का-कासान्त्रकूजनम् ।
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥ १५ ॥
कफप्रसेको वैवर्ण्यं पर्वभेदश्च पञ्चमे ।
सर्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥ १६ ॥
षष्ठे संज्ञाप्रणाशश्च सुभृशञ्चातिसार्यते ।
स्कन्ध-पृष्ठ-कटीभङ्गो भवेन्मृत्युश्च सप्तमे ॥ १७ ॥

इदानी स्थावरस्येत्यादिना क्रमेण सप्तानां विषवेगानां लक्षणमाह । स्तम्भोऽपि जिह्वाया एव । वमिरित्यन्तं प्रथमवेगस्य लक्षणम् । हृदि वेदना मित्यन्तं द्वितीयस्य । अन्त्रकूजन मित्यन्तं तृतीयस्य । गौरव मित्यन्तं चतुर्थस्य । वेदनेत्यन्तं पञ्चमस्य, अतिसार्य्यत इत्यन्तं षष्ठस्य । १२—१७

प्रथमे विषवेगे तु वान्तं शीताम्बुसेचितम् ।
सर्पिर्मधुभ्यां संयुक्तमगदं पाययेद्द्रुतम् ॥ १८ ॥

(२) सहाश्रयानिति वा पाठः ।

उक्तानां विषवेगानां क्रमेण चिकित्सितमाह प्रथम इत्यादि। अत्र तथा वक्ष्यमाणे चाविशेषेणागदश्रुत्या दूषीविषहरोऽगदो बोध्य इति ब्रह्मदेवः। १८

द्वितीये पूर्ववद्वान्तं विरिक्तञ्चानुपाययेत्।
तृतीयेऽगदपानन्तु हितं नस्यं तथाञ्जनम् ॥ १९ ॥

द्वितीय इत्यादौ पाययेदित्यत्रागदमिति सम्बध्यते। पूर्ववदित्यनेन मधुघृताभ्याम् अगद पानं बोधयति। १९

चतुर्थे स्नेहसंयुक्तमगदं प्रतियोजयेत्।
पञ्चमे मधुककाथमाक्षिकाभ्यां युतं हितम् ॥ २० ॥

चतुर्थे स्नेह संयुक्तमिति स्नेहो गव्यघृतम्। २०

षष्ठेऽतिसारवत् सिद्धिरवपीडस्तु सप्तमे।
मूर्ध्नि काकपदं कृत्वा सासृग्वा पिशितं क्षिपेत् ॥ २१ ॥

षष्ठेऽतिसारवत् सिद्धिरिति चिकित्सा। काकपदमिति काकपदाकृतिशस्त्रपदमित्यर्थः मूर्ध्निति तालुनि। २१

कोशातक्यग्निकः पाठासूर्यवल्यमृताभयाः।
शेलुः शिरीषः किणिही हरिद्रे गिरिजाह्वया ॥ २२ ॥
पुनर्नवे त्रिकटुकं बृहत्यौ शारिवे बले।
एषां यवागूं निर्यूहेऽशीतां सघृतमाक्षिकाम् ॥ २३ ॥
युञ्जाद्वेगान्तरे सर्वविषघ्नीं कृतकर्मणः।

इदानीमुक्त वेगानां, मध्ये यत कर्त्तव्यं तदाह कोषातकीत्यादि। कोषातकी घोषकः, अग्निको लाङ्गलिका अजमोद इति ब्रह्मदेवः मोरट इत्यन्ये। सूर्य्यवल्ली सूर्य्यावर्त्तः ब्रह्मदेवस्तु पटोलसदशपत्ता यस्याः पत्ररसेनाक्तं मांसं स्विन्नमिव भवतीत्याह। शेलुर्बहुवारः, किनिही कटभी, गिरिजाह्वया अपराजिता, सुश्रुतेऽपि "गिर्य्याह्वारजनी द्वयम्" इत्युक्तम्। बले इति बलाद्वयम्। सुश्रुतटीकाकृतोऽपि "श्वेतपीतपुष्पभेदेन द्वे बले" इति व्याचक्षते। अन्येतु 'शारिवे बले' इत्यत्र शारिवोपले' इति पठन्ति। कृतकर्म्मण इति कृतं पूर्व्वोक्तवेगविहितं कर्म्म चिकित्सितं यस्य तस्येत्यर्थः। सुश्रुतेऽपि "वेगान्तरे त्वन्यतमे कृते कर्मणि" इत्युक्तम्। २२—२४—

तद्वन्मधुक-मधूक-पद्मकेशर-चन्दनैः ॥ २४ ॥

यवाग्वन्तरमाह तद्वदित्यादि। तद्वदिति मधुकादिक्वाथे सिद्धा यवागूः सघृतमाक्षिका। तद्वदिति सर्व्वविषघ्नीत्यर्थः। —२४

अञ्जनं तगरं कुष्ठं हरितालं मनःशिला।
फलिनी त्रिकटु स्पृक्का नागपुष्पं सकेशरम् ॥ २५ ॥
हरेणु मधुकं मांसी रोचना कालमालिका।
श्रीवेष्टकं सर्जरसः शताह्वा कुङ्कुमं बला ॥ २६ ॥
तमालपत्र-तालीस-भूर्जोशीरं निशाद्वयम्।
कन्योपवासिनी स्नाता शुक्लवासा मधुप्लुतैः ॥ २७ ॥
द्विजानभ्यर्च्य तैः पुष्ये कल्पयेदगदोत्तमम्।
वैद्यश्चात्र तदा मन्त्रं प्रयतात्मा पठेदिमम् ॥ २८ ॥

चन्द्रोदयाख्यमगदमाह अञ्जनमित्यादि। अञ्जनं रसाञ्जनं, फलिनी प्रियङ्गुः, नागपुष्पं नागकेशरं, केशरं पद्मकेशरं, रोचना गोरोचना, कालमालिका कृष्णपर्णासः। कन्या द्विजानभ्यर्च्य पूजयित्वा तै रित्यञ्जनतगरादिभिर्द्रव्यैः मधुप्लुतैरिति मधुसिक्तैः, पुष्य इति पुष्यनक्षत्रे अगदोत्तमं कल्पयेदिति योजना। वैद्यश्चात्र कन्यायाः समीपे तदेति अञ्जनादिद्रव्यपेषणकाले इमं मन्त्रं पठेत्। २५—२८

नमः पुरुषसिंहाय नमो नारायणाय च।
यथासौ नाभिजानाति रणे कृष्णपराजयम् ॥ २९ ॥
एतेन सत्यवाक्येन अगदो मे प्रसिध्यतु।
नमो वैडूर्यमाते हुलुहुलु रक्ष मां सर्वविषेभ्यः ॥ ३० ॥
गौरि गान्धारि चण्डालि मातङ्गि स्वाहा।
पिष्टे च द्वितीयो मन्त्रः ओं हरिमायि स्वाहा ॥ ३१ ॥

कोऽसौ मन्त्र इत्याह नम इत्यादि। मातङ्गिस्वाहेत्यन्तः पेषणकालीनो मन्त्रः। पेषणानन्तरन्तु मन्त्रान्तरं पठनीय मित्याहुः पिष्टे च द्वितीयो मन्त्र इति। तमेव द्वितीयं मन्त्रमाह ॐहरिमायि स्वाहेति। २९—३१

अशेषविषवेतालग्रहकार्मणपाप्मसु।
मरक-व्याधि-दुर्भिक्ष-युद्धाशनिभयेषु च ॥ ३२ ॥

पाननस्याञ्जनालेपमणिबन्धादियोजितः ।
एष चन्द्रोदयो नाम शान्तिः स्वस्त्ययनं परम् ।
बासवो वृत्रमवधीत् समालब्धोऽमुनाकिल (१) ॥ ३३ ॥

उक्तस्यागदस्य फलमाह अशेषेत्यादि । कार्म्मणः परद्रोहाद्यो योगः । मणिबन्धो मणिबन्धादि प्रदेशे उक्तागदबन्धनम् । समालब्धोऽमुनेति अमुना अगदेन कृतानुलेपनः । ३२।३३

जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्नि-वातातप-शोषितं वा ।
स्वभावतो वा न गुणैः सुयुक्तं दूषीविषाख्यं विषमभ्युपैति ॥ ३४ ॥
वीर्याल्पभावादविभाव्यमेतत् कफावृतं वर्षगणानुबन्धि ।

स्थावरजङ्गमविषमेव जीर्णत्वादिभिर्विशेषैः दूषीविषसंज्ञां लभते तदाह जीर्णमित्यादि। जीर्णमिति पुराणम्। विषघ्नौषधिभिरगदैर्हतमिति हतवीर्य्यम्, स्वभावतो वा न गुणैः सुयुक्तमिति स्वभावादेव किमपि विषं व्यवायिविकाशि-प्रभृतिषु गुणेषु मध्ये एकद्वित्रिगुणहीनत्वाद् गुणैः सम्यग् युक्तं न भवति तदा विषमेव दूषीविषसंज्ञां प्राप्नोति। वीर्य्याल्पभावादविभाव्यमिति हीन वीर्य्यत्वेन तत्कालं न मारयतीति कृत्वा विषमित्यविभाव्यं लक्षयितुमशक्यम्। कफावृतमिति कफावृततया मन्दीभूतौष्ण्यगुणं सत् सद्यो न मारयेदिति भावः। वर्षगणानुबन्धीति अपाकाच्चिरस्थायीत्यर्थः । ३४।३५—

तेनार्दितो भिन्नपुरीषवर्णो दुष्टास्ररोगी तृडरोचकार्तः ॥ ३५ ॥
मुर्च्छन् वमन् गद्गदवाक् विमुह्यन् भवेच्च दूष्योदरलिङ्गजुष्टः ।

दूषीविषार्दितस्य लक्षणमाह (तेनार्दित इत्यादि) तृड़रोचकाभ्यां पिपासारुचिभ्यामार्त्तः । —३५।३६—

आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी ॥ ३६ ॥
भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षः स यथा विहङ्गः ।

तस्यैव दूषीविषस्य स्थानविशेष सम्बन्धाद्विशिष्ट लक्षणमाह आमाशयस्थ-इत्यादि। वातरोगश्च कफावरणेन वातरोगात्। पक्वाशयस्थोऽनिलपित्तरोगीति

(१) समालिप्त इति वा पाठः। श्लोकोऽयं कुत्र कुत्र पुस्तके न दृश्यते। शिवदासेन व्याख्यातश्च।

पक्वाशये दुष्टवातसम्बन्धेन तत्र प्रत्यासन्नाशयस्य पित्तस्यापि कोप इत्यर्थः। ध्वस्त-शिरोरुहाङ्ग इति ध्वस्तकेशः केशशातयुक्तः ध्वस्ताङ्ग इत्यवसन्नशरीरः। अन्येतु अङ्गशब्देनात्र अङ्गरुहमुच्यते तात्स्थात् अतएवोक्तमन्यत्र "सीदति केशलोमानि तस्मिन् पक्वाशयं गते" इत्याहुः । —३६।३७—

स्थितं रसादिष्वथवा विचित्रान् करोति धातुप्रभवान् विकारान् ॥ ३७ ॥

तस्यैव दूषीविषस्य रसादिगतस्य लक्षणमाह स्थितमित्यादि। विचित्रान् इति नानाविधान्। धातवो रसादयस्तत् प्रभवान् ते च दोषभेदीयोक्ताः । ३७—

प्राग्वाताजीर्णशीताभ्रदिवास्वप्नाहिताशनैः ।
दुष्टं दूषयते धातूनतो दूषीविषं स्मृतम् ॥ ३८ ॥

दूषीविष निरुक्तिमाह प्राग्वातेत्यादि। अजीर्णमित्यजीर्णभोजनम्। शीत शब्देन शीतकालः शीतदेशश्चानूप उच्यन्ते। अभ्र शब्देन मेघागमोपलक्षितं दुर्दिन-मुच्यते । ३८

दूषीविषार्तं सुस्विन्नमूर्ध्वञ्चाधश्च शोधितम् ।
दूषीविषारिमगदं लेहयेन्मधुनाप्लुतम् ॥ ३९ ॥

दूषीविष चिकित्सामाह दूषीविषार्त्तमित्यादि। सुस्विन्नमिति यद्यपि विषे स्वेदो निषिद्धः, तथापि दूषीविषस्य मन्दवीर्य्यतया कफावरणाच्च स्वेदोऽत्र न विरुध्यते। स्वेदेन कफस्यावरकस्य व्यपगमात् कोष्ठमानीय संशोधनेन यतो ह्रीयते। अन्येत्वनयैवानुपपत्त्या सुस्निग्धमिति पठन्ति । ३९

पिप्पल्यो ध्यामकं मांसी रोध्रमेला सुवर्चिका ।
कुटन्नटं नतं कुष्ठं यष्टी चन्दनगैरिकम् ॥ ४० ॥
दूषीविषारिर्नाम्नाऽयं न चान्यत्रापि वार्यते ।

तमेव दूषीविषारिमगदमाह पिप्पल्य इत्यादि। ध्यामकं गन्धतृणम्, कुटन्नटं कैवर्त्तमुस्तकम्। नचान्यत्रापि वार्य्यते इति दूषीव्यतिरिक्ते विषान्तरेऽपि न निवार्य्यत इत्यर्थः । ४०।४१—

विषदिग्धेन विद्धस्तु प्रताम्यति मुहुर्मुहुः ॥ ४१ ॥
विवर्णभावं भजते विषादञ्चाशु गच्छति ।
कीटैरिवावृतश्चास्य गात्रं चिमिचिमायते ॥ ४२ ॥

श्रोणि-पृष्ठ-शिरःस्कन्ध-सन्धयः स्युः सवेदनाः ।
कृष्णदुष्टास्रविस्रावी तृण्मूर्च्छा-ज्वर-दाहवान् ॥ ४३ ॥
दृष्टि-कालुष्य-वमथु-श्वास-कासकरः क्षणात् ।
आरक्तपीतपर्यन्तः श्यावमध्योऽतिरुग्व्रणः ॥ ४४ ॥
श्वयते पच्यते सद्यो गत्वा मांसञ्च कृष्णताम् ।
प्रक्लिन्नं शीर्यतेऽभीक्ष्णं सपिच्छिलपरिस्रवम् ॥ ४५ ॥

विषाक्तशरादिविद्धस्य चिकित्सामाह विषदिग्धेनेत्यादि । प्रताम्यतीति मुह्यति । —४३—४५

कुर्यादमर्मविद्धस्य हृदयावरणं द्रुतम् ।
शल्यमाकृष्य तप्तेन लोहेनानु दहेद् व्रणम् ॥ ४६ ॥
अथवा मुष्कक-श्वेता-सोमत्वक्ताम्रवल्लितः ।
शिरीषाद् गृध्रनख्याश्च चूर्णेन प्रतिसारयेत् ॥ ४७ ॥
शुक-नासा-प्रतिविषा-व्याघ्रीमूलैश्च लेपयेत् ।
पीतदष्टचिकित्साञ्च कुर्यात्तस्य यथार्थतः (१) ॥ ४८ ॥
व्रणे तु पूतिपिशिते क्रिया पित्तविसर्पवत् ।

अस्यैव चिकित्सामाह कुर्य्यादित्यादि । हृदयावरणमिति हृदयरक्षाकर मौषधं हृदयावरणं तच्च वक्ष्यमाणम् । श्वेता अपराजिता । सोमत्वक् सोमवल्कः श्वेतखदिर इत्यर्थः । ताम्रवल्ली मञ्जिष्ठा । गृध्रनखी शब्देनाविशेषात् श्वेत लोहित पुष्पभेदेन काकादनीद्वयमेव गृह्यते । पीतदष्टचिकित्सामिति विषपीत चिकित्सां सर्पदष्टचिकित्साञ्चेत्यर्थः । यथार्थत इति यथायोग्यमित्यर्थः । ४६—४९—

सौभाग्यार्थं स्त्रियो भर्त्रे राज्ञे वाऽरातिचोदिताः ॥ ४९ ॥
गरमाहारसम्पृक्तं यच्छन्त्यासन्नवर्त्तिनः ।

गरोत्पत्तिप्रकारमाह सौभाग्यार्थमित्यादि । गरमिति गरसंज्ञकं कृत्रिमं विषम् । —४९—५०—

नानाप्राण्यङ्गशकृतां विरुद्धौषधिभस्मनाम् ।
विषाणाञ्चाल्पवीर्याणां योगो गर इति स्मृतः ॥ ५० ॥

(१) कीटदष्टचिकित्सामिति वा पाठः ।

तेन पाण्डुः कृशोऽल्पाग्निः कास-श्वास-ज्वरार्दितः ।
वायुना प्रतिलोमेन स्वप्नचिन्तापरायणः ॥ ५१ ॥
महोदर-यकृत्प्लीही दीनवाग् दुर्बलोऽलसः ।
शोफवान् सतताध्मातः शुष्कपादकरः क्षयी ॥ ५२ ॥
स्वप्ने गोमायु-मार्जार-नकुल-व्याल-वानरान् ।
प्रायः पश्यति शुष्कांश्च वनस्पति-जलाशयान् ॥ ५३ ॥
मन्यते कृष्णमात्मानं गौरो गौरञ्च कालकः ।
विकर्ण-नासा-नयनं पश्येत्तद्विहतेन्द्रियः ॥ ५४ ॥
एतैरन्यैश्च बहुभिः क्लिष्टो घोरैरुपद्रवैः ।
गरार्त्तो नाशमाप्नोति कश्चित् सद्योऽचिकित्सितः ॥ ५५ ॥

तदेव दर्शयति नानेत्यादि । तेनेति गरेण । वायुना प्रतिलोमेनेति उपलक्षणे तृतीया । सतताध्मात इति सर्व्वदा आध्मानयुक्तः । विहतेन्द्रियइति गरोपहतेन्द्रियः । —५०—५५

गरार्त्तो वान्तवान् भुक्त्वा तत् पथ्यं पानभोजनम् ।
शुद्धहृच्छीलयेद्धेम सूत्रस्थानविधेः स्मरन् ॥ ५६ ॥
शर्करा-क्षौद्र-संयुक्तं चूर्णं ताप्य-सुवर्णयोः ।
लेहः प्रशमयत्युग्रं सर्वयोगकृतं विषम् ॥ ५७ ॥

गरचिकित्सामाह गरार्त्त इत्यादि । तत्पथ्यमिति गरहितं पानभोजनं भुक्त्वा वान्तवानिति कृतवमनः सन् शुद्धहृदिति वमनेन शुद्धहृदयः सन् हेमेति जारित पुटित सुवर्णचूर्णं शीलयेत् । सूत्रस्थानविधेः स्मरन्निति अन्नरक्षाध्यायोक्तं (७ अं) विधिं स्मरन् इत्यर्थः । स्मृत्यर्थकर्म्मणीत्यनेन षष्ठी । ताप्यं स्वर्णमाक्षिकम् । सर्व्वयोगकृतं विषमिति योगकृतं विषं गरमित्यर्थः । ५६—५७

मूर्वामृता-नत-कणा-पटोली-चव्य-चित्रकान् ।
वचा-मुस्त-विडङ्गानि तक्रं कोष्णाम्बु-मस्तुभिः ॥ ५८ ॥
पिबेद्रसेन वाम्लेन गरोपहतपावकः ।
पारावतामिष-शठी-पुष्कराह्वं शृतं हितम् ॥ ५९ ॥

गर-तृष्णा-रुजा-कास-श्वास-हिक्का-ज्वरापहम् ।

मूर्व्वेत्यादौ नतं तगरपादिका। अम्लेन रसेनेति बीजपूररसेन अन्येतु मांसरसेनेत्याहुः। पारावतामिषं पारावतमांसम्। पारावतामिषादिभिः शृतशीतं जलमित्यर्थः। एतच्च शृतशीतजलविधानं षडङ्गपरिभाषयेति वदन्ति। अन्येतु राजयक्ष्म चिकित्सितोक्त मांसरस साधनवदस्यापि साधन मिच्छन्ति। ५८—६०—

विषप्रकृति-कालान्न-दोष-दूष्यादिसङ्गमे ॥ ६० ॥
विषसङ्कटमुद्दिष्टं शतस्यैकोऽत्र जीवति ।

इदानीं विषस्यैव स्वानुगुणप्रकृत्यादि संसर्गे सति विषसंकटाख्या अवस्था भवतीत्याह विषमित्यादि। तत्र विषवर्द्धकत्वेन विषानुगुणा प्रकृतिः पित्तप्रकृतिः, विषानुगुणः कालो वर्षाकालो ग्रीष्मकालश्च, विषानुगुण मन्नं तिलकुलत्थादि। विषानुगुणो दोषः पित्तं, विषानुगुणं दूष्यं रक्तम्। आदि शब्दाद्देशसात्म्यादीनां ग्रहणम्। शतस्यैकोऽत्र जीवतीति अत्र विष संकटे शतमध्ये एकः कदाचिज्जीवति। —६०।६१—

क्षुत्तृष्णा-घर्म-दौर्बल्य-क्रोध-शोक-भय-श्रमैः ॥ ६१ ॥
अजीर्णवर्चो द्रवतः पित्तमारुतवृद्धिभिः ।
तिलपुष्पफलाघ्राण-भूवाष्प-घनगर्जितैः ॥ ६२ ॥
हस्ति-मूषिक-वादित्र-निःस्वनैर्विषसङ्कटैः ।
पुरोवातोत्पलामोद-मदनैर्वर्द्धते विषम् ॥ ६३ ॥

अपरानपि विषवर्द्धकान् भावानाह क्षुदित्यादि। मदनैरिति कामोद्दीपकैर्वनितादिभिः।—६१—६३

वर्षासु चाम्बुयोनित्वात् संक्लेदं गुडवद्गतम् ।
विसर्पति घनापाये तदागस्त्यो हिनस्ति च ॥ ६४ ॥
प्रयाति मन्दवीर्यत्वं विषं तस्माद्घनात्यये ।

विषस्य वर्षासु विशेष प्रकोपे शरदि चोपशमे हेतुमाह वर्षास्वित्यादि। गुडो हि यथा पिण्डितः सन् अम्बुयोनित्वाद् वर्षासु संक्लेदं याति तथा विषमपि अम्बुयोनित्वाद् वर्षासु क्लिन्नं सद् विसर्पति उत्कृष्टशक्तिकं भवति। अतएव दूषीविषार्त्ता वर्षास्वतिपीड़िता भवन्ति। ६४।६५—

इति प्रकृतिसात्म्यर्तु स्थानवेगबलाबलम् ॥ ६५ ॥
आलोच्य निपुणं बुद्ध्या कर्मानन्तरमाचरेत् ।

विषस्याम्बुयोनित्वञ्च अध्यायादावेवोक्तमिति इतीत्यादि। इति पूर्व्वोक्तानुसारेण प्रकृत्यादीनां बलाबलं निपुणं यथा स्यात्तथा बुद्ध्या आलोच्य अनन्तरं कर्म्म चिकित्सा माचरेत्। —६५।६६—

श्लैष्मिकं वमनैरुष्ण-रूक्ष-तीक्ष्णैः प्रलेपनैः ॥ ६६ ॥
कषाय-कटु-तिक्तैश्च भोजनैः शमयेद्विषम् ।
पैत्तिकं स्रंसनैः सेकप्रदेहैर्भृशशीतलैः ॥ ६७ ॥
कषाय-तिक्त-मधुरैर्घृतयुक्तैश्च भोजनैः ।
वातात्मकं जयेत् स्वादु-स्निग्धाम्ल-लवणान्वितैः ॥ ६८ ॥
सघृतैर्भोजनैर्लेपैस्तथैव पिशिताशनैः ।

इदानीमुल्बणदोषभेदेन चिकित्सामाह श्लैष्मिकमित्यादि। श्लैष्मिकमिति श्लेष्मोल्बणम् किंवा कफस्थानगतत्वेन श्लेष्मलिङ्गबहुलञ्च। एवं पैत्तिक वातिकमित्यपि व्याख्येयम्। पिशिताशनैरिति मांस भोजनैः। ६७—६९—

नाघृतं स्रंसनं शस्तं प्रलेपो भोज्यमौषधम् ॥ ६९ ॥
सर्वेषु सर्वावस्थेषु विषेषु न घृतोपमम् ।
विद्यते भेषजं किञ्चिद्विशेषात् प्रबलेऽनिले ॥ ७० ॥

सर्व्वेष्वेव विरेचनादि योगेषु घृतस्यावश्यप्रयोज्यतामाह नाघृतमित्यादि। अत्रैव घृतस्य प्राधान्यरूपं हेतुमाह सर्वेष्वित्यादि। —६९।७०

अयत्नाच्छ्लेष्मगं साध्यं यत्नात् पित्ताशयाशयम् ।
सुदुःसाध्यमसाध्यं वा वाताशयगतं विषम् ॥ ७१ ॥

इति श्रीमद् वाग्भट विरचिताया मष्टाङ्गहृदय संहितायामुत्तरे तन्त्रे
विष प्रतिषेधो नाम पञ्चत्रिंशोऽध्यायः ॥

विषस्य दोषस्थान सम्बन्धविशेषेण सुखसाध्यत्वादिकमाह अयत्नादित्यादि। श्लेष्मगमिति कफस्थानगतम्। पित्ताशयः पित्तस्थानम् स एव आशयः स्थानं यस्य विषस्य। ७१

इति (श्रीशिवदास सेन कृते अष्टाङ्ग हृदय तत्त्वबोधे)
उत्तरे तन्त्रे पञ्चत्रिंशोऽध्यायः ।

षट्त्रिंशोऽध्यायः।

अथातः सर्पविषप्रतिषेधं व्याख्यास्यामः
इतिहस्माहु रात्रेयादयो महर्षयः ॥
दर्वीकरा मण्डलिनो राजीमन्तश्च पन्नगाः।
त्रिधा समासतो भौमा भिद्यन्ते—

पूर्वाध्याये स्थावरविषचिकित्सित मभिधाय सम्प्रति जङ्गमविषप्रतिषेधे वक्तव्ये जङ्गमेषु सर्पस्य प्राधान्यात् प्रथमं सर्प (विष) प्रतिषेध माह अथात— इत्यादि। अत्र भौमसर्पाणां बहुविधत्वेऽपि समासेन त्रैविध्यमाह दर्वीकरा- इत्यादि। भौमा इति दिव्यवासुकितक्षकादि निरासार्थं विशेषणम्। भौमाः पन्नगाः सर्पाः दर्वीकरमण्डलिराजिमद्भेदेन समासतस्त्रिधा भवन्ति। १—

ते त्वनेकधा ॥ १ ॥
व्यासतो योनिभेदेन नोच्यन्तेऽनुपयोगतः।

तेषां लक्षणमग्रे वाच्यं ते त्वनेकधेत्यादि। ते पुनर्दर्वीकरादयो योनिभेदेनानेकधा भिद्यन्ते यद्यपि तथाप्यत्र व्यासत इति विस्तरेण नोच्यन्ते। तत्रैव हेतुमाह अनुपयोगत इति। तद्भेद कथनस्य चिकित्सानुपयुक्तत्वादित्यर्थः। —१।२—

विशेषाद्रूक्ष-कटुकमम्लोष्णं स्वादु शीतलम् ॥ २ ॥
विषं दर्वीकरादीनां क्रमाद्वातादिकोपनम्।

दर्वीकरादि विष त्रयस्य क्रमाद् वातादिकोपकत्वं सहेतुकमाह विशेषादित्यादि। दर्वीकरस्य विषं रूक्षकटुक मतो वातकोपनम्। मण्डलिनां विषमम्लोष्ण मतः पित्तकोपनम्। राजिमतां विषं स्वादुशीतल मतः कफकोपनमित्यर्थः। विशेषादित्यनेन विषस्य त्रिदोष प्रकोपकत्वेऽपि वातादिकोपकत्वं विशेषाज् ज्ञेय मिति बोधयति। विषञ्च यद्यप्यव्यक्तरसमुक्तं तथापि इह कटुकादिरसाभिधानं प्रभावोक्तरसाभिप्रायेण ज्ञेयम्। यथा आतपे कटुत्वं तद्वदिहापि। किंवा अव्यक्तरसतायामेव मनाक् कटुकादीना माधिक्यं ज्ञेयम्। —२।३—

तारुण्यमध्यवृद्धत्वे वृष्टि-शीतातपेषु च ॥ ३ ॥
विषोल्वणा भवन्त्येते द्व्यन्तरा ऋतुसन्धिषु।

वयोभेदेन ऋतुभेदेन च दर्वीकरादीनां तीव्रतामाह तारुण्येत्यादि। मध्य-इति तारुण्यवार्द्धक्ययो र्मध्ये। वृष्टिशीतातपेषु चेत्यनेन चतुर्मासात्मकानां वर्षाकाल-शीतकाल-ग्रीष्मकालानां ग्रहणम्। एत इति दर्वीकरादयस्त्रयः क्रमेण तारुण्यादिषु तथा वर्षादिषु त्रिषुच विषोल्बणा भवन्तीत्यर्थः द्व्यन्तरा-ऋतुसन्धिष्विति व्यामिश्रजातयः सर्पा ऋतुसन्धिषु विषोल्बणा भवन्तीति योज्यम्। —३।४—

रथाङ्ग-लाङ्गल-च्छत्र-स्वस्तिकांकुशधारिणः ॥ ४ ॥
फणिनः शीघ्रगतयः सर्पा दर्वीकराः स्मृताः।

दर्वीकरादीनां लक्षणमाह रथाङ्गेत्यादि। रथाङ्गं चक्रं फणामध्ये रथाङ्गाद्याकृतिरेखाधारिण इत्यर्थः। फणिन इति फणावन्तः। —४।५—

ज्ञेया मण्डलिनोऽभोगा मण्डलैर्विविधैश्चिताः ॥ ५ ॥
प्रांशवो मन्दगमनाः—

ज्ञेया इत्यादि मन्दगमना इत्यन्तं मण्डलिलक्षणम्। अभोगा इति फणारहिता अल्पफणा वा। प्रांशव इति दीर्घाः। —५।६—

राजीमन्तस्तु राजिभिः ॥
स्निग्धा विचित्रवर्णाभिस्तिर्यगूर्ध्वं विचित्रिताः ॥ ६ ॥

राजीमन्त इत्यादि चित्रिता इत्यन्तं राजीमतां लक्षणम्। —६

गोधासुतस्तु गौधेरो विषे दर्वीकरैः समः।
चतुष्पात्

जातिव्यामिश्रजानां सर्पाणां बहुत्वेनोदाहरणार्थ मेकमाह गोधासुत इत्यादि। गोधायां सर्पेण जनितो यः सर्पः स गौधेरो नाम। किंविशिष्ट श्चतुष्पात् चतुश्चरणः।१—

द्व्यन्तरान् विद्यादेतेषामेव सङ्करात् ॥ ७ ॥
व्यामिश्रलक्षणास्ते हि सन्निपातप्रकोपणाः।

अनुक्तव्यामिश्रजाति संग्रहार्थं माह द्व्यन्तरान् विद्यादेतेषामेव सङ्करादिति। एतेषामिति दर्वीकरादीनां सङ्करादिति मिश्रणात्। द्व्यन्तरानिति द्वयोरन्तरं विशेषो येषु ते तथा। यथा दर्वीकरेण मण्डलिन्यां मण्डलिना दर्वीकरायां जातानित्यर्थः।

व्यन्तरानिति पाठेऽपि स एवार्थः। वि शब्दस्य द्वयर्थत्वात्। एतेषामिति दर्वी-कर-मण्डलि-राजिमताम्। व्यामिश्रलक्षणा इति उक्तदर्वीकरादिलक्षण-व्यामिश्रा इत्यर्थः।—७।८—

आहारार्थे भयात् पादस्पर्शादतिविषात् क्रुधः॥ ८॥
पापवृत्तितया वैराद्देवर्षियमचोदनात्।
दशन्ति सर्पास्तेषूक्तं विषाधिक्यं यथोत्तरम्॥ ९॥
आविष्टात् कारणं ज्ञात्वा प्रतिकुर्याद्यथायथम्॥ (२)

सर्पैः किमर्थं दश्यत इति जिज्ञासायां दंशकारणमाह आहारार्थमित्यादि। पापवृत्तितयेति दुष्टस्वभावतया। आविष्टात् कारणं ज्ञात्वेति मान्त्रिका हि सर्पदष्टे पुरुषे देवताया आवेशं कारयित्वा दंशकारणं वादयन्ति।—८—१०—

व्यन्तरः पापशीलत्वान्मार्गमाश्रित्य तिष्ठति॥ १०॥

व्यन्तर इत्यादि। व्यन्तरः सर्पः पापशीलत्वात् दुष्टस्वभावत्वान् मनुष्यान् दंशितुं पन्थान मावृत्य तिष्ठति।—१०

यत्र लालापरिक्लेदमात्रं गात्रे प्रदृश्यते।
नतु दंष्ट्राकृतं दंशं तत्तुण्डाहतमादिशेत्॥ ११॥
एकं दंष्ट्रापदं द्वे वा व्यालीढाख्यमशोणितम्।
दंष्ट्रापदे सरक्ते द्वे व्यालुप्तं

साध्यत्वादि ज्ञानार्थं दंशविशेषाणां लक्षणमाह यत्रेत्यादि। व्यालुप्तमिति व्यालुप्त संज्ञकम्। ११।१२—

त्रीणि तानि तु॥ १२॥
मांसच्छेदादविच्छिन्नरक्तवाहीनि दष्टकम्।

त्रीणीत्यादिना दष्टकमित्यन्तेन दष्टकाख्यस्य दंशस्य लक्षणमाह। —१२।१३—

दंष्ट्रापदानि चत्वारि तद्वद्दष्टनिपीडितम्॥ १३॥

द्रंष्ट्रापदानीत्यादिना (दष्ट) निपीडित संज्ञकस्य दंशस्य लक्षणमाह। तद्वदित्य-विच्छिन्न रक्तवाहिनीत्यर्थः।—१३

(२) चादिष्टादिति वा पाठः।

निर्विषं द्वयमत्राद्यमसाध्यं पश्चिमं वदेत्।

निर्विषमित्यादि। आद्यं द्वयं तुण्डाहतं व्यालीढञ्च निर्विषं विषरहितम्। असाध्यं पश्चिममिति निपीडिताख्य मसाध्यं वदेदित्यर्थः। १४—

विषंनाहेयमप्राप्य रक्तं दूषयते वपुः॥ १४॥
रक्तमण्वपि तु प्राप्तं वर्द्धते तैलमम्बुवत्।

सर्पविषस्य शोणित सम्बन्धाद् विसारितामाह विषमित्यादि। आहेयं सर्पसम्बन्धि विषं रक्तमप्राप्य वपुर्न दूषयते अण्वपि अल्पमपि रक्तं प्राप्तं सद् वर्द्धते प्रसरति तैल मम्बुवदिति यथा तैलं कर्तृ अम्बु प्राप्य प्रसरतीत्यर्थः। —१४।१५—

भीरोस्तु सर्पसंस्पर्शाद्भयेन कुपितोऽनिलः॥ १५॥
कदाचित् कुरुते शोफं सर्पाङ्गाभिहतन्तु तत्।

दंशमन्तरेणापि सर्पाङ्गसंस्पर्शात् सर्पाङ्गाभिहताख्यो व्याधिर्भवतीत्याह भीरोरित्यादि।—१५।१६—

दुर्गेऽन्धकारे विद्धस्य केनचिद्दष्टशङ्कया॥ १६॥
विषोद्वेगो ज्वर-च्छर्दि-मूर्च्छा-दाहोऽपि वा भवेत्।
ग्लानिर्मोहोऽतिसारो वा तच्छङ्काविषमुच्यते॥ १७॥

शङ्काविषाख्यं व्याधिमाह दुर्गान्धकार इत्यादि। घोरान्धकारे केनचिद् अविषेणापि विद्धस्य पुरुषस्य सर्पेण दष्ट इति शङ्कया विषजनितचित्तोद्वेगात् ज्वरादयो जायन्ते तच्छङ्काविष मुच्यते। विष शङ्कयैव विष लक्षण प्रादुर्भावे विषप्रभाव एव हेतुः।—१६।१७

तुद्यते सविषो दंशः कण्डू-शोफ-रुजान्वितः।
दह्यते ग्रथितः किञ्चिद्विपरीतस्तु निर्विषः॥ १८॥

शङ्काविषे विषभयनिरासार्थं सविषाविषदंशलक्षण माह तुद्यत इत्यादि। किञ्चिद ग्रथित इति स्वल्पग्रन्थिरूपः। १८

पूर्वे दर्वीकृतां वेगे दुष्टं श्यावीभवत्यसृक्।
श्यावता तेन वक्त्रादौ सर्पन्तीव च कीटकाः॥ १९॥
द्वितीये ग्रन्थयो वेगे तृतीये मूर्ध्नि गौरवम्।
दुर्गन्धी दंशविक्लेदश्चतुर्थे छेदनं वमिः॥ २०॥

सन्धिविश्लेषणं तन्द्रा पञ्चमे पर्वभेदनम् ।
दाहो हिका च षष्ठे च हृत्पीड़ा गात्रगौरवम् ॥ २१ ॥
मूर्च्छा विपाकोऽतीसारः प्राप्य शुक्रन्तु सप्तमे ।
स्कन्ध-पृष्ठ-कटीभङ्गः सर्वचेष्टानिवर्तनम् ॥ २२ ॥

दर्वीकरादीनां त्रयाणां वेगभेदेन लक्षणभेद माह पूर्व्वं इत्यादि । सर्पन्तीव च कीटका इति पिपीलिकाः । ग्रन्थय इति ग्रन्थिरूपाः शोथाः । चतुर्थे ष्ठेवनमिति कफप्रसेकः । वेगशब्देन प्रकोप उच्यते । कलानाञ्च सप्तविधत्वाद् वेगस्यापि सप्तविधत्वम् । कला च धात्वन्तर मर्य्यादा । उक्तं हि—

"धात्वन्तरेषु याः सप्त कलाः संपरिकीर्त्तिताः ।
तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् ॥" इति (सुश्रु कं ४ अ) १९—२२

अथ मण्डलिदष्टस्य दुष्टं पीतीभवत्यसृक् ।
तेन पीताङ्गता दाहो द्वितीये श्वयथूद्भवः ॥ २३ ॥
तृतीये दंशविक्लेदः स्वेदस्तृष्णा च जायते ।
चतुर्थ ज्वर्यते दाहः पञ्चमे सर्वगात्रगः ॥ २४ ॥
दष्टस्य राजिलैर्दुष्टं पाण्डुतां याति शोणितम् ।
पाण्डुता तेन गात्राणां द्वितीये गुरुताऽति च ॥ २५ ॥
तृतीये दंशविक्लेदो नासिकाक्षिमुखस्रवाः ।
चतुर्थे गरिमा मूर्ध्नो मन्यास्तम्भश्च पञ्चमे ॥ २६ ॥
गात्रभङ्गो ज्वरः शीतः शेषयोः पूर्ववद्वदेत् ।

मण्डलिसर्पवेगानां लक्षणमाह अथेत्यादि । मन्यास्तम्भश्चेत्यन्तं चतुर्थवेगलक्षणम् । अथ कथं मण्डलिदष्टे राजिलदष्टे च षष्ठ सप्तम वेग लक्षणंनोक्त मित्याशङ्कां हृदि निधायाह शेषयोः पूर्व्ववद् वदेदिति शेषयोरिति षष्ठ सप्तमवेगयो र्लक्षणं पूर्व्ववदिति दर्वीकरदष्टवद् वदेदिति । तेन दर्वीकरदष्टे यत् षष्ठ सप्तम वेग लक्षणं तदनयोरपीत्यर्थः । २३—२७—

कुर्यात् पञ्चसु वेगेषु चिकित्सां न ततः परम् ॥ २७ ॥

पञ्चानां वेगानां साध्यतां तथा षष्ठ सप्तम वेगयो श्चासाध्यतामाह कुर्य्यादित्यादि । —२७

जलाप्लुता रतिक्षीणा भीता नकुलनिर्जिताः ।
शीत-वातातप-व्याधि-क्षुत्तृष्णा-श्रमपीडिताः ॥ २८ ॥
जीर्णा देशान्तरायाता विमुक्तविषकञ्चुकाः ।
कुशौषधीकण्टकवद् ये चरन्तिच काननम् ॥ २९ ॥
देशञ्च देवाध्युषितं सर्पास्तेऽल्पविषा मताः ।

यादृशाः सर्पा अल्पविषा भवन्ति तानाह जलाप्लुता इत्यादि । जलप्लावनेनोपहताः । रति मैथुनं तेन क्षीणाः, जीर्णा इति वृद्धाः । चरके सुश्रुते च वृद्धानां मन्दविषत्व मुक्तम् । तूर्णं देशान्तरायाता इति पाठे तत्काले देशान्तरादागता इत्यर्थः । देशञ्च देवाध्युषितमिति देवादिभि रध्युषित मित्यर्थः । उक्तं हि—

"सुपर्णदेव ब्रह्मर्षि सूत सिद्ध निषेविते ।
विषघ्नौषध जुष्टे च देशे न क्रमते विषम् ॥" इति (सुश्रु कं ४ अ) २८—३०—

श्मशानचितिचैत्यादौ पञ्चमीपक्षसन्धिषु ॥ ३० ॥
अष्टमी-नवमी-सन्ध्या-मध्यरात्रि-दिनेषु च ।
याम्याग्नेय-मघाश्लेषा-विशाखापूर्वनैर्ऋते ॥ ३१ ॥
नैर्ऋताख्ये मुहूर्ते च दष्टं मर्मसु च त्यजेत् ।

विशिष्टदेशनक्षत्रादिदष्टस्यासाध्यतामाह श्मशानेत्यादि । चिति चिता । आदि शब्देन देवायतन वल्मीकादीनां ग्रहणम् । पक्षसन्धिरमावस्या पौर्णमासी च । मध्यरात्रिदिनेषु चेति मध्यरात्रे मध्याह्ने चेत्यर्थः । याम्यं नक्षत्रं भरणी, आग्नेयं कृत्तिका, पूर्व्वशब्देन पूर्व्वात्रयमुच्यते । नैर्ऋतं नक्षत्रं मूलनक्षत्रम् । नैर्ऋतो मुहूर्त्तो दिवसस्य द्वादशमुहूर्त्तः । —३०—३२—

दष्टमात्रः सितास्याक्षः शीर्यमाणशिरोरुहः ॥ ३२ ॥
स्तब्धजिह्वो मुहुर्मूर्च्छन् शीतोच्छ्वासो न जीवति ।
हिक्का श्वासो वमिः कासो दष्टमात्रस्य देहिनः ॥ ३३ ॥
जायन्ते युगपद्यस्य स हृच्छूली न जीवति ।
फेनं वमति निःसंज्ञः श्यावपादकराननः ॥ ३४ ॥
नासावसादो भंगोऽङ्गे विड्भेदः श्लथसन्धिता ।
विषपीतस्य दष्टस्य दिग्धेनाभिहतस्य च ॥ ३५ ॥

भवन्त्येतानि रूपाणि सम्प्राप्ते जीवितक्षये ।
न नस्यैश्चेतना तीक्ष्णैर्न क्षतात् क्षतजागमः ॥ ३६ ॥
दण्डाहतस्य नो राजी प्रयातस्य यमान्तिकम् ।
अतोऽन्यथा तु त्वरया प्रदीप्तागारवद्भिषक् ॥ ३७ ॥
रक्षन् कण्ठगतान् प्राणान् विषमाशु शमं नयेत् ।

असाध्यसाध्यलक्षणान्याह दष्टमात्र इत्यादि । दिग्धेनेति विषलिप्तशस्त्रेण । दण्डाहतस्य नो राजीति कशादिभिस्ताडनाद् यस्य रेखा न जायत इत्यर्थः । प्रयातस्येति गमिष्यतः । "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति भविष्यति 'क्तः' । अतोऽन्यथेति उक्तासाध्यलक्षण व्यतिरेकेणेत्यर्थः । —३२—३८—

मात्राशतं विषं स्थित्वा दंशे दष्टस्य देहिनः ॥ ३८ ॥
देहं प्रक्रमते धातून् रुधिरादीन् प्रदूषयत् ।
एतस्मिन्नन्तरे कर्म दंशस्योत्कर्त्तनादिकम् ॥ ३९ ॥
कुर्याच्छीघ्रं यथा देहे विषवल्ली न रोहति ।

विषं दंशप्रदेशे यावन्तं कालं स्थित्वा अनन्तरं शरीरमाक्रामति तदाह मात्राशतमित्यादि । मात्रा लघ्वक्षरं छोटी वा । एतस्मिन्नन्तर इति यावद्दंशे विषं तिष्ठतीत्यर्थः । आदि शब्दात् निष्पीडनचूषणादीनामुपक्रमाणां ग्रहणम् । उक्तं हि—

"मन्त्रारिष्टोत्कर्त्तन निष्पीडन चूषणाग्निपरीषेकाः ।
अवगाहरक्तमोक्षण वमनविरेकोपधानानि ॥
हृदयावरणाञ्जन नस्यधूमलेहौषधि प्रधमनानि ।
प्रतिसारणं प्रतिविषं संज्ञासंस्थापनं लेपः ॥
मृतसञ्जीवनमेव च विंशतिरेते चतुर्भिरभ्यधिकाः ।
स्युरुपक्रमाः"········ इति । (चरं चि २३ अं) —३८—४०—

दष्टमात्रो दशेदाशु तमेव पवनाशिनम् ॥ ४० ॥
लोष्टं महीं वा दशनैश्छित्वा चाशु ससम्भ्रमम् ।
निष्ठ्येवेन समालिम्पेद्दंशं कर्णमलेन वा ॥ ४१ ॥

दंशस्योपरि बध्नीयादरिष्टां चतुरङ्गुले ।

ससम्भ्रममिति सत्वरम् । निष्ठेवो निष्ठीवनं "थेप" इति यस्य प्रसिद्धिः (बङ्गे) । अरिष्टा 'धरणी' इति प्रसिद्धा सा च द्विविधा क्षौमादिभिर्मन्त्रादिभिश्च । —४०—४२—

क्षौमादिभिर्वेणिकया सिद्धैर्मन्त्रैश्च मन्त्रवित् ॥ ४२ ॥
अम्बुवत् सेतुबन्धेन बन्धेन स्तभ्यते विषम् ।
न वहन्ति शिराश्चास्य विषं बन्धाभिपीडिताः ॥ ४३ ॥

एतदेवाह क्षौमादिभिरित्यादि । क्षौमादिरचितवेणिकया रज्जुविशेषेणेत्यर्थः । बन्धेनेत्यरिष्टाबन्धेन । —४२।४३

निष्पीड्यानूद्धरेद्दंशं मर्मसन्ध्यगतं तथा ।
न जायते विषावेगो बीजनाशादिवाङ्कुरः ॥ ४४ ॥

निष्पीड्येत्यादि । अन्विति अरिष्टाबन्धनानन्तरम् । दंशप्रदेशं निष्पीड्य विषमुद्धरेद् गालयेत् किंवा उत्कृत्य हरेत् । एतच्चोत्कर्त्तनं मर्म्मसन्धी वर्जयित्वा कर्त्तव्यमित्याह मर्म्मसन्ध्यगतमिति । चरकेऽप्युक्तम्—

"दंशान्तु दष्टस्याविसृतं वेणिकां भिषग्बद्धा ।
निष्पीडयेत् त्वरन् दंशमुद्धरेन् मर्मवर्जं वा ॥" इति (चि २३ अं)

विषस्य आवेगः प्रसरणं विषावेगः । ४४

दंशं मण्डलिनां मुक्त्वा पित्तलत्वात्तथापरम् ।
प्रतप्तैर्हेमलोहाद्यैर्दहेदाशूल्मकेन वा ॥ ४५ ॥
करोति भस्मसात् सद्यो वह्निः किं नाम न क्षणात् ।

दाहाख्यमुपक्रममाह दंशमित्यादि । सुश्रुतेऽप्युक्तम्—

"अथ मण्डलिदष्टन्तु न कथञ्चन दाहयेत् ।
सपित्तविषबाहुल्याद्दंशोदाहाद् विनाशयेत् ॥" इति (कं ५ अं)

अपरमिति मण्डलिदंशव्यतिरिक्तं दंशम् । ४५।४६—

आचूषेत् पूर्णवक्त्रो वा मृद्भस्मागदगोमयैः ॥ ४६ ॥

आचूषणाख्यमुपक्रममाह आचूषेदित्यादि । आचूषणे मृद्भस्मादिना वक्त्रपूरणं वक्त्रस्य विषसम्बन्ध परिहारार्थम् । —४६

प्रच्छायान्तररिष्टाया मांसलन्तु विशेषतः । (१)
अङ्गं सहैव दंशेन लेपयेदगदैर्मुहुः ॥ ४७ ॥
चन्दनोशीरयुक्तेन सलिलेन च सेचयेत् ।

प्रलेपो यथा देयस्तानाह प्रच्छायेत्यादि। प्रच्छायेति प्रच्छानरूपं शस्त्रपदं कृत्वा 'छो' छेदने इत्यस्य ल्यपि रूपम्। अरिष्टाया अन्तरिति अरिष्टया क्रोडीकृतस्य प्रदेशस्य मध्ये। सुश्रुतेऽप्युक्तम्—

"समन्तादगदैर्दंशं प्रच्छयित्वा प्रलेपयेत् ।
चन्दनोशीरयुक्तेन वारिणा परिषेचयेत् ॥ इति (कं ५ अं) ४७।४८—

विषे प्रविसृते विध्याच्छिरां सा परमा क्रिया ॥ ४८ ॥

रक्तमोक्षणाख्यमुपक्रममाह विषे इत्यादि। प्रविसृते प्रकर्षेण विसृते। परमा क्रियेति प्रधान उपक्रमः। —४८

रक्ते निर्ह्रियमाणे हि कृत्स्नं निर्ह्रियते विषम् ।

प्राधान्ये हेतुमाह रक्ते इत्यादि। ४९—

दुर्गन्धं सविषं रक्तमग्नौ चटचटायते ॥ ४९ ॥

सविषाविष रक्तज्ञानार्थं लक्षणमाह दुर्गन्धमित्यादि। —४९

यथादोषं विशुद्धञ्च पूर्ववल्लक्षयेदसृक् ।

यथादोषमित्यादि। यथादोषं दोषानुरूपलक्षणयुक्त मसृक् तथा विशुद्धमित्यदोषदुष्टञ्चासृक् पूर्ववल्लक्षयेत् शिराविध्युक्तेन लक्षणेन जानीयादित्यर्थः। ५०—

शिरास्वदृश्यमानासु योज्याः शृङ्गजलौकसः ॥ ५० ॥

यदि शिरा न दृश्यन्ते तदा किं विधेयमित्याह शिरास्वित्यादि। —५०

शोणितं स्रुतशेषञ्च प्रविलीनं विषोष्मणा ।
लेपसेकैस्तु बहुशः स्तम्भयेद्धिमशीतलैः ॥ ५१ ॥

अदुष्ट शोणित ग्रहणोपाय माह शोणितमित्यादि। प्रविलीनमिति द्रवीभूतम्। ५१

अस्कन्ने विषवेगाद्धि मूर्च्छायमदहृद्द्रवः ।
भवन्ति तान् जयेच्छीतैर्वीजेच्चारोमहर्षतः ॥ ५२ ॥

(१) अरिष्टायामिति वा पाठः।

स्कन्ने तु रुधिरे सद्यो विषवेगः प्रशाम्यति ।

यदि उक्तशीतोपचारेण रक्तं न स्तभ्यते ये दोषा भवन्ति स्तम्भनेन च ये गुणा भवन्ति तानाह अस्कन्न इत्यादि। अस्कन्न इति अस्त्याने अस्थिरे इत्यर्थः। हृद्द्रवो धक्धकिका। ५२।५३—

विषं कर्षति तीक्ष्णत्वाद् हृदयं तस्य गुप्तये ॥ ५३ ॥
पिबेद्घृतं घृतक्षौद्रमगदं वा घृताप्लुतम् ॥

हृदयावरणाख्यमुपक्रममाह विषमित्यादि। कर्षतीति हिनस्ति। —५३।५४—

हृदयावरणेनास्य श्लेष्मा ह्युपचीयते ॥ ५४ ॥
प्रवृत्तगौरवोत्क्लेशहृल्लासं वामयेत्ततः ।
द्रवैः काञ्जिक-कौलत्थ-तैल-मद्यादिवर्जितैः ॥ ५५ ॥
वमनैर्विषहृद्भिश्च नैवं व्याप्नोति तद्वपुः ।

हृदयावरणस्य फलमाह हृदयावरणेनेत्यादि। —५४—५६—

भुजङ्गदोषप्रकृतिस्थानवेगविशेषतः ॥ ५६ ॥
सुसूक्ष्मं सम्यगालोच्य विशिष्टां वाऽऽचरेत् क्रियाम् ।

संक्षेपेण चिकित्सासूत्रमाह भुजङ्गेत्यादि। भुजङ्ग विशेषो दर्वीकरादिरूपः दोषविशेषो वातादिः। प्रकृतिः कायिकी मानसी च तत्र कायिकी वातादिकृता मानसी सत्त्वरजस्तमोजन्या। स्थानं देशः स च भूमिरातुरशरीरञ्च। तत्र भूदेशोऽश्वत्थदेवायतनादिः। आतुरशरीरदेशश्च मर्म्मादिः। वेगाः पूर्वमेवोक्ताः। सुसूक्ष्ममित्यनन्तरं विषगतलक्षणमिति शेषः। —५६।५७—

सिन्धुवारितमूलानि श्वेता च गिरिकर्णिका ॥ ५७ ॥
पानं दर्वीकरैर्दष्टे नस्यं मधु सपाकलम् ।

तत्र भुजङ्ग विशेषे चिकित्साविशेषमाह सिन्धुवारितेत्यादि। सिन्धुवारितः सिन्धुवारः, गिरिकर्णिका अपराजिता श्वेतेति तद्विशेषणम्। दर्वीकरदंशे नस्यमप्याह नस्यं समधुपाकलमिति पाकलं कुष्ठम्। —५७।५८—

कृष्णसर्पेण दष्टस्य लिम्पेद्दंशं हृतेऽसृजि ॥ ५८ ॥
चारटी-नाकुलीभ्यां वा तीक्ष्णमूलविषेण वा ।
पानञ्च क्षौद्र-मञ्जिष्ठा-गृहधूमयुतं घृतम् ॥ ५९ ॥

कृष्णसर्पेणेत्यादि। कृष्णसर्पोदर्वीकरविशेष एव। चारटी उत्तरापथे पद्म-

चारिणीतिनाम्ना ख्याता अन्ये तु कुम्भाण्लतामाहुः। नाकुली रास्ना। पानमित्यादौ पीयते इति पानं कर्म्मणि ल्युट्। —५८।५९

तण्डुलीयक-काश्मर्य-किणिही-गिरिकर्णिकाः।
मातुलुङ्गी सिता शेलुः पान-नस्याञ्जनैर्हितः॥ ६० ॥
अगदः फणिनां घोरे विषे राजीमतामपि।

तण्डुलीयकेत्यादिना शेलुरित्यन्तेनैकमगदमाह। काश्मर्य्यं गम्भारी। किणिही पामार्गः, गिरिकर्णिका अपराजिता, सिता शर्करा, शेलुर्बहुवारः। ६०।६१—

समाः सुगन्धा मृद्वीका श्वेताख्या गजवृत्तिका॥ ६१ ॥
अर्द्धांशं सौरसं पत्रं कपित्थं बिल्व-दाडिमम्।
सक्षौद्रो मण्डलिविषे विशेषादगदो हितः॥ ६२ ॥

समा इत्यादिना हितइत्यन्तेनागदान्तरमाह। समा इति समभागाः। सुगन्धा रास्ना, श्वेताख्या अपराजिता। शल्लकी गजवृत्तिकेत्यत्र नगवृत्तिकेति सुश्रुते पठ्यते। सुरसः पर्णासः। सुरसपत्रादि चतुष्टयं प्रत्येकं सुगन्धादिभागापेक्षयाऽर्धांशम्। —६१।६२

पञ्चवल्क-वरा-यष्टी-नागपुष्पैलवालुकम्।
जीवकर्षभकौशीतः सितापद्मकमुत्पलम्॥ ६३ ॥
सक्षौद्रो हिमवान्नाम हन्ति मण्डलिनां विषम्।
लेपाच्छ्वयथु-वीसर्प-विस्फोट-ज्वरदाहहा॥ ६४ ॥

पञ्चवल्केत्यादौ वरा त्रिफला, नागपुष्पं नागकेशरम्, शीतो बहुवारः। ६३।६४

काश्मर्य-वटशुङ्गाणि जीवकर्षभकौ सिता।
मञ्जिष्ठा मधुकञ्चेति दंष्टो मण्डलिना पिबेत्॥ ६५ ॥

काश्मर्य्यमित्यादि स्पष्टम्। ६५

वंशत्वक्बीज-कटुका-पाटलीबीज-नागरम्।
शिरीषबीजातिविषे मूलं गावेधुकं वचा॥ ६६ ॥
पिष्टो गोवारिणाष्टाङ्गो हन्ति गोनसजं विषम्।

वंशत्वगित्यादि। वंशस्य त्वग् वंशनेली, वंशस्य बीजञ्च। गोनसा फणारहिता मण्डलिनः। अष्टाङ्ग संज्ञा चास्य पञ्चाम्रा इतिवत्। ६६।६७—

कटुकातिविषा-कुष्ठ-गृहधूम-हरेणुकाः॥ ६७ ॥
सक्षौद्र-व्योष-तगरा घ्नन्ति राजीमतां विषम्।

कटुकेत्यादि स्पष्टम्। —६७।६८—

निखनेत् काण्डचित्राया दंशं यामद्वयं भुवि॥ ६८ ॥
उद्धृत्य प्रच्छितं सर्पिर्धान्यमृद्भ्यां प्रलेपयेत्।
पिबेत् पुराणञ्च घृतं वराचूर्णावचूर्णितम्॥ ६९ ॥
जीर्णे विरिक्ते भुञ्जीत यवान्नं सूपसंस्कृतम्।

निखनेदित्यादि। काण्डचित्रा सर्पविशेषः चितीति संज्ञया ख्यातः। धान्यमृदिति धान्यमूलस्था मृत्तिका। वराचूर्णं तिफलाचूर्णम्। सूपसंस्कृतमिति सुष्ठु उपप्लुतम्। —६८।७०—

करवीरार्ककुसुममूलल्लाङ्गलिकाकणाः॥ ७० ॥
कल्कयेदारनालेन पाठामरिचसंयुताः।
एष व्यन्तर दष्टानामगदः सार्वकार्मिकः॥ ७१ ॥

करवीरेत्यादि। करवीरस्य कुसुमम्। अर्कस्य मूलमित्यन्वयः। सार्व्वकार्मिक इति पाननस्यालेपनादि विधिना प्रयोजित इत्यर्थः। —७०।७१

शिरीषपुष्पस्वरसे सप्ताहं मरिचं सितम्।
भावितं सर्पदष्टानां पाने नस्याञ्जने हितम्॥ ७२ ॥

शिरीशपुष्पेत्यादौ सितं मरिचमिति शोभाञ्जनबीजम्। ७२

द्विपलं नत-कुष्ठाभ्यां घृतक्षौद्रचतुष्पलम्।
अपि तक्षकदष्टानां पानमेतत् सुखप्रदम्॥ ७३ ॥

द्विपलमित्यादि। द्विपलं चतुःपलञ्च मिलित्वा बोध्यम्। तेन षट्पलीयं मात्रा सर्पदष्टविषयविशेषविहितत्वान्न दोषावहेति। ७३

अथ दर्वीकृतां वेगे पूर्वे विस्राव्य शोणितम्।
अगदं मधुसर्पिर्भ्यां संयुक्तं त्वरितं पिबेत्॥ ७४ ॥
द्वितीये वमनं कृत्वा तद्वदेवागदं पिबेत्।
विषापहैः प्रयुञ्जीत तृतीयेऽञ्जननावने॥ ७५ ॥

पिवेच्चतुर्थे पूर्वोक्तां यवागूं वमने कृते ।

दर्वीकरादीनां वेगविशेषे चिकित्साविशेषमाह अथेत्यादि। अगदमिति दर्वीकरविषोदितमगदम्। पूर्व्वोक्तां यवागूमिति कोषातक्यग्निकः पाठेत्यादिना पूर्व्वाध्यायोक्ताम्। ७४—७६—

षष्ठपञ्चमयोः शीतैर्दिग्ध सिक्तमभीक्ष्णशः ॥ ७६ ॥

पाययेद्वमनं तीक्ष्णं यवागूञ्च विषापहैः ।

षष्ठपञ्चमयोरित्यादि। शीतैरिति चन्दनसारादिभिः। यवागूञ्च विषापहामिति पूर्व्वोक्तामेव। —७६।७७—

अगदं सप्तमे तीक्ष्णं युञ्ज्यादञ्जननस्ययोः ॥ ७७ ॥

कृत्वावगाढं शस्त्रेण मूर्ध्नि काकपदं ततः ।

मांसं सरुधिरं तस्य चर्म वा तत्र निक्षिपेत् ॥ ७८ ॥

सप्तमवेगचिकित्सामाह अगदमित्यादि। काकपदमिति काकपदाकारं (१) क्षतम्। सरुधिरमिति चर्म्मणोऽपि विशेषणम्। —७७।७८

तृतीये वमितः पेयां वेगे मण्डलिनां पिवेत् ।

मण्डलिराजीलयोः सप्तवेगेषु मध्ये यस्य यस्य वेगस्य चिकित्सा दर्वीकरेण तुल्या तां परित्यज्य अवशिष्ट वेगचिकित्सामाह तृतीय इत्यादि। ७९—

अतीक्ष्णमगदं षष्ठे गणं वा पद्मकादिकम् ॥ ७९ ॥

मण्डलिनः षष्ठवेगचिकित्सामाह अतीक्ष्णमित्यादि। उक्तेषु अनुक्तेषु चागदेषु योऽगदोऽतीक्ष्णः तीक्ष्णो न भवति तमगदं पद्मकादिगणं वा पिवेत्। मधुरोऽगद इति सुश्रुतेप्युक्तम्। —७९

आद्येऽवगाढं प्रच्छाय वेगे दष्टस्य राजिलैः ।

अलावूना हरेद्रक्तं पूर्ववच्चागदं पिवेत् ॥ ८० ॥

षष्ठेऽञ्जनं तीक्ष्णतममवपीडञ्च योजयेत् ।

राजिलदष्टस्य प्रथमवेग-षष्ठवेगयो श्चिकित्सामाह आद्य इत्यादि प्रच्छायेति शस्त्रक्षतं कृत्वा। पूर्व्ववच्चागदमिति अतीक्ष्णमगद मित्यर्थः। ८०।८१—

---

(१) काकपदाकारमिति रेखाचतुष्टयेन एकबिन्दुतः प्रसृतेन कर्त्तव्यम्। तव ब्रह्मतालुनि केन्द्रबिन्दुं प्रकल्प्य ततो ललाटभिमुखाः समदूरवर्त्तिनः तिस्रः रेखाः शिखाभिमुखिनी चैका कुशपत्रादिना तत्प्रभेदेन कर्त्तव्याः। काकपदस्याकृति रेवं ※ स्यात्।

अनुक्तेषु च वेगेषु क्रियां दर्वीकरोदिताम् ॥ ८१ ॥

येषां वेगानां चिकित्सा नोक्ता सा कथं ज्ञातव्येत्यत आह अनुक्तेष्वित्यादि। योजयेदित्यनेन पूर्व्वोक्तेनान्वयः। —८१

गर्भिणी-बाल-वृद्धेषु मृद्वीं विध्येच्छिरां न च ।

गर्भिणीत्यादि। गर्भिण्यादिषु मृद्वीं क्रियां योजयेदिति सम्बन्धः। तथा शिराञ्च न विध्येत्। ८२—

त्वङ्मनोह्वानिशे वक्रं रसः शार्दूलजो नखः ॥ ८२ ॥

तमाल केशरं शीतं पीतं तण्डुलवारिणा ।

हन्ति सर्वविषाण्येतद्वज्रमिवासुरान् ॥ ८३ ॥

त्वगित्यादौ त्वग् गुडत्वक्। मनोह्वा मनःशिला, निशे इति हरिद्राद्वयम्, वक्रं तगरम् रसो गन्धरसः। अन्ये तु रस स्थाने व्याधिरिति पठन्ति। चरकेऽप्युक्तम्—

"चन्दनं तगरं कुष्ठं द्वे हरिद्रे त्वगेवच ।
मनः शिला तमालस्य रसः केशर एवच ॥
शार्दूलस्य नखश्चैव सुपिष्टं तण्डूलाम्भसा ।
हन्ति सर्व्वविषाण्येव युक्तो वज्र इवासुरान् ॥" (चि २३ अं)

शीतमिति चन्दनम्। —८२।८३

विल्वस्य मूलं सुरसस्य पुष्पं फलं करञ्जस्य नतं सुराह्वम् ।

फलत्रिकं व्योषनिशाद्वयञ्च वस्तस्य मूत्रेण सुसूक्ष्मपिष्टम् ॥ ८४ ॥

भुजङ्ग-लूतोन्दुर-वृश्चिकाद्यैर्विषूचिकाजीर्णगरज्वरैश्च ।

आर्तान्नरान् भूतविधर्षितांश्च स्वस्थीकरोत्यञ्जनपाननस्यैः ॥ ८५ ॥

विल्वस्येत्यादि। सुरसः सुगन्धिपर्णासः तस्य पुष्पम्। ८४।८५

प्रलेपाद्यैश्च निःशेषं दंशादप्युद्धरेद्विषम् ।

भूयो वेगाय जायेत शेषं दूषीविषाय वा ॥ ८६ ॥

प्रलेपाद्यैश्चेत्यादि। दंशादपीति किंपुनः कायादीष्वपि शब्दार्थः। शेषमिति अवशिष्टं विषम्। ८६

विषापायेऽनिलं क्रुद्धं स्नेहादिभिरुपाचरेत् ।
तैलमद्यकुलत्थाम्लवर्ज्यैः पवननाशनैः ॥ ८७ ॥
पित्तंपित्तज्वरहरैः कषाय-स्नेह-वस्तिभिः ।
समाक्षिकेण वर्गेण कफमारग्वधादिना ॥ ८८ ॥

विषव्यपगमनान्तरमपि यद्यनिलादिप्रकोपः स्यात्तदा यद्विधेयं तदाह विषापाय- इत्यादि । ८७।८८

सिता वैगन्धिकं द्राक्षा पयस्या मधुकं मधु ।
पाने समन्त्रपूताम्बुप्रोक्षणं सान्त्वहर्षणम् ॥ ८९ ॥
सर्पाङ्गाभिहते युञ्ज्यात्तथा शङ्काविषार्दिते ।

सर्पाङ्गाभिहतशङ्काविषयो श्चिकित्सा माह सितेत्यादि । त्रैगन्धिकं त्रिसुगन्धम् । वैगन्धिकमिति पाठे तु गन्धकम् । ८९।९०—

कर्कैतनं मरकतं वज्रं वारणमौक्तिकम् ॥ ९० ॥
वैडूर्यगर्दभमणि पिचुकं विषमूषिकाम् ।
हिमवद्गिरिसम्भूतां सोमराजीं पुनर्नवाम् ॥ ९१ ॥
तथा द्रोणीं महाद्रोणीं मानसीं सर्पजं मणिम् ।
विषाणि विषशान्त्यर्थं वीर्यवन्ति च धारयेत् ॥ ९२ ॥
छत्री झर्झरपाणिश्च चरेद्रात्रौ विशेषतः ।
तच्छायाशब्दवित्रस्ताः प्रणश्यन्ति भुजङ्गमाः ॥ ९३ ॥

इति श्रीमद्वाग्भट विरचिताया मष्टाङ्गहृदय संहिताया मुत्तरे
तन्त्रे सर्पविषप्रतिषेधो नाम षट्त्रिंशोऽध्यायः ॥

धारणाद् यद् विषापहं भवति तदाह कर्कैतनमित्यादि । कर्कैतनं पद्मरागः, वारणमौक्तिकं गजमौक्तिकम् । गर्दभमणिपिचुकमणी उत्तरापथे ख्यातौ । विषमूषिकादयो मानस्यन्ता औषधयो हि हिमवति प्रसिद्धाः । झर्झरः खुरखुर इतिख्यातः । छत्रस्य छाया झर्झरस्य शब्दः ।

इति (श्रीशिवदास सेन विरचिते अष्टाङ्गहृदयतत्त्वबोधे)
उत्तर तन्त्रे षट्त्रिंशोऽध्यायः ।

सप्तत्रिंशोऽध्यायः ।

अथातः कीटलूतादिविषप्रतिषेधं व्याख्यास्यामः
इतिहस्माहुरात्रेयादयो महर्षयः ॥
सर्पाणामेव विण्मूत्रशुक्राण्डशवकोथजाः ।
दोषैर्व्यस्तैः समस्तैश्चयुक्ताः कीटाश्चतुर्विधाः ॥ १ ॥

जङ्गमविषप्रतीकारस्याधिकृतत्वात् सर्पविण्मूत्रादि सम्भवाच्च—सर्पविष प्रतिषेधमभिधाय कीटलूता प्रतिषेध उच्यते । तत्र कीटानां सम्भवहेतुमाह सर्पाणामित्यादि । शवो मृतसर्पशरीरम् । एतेषां कोथः पूतीभावः । चिकित्साविशेषार्थं तेषामुल्वण दोषभेदेन चातुर्व्विध्यमाह दोषैरित्यादि । वातोल्वणाः पित्तोल्वणाः कफोल्वणाः सन्निपातोल्वणा श्चेति चातुर्विध्यम् । १

दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्वणः ।
आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ॥ २ ॥
पक्वपीलुफलप्रख्यः खर्जूरसदृशोऽथवा ।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ॥ ३ ॥
स्रावाढ्यः सर्वलिङ्गस्तु विवर्ज्यः सान्निपातिकैः ।

एषां क्रमेण लक्षणमाह दष्टस्येत्यादि । वायव्यैरिति वातोल्वणैः । आग्नेयैरिति पित्तोल्वणैः । अत्रापि तथा कफाधिकैस्तथा सन्निपातिकैरित्यत्र वक्ष्यमाणेऽपि दष्टस्य दंश इति सम्बध्यते । एषाञ्च बहुविधा भेदाः सुश्रुतोक्ता नात्युपयुक्तत्वाद्वक्तृता नोक्ताः । २-४—

वेगाश्च सर्पवच्छोफो वर्धिष्णुर्विस्नरक्तता ॥ ४ ॥
शिरोऽक्षिगौरवं मूर्छा भ्रमः श्वासोऽतिवेदना ।

सान्निपातिकैर्दष्टस्य लिङ्गान्तरमप्याह वेगाश्चेत्यादि । दर्वीकरादीनां विषे यथा प्रथमद्वितीयादिवेगाः, यथा च शोफः क्रमेण वर्द्धते तथाऽत्रापीत्यर्थः । —४।५—

सर्वेषां कर्णिकाशोफो ज्वरः पाण्डुररोचकः ॥ ५ ॥

चतुर्णामेव साधारणं लिङ्गमाह सर्व्वेषामित्यादि । कर्णिका कर्णिकाकारमांसः । —५

वृश्चिकस्य विषं तीक्ष्णमादौ दहति वह्निवत् ।
ऊर्ध्वमारोहति क्षिप्रं दंशे पश्चात्तु तिष्ठति ॥ ६ ॥
दंशः सद्योऽतिरुक्श्यावस्तुद्यते स्फुटतीव च ।

वृश्चिकविषलक्षणमाह वृश्चिकस्येत्यादि । पश्चादिति वेगकरणानन्तरं दंश-प्रदेशे स्थितिं करोति । वृश्चिकदंशः सद्य इति तत्कालमतिरुग् भवति स्थिरवा च मन्दरुग् भवतीत्यर्थः । ६।७—

ते गवादिशकृत् कोथाद्दिग्धदष्टादिकोथतः ॥ ७ ॥
सर्पकोथाच्च सम्भूता मन्दमध्यमहाविषाः ।

तेषामेव वृश्चिकानां मन्दमध्य-महाविष भेदेन त्रैविध्य माह ते इत्यादि । गवादि शकृत्कोथाद् ये सम्भूता स्ते मन्दविषाः । दिग्धो विषाक्तशस्त्रविद्धः दष्टः सर्पदष्टश्च तत्कोथतः सम्भूता वृश्चिका मध्यविषा भवन्ति । मृतसर्पकोथाद् ये सम्भूता स्ते महाविषाः । —७।८—

मन्दाः पीताः सिताः श्यावा रूक्षकर्बुरमेचकाः ॥ ८ ॥
रोमशा बहुपर्वाणो लोहिताः पाण्डुरोदराः ।
धुम्रोदरास्त्रिपर्वाणो

एषां ज्ञानार्थं लक्षणमाह मन्दा इत्यादि । ईदृग्वर्णा वृश्चिका मन्दा इति मन्दविषा भवन्ति । पीतासिताश्चेति पीताः केचन असिताः । श्यावः शुक्लानु-विद्धकृष्णो वर्णः । कर्बुरा इति चित्रवर्णाः । मेचका इति स्निग्धकृष्णाः । —८।९—

मध्यास्तु कपिलारुणाः ॥ ९ ॥
पिशङ्गाः शवलाश्चित्राः शोणिताभाः

मध्यास्त्वित्यादिना मध्यविषानाह । कपिलारुणा इति कपिलवर्णानुविद्धारुण-वर्णाः । —९।१०—

महाविषाः ।
अग्न्याभा ह्येकपर्वाणो रक्तासितसितोदराः ॥ १० ॥
तैर्दष्टः शूनरसनः स्तब्धगात्रो ज्वरार्दितः ।
खैर्वमन् शोणितं कृष्णमिन्द्रियार्थानसंविदन् ॥ ११ ॥

खिद्यन्मूर्च्छन् विशुष्कास्यो विह्वलो वेदनातुरः ।
विशीर्यमाणमांसश्च प्रायशो विजहात्यसून् ॥ १२ ॥

महाविषानाह महाविषा इत्यादि । द्व्येकपर्वाण इति केचन द्विपर्वाणः केचन एकपर्वाण इति । रक्तासितसितोदरा इति केचिद् रक्तोदराः केचिच्चा-सितोदराः केचिच्च सितोदराः इति खैर्वमन् शोणितं कृष्णमिति खैरिति मुख-नासिकादिभिः स्रोतोभिः कृष्णं शोणितं वमन् । प्रायश इति वचनात् कदाचिदेवास्य साध्यता भवतीति दर्शयति । —१०—१२

उच्चिटिङ्गस्तु वक्त्रेण दशत्यभ्यधिकव्यथः ।
साध्यतो वृश्चिकात् स्तम्भं शेफसो हृष्टरोमताम् ॥ १३ ॥
करोति सेकमङ्गानां दंशः शीताम्बुनेव च ।

उच्चिटिङ्गाख्येन कीटविशेषेण दष्टस्य लक्षणमाह उच्चिटिङ्ग इत्यादि । उच्चिटिङ्गा-दयश्च कीटभेदा नानादेशीय लोकेभ्य एवावगन्तव्याः । वक्त्रेण दशतीत्यनेनास्य दंष्ट्राविषत्वमुक्तम् । साध्यवृश्चिकमपेक्ष्याधिकव्यथः असाध्यवृश्चिकापेक्षया तु हीन व्यथ इत्यर्थः । १३।१४—

उग्रधूमः स एवोक्तो रात्रिचराच्च रात्रिकः ॥ १४ ॥

उच्चिटिङ्ग स्यैव नामान्तर माह उग्रधूम इत्यादि । —१४

वातपित्तोत्तराः कीटाः श्लैष्मिकाः कणभोन्दुराः ।
प्रायो वातोल्बणविषा वृश्चिकाः सोग्रधूमकाः ॥ १५ ॥

वातपित्तोत्तरा इत्यादौ कणभः कीटभेदः । १५

यस्य यस्यैव दोषस्य लिङ्गाधिक्यं प्रतर्कयेत् ।
तस्य तस्यौषधैः कुर्याद्विपरीतगुणैः क्रियाम् ॥ १६ ॥

यस्य यस्येत्यादि । विपरीतगुणैरिति दोष विपरीत गुणैः । लिङ्गाधिक्य-मित्यनन्तरं विषेष्विति शेषः । १६

हृत्पीडोर्ध्वानिलस्तम्भः शिरायामोऽस्थिपर्वरुक् ।
घूर्णनोद्वेष्टनं गात्रश्यावतां वातिके विषे ॥ १७ ॥
संज्ञानाशोष्णनिश्वासौ हृद्दाहः कटुकास्यता ।
मांसावदरणं शोफो रक्तपीतश्च पैत्तिके ॥ १८ ॥

छर्द्यरोचकहृल्लास-प्रसेकोत्क्लेश-पीनसैः ।
सशैत्यमुखमाधुर्यैर्विद्याच्छ्लेष्माधिकं विषम् ॥ १९ ॥

विषेषु दोषाधिक्य ज्ञानार्थं दोषलिङ्गान्याह हृत्पीडेत्यादि । १७—१९

पिण्याकेन व्रणालेपस्तैलाभ्यङ्गश्च वातिके ।
नाडीस्वेदो पुलाकाद्यैर्बृंहणश्च विधिर्हितः ॥ २० ॥
पैत्तिकं स्तम्भयेत् सेकैः प्रदेहैश्चातिशीतलैः ।
लेखन-च्छेदन-स्वेद-वमनैः श्लैष्मिकं जयेत् ॥ २१ ॥

दोषभेदेन चिकित्साभेदमाह पिण्याकेनेत्यादि । २०।२१

कीटानां त्रिप्रकाराणां त्रैविध्येन प्रतिक्रिया ।

कीटानामित्यादि । वातोल्बण पित्तोल्बण कफोल्बणभेदेन त्रिविधानाम् । सन्निपातोल्बणस्त्वसाध्य एवेति तच्चिकित्सा नोक्ता । २२—

स्वेदालेपनसेकांस्तु कोष्णान् प्रायोऽवचारयेत् ॥ २२ ॥
अन्यत्र मूर्च्छिताद्दंशपाकतः कोथतोऽथवा ।

इदानीं त्रिविधकीटसाधारणं चिकित्सित माह स्वेदेत्यादि । अन्यत्र मूर्च्छितादिति मूर्च्छितादिषु न कुर्यादित्यर्थः । —२२।२३—

नृकेशाः सर्षपाः पीता गुडो जीर्णश्च धूपनम् ॥ २३ ॥
विषदंशस्य सर्वस्य काश्यपः परमब्रवीत् ।
विषघ्नश्च विधिं सर्वं कुर्यात् संशोधनानि च ॥ २४ ॥

नृकेशा इत्यादौ नृकेशादिभिर्धूपनमित्यर्थः । विषघ्नञ्च विधिं सर्वमिति संशमनविधिं सर्पिःस्वाभ्यञ्जालेपनपरीषेकाञ्जनादिकं वातादिविषहरद्रव्यकल्पितमित्यर्थः । संशोधनानि चेति वमनविरेकास्थापनानि यथादोषमिति वाक्यशेषः । —२३।२४

साधयेत् सर्पवद्दष्टान् विषोग्रैः कीटवृश्चिकैः ।
तण्डुलीयकतुल्यांशां त्रिवृतां सर्पिषा पिबेत् ॥ २५ ॥
याति कीटविषैः कम्पं न कैलास इवानिलैः ।
क्षीरिवृक्षत्वगालेपः शुद्धे कीटविषापहः ॥ २६ ॥

मुक्तालेपो वरः शोफ-तोद-दाह-ज्वरप्रणुत् ।

उग्रविषकीटादि चिकित्सामाह साधयेदित्यादि । तण्डुलीयकेत्यादि स्पष्टम् । क्षीरिणो वृक्षा वटोदुम्बरादयः । शुद्धे इति वमनादिभिः शुद्धे । मुक्तेत्यादौ मुक्ता मौक्तिकम् । २५—२७—

वचा-हिङ्गु-विडङ्गानि सैन्धवं गजपिप्पली ॥ २७ ॥
पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम् ।
दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ॥ २८ ॥

अष्टाङ्ग मगदमाह वचेत्यादि । —२७।२८

सद्यो वृश्चिकजं दंशं चक्रतैलेन सेचयेत् ।
विदारिगन्धासिद्धेन कवोष्णेनेतरेण वा ॥ २९ ॥
लवणोत्तमयुक्तेन सर्पिषा वा पुनः पुनः ।
सिञ्चेत् कोष्णारनालेन सक्षीरलवणेन वा ॥ ३० ॥
उपनाहो घृते भृष्टः कल्कोऽजाज्याः ससैन्धवः ।

सद्य इत्यादि । चक्रतैलं चक्रपीडित तिलतैलम् । चक्रशब्दोपादानञ्च हस्तादियन्त्रपीडित तैलनिषेधार्थमिति इन्दुः । तत्काल चक्रोद्धृत तैलग्रहणार्थ मित्यन्ये । किम्भूतेन चक्रतैलेन विदारिगन्धादि सिद्धेन । विदारिगन्धा शालपर्णी । सुश्रुते तु विदारिगन्धासिद्धेनेत्यत्र विदारिगण सिद्धेन इति पठ्यते टीका कृतोऽपि आदि शब्द लोपात् विदार्यादिगण सिद्धेनेति व्याचक्षते । इतरेणेति शीतेन । सुश्रुते तु इतरेणेत्यत्र अथवा पुनरिति पठ्यते । लवणोत्तमं सैन्धवम् । उपनाह इत्युष्णो लेपः । २९—३१—

आर्दंशं स्वेदितं चूर्णैः प्रच्छाय प्रतिसारयेत् ॥ ३१ ॥
रजनी-सैन्धव-व्योष-शिरीष-फल-पुष्पजैः ।
मातुलुङ्गाम्बुगोमूत्रपिष्टैश्च सुरसाग्रजम्(१) ॥ ३२ ॥
लेपः सुखोष्णश्च हितः पिण्याको गोमयोऽपि वा ।

आर्दंश मित्यादि । आर्दंशो दंश एव यथा आर्दंशो पीतिकायास्तु पिडका पीतिका स्थिरेति । प्रच्छायेति शस्त्रपदं कृत्वेत्यर्थः । सुरसाग्रं सुरस मञ्जरी । मातुलुङ्गस्याम्बु रसः । —३१—३३—

(१) मातुलुङ्गाम्लगोमूत्रै ति वा पाठः ।

पाने सर्पिर्मधुयुतं क्षीरं वा भूरिशर्करम् ॥ ३३ ॥
पारावतशकृत्पथ्यातगरं विश्वभेषजम् ।
बीजपूररसोन्मिश्रः परमो वृश्चिकागदः ॥ ३४ ॥
सशैवलोग्रदंष्ट्रा च हन्ति वृश्चिकजं विषम् ।
हिङ्गुना हरितालेन मातुलुङ्गरसेन च ॥ ३५ ॥
लेपाञ्जनाभ्यां गुटिका परमं वृश्चिकापहा ।

पान मित्यादि वृश्चिकापहेत्यन्तं स्पष्टम् । —३३–३६—

करञ्जार्जुनशेलूनां कटभ्याः कुटजस्य च ॥ ३६ ॥
शिरीषस्य च पुष्पाणि मस्तुना दंशलेपनम् ।

करञ्जेत्यादौ मस्तुनेत्यनन्तरं पिष्टमिति शेषः । —३६।३७ –

यो मुह्यति प्रश्वसिति प्रलपत्युग्रवेदनः ॥ ३७ ॥
तस्य पथ्या-निशा-कृष्णा-मञ्जिष्ठातिविषोषणम् ॥
सालाबुवृन्तं वार्ताकरसपिष्टं प्रलेपनम् ॥ ३८ ॥

यो मुह्यतीत्यादौ ऊषणं मरिचम् । – ३७।३८

सर्वत्र चोग्रालिविषे पाययेद्दधि-सर्पिषी ।
विध्येच्छिरां विदध्याच्च वमनाञ्जननावनम् ॥ ३९ ॥
उष्ण-स्निग्धाम्ल-मधुरं भोजनं चानिलापहम् ॥ ४० ॥
नागरं गृहकपोतपुरीषं बीजपूरकरसो हरितालम् ।
सैन्धवञ्च विनिहन्त्यगदोऽयं लेपतोऽलिकुलजं विषमाशु ॥ ४१ ॥

भ्रमरदष्टचिकित्सामाह सर्व्वत्रेत्यादि । गृहकपोतो गृहवासी पारावतः । ३९—४१

अन्ते वृश्चिकदष्टानां समुदीर्णे भृशं विषे ।
विषेणालेपयेद्दंशमुच्चिटिङ्गेऽप्ययं विधिः ॥ ४२ ॥
नागपुरीषच्छत्रं रोहिषमूलञ्च शेलुतोयेन ।
कुर्याद्गुटिकां लेपादियमलिविषनाशनी श्रेष्ठा ॥ ४३ ॥

अन्त इत्यादि । अन्ते इति सर्व्वेषामुपक्रमाणामवसाने । विषेणेति स्थावर-

विषेण । नागपुरीषछत्रमिति हस्तिपुरीष सम्भवा छत्रिका । रोहिषं गन्धतृणम् । शेलुर्बहुवारः । शेलुतोयेनेत्यनन्तरं पिष्ट्वेति शेषः । ४२।४३

अर्कस्य दुग्धेन शिरीषबीजं त्रिर्भावितं पिप्पलिचूर्णमिश्रम् ।
एषोऽगदो हन्ति विषाणि कीट-भुजङ्ग-लूतोन्दुर-वृश्चिकानाम् ॥ ४४ ॥

अर्कस्येत्यादौ त्रिरिति वारत्रयम् । ४४

शिरीषबीजं (१) सकरञ्जबीजं काश्मीरजं कुष्ठमनःशिले च ।
एषोऽगदो रात्रिकवृश्चिकानां संक्रान्तिकारी कथितो जिनेन ॥ ४५ ॥

शिरीषबीजमित्यादौ रात्रिका इति उच्चिटिङ्गाः संक्रान्ति र्व्यपगमः । जिनेनेति भगवता बुद्धेन । ४५

कीटेभ्यो दारुणतरा लूताः षोडश ता जगुः ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥ ४६ ॥
सहस्ररश्म्यनुचरा वदन्त्यन्ये सहस्रशः ।

कीटापेक्षया लूतानां दारुणतरत्वं तथा मतभेदेन नानाविधत्वञ्चाह कीटेभ्य-इत्यादि । सहस्ररश्म्यनुचरत्वञ्चासा मागमवेद्यम् । ४६।४७ –

बहूपद्रवरूपा तु लूतैकैव विषात्मिका ॥ ४७ ॥

परेषां मतान्यभिधाय स्वमतमाह लूतैकैवेति । बहव उपद्रवा रूपाणि च यस्याः । बहूपद्रवरूपत्वेऽपि कथमेकत्वमित्याह विषात्मिकेति । विषमयस्वभावा विषमयदेहा वा । एतेन विषात्मकत्वेन धर्म्मेण सर्व्वासामेव लूतानामेकत्वमेवेत्यर्थः । —४७

रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात् ।
नास्ति स्थानव्यवस्था च दोषतोऽतः प्रवक्ष्यते ॥ ४८ ॥

ननु सन्ति तावन्नामभेदेन लूतानां रूपभेदाः यथा "त्रिमण्डलायाः बहलं दंशात् कृष्णं क्षरत्यसृग्" इत्यादि तेऽत्र किमिति नोच्यन्ते इत्यत आह रूपाणीत्यादि । लूतानां त्रिमण्डलादीना मेवोल्लेखेन यानि रूपाणि सुश्रुतादिभिरुक्तानि तानि अतिसङ्करात परस्परेणात्यर्थंसम्मिश्रणाद्धेतो र्दुर्ज्ञेयानि अतो हेतो दोषत इति वातादिभेदेन यो भेदः स एव प्रवक्ष्यते चिकित्सोपयोगित्वादिति भावः । ननु नामभेदेन यानि रूपाणि तानि नोच्यन्तां नाम, कीटानामिवोत्पत्तिस्थान

(१) शिरीषपुष्पमिति वा पाठः ।

[illegible] । [illegible] मत्स्यो [illegible] । ४८

कुल्यकुल्याख्या पुच्छाग्रे [illegible] विचर्चिता सा ।

[illegible] मत्स्या [illegible] । सा मत्स्या [illegible] [illegible] । ४९—

[illegible] ॥ ४९ ॥

[illegible] । [illegible] मत्स्यो [illegible] [illegible] । — ४९

[illegible] ।

[illegible] ॥ ५० ॥

[illegible] ।

[illegible] ॥ ५१ ॥

[illegible] ।

[illegible] ॥ ५२ ॥

[illegible] ।

[illegible] ॥ ५३ ॥

[illegible] ।

[illegible] ॥ ५४ ॥

[illegible] ।

[illegible] । [illegible] । [illegible] । ५४—५५—

[illegible] ॥ ५५ ॥

[illegible] ।

[illegible] । —५५।५६—

[illegible] ॥ ५६ ॥

[illegible] ।

[illegible] ॥ ५७ ॥

[illegible] ।

[illegible] ॥ ५८ ॥

[illegible] ।

[illegible] । [illegible] । —५६—५८—

[illegible] ॥ ५९ ॥

[illegible] ।

[illegible] । [illegible] । [illegible] । [illegible]—

"[illegible]" । इति ([illegible]) —५९।६०—

[illegible] ॥ ६० ॥

[illegible] ।

[illegible] । [illegible] । —६०।६१—

[illegible] ॥ ६१ ॥

[illegible] ।

[illegible] ॥ ६२ ॥

[illegible] ।

[illegible] ॥ ६३ ॥

[illegible] ।

[illegible] ॥ ६४ ॥

महांश्चतुर्थे श्वयथुस्ताप-श्वास-भ्रमप्रदः ।
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ॥ ६५ ॥
षष्ठे व्याप्नोति मर्माणि सप्तमे हन्ति जीवितम् ।
इति तीक्ष्णं विषं मध्यं हीनञ्च विभजेदतः ॥ ६६ ॥

इदानीं तीक्ष्णस्य लूताविषस्य ज्ञानार्थं कालविशेषकृतं लक्षणविशेषमाह दिनार्द्धमित्यादि । किञ्चित्प्रबल इत्यन्वयः । केचित्तु प्रबल इत्यत्र प्रचल इति पठन्ति । द्वितीयदिने अन्तेषु दंशप्रान्तभागेषु पीड़कैः पीड़काभिराचित इव उन्नतः शूनः । मध्ये दंशस्य दंशभागे नतः निम्नः । रोमकूपेषु सास्त्रव इति स्राववान् । विकारान् इत्यादि पञ्चम दिनलक्षणम् । विषकोपजान् विकारानिति मोहादीन् । मर्माणीति हृदयवस्त्यादीनि । उक्तं कालविशेषवचनं तीक्ष्णलूताविष-लक्षणम् । उपसंहरति इति तीक्ष्णविषमिति इत्युक्तलक्षणं लूताविषं तीक्ष्णं ज्ञेयम् । मध्यहीनञ्च विभजेदत इति अत इत्युक्तकालानुसारेण यद्विषं सप्ताहात् परतोऽष्टम-नवमादिभि र्मारयति तन् मध्यवीर्य्यम्, पक्षेण यद्विषं मारयति तद्धीनवीर्य्यमिति विषं विभजेत् । सुश्रुतेऽप्युक्तम्

"याश्चण्डतीक्ष्णोग्रविषाहि लूतास्ताः सप्तरात्रेणनरंनिहन्युः ।
ततोऽधिकेनापि निहन्युरन्या यासां विषं मध्यमवीर्य्यमुक्तम् ॥
यासां कणीयो विषवीर्य्यमुक्तं ता पक्षमात्रेण विनाशयन्ति ।"

इति (कं ८ अं) —६१—६६

एकविंशतिरात्रेण विषं शाम्यति सर्वथा ।
लूता विषस्यप्रशमकालावधि माह एकविंशति रात्रेणेत्यादि । ६७—

अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ॥ ६७ ॥
दहेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ।
कर्कशं भिन्नरोमाग्रं मर्मसन्ध्यादिसंश्रितम् ॥ ६८ ॥
प्रसृतं सर्वतो दंशं न छिन्दीत दहेन्न च ।
लेपयेद्दग्धमगदैर्मधुसैन्धवसंयुतैः ॥ ६९ ॥
सुशीतैः सेचयेच्चानु कषायैः क्षीरिवृक्षजैः ।
सर्वतोऽपहरेद्रक्तं शृङ्गाद्यैः शिरयापि वा ॥ ७० ॥

सेका लेपास्ततः शीताः

इदानी लूतादष्ट चिकित्सितमाह अथेत्यादि । लेपयेद् दग्धमगदैरिति दग्धं दंशं अगदैर्लेपयेदित्यन्वयः । —६७—७१—

बोधिश्लेष्मातकाद्मिकैः ।
फलिनी-द्विनिशा-क्षौद्र-सर्पिर्भिः पद्मकाह्वयः ॥ ७१ ॥
अशेषलूता कीटानामगदः सर्वकार्मिकः ।

बोधि श्लेष्मातकेत्यादिना पद्मकाख्य मगदमाह । बोधिः पिप्पलवृक्षः तस्य त्वक् श्लेष्मातको बहुवारः, आक्षिकी लताविशेषस्तस्याः फलमाक्षिकम् । —७१।७२—

हरिद्रा-द्वय-पत्तङ्ग-मञ्जिष्ठा-नत-केशरैः ॥ ७२ ॥
सक्षौद्रसर्पिः पूर्वस्मादधिकश्चम्पकाह्वयः ।

हरिद्रेत्यादिना चम्पकाख्य मगदमाह । —७२।७३—

तद्वद्गोमयनिष्पीड शर्करा-घृत-माक्षिकैः ॥ ७३ ॥
अपामार्ग-मनोह्वाल-दार्वी-ध्यामक-गैरिकैः ।
नतैला-कुष्ठ-मरिच-यष्ट्याह्व-घृत-माक्षिकैः ॥ ७४ ॥
अगदो मन्दरो नाम

तद्वदित्यादिना मन्दराख्यमगदमाह । तद्वदिति गुणेन पूर्व्वोक्तागदतुल्यः । गोमय निष्पीड़ो गोमयस्वरसः । अलं हरितालं, ध्यामकं गन्धतृणं, नतं तगर-पादिका । —७३—७५—

तथाऽन्यो गन्धमादनः ।
नत-रोध्र-वचा-कट्वी-पाठेला-पत्र-कुङ्कुमैः ॥ ७५ ॥

तथेत्यादिना कुङ्कुमै रित्यन्तेन गन्धमादनाख्यमगदमाह । कट्वी कटुकी । —७५

विषघ्नं बहुदोषेषु प्रयुञ्जीत विशोधनम् ।

इदानीं शोधनविषयाभिधान पूर्व्वकं शोधनमाह विषघ्नमित्यादि । ७६—

यष्ट्याह्व-मदनाङ्कोलजालिनी-सिन्धुवारिताः ॥ ७६ ॥
कफे ज्येष्ठाम्बुना पीत्वा विषमाशु समुद्वमेत् ।

तत्र विषघ्न वमनयोगमाह यष्ट्याह्वेत्यादि । जालिनी घोषकः । सिन्धु-वारितं सिन्धुवार एव, ज्येष्ठाम्बु तण्डलाम्बु । —७६।७७—

शिरीषपत्रत्वङ्मूलफलं वाऽङ्कोलमूलवत् ॥ ७७ ॥

वमन योगान्तरमाह शिरीषेत्यादि। शिरीषस्य पत्रादिभिः सह प्रत्येकमन्वयः। अङ्कोलमूलवदिति अङ्कोलमूलयुक्तम्। —७७

विरेचयेच्च त्रिफला-नीलिनी-त्रिवृतादिभिः।

विरेचनयोगानाह विरेचयेदित्यादि। आदिशब्दादारग्वधफलादीनां ग्रहणम्। ७८—

निवृत्ते दाहशोफादौ कर्णिकां पातयेद् व्रणात् ॥ ७८ ॥

उक्त चिकित्सया दाह शोफादि प्रशमनानन्तरं विषोत्पन्न कर्णिकायाश्चिकित्सामाह निवृत्त इत्यादि। कर्णिका मांसकन्दी पद्मकर्णिकाकारत्वात कर्णिकेत्युच्यते। —७८

कुसुम्भपुष्पं गोदन्तः स्वर्णक्षीरी कपोतविट्।
त्रिवृतासैन्धवं दन्तीकर्णिकापातनं तथा ॥ ७९ ॥

तमेव कर्णिकापातन योगमाह कुसुम्भेत्यादि। गोदन्तो हरितालं गवां दन्त इत्यन्ये। ७९

मूलमुत्तरकारिण्या वंशनिर्लेखसंयुतम्।

मूल मित्यादि। उत्तमकारिणी दुग्धिका। वंशनिर्लेखनं वंशनेली। ८०—

तद्वच्च सैन्धवं कुष्टं दन्ती-कटुक-दौग्धिकम् ॥ ८० ॥
राजकोशातकीमूलं किण्वो वा मथितान्वितः।
कर्णिकापातसमये बृंहयेच्च विषापहैः ॥ ८१ ॥
स्नेहकार्यमशेषञ्च सर्पिषैव समाचरेत्।
विषस्य वृद्धये तैलमग्नेरिव तृणोलुपम् ॥ ८२ ॥

तद्वदित्यादि। दौग्धिकं क्षीरिकामूलम्। राजकोषातकी पीतघोषकः। किण्वं सुरावीज मिति डल्वणः। मथितेन तक्रेण अन्वितः। कर्णिकापात समय इति स्पष्टम्। —८०—८२

ह्रीवेर-वैकङ्कत-गोपकन्या-मुस्ता-शमी-चन्दन-टिण्टुकानि।
शैवाल-नीलोत्पल-वक्र-यष्टी-त्वङ्नाकुली-पद्मकराठमध्यम् ॥ ८३ ॥

इदानीं पित्तकफानिल लूतानुक्रमेण श्लोकत्रयेणागदत्रयमाह ह्रीवेरेत्यादिना

वराङ्गमित्यन्तेन। गोपकन्या शारिवा। वक्रं तगरपादिका। नाकुली रास्ना, राठं मदनफलं तस्य मध्यं वीज मित्यर्थः। ८३

रजनी-घन-सर्पलोचना-कणा-शुण्ठी-कणामूलचित्रकाः।
वरुणागुरु-विल्व-पाटली-पिचुमन्दामय-शेलु-केशरम् ॥ ८४ ॥

रजनीत्यादौ सर्पलोचना रास्ना भेदः। कणमूलं पिप्पलीमूलम्। ८४

विल्व-चन्दन-नतोत्पल शुण्ठी-पिप्पली-निचुल-वेतस-कुष्ठम्।
शुक्ति-शाक-वरपाटलि-भार्गी-सिन्धुवार-करघाट-वराङ्गम् ॥ ८५ ॥
पित्तकफानिललूताः पानाञ्जनस्यलेपसेकेन।
अगदवरा वृत्तस्थाः कुमतिरिव वारयन्त्येते ॥ ८६ ॥

विल्वेत्यादौ निचुल इज्जलः, शाकवरो जयन्तीशाकः, करघाटं मदनफलं, वराङ्गं गुड़त्वक्। ८५।८६

रोध्रं सेव्यं पद्मरेणुः कालीयाख्यं चन्दनं यच्च रक्तम्।
कान्तापुष्पंदुग्धिनीका मृणालं लूताः सर्वा घ्नन्ति सर्वक्रियाभिः ॥८७॥

इतिश्रीमद्वाग्भट विरचितायामष्टाङ्गहृदय संहिताया मुत्तरे तन्त्रे कीटलूतादि विष प्रतिषेधो नाम सप्तत्रिंशोऽध्यायः ॥

सामान्येन सर्व्वलूताहराणि द्रव्याण्याह लोध्र मित्यादि। सेव्यमुशीरम्। पद्मरेणुः पद्मपुष्पपरागः। रक्तं चन्दन मित्यन्वयः। कान्तापुष्पं प्रियंगुपुष्पम्। मृणालं विसम्। सर्व्वक्रियाभिरिति पानाञ्जनस्य लेप सेकैरित्यर्थः। ८७

इति (श्रीशिवदाससेन विरचिते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे सप्तत्रिंशोऽध्यायः।

अष्टत्रिंशोऽध्यायः।

अथातो मूषिकालर्कविषप्रतिषेधं व्याख्यास्यामः

इतिहस्माहुरात्रेयादयो महर्षयः ॥

लालनश्चपलः पुत्रो हसिरश्चिक्किरोऽजिरः।

कषायदन्तः कुलकः कोकिलः कपिलोऽसितः ॥ १ ॥

अरुणः शवलः श्वेतः कपोतः पलितोन्दुरः।

छुच्छुन्दरोऽलसाख्यश्च दशाष्टौ चेति मूषिकाः ॥ २ ॥

विषतन्त्र पारिशेष्यात् मूषिकालर्कं विषप्रतिषध उच्यते। अलर्कः सविषः कुक्कुरः। तत्राष्टादश मूषकभेदानाह लालन इत्यादि। अलसाख्य इत्यत्र बलासाख्य इति कचित् पठ्यते किन्तु सुश्रुतेऽप्यलस इत्येव पाठः। एते च मूषकभेदाः शवरादिभ्य एव ज्ञेयाः। १।२

शुक्रं पतति यत्रैषां शुक्रदिग्धैः स्पृशन्ति वा।

यदङ्गमङ्गैः

एषामष्टादशानां शुक्रविषत्वमाह शुक्रमित्यादि। एतच्च शुक्रविषत्वं प्रायिकं तेन दंष्ट्रा विषत्वमप्येषां बोध्यम्। अतएव सुश्रुते दष्टरूपं समासोक्तमित्युक्तम्। ३—

तत्रास्रे दूषिते पाण्डुतां गते ॥ ३ ॥

ग्रन्थयः श्वयथुः कोथो मण्डलानि भ्रमोऽरुचिः।

शीतज्वरोऽतिरुक् सादो वेपथुः पर्वभेदनम् ॥ ४ ॥

रोमहर्षः स्रुतिर्मूर्च्छादीर्घकालानुबन्धनम्।

श्लेष्मानुबद्धबह्वाखुपोतकच्छर्दनं सतृट् ॥ ५

व्यवाय्याखुविषं कृच्छ्रं भूयो भूयश्च कुप्यति।

तेषां सामान्यलक्षणमाह तत्रेत्यादि। श्लेष्मानुविद्धबह्वाखुपोतकच्छर्दनमिति [श्लेष्मणा अनुबद्धा ये] आखुपोतकाः मूषकशावकास्तेषां छर्दनं भवति। एतद् यद्यप्यत्र सामान्यतएवोक्तं तथापि विशेषेण पुत्रकाख्यमूषकदष्टविषयतया बोध्यम्। यदाहनागार्जुनः

"तेनच्छर्दयतेदष्टो बहून् मूषकपुत्तकान्।

एतत्पुत्तकदष्टस्यव्यक्तं भवति लक्षणम् ॥" इति

एषान्तु विशिष्टलक्षणचिकित्सितं सुश्रुतादिभ्य एवावगन्तव्यम्। इहतु विस्तरभयान्नोक्तम्। —३—६—

मूर्च्छाङ्गशोफ-वैवर्ण्य-क्लेद-शब्दाश्रुति-ज्वराः ॥ ६ ॥

शिरोगुरुत्वं लालासृक् छर्दिश्चासाध्यलक्षणम्।

शूनबस्तिं विवर्णोष्ठमाखाभैर्ग्रन्थिभिश्चितम् ॥ ७ ॥

छुच्छुन्दरसगन्धञ्च वर्जयेदाखुदूषितम्।

असाध्यलक्षणमाह मूर्च्छेत्यादि। आख्वाभैर्ग्रन्थिभिरिति मूषकाकारैर्ग्रन्थिभिः चितमित्यर्थः सुश्रुतेऽप्युक्तम् "चीयतेग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः ॥" इति (कं ६ अ) छुच्छुन्दरस्य समानगन्धम्। —६—८—

शुनः श्लेष्मोल्वणा दोषाः संज्ञां संज्ञावहाश्रिताः ॥ ८ ॥

मुष्णन्तः कुर्वते क्षोभं धातूनामतिदारुणम्।

लालावानन्धबधिरः सर्वतः सोऽभिधावति ॥ ९ ॥

स्रस्तपुच्छहनुस्कन्धशिरोदुःखनताननः। (१)

मूषकविषलक्षण मभिधाय दुष्टस्यापि शुनो लक्षणमाह शुन इत्यादि। शुनः कुक्कुरस्य श्लेष्म प्रधाना दोषाः वातादयः संज्ञावहधमनीमाश्रिताः सन्तः संज्ञामिति सम्यक्ज्ञानं। मुष्णन्तो नाशयन्त यदा धातूनां रसादीनां अतिदारुणं क्षोभं प्रकोपं कुर्वते, तदा स श्वा लालावान् भवति। स्रस्तं स्वस्थानाच्च्युतं पुच्छहनुस्कन्धं यस्य। शिरोदुःखेन नत माननं यस्य। शिरोदुःखानताननः इत्यपि पाठः। —८—१०—

दंशस्तेन विदष्टस्य सुप्तः कृष्णं क्षरत्यसृक्।

हृच्छिरोरुग्ज्वर-स्तम्भ-तृष्णा-मूर्च्छोद्भवोऽनु च ॥ १० ॥

एवम्भूतेन शुना दष्टस्य लक्षणमाह दंश इत्यादि। सुप्त इति स्पर्शाज्ञः।—१०

अनेनान्येऽपि बोद्धव्या व्यालादंष्ट्राप्रहारिणः।

शृगालाश्वतराश्वर्क्षद्वीपिव्याघ्रवृकादयः ॥ ११ ॥

एवमुक्तरीत्या शृगालादयोऽपि दुष्टा बोध्या इत्याह अनेनेत्यादि व्याला इति हिंस्रजन्तवः। ११

(१) शिरोदुःखी नताननः इत्यपि पाठः।

बहु-निस्तोद-वैवर्ण्य-सुप्ति-क्लेद-ज्वर-भ्रमाः । (१)
विदाह-रागरुक् पाक-शोथ-ग्रन्थिविकुञ्चनम् ॥ १२ ॥
दंशावदरणं स्फोटाः कर्णिका मण्डलानि च ।
सर्वत्र सविषे लिङ्गं विपरीतन्तु निर्विषे ॥ १३ ॥

क्रमेण सविषनिर्विषदंशयोर्लक्षणमाह बहुनिस्तोदेत्यादि । ग्रन्थीनां विकुञ्चनं वक्रता । १२।१३

दष्टो येन तु तच्चेष्टारुतं कुर्वन् विनश्यति ।
पश्यंस्तमेव चाकस्मादादर्शसलिलादिषु ॥ १४ ॥

अस्यैव रिष्टस्य मसाध्यलक्षणमाह दष्ट इत्यादि । येन श्वशृगालादीनामन्यतमेन दष्टः तस्य दंशकस्यैव चेष्टां रुतं वा कुरुते स विनश्यति । तथा आदर्शादिषु तमेव दंशकं श्वशृगालादिकं पश्यति सोऽपि विनश्यतीत्यर्थः । सुश्रुतेऽप्युक्तम्—

"दंष्ट्रिणा येन दष्टन्तु तद्रूपं योऽथ पश्यति ।
अप्सु चादर्शबिम्बे च रिष्टं तस्यैव निर्दिशेत् ॥" इति (कं ६ अं) १४

योऽद्भ्यस्त्रस्येददष्टोऽपि शब्द-संस्पर्श-दर्शनैः ।
जलसन्त्रासनामानं दष्टं तमपि वर्जयेत् ॥ १५ ॥

जलत्रास संज्ञकस्य दष्टविशेषस्य लक्षणमाह योऽद्भ्य इत्यादि । यः पुरुषः श्वशृगालादिभिरदष्टोऽपि अपि शब्दात् दष्टोऽपि सन् जलस्य शब्दसंस्पर्शदर्शनैस्त्रस्यति तं दष्टम् अपिशब्दाददष्टमपि जलत्रासनामानं वर्जयेत् । एतेन दष्टस्यादष्टस्यचाकस्मिको जलत्रासो रिष्टमेव । उक्तं हि

"अदष्टस्यापिजन्तोर्हिजलत्रासो भवेद् यदि ।
तस्यापि रिष्टं भिषजो ब्रुवते विषचिन्तकाः ॥" इति १५

आखुना दष्टमात्रस्य दंशं काण्डेन दाहयेत् ।
दर्पणेनाथवा

इदानीं मूषकदष्टस्य चिकित्सामाह आखुनेत्यादि । काण्डेनेति शरेण अथवा दर्पणेन दाहयेदित्यन्वयः । १६—

तीव्ररुजा स्यात् कर्णिकान्यथा ॥ १६ ॥

दाहस्य फलमाह तीव्ररुजा स्यादित्यादि । अन्यथेति दाहं विना । —१६

(१) कष्टनिस्तोदेति वा पाठः ।

दग्ध्वा विस्रावयेद्दंशं प्रच्छितञ्च प्रलेपयेत् ।
शिरीष-रजनी-वक्र-कुङ्कुमामृतवल्लिभिः ॥ १७ ॥

दग्ध्वेत्यादि । दंशं दग्ध्वा शिरीषादिभिः प्रलेपयेत् । प्रच्छितञ्च दंशं विस्रावयेद्रक्तमित्यर्थः । अन्येतु दग्ध्वा प्रच्छितं दंशं विस्रावयेत् तथा शिरीषादिभिः प्रलेपयेदित्याहुः, वक्रं तगरपादिका, अमृतवल्ली गुडूची । १७

आगारधूम-मञ्जिष्ठा-रजनी-लवणोत्तमैः ।
लेपो जयत्याखुविषं कर्णिकायाश्च पातनः ॥ १८ ॥
ततोऽम्लैः क्षालयित्वाऽनु तोयैरनु च लेपयेत् ।
पालिन्दी-श्वेतकटभी-विल्वमूल-गुडूचिभिः ॥ १९ ॥
अन्यैश्च विषशोफघ्नैः शिरां वा मोक्षयेद् द्रुतम् ।

योगान्तरमाह आगारधूमेत्यादि । अम्लैरिति काञ्जिकादिभिः । पालिन्दी श्यामालता । १८—२०—

छर्दनं जालिनीक्वाथैः शुकाख्याङ्कोलयोरपि ॥ २० ॥
कोशवत्याः शुकाख्यायाः फलं जीमूतकस्य च ।
मदनस्य च सञ्चूर्ण्य दध्ना पीत्वा विषं वमेत् ॥ २१ ॥

छर्दनमित्यादौ जालिनी घोषकः । जालिनी स्थाने नीलिनीति न पाठः सुश्रुते हि जालिन्येव पठ्यते टीकाकृतैश्च व्याख्यात इति । शुकाख्या चर्मकारवटकः अङ्कोलो अङ्कोठः, कोषवती घोषकः । फलमित्यत्र सुश्रुते मूलमिति डल्वणः पठति । जीमूतस्येत्यादि योगान्तरम् । जीमूतकः पीतघोषकः अत्रापि फलमिति सम्बध्यते । २१

वचा-मदन-जीमूत-कुष्ठं वा मूत्रपेषितम् ।
पूर्वकल्पेन पातव्यं सर्वोन्दुरविषापहम् ॥ २२ ॥

वचेत्यादि योगान्तरम् । पूर्वकल्पेनेति दध्नाऽलोड्येत्यर्थः । २२

विरेचनं त्रिवृन्नीलीत्रिफलाकल्क इष्यते ।

विरेचनमाह विरेचनम् इत्यादि । २३—

शिरोविरेचने सारः शिरीषस्य फलानि च ।

नस्ययोगमाह शिरोविरेचन इत्यादि । सारोऽत्र मधूकादीनामिति गयदासः डल्वणस्तु सारः फलञ्च शिरीषस्यैवेत्याह । —२३—

अञ्जनं गोमयरसो व्योषसूक्ष्मरजोऽन्वितः ॥ २३ ॥

अञ्जनमाह अञ्जनम् इत्यादि ।—२३

कपित्थगोमयरसो मधुमानवलेहनम् ।
तण्डुलीयकमूलेन सिद्धं पाने हितं घृतम् ॥ २४ ॥

शोधनयोगानभिधाय संशमन योगानाह कपित्थेत्यादि । तण्डुलीयकेत्यादौ तण्डूलीयकमूलस्य कल्कः । २४

द्विनिशा-कट्भी-रक्तायष्ट्याह्वर्वाऽमृतान्वितैः ।
आस्फोतमूलसिद्धं वा पञ्चकापित्थमेव वा ॥ २५ ॥

द्विनिशेत्यादौ रक्ता गोरोचना मञ्जिष्ठेत्यन्ये । आस्फोता अप्फरमल्ली । पञ्चकापित्थमेवेति कपित्थस्य पल्लवफलमूलपुष्प वल्कल कषाय कल्कसिद्धमित्यर्थः । २५

सिन्धुवारनतं शिग्रुबिल्वमूलं पुनर्नवा ।
वचाश्वदंष्ट्राजीमूतमेषां क्वाथं समाक्षिकम् ॥ २६ ॥
पिबेच्छाल्योदनं दध्ना भुञ्जानो मूषिकार्दितः ।
तक्रेण शरपुङ्खाया बीजं सञ्चूर्ण्य वा पिबेत् ॥ २७ ॥
अङ्कोलमूलकल्को वा बस्तमूत्रेण कल्कितः ।
पानालेपनयोर्युक्तः सर्वाखुविषनाशनः ॥ २८ ॥

सिन्धुवारेत्यादि विषनाशन इत्यन्तं योगत्रयं स्पष्टम् । २६—२८

कपित्थमध्यतिलकतिलाङ्कोलजटाः पिबेत् ।
गवां मूत्रेण पयसा मञ्जरी तिलकस्य वा ॥ २९ ॥
अथवा सैर्यकान्मूलं सक्षौद्रं तण्डुलाम्बुना ।
कटुकालाबुविन्यस्तं पीतं वाम्बु निशोषितम् ॥ ३० ॥

कपित्थेत्यादि मूत्रेणेत्यन्त एको योगः । तिलकस्य वेत्यन्तो द्वितीयः । कपित्थस्य मध्यं शस्यम् । तिलकः स्वनामख्यातो वृक्षः दीर्घपत्रः । जटेति मूलम् । सैर्यको झिण्टी । २९।३०

सिन्धुवारस्य मूलानि बिडालास्थिविषं नतम् ।
जलपिष्टो गदो हन्ति नस्याद्यैराखुजं विषम् ॥ ३१ ॥

सिन्धुवारस्येत्यादि स्पष्टम् । ३१

सशेषं मूषिकविषं प्रकुप्यत्यभ्रदर्शने ।

इदानीं सम्यगनिर्हृतस्य मूषकविषस्य कालान्तर प्रकोपित्वमाह सशेषमित्यादि । अभ्र दर्शन इति मेघागमे । ३२—

यथायथं वा कालेषु दोषाणां वृद्धिहेतुषु ॥ ३२ ॥
तत्र सर्वे यथावस्थं प्रयोज्याः स्युरुपक्रमाः ।
यथास्वं ये च निर्दिष्टास्तथा दूषीविषापहाः ॥ ३३ ॥

यथायथं वेत्यादि । यस्य यस्य दोषस्य ये ये वृद्धिहेतवः काला स्तेष्वित्यर्थः । यथावस्थमिति यस्यां यस्या मवस्थायां ये ये उपक्रमा निर्दिष्टास्ते इत्यर्थः । —३२।३३

दंशं हालर्कदष्टस्य दग्धमुष्णेन सर्पिषा ।
प्रदिह्यादगदैस्तैस्तैः पुराणञ्च घृतं पिबेत् ॥ ३४ ॥
अर्कक्षीरयुतं चास्य योज्यमाशु विरेचनम् ।

अलर्काख्येन शुना दष्टस्य चिकित्सामाह दंशमित्यादि । उष्णेन सर्पिषा दग्धमित्यन्वयः । तैं स्तैरगदैरिति पूर्व्वोक्तैः । डल्वणस्तु विरेचनमित्यत्र विशोधनमिति पठति व्याचष्टे च कफाधिको वमनद्रव्यं पित्ताधिको विरेचनद्रव्यमिति । ३४।३५—

अङ्कोलोत्तरमूलाम्बु त्रिपलं सहविःपलम् ॥ ३५ ॥

अङ्कोलेत्यादि । अङ्कोठस्योत्तरदिग्भवं मूलं तत्सिद्धं जलं पलत्रयपरिमितं एकेन घृतपलेन सहितं पिबेत् । अन्ये तु उत्तरमूलं प्रधानं मूलमाहुः । —३५

पिबेत् सधूस्तुरफलां श्वेतां वापि पुनर्नवाम् ।

सधूस्तुरफलामित्यादिना पुनर्नवामित्यन्तेन द्वितीयं योगमाह । श्वेतामिति पुनर्नवा विशेषणम् अन्येतु कटभीमाहुः । ३६—

पैकध्यं पललं तैलं रूपिकायाः पयो गुडः ॥ ३६ ॥
भिनत्ति विषमालर्कं घनवृन्दमिवानिलः ।

ऐकध्यमित्यादिना अनिल इत्यन्तेन तृतीय योगमाह । पललमिति तिलचूर्णम् । रूपिकायाः पय इति अर्कस्य क्षीरम् । अत्र जलेन पीतमिति शेषः । एतद्द्रव्यचतुष्टय मैकध्यमिति एकत्र मिश्रितम् । —३६।३७ —

समन्त्र' सौषधीरत्न' स्नपनञ्च प्रयोजयेत् ॥ ३७ ॥

अलर्कविषे भूतानुबन्धे सति दैवव्यपाश्रयं चिकित्सितमाह समन्त्रमित्यादि। अत्र स्नानविधिः मन्त्रश्च सुश्रुतोक्तो यथा—

"क्षिप्तरत्नौषधीवीजैः कुम्भैः शीताम्बुपूरितैः।
स्नापयेत्त' नदीतीरे समन्त्रैर्वा चतुष्पथे॥
बलिर्निवेद्य स्तत्रापि पिण्याकं पलल'दधि।
माल्यानि च विचित्राणि मांसंपक्वामकं तथा॥
अलर्काधिपते यक्ष सारमेय गणाधिप।
अलर्कदष्टमेतन् मे निर्विषं कुरुमाचिरात्॥" इति (कं ६ अं) —३७

चतुष्पाद्भिर्द्विपाद्भिर्वा नखदन्तपरिक्षतम्।
शूयते पच्यते राग-ज्वर-स्रावरुजान्वितम्॥ ३८॥
सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपादिका।
रजन्यौ गैरिकं लेपो नखदन्तविषापहः॥ ३९॥

इति श्रीमद्‌वागभट विरचिताया मष्टाङ्गहृदय संहिताया मुत्तरे तन्त्रे मूषिकालर्कादि विषप्रतिषेधो नामाष्टत्रिंशोऽध्यायः॥

उन्मत्त श्वशृगालादि विष चिकित्सित मभिधाय अनुन्मत्तानामेव श्वशृगालादीनां नखदन्तादिक्षतविषस्य लक्षणं चिकित्साञ्चाह चतुष्पाद्भिरित्यादि। सोमवल्कः कट्फलम्। अश्वकर्णः शालभेदः गोजिह्वा दार्व्वीशाकः, हंसपादी स्वनामख्याता। ३८।३९

इति (श्रीशिवदास सेन विरचिते अष्टाङ्गहृदय तत्त्वबोधे) उत्तरे तन्त्रे अष्टत्रिंशोऽध्यायः।

समाप्तञ्च विषतन्त्रम्।

एकोनचत्वारिंशोऽध्यायः।

अथातो रसायनाध्यायं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः॥

दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।
प्रभावर्णस्वरौदार्य' देहेन्द्रियबलोदयम्॥ १॥
वाक्सिद्धिं वृषतां कान्तिमवाप्नोति रसायनात्।

उद्देशशास्त्रसामान्यादेव विषतन्त्रानन्तरं रसायनमुच्यते। तत्र रसायनस्य फलमाह दीर्घमित्यादि। वाक्सिद्धिमिति यदुच्यते तदवश्यं भवतीत्यर्थः। वृषतामिति शुक्रभूयिष्ठताम्। १।२—

लाभोपायो हि शस्तानां रसादीनां रसायनम्॥ २॥
पूर्वे वयसि मध्ये वा तत् प्रयोज्यं जितात्मनः।
स्निग्धस्य स्रुतरक्तस्य विशुद्धस्य च सर्वथा॥ ३॥
अविशुद्धे शरीरे हि युक्तो रासायनो विधिः।
वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफलः॥ ४॥
रसायनानां द्विविधं प्रयोगमृषयो विदुः।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा॥ ५॥

कथमेतद् रसायनेन क्रियते इत्येतदर्थं रसायन शब्दार्थमेव हेतुत्वेनोपन्यस्यति लाभोपाय इत्यादि। आदिग्रहणेन स्मृत्यादीनाञ्च ग्रहणम्। एतेन विशिष्टरसादिजनकत्वे सत्यशेषदाहहरत्वं रसायनत्वमिति लक्षणं सूचितम्। अत्र विशिष्टेत्यादि विशेषणेन ध्यानमन्त्रतपःप्रभावादिव्यवच्छेदः। ध्यानादयो हि न विशिष्टरसादिजननावान्तरव्यापाराज् जरादिदोषहराः किन्तु प्रभावादेवेति न तेषां रसायनत्वम्। अशेषदोषः शारीरो मानसश्च। तेन वृष्ये नातिव्याप्तिः। वृष्यं हि न मानसदोषहर' किन्तूत्कृष्टशक्तिकं किञ्चिदेव तथापि तादृशरसायननिष्ठसामान्यविशेषव्याप्तत्वेन तेषामपि रसायनत्वम्। किंवा विशिष्टरसजनकत्वे सति जरानिवर्त्तकत्वं रसायनत्वम्। अत्र रसकार्य्यत्वात् सप्तानामेव धातूनां ग्रहणम्। अत्राद्यविशेषणसन्निवेशात् कपालरञ्जन योगादिषु नातिव्याप्तिः। ननु वृद्धो न

रसायनाधिकारी उक्तं हि "जरापक्वशरीरस्य व्यर्थमेव रसायनम्" इति तत् कथं जराप्रशमकत्वं रसायनस्य। नैवम्, जराशब्देनात्राकालपलितं कालिकञ्च वलिपलित मुच्यते, अतो नायं दोषः, यत् च्यवनप्राशो सुवृद्धोऽभूत् पुनर्युवत्वेन वृद्धस्यापि रसायन प्रयोगात् जराप्रशमनमुक्तं तत्तत्प्रभावानुगृहीतस्य रसायनस्य फलं न रसायनमात्रस्येति। पूर्वं इति यौवनप्रवेश एव। मध्य इति यौवनशेषे। बालवृद्धौ तु न रसायनविषयौ भेषजवीर्यासहत्वाज्जरापक्वशरीरत्वाच्चेति। जितात्मन इति जितेन्द्रियस्य। विशुद्धस्येति वमनविरेचनाभ्याम्। कुटीप्रवेशेन यत् क्रियते तत्कुटीप्रावेशिकम्। वातातपसेवयापि यत् क्रियते तद्वातातपिकम्। —२–५

नृपादिचरिते धर्म्ये प्राप्योपकरणे पुरे। (१)
दिश्युदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥ ६ ॥
धूमातपरजोव्यालस्त्रीमूर्खाद्यविलङ्घिताम्।
सज्जवैद्योपकरणां सुमृष्टां कारयेत् कुटीम् ॥ ७ ॥
अथ पुण्येऽह्नि सम्पूज्य पूज्यांस्तां प्रविशेच्छुचिः।
तत्र संशोधनैः शुद्धः सुखी जातबलः पुनः ॥ ८ ॥
ब्रह्मचारी धृतियुतः श्रद्दधानो जितेन्द्रियः।
दानशील-दया-सत्य-व्रत-धर्मपरायणः ॥ ९ ॥
देवतानुस्मृतौ युक्तो युक्तस्वप्नप्रजागरः।
प्रियौषधः पेशलवाक् प्रारभेत रसायनम् ॥ १० ॥

तत्र कुटीकरणविधिमाह नृपेत्यादि। धर्म्ये इति धर्मादनपेते। अरुणस्तु धर्म्येति स्थाने हर्म्ये इति पठित्वा हर्म्यं धवलगृहमिति व्याचष्टे तत्र असंगतार्थत्वात्। प्राप्योपकरण इति उपकरणं रसायनसहायः। शुभे देश इति तुषभस्मकण्टकादिरहिते प्रदेशे। त्रिगर्भामिति त्रिप्रकोष्ठाम्। सूक्ष्मलोचनामिति सूक्ष्मगवाक्षाम्। तथा धूमादिभिरविलङ्घिताम् अनाक्रान्ताम् धूमादिप्रवेशरहितामित्यर्थः। सज्जानि सम्भृतानि वैद्योपकरणानि यस्याम्। सुमृष्टामित्युपलेपादिना शुद्धाम्। सुखी नीरोगः। जातबलः पुनरिति, संशोधन क्षीणबलतया संसर्जनक्रमेण पुनर्जातबल इत्यर्थः। युक्तौ उचितौ स्वप्नप्रजागरौ यस्य। ६–१०

(१) त्रिगर्भां त्रिकोष्ठकां इति वा पाठः।

हरीतकीमामलकं सैन्धवं नागरं वचाम्।
हरिद्रां पिप्पलीं वेल्लं गुडं चोष्णाम्बुना पिबेत् ॥ ११ ॥
स्निग्धः स्विन्नो नरः पूर्वं तेन साधु विरिच्यते।
ततः शुद्धशरीराय कृतसंसर्जनाय च ॥ १२ ॥
त्रिरात्रं पञ्चरात्रं वा सप्ताहं वा घृतान्वितम् ॥
दद्याद्यावकमाशुद्धेः पुराणशकृतोऽथवा ॥ १३ ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत्।
यस्य यद्यौगिकं पश्येत् सर्वमालोच्य सात्म्यवित् ॥ १४ ॥

इदानीं रसायनप्रयोगे कर्तव्ये यच्छोधनं विधेयं तदाह हरीतकीमित्यादि। वेल्लमिति विडङ्गम्। पूर्वं स्निग्धस्विन्नः सन् पश्चाद् हरीतक्यादिकमुष्णाम्बुना पिबेत्। यावकमिति यवान्नम्। त्रिरात्रादि विकल्पत्रयं हीनमध्योत्तमविषयम्। ११–१४

पथ्यासहस्रं त्रिगुणधात्रीफलसमन्वितम्।
पञ्चानां पञ्चमूलानां सार्धं पलशतद्वयम् ॥ १५ ॥
जले दशगुणे पक्त्वा दशभागस्थिते रसे।
आपोथ्य कृत्वा व्यस्थीनि विजयामलकान्यथ ॥ १६ ॥
विनीय तस्मिन्निर्यूहे योजयेत् कुडवांशकम्।
त्वगेलामुस्तरजनीपिप्पल्यगुरुचन्दनम् ॥ १७ ॥
मण्डूकपर्णी-कनक-शङ्खपुष्पी-वचा-प्लवम्।
यष्ट्याह्वयं विडङ्गं च चूर्णितं तुल्याधिकम् ॥ १८ ॥
सितोपलार्धभारं च पात्राणि त्रीणि सर्पिषः।
द्वे च तैलात् पचेत् सर्वं तदग्नौ लेह्यतां गतम् ॥ १९ ॥
अवतीर्णं हिमं युञ्ज्याद्द्विंशैः क्षौद्रशतैस्त्रिभिः।
ततः खजेन मथितं निदध्याद् घृतभाजने ॥ २० ॥
या नोपरुन्ध्यादाहारमेकं मात्रास्य सा स्मृता।
षष्टिकः पयसा चात्र जीर्णे भोजनमिष्यते ॥ २१ ॥
वैखानसा वालखिल्यास्तथा चान्ये तपोधनाः।
ब्रह्मणा विहितं धन्यमिदं प्राश्य रसायनम् ॥ २२ ॥

तन्द्राश्रमक्लमवलीपलितामयवर्जिताः ।
मेधास्मृतिबलोपेता बभूवुरमितायुषः ॥ २३ ॥

पथ्येत्यादिना रसायन प्रयोगमाह । धात्रीफलस्य सहस्रत्रयमित्यर्थः । पञ्चानां पञ्चमूलानामित्यन्नपानस्वरूप विज्ञानीयोक्तानाम् । (सू॰ ६ अ॰) पलशतद्वयमिति मिलित्वा । दशभागस्थित इति दशमभागावशेष इत्यर्थः । भागशब्दे परे पूरणप्रत्ययस्य लोपः । आपोथ्येति शिलाया संक्षुद्य । त्रिजया हरीतकी विनीयेति प्रक्षिप्य । कुडवांशिकमिति त्वगेलादिचूर्णं प्रत्येकं पलचतुष्टयसम्मितमित्यर्थः । कनकं नागकेशरं प्लवं कैवर्तमुस्तकम् । तुलयाधिकमिति सितोपलार्द्धं भार--विशेषणं भारो विंशतिस्तुलाः । तदर्द्धं दशतुला इत्यर्थः । तेन शर्करायाः एकादश तुला इत्यर्थः । पात्राणीत्याढकानि । द्वे च तैलादिति तैलादाढकद्वयमित्यर्थः । त्रिंशैः क्षौद्रशतैस्त्रिभिरिति क्षौद्रस्य त्रिंशति पलाधिक पलशतत्रयेण तद् युञ्ज्यादिति योजयेदित्यर्थः । तदधिक मित्यर्थे शदन्तविंशतेश्चेति डः । एकमित्यपराह्णिक माहारम् । १५—२३

अभयामलकसहस्रं निरामयं पिप्पलीसहस्रयुतम् ।
तरुणपलाशक्षारद्रवीकृतं स्थापयेद्भाण्डे ॥ २४ ॥
उपयुक्ते च क्षारे छायासंशुष्कचूर्णितं योज्यम् ।
पादांशेन सितायाश्चतुर्गुणाभ्यां मधुघृताभ्याम् ॥ २५ ॥
तद्घृतकुम्भे भूमौ निधाय षण्मासस्थमुद्धृत्य ।
प्राह्णे प्राश्य यथानलमुचिताहारो भवेत् सततम् ॥ २६ ॥
इत्युपयुज्याशेषं वर्षशतमनामयो जरारहितः ।
जीवति बलपुष्टिवपुःस्मृतिमेधाद्यन्वितो विशेषेण ॥ २७ ॥

अभयामलक सहस्रमित्यादि । अभयामलकयोर्मिलित्वा सहस्रमित्यर्थः । निरामयमिति कीटादिदोषरहितम् । तरुणविशेषणेन बालवृद्धपलाशवर्जनं बोधयति । तरुण पलाशक्षार द्रवीकृतमिति पलाश क्षारोदकेन भावितमित्यर्थः । उपयुक्ते च क्षार इति क्षारोदके शुष्के सतीत्यर्थः । पादांशेनेत्यादि । अभयामलक पिप्पली चूर्णापेक्षया सितायाश्चतुर्थांशेन तथा अभयादिचूर्णापेक्षयैव चतुर्गुणाभ्यां मधुघृताभ्यां तच्चूर्णं योज्यमिति योजनीयम् । प्राह्ण इति पूर्वाह्णे । २४—२७

नीरुजार्द्रपलाशस्य छिन्ने शिरसि तत्क्षतम् ।
अन्तर्द्विहस्तगम्भीरं पूर्यमामलकैर्नवैः ॥ २८ ॥
आमूलं वेष्टितं दर्भैः पद्मिनीपङ्कलेपितम् ।
आदीप्य गोमयैर्वन्यैर्निर्वाते स्वेदयेत्ततः ॥ २९ ॥
स्विन्नानि तान्यामलकानि तृप्त्या खादेन्नरः क्षौद्रघृतान्वितानि ।
क्षीरं शृतं चानुपिबेत् प्रकामं तेनैव वर्तेत च मासमेकम् ॥ ३० ॥
वर्ज्यानि वर्ज्यानि च तत्र यत्नात् स्पृश्यञ्च शीताम्बु न पाणिनापि ।
एकादशाहेऽस्य ततो व्यतीते पतन्ति केशा दशना नखाश्च ॥ ३१ ॥
अथाल्पकैरेव दिनैः सुरूपः स्त्रीष्वक्षयः कुञ्जरतुल्यवीर्यः ।
विशिष्टमेधाबलबुद्धिसत्त्वो भवत्यसौ वर्षसहस्रजीवी ॥ ३२ ॥

निरुजार्द्रपलाशस्येत्यादि । निरुज इति कीटादिदोषरहितः । अन्तस्तत्क्षतमिति अभ्यन्तरे शुषिरीकृतं । तक्ष् त्वक्ष् तनुकरण इत्यस्य रूपम् । कियत् प्रमाणं शुषिरं कार्यमित्याह द्विहस्तगम्भीरमिति । तेनैवेति शृतक्षीरेण । वर्ज्यानि वर्ज्यानि इति रसायनविधौ यानि ग्राम्यवादीनि वर्जनीयत्वेनोक्तानि तानि वर्ज्यानीत्यर्थः । २८—३२

दशमूल-बला-मूल-जीवकर्षभकोत्पलम् ।
पर्णिन्यौ पिप्पलीशृङ्गीमेदातामलकी-त्रुटिः ॥ ३३ ॥
जीवन्ती-जोङ्गकं द्राक्षा पौष्करं चन्दनं शटी ।
पुनर्नवा-द्विकाकोली-काकनासामृताह्वयाः ॥ ३४ ॥
विदारीवृषमूलञ्च तदेकर्ष्यं पलोन्मितम् ।
जलद्रोणे पचेत् पञ्चधात्रीफलशतानि च ॥ ३५ ॥
पादशेषं रसं तस्माद्धृत्वास्थीन्यामलकानि च ।
गृहीत्वा भर्जयेत्तैलघृताद्द्वादशभिः पलैः ॥ ३६ ॥
मत्स्यण्डिकातुलार्द्धेन युक्तं तल्लेहवत् पचेत् ।
षट् हार्दं मधु सिद्धे तु तुगाक्षीर्याश्चतुष्पलम् ॥ ३७ ॥
पिप्पल्या द्विपलं दद्याच्चातुर्जातं कर्षिकम् ।
अतोऽवलेहयेन्मात्रां कुटीस्थः पथ्यभोजनः ॥ ३८ ॥

इत्येषच्यवनप्राशो यं प्राश्य च्यवनो मुनिः ।
जराजर्जरितोऽप्यासीन्नारीनयननन्दनः ॥ ३९ ॥
कासं श्वासं ज्वरं शोषं हृद्रोगं वातशोणितम् ।
मूत्रशुक्राश्रयान् दोषान् वैस्वर्यञ्च व्यपोहति ॥
बालवृद्धक्षतक्षीणकृशानामङ्गवर्द्धनः ॥ ४० ॥
मेधां स्मृतिं कान्तिमनामयत्वमायुःप्रकर्षं पवनानुलोम्यम् ।
स्त्रीषु प्रहर्षं बलमिन्द्रियाणामग्नेश्च कुर्याद्विधिनोपयुक्तः ॥ ४१ ॥

दशमूलेत्यादिना च्यवनप्राशमाह । पर्णिन्याविति मुद्गपर्णी माषपर्ण्यौ । त्रुटिः सूक्ष्मैला । जोङ्गकमगुरु । काकनासा वासाफलम् अन्येतु काकतुण्डाकृति द्रव्यमाहुः । अमृताद्वयमिति गुडूची हरीतकीचेत्यर्थः । व्यस्थीनीति विगतास्थीनि । तैलघृतयोर्द्वादशभिः पलैरिति मिलित्वा । चातुर्जातं कणार्द्धिकमिति मिलित्वा पलमेकमित्यर्थः । ३३—४१

मधुकेन तुगाक्षीर्या पिप्पल्या सिन्धुजन्मना ।
पृथग्लौहैः सुवर्णेन वचया मधुसर्पिषा ॥ ४२ ॥
सितया वा समायुक्ता समायुक्ता रसायनम् ।
त्रिफला सर्वरोगघ्नी मेधायुःस्मृतिबुद्धिदा ॥ ४३ ॥

मधुकेनेत्यादि । मधुकादिभिः पृथक् समायुक्ता सम्यग्युक्ता त्रिफला समायुक्तेति संवत्सरोपयुक्ता सती सर्व्वरोगघ्नी भवतीति योजना । किंवा मधुकेनेत्यादि सिन्धुजन्मनेत्यन्त एकोयोगः । पृथग् लोहैरिति ताम्रत्रपुसीसरौप्यलौहानामन्यतमेनेत्यर्थः । मधुसर्पिःसितायोगः पुनरुभयत्रापीति । ४२।४३

मण्डूकपर्ण्याः स्वरसं यथाग्नि क्षीरेण यष्टीमधुकस्य चूर्णम् ।
रसंगुडूच्याः सहमूलपुष्प्याः कल्कंप्रयुञ्जीत च शङ्खपुष्प्याः ॥ ४४ ॥
आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि रसायनानि मेध्याविशेषेण तु शङ्खपुष्पी ॥ ४५ ॥

श्लोकपाद चतुष्टयेनापरं योगचतुष्टयमाह मण्डूकपर्ण्या इत्यादि । सहमूलपुष्प्या इति गुडूचीविशेषणम् इति चक्रः शङ्खपुष्प्यो विशेषण मित्यन्ये । ४४।४५

नलदं कटुरोहिणी पयस्या मधुकं चन्दनसारिवोग्रगन्धाः ।
त्रिफला कटुकत्रयं हरिद्रे सपटोलं लवणञ्च तैः सुपिष्टैः ॥ ४६ ॥
त्रिगुणेन रसेन शंखपुष्प्याः सपयस्कं घृतलल्वणं विपक्वम् ।
उपयुज्य भवेज्जडोऽपि वाग्मी श्रुतधारी प्रतिभानवानरोगः ॥ ४७ ॥

नलदमित्यादौ नलदमुशीरम् । पयस्या क्षीरकाकोली, शारिवा अनन्तमूलम्, उग्रगन्धा वचा । एषां कल्को घृतात् पादिकः । क्षीरं घृतसमम् । लल्वणो द्रोणः । ४६।४७

पेष्यैर्मृणालबिसकेसरपत्रबीजैः
सिद्धं सहेमशकलं पयसा च सर्पिः ।
पद्मारविन्दमिति तत् प्रथितं पृथिव्यां
प्रभ्रष्टपौरुषबलप्रतिभैर्निषेव्यम् ॥ ४८ ॥

पेष्यैरित्यादि । पेष्यैरिति कल्कैः । बिसं पद्मकन्दः । सहेमशकलमिति जारित-पुटित-सुवर्णचूर्णसहितमिति केचित् । सुवर्णखण्डेन सहपक्वमित्यन्ये । अत्र सुवर्णसहितः पाकः प्रभावादेव गुणजनकः । यथा "मण्डलैर्जातरूपस्य तस्याएव पयःशृत"मित्यादि । एवं वक्ष्यमाणेऽपि । ४८

यन्नालकन्ददलकेसरवद्विपक्वं
नीलोत्पलस्य तदपि प्रथितं द्वितीयम् ।
सर्पिश्चतुः कुवलयं सहिरण्यपत्रं
मेध्यं गवामपि भवेत् किमु मानुषाणाम् ॥ ४९ ॥

यन्नाल कन्देत्यादि । सहिरण्यपत्रमिति पत्राकृतिहिरण्यसहितं यथा स्यात्तथा पक्वमित्यर्थः । ४९

ब्राह्मी-वचा-सैन्धव-शङ्खपुष्पी-मत्स्याक्षक-ब्रह्मसुवर्चलैन्द्र्यः ।
वैदेहिका च त्रियवा पृथक्स्युर्यवौ सुवर्णस्य तिलो विषस्य ॥ ५० ॥
सर्पिषश्च पलमेकत एतद्योजयेत् परिणते च घृताढ्यम् ।
भोजनं समधु वत्सरमेधं शीलयन्नधिकधीस्मृतिमेधः ॥ ५१ ॥
अतिक्रान्तजराव्याधितन्द्रालस्यश्रमक्लमः ।
जीवत्यब्दशतं पूर्णं श्रीतेजःकान्तिदीप्तिमान् ॥ ५२ ॥

विशेषतः कुष्ठकिलासगुल्मविषज्वरोन्मादगरोदराणि ।
अथर्वमन्त्रादिकृताश्च कृत्याः शाम्यन्त्यनेनातिबलाश्च वाताः ॥५३॥

ब्राह्मीत्यादि । मतस्याश्च "कोमळोरि"रिति ख्यातः अन्येतु ऐन्द्रीभेदमाहुः । ब्रह्मसुवर्चलापि स्वनामख्याता दिव्यौषधिः सा च सुवर्णवर्णक्षीरा पुष्करपत्रसदृशपत्रेति । वैदेहिका पिप्पली । एते सप्त पृथक् त्रियवप्रमाणाः । परिणते चेति अस्मिन् औषधे जीर्णे सति घृताढ्यं तथा सममधु च भोजनं विधेयम् । ५० – ५३

शरन्मुखे नागबलां पुष्ययोगे समुद्धरेत् ।
अक्षमात्रं ततो मूलाच्चूर्णं तात् पयसा पिबेत् ॥ ५४ ॥
लिह्यान्मधुघृताभ्यां वा क्षीरवृत्तिरनन्नभुक् ।
एवं वर्षप्रयोगेण जीवेद्वर्षशतं बली ॥ ५५ ॥

शरन्मुखे इति शरदारम्भे । नागबला गोरक्षतण्डुला । ५४।५५

फलोन्मुखो गोक्षुरकः समूलश्छायाविशुष्कः सुविचूर्णिताङ्गः ।
सुभावितः स्वेन रसेन तस्मान्मात्रां परां प्रासृतिकीं पिबेद्यः ॥ ५६ ॥
क्षीरेण तेनैव च शालिमश्नन् जीर्णे भवेत् स द्वितुलोपयोगात् ।
शक्तः सुरूपः सुभगः शतायुः कामी ककुद्मानिव गोकुलस्थः ॥ ५७ ॥

फलोन्मुख इत्यादि । क्षीरेण प्रासृतिकीं मात्रां पिबेत् । तथा तेनैवेति क्षीरेण शालिमन्नमश्नन्नित्यन्वयः । ५६।५७

वाराहीकन्दमार्द्रार्द्रं क्षीरेण क्षीरपः पिबेत् ।
मासं निरन्नो मासश्च क्षीराशी जरां जयेत् ॥ ५८ ॥

वाराहीकन्दमित्यादि । आर्द्रार्द्रमित्यतिशयेन आर्द्रम् । एतल्लक्षणञ्च तन्त्रान्तरे यथा—

"ताम्बुल सदृशैः पत्रैः ग्रन्थिभिः समलङ्कृता ।
सजांशु न निभैः पुष्पैः शोभते सा सुगन्धिभिः ॥
वराहच्छविवर्णेन पिच्छिलेन सुवर्चसा ।
कन्देन कटुतिक्तेन नीलोत्पल सुगन्धिना ॥
जायते सा गिरौरम्ये विन्ध्येश्रीपर्वते तथा ॥" इत्यादि । ५८

तत्कन्दकल्कस्या चूर्णं वा स्वरसेन सुभावितम् ।
घृतक्षौद्रप्लुतं लिह्यात्तत्पक्वं वा घृतं पिबेत् ॥ ५९ ॥

तत्कन्देत्यादि । स्वरसेनेति वाराहीकन्दस्वरसेन । तत्पक्वमिति वाराहीकन्दकल्कपक्वम् । ५९

तद्वद्विदार्यतिबलाबलामधुकवायसीः ।
श्रेयसी श्रेयसी युक्ता पथ्या-धात्री-स्थिरामृताः ॥ ६० ॥
मण्डूकीशङ्खकुसुमावाजिगन्धाशतावरीः ।
उपयुञ्जीत मेधावी वयःस्थैर्यबलप्रदाः ॥ ६१ ॥

वाराहीकन्दोक्तं विधिं विदार्यादिष्वतिशति तद्वदित्यादि । वायसी काकमाची, युक्ता रास्ना, मण्डूकी मण्डूकपर्णी, शङ्खकुसुमा शङ्खपुष्पी । ६०।६१

यथास्वं चित्रकः पुष्पैर्ज्ञेयः पीतसितासितैः ।
यथोत्तरं स गुणवान् विधिना च रसायनम् ॥ ६२ ॥
छायाशुष्कं ततो मूलं मासं चूर्णीकृतं लिहन् ।
सर्पिषा मधुसर्पिभ्यां पिबन् वा पयसा यतिः ॥ ६३ ॥
अम्भसा वा हिताशी शतं जीवति नीरुजः ।
मेधावी बलवान् कान्तो वपुष्मान् दीप्तपावकः ॥ ६४ ॥
तैलेन लीढो मासेन वातान् हन्ति सुदुस्तरान् ।
मूत्रेण श्वित्रकुष्ठानि पीतस्तक्रेण पायुजान् ॥ ६५ ॥

चित्रक कल्पमाह यथास्वमित्यादि । यतिरिति ब्रह्मचारी । ६२ – ६५

भल्लातकानि पुष्टानि धान्यराशौ निधापयेत् ।
ग्रीष्मे संगृह्य हेमन्ते स्वादुस्निग्धहिमैर्वपुः ॥ ६६ ॥
संस्कृत्य तान्यष्टगुणे सलिलेऽष्टौ विपाचयेत् ।
अष्टांशशिष्टं तत्क्वाथं सक्षीरं शीतलं पिबेत् ॥ ६७ ॥
वर्द्धयेत् प्रत्यहञ्चानु तत्रैकैकमरुष्करम् ।
सप्तरात्रत्रयं यावत् क्षीणि त्रीणि ततः परम् ॥ ६८ ॥

आचत्वारिंशतस्तानि ह्रासयेद्वृद्धिवत्ततः ।
सहस्रमुपयुञ्जीत सप्ताहैरिति सप्तभिः ॥ ६९ ॥
यन्त्रितात्मा घृतक्षीरशालिषष्टिकभोजनः ।
तद्वत् त्रिगुणितं कालं प्रयोगान्तेऽपि चाचरेत् ॥ ७० ॥
आशिषो लभते पूर्वा वह्नेर्दीप्तिं विशेषतः ।
प्रमेह-कृमि-कुष्ठार्शो मेदोदोषविवर्जितः ॥ ७१ ॥

भल्लातक कल्पमाह भल्लातकानीत्यादि । पुष्टानीति मांसलानि । ग्रीष्मे संगृह्य धान्यराशौ निधापयेत् । ततो हेमन्ते तत्कार्यं सेवेदित्यन्वयः । ततः परमिति सप्तरात्रत्रयात् परम् । यन्त्रितात्मेति संयतेन्द्रियः । तद्वत्त्रिगुणितं कालमिति पूर्वोक्त सप्ताहापेक्षया त्रिगुणितः कालः एकविंशतिः सप्ताहाः । प्रयोगान्त इति सहस्रमात्रप्रयोगस्य अन्ते त्रिगुणितं कालं व्याप्य तद्वदाचरेत् घृतक्षीरशालिषष्टिक भोजनमाचरेदित्यर्थः । आशिषो लभते पूर्वा इति पूर्वं योगोक्तान् गुणान् लभत इत्यर्थः । ६९—७१

पिष्टस्वेदनमरुजः पूर्णं भल्लातकैर्विजर्जरितैः ।
भूमिनिखाते कुम्भे प्रतिष्ठितं कृष्णमृल्लिप्तम् ॥ ७२ ॥
परिवारितं समन्तात् पचेत् ततो गोमयाग्निना मृदुना ।
तत् स्वरसो यश्च्यवते गृह्णीयात् तं दिनेऽन्यस्मिन् ॥ ७३ ॥
अमुमुपयुज्य स्वरसं मध्वष्टमभागिकं द्विगुणसर्पिः ।
पूर्वविधियन्त्रितात्मा प्राप्नोति गुणान् स तानेव ॥ ७४ ॥

पिष्टस्वेदन मित्यादि । पिष्टकमुत्स्वेद्यते यत्र पात्रे तत् पिष्टस्वेदनम् तच्चेह सच्छिद्रं ग्राह्यम् अन्यथा उपरिस्थस्य भल्लातकस्य तापस्विन्नस्य स्नेहो नाधो गच्छेत् । अरुजैरिति कीटादिदोषरहितैः । विजर्जरीकृतैरिति खण्डखण्डीकृतैः । शेषं सुगमम् । ७२—७४

पुष्टानि पाकेन परिच्युतानि भल्लातकान्याढकसम्मितानि ।
घृष्ट्वेष्टिकाचूर्णकणैर्जलेन प्रक्षाल्य संशोष्य च मारुतेन ॥ ७५ ॥
जर्जराणि विपचेज्जलकुम्भे पादशेषघृतगालितशीते ।
तद्रसं पुनरपि श्रपयेत् क्षीरकुम्भसहितं चरणस्थे ॥ ७६ ॥

सर्पिः पक्वं तेन तुल्यप्रमाणं युञ्ज्यात् स्वेच्छं शर्करया रजोभिः ।
एकीभूतं तत् खजक्षोभणेन स्थाप्यं धान्ये सप्तरात्रं सुगुप्तम् ॥ ७७ ॥
तममृतरसपाकं यः प्रगे प्राशमश्नन्
अनुपिबति यथेष्टं वारिदुग्धं रसं वा
स्मृतिमतिबलमेधासत्त्वसारैरुपेतः
कनकनिचयगौरः सोऽश्नुते दीर्घमायुः ॥ ७८ ॥

पुष्टानीत्यादि । पाकेन परिच्युतानीति पाकवशात् स्वयमेव वृन्ततश्च्युतानि । कुम्भो द्रोणः । तुल्यप्रमाणं सर्पिरिति पादावशिष्टद्रवभागापेक्षया । स्वेच्छमिति आतुरेच्छया वैद्येच्छया च शर्करा प्रक्षेपः । व्यवहारस्तु अवलेहतापादनयोग्या मात्रा शर्करायाः । अमृतरसपाकमिति अमृतस्येव रसपाकौ यस्य । प्राशमिति लेहः । ७५—७८

द्रोणेऽम्भसो व्रणकृतां त्रिशताद्विपक्वात्
क्वाथाढके पलसमैस्तिलतैलपात्रम् ।
तिक्ताविषाद्वयवरागिरिजन्मतार्क्ष्यैः
सिद्धं परं निखिलकुष्ठनिबर्हणाय ॥ ७९ ॥

द्रोणेऽम्भस इत्यादि । व्रणकृता मित्यरुष्कराणां भल्लातकानामित्यर्थः । त्रिशता दित्याकृतिमानेन शतत्रयात् । एतच्छतत्रयं पक्त्वा क्वाथाढकः स्थाप्यः । क्वाथाढकस्य पादावशेषतया आढकचतुष्टयेन पाकः सिद्धो भवति । पलसमैरिति तिक्तादीनां कल्कद्रव्याणां विशेषणम् । पात्रमाढकम् । गिरिजन्म शिलाजतु, तार्क्ष्यं रसाञ्जनम् । ७९

सहामलकशुक्तिभिर्दधिसरेण तैलेन वा
गुडेन पयसा घृतेन यवसक्तुभिर्वा सह ।
तिलेन सह माक्षिकेण पललेन सूपेन वा
वपुष्करमरुष्करं परममेध्यमायुष्करम् ॥ ८० ॥

सहामलकेत्यादिना एकादशभल्लातकयोगानाह । आमलकशुक्ति रामलकचूर्णम् । अत्र भल्लातकेन सर्पिरादीनां यथासम्भवं संस्कारः संयोगश्च ज्ञेयः । अनुक्तोऽप्युक्तम्—"भल्लातकसंयुक्तसंस्कृतानि घृतक्षीरक्षौद्रगुड-यूष-तैल-पलल सक्तुकान तर्पणानि" इति । ८०

भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च ।
भवन्त्यमृतकल्पानि प्रयुक्तानि यथाविधि ॥ ८१ ॥
कफजो न स रोगोऽस्ति न विबन्धोऽस्ति कश्चन ।
यं न भल्लातकं हन्याच्छीघ्रमग्निबलप्रदम् ॥ ८२ ॥

सामान्य भल्लातक गुणाभिधान पूर्व्वकं यथाविधि प्रयुक्तानां तेषाममृतसमत्व-माह भल्लातकानीत्यादि । अग्निसमत्वं दाह स्फोटजनकत्वेन । ८१।८२

वातातपविधानेऽपि विशेषेण विवर्जयेत् ।
कुलत्थ-दधि-सुक्तानि तैलाभ्यङ्गाग्निसेवनम् ॥ ८३ ॥

इदानीं भल्लातक प्रयोगे क्रियमाणे यद् वर्जनीयं तदाह-वातातपेत्यादि । अपि-शब्दात् कुटीप्रावेशिकेऽपीत्यर्थः । ८३

वृक्षास्तुवरका नाम पश्चिमार्णवतीरजाः ।
वीचीतरङ्गविक्षोभमारुतोद्धूतपल्लवाः ॥ ८४ ॥
तेभ्यः फलान्याददीत सुपक्वान्यम्बुदागमे ।
मज्जा फलेभ्यश्चादाय शोषयित्वाऽवचूर्णयं च ॥ ८५ ॥
तिलवत् पीडयेद् द्रोण्यां क्वाथयेद्वा कुसुम्भवत् ।
तत् तैलं संभृतं भूयः पचेदासलिलक्षयात् ॥ ८६ ॥
अवतार्य करीषे च पक्षमात्रं निधापयेत् ।
स्निग्धस्विन्नो हतमलः पक्षादुद्धृत्य तत् ततः ॥ ८७ ॥
चतुर्थभक्तान्तरितः प्रातः पाणितलं पिबेत् ।
मन्त्रेणानेन पूतस्य तैलस्य दिवसे शुभे ॥ ८८ ॥
मज्जसार महावीर्य्य सर्वान् धातून् विशोधय ।
शङ्ख-चक्र-गदापाणिस्त्वामाज्ञापयतेऽच्युतः ॥ ८९ ॥
तेनास्योर्द्धमधस्ताच्च दोषा यान्त्यसकृत् ततः ।
सायमस्नेहलवणां यवागूं शीतलां पिबेत् ॥ ९० ॥

पञ्चाहानि पिबेत्तैलमित्थं वर्ज्यानि वर्जयेत् ।
पक्षं मुद्गरसान्नाशी सर्वकुष्ठैर्विमुच्यते ॥ ९१ ॥

तुवरककल्पमाह वृक्षा इत्यादि । वीचीतरङ्गौ अल्पबृहद् भेदेन तरङ्गद्वयम् । वीची अल्प तरङ्गे स्यादिति मेदिनी । अनेन विशेषणेन समुद्रातिसन्निहिते देशे भवत्व मेषां बोधयति । चतुर्थभक्तान्तरित इत्यनेन वमनविरेचनान्तरं चतुर्थ-भक्तकालं परित्यज्य पञ्चमान्नकालात् पूर्व्वमिदमुपयोज्यमिति दर्शयति । ८४—९१

तदेव खदिरक्वाथे त्रिगुणे साधु साधितम् ।
निहितं पूर्ववत् पक्षं पिबेन्मासं सुयन्त्रितः ॥ ९२ ॥
तेनाभ्यक्तशरीरश्च कुर्वन्नाहारमीरितम् ।
अनेनाशु प्रयोगेण साधयेत् कुष्ठिनं नरम् ॥ ९३ ॥

तदेवेत्यादि । पूर्व्ववन्निहितमिति करीषे निहितमित्यर्थः । कुर्व्वन्नाहार मीरितमिति अस्नेहलवणां यवागू मुपयुञ्जान इत्यर्थः । ९२।९३

सर्पिर्मधुयुतं पीतं तदेव खदिराद्विना ।
पक्षं मांसरसाहारं करोति द्विशतायुषम् ॥ ९४ ॥
तदेव नस्ये पञ्चाशद्दिवसानुपयोजितम् ।
वपुष्मन्तं श्रुतधरं करोति त्रिशतायुषम् ॥ ९५ ॥

सर्पिर्मधुयुतं पीत मित्यादि । खदिराद्विनेति खदिरक्वाथसाधन विना । ९४।९५

पञ्चाष्टौ सप्त दश वा पिप्पलीर्मधुसर्पिषा ।
रसायनगुणान्वेषी समामेकां प्रयोजयेत् ॥ ९६ ॥

पञ्चाष्टावित्यादि । सप्त वा दश वेति योज्यम् । अत्र विकल्पोऽनियम प्रदर्श-नार्थः । संख्या व्यतिक्रमस्तु अनुक्तसंख्या युक्तानामपि पिप्पलीना मुपयोग-सूचनार्थं इति चक्रः । रसायनगुणा बृंहणत्वादयः । ९६

तिस्रस्तिस्रस्तु पूर्वाह्णे भुक्ताग्रे भोजनस्य च ।
पिप्पल्यः किंशुकक्षारभाविता घृतभर्जिताः ॥ ९७ ॥

प्रयोज्या मधुसंमिश्रा रसायनगुणैषिणा ।

तिस्र इत्यादि । किंशुकः पलाशः क्षारेति क्षारोदकं । भाविता इति सप्ताहम् । ९७।९८—

क्रमवृद्ध्या दशाहानि दश पैप्पलिकं दिनम् ॥ ९८ ॥
वर्द्धयेत् पयसा सार्द्धं तथैवापनयेत् पुनः ।
जीर्णोऽौषधश्च भुञ्जीत षष्टिकं क्षीरसर्पिषा ॥ ९९ ॥
पिप्पलीनां सहस्रस्य प्रयोगोऽयं रसायनम् ।
पिष्टास्ता बलिभिः पेयाः शृता मध्यबलैर्नरैः ।
चूर्णीकृता हीनबले वीक्ष्य दोषामयान् प्रति ॥ १०० ॥

पिप्पलीवर्द्धमान माह क्रमेत्यादि । दश ल्यो यत्र वर्द्धन्ते तद्दिनं दशपैप्पलिकम् । तेन प्रत्यहं दश दश पिप्पल्यः वर्द्धयितव्या इत्यर्थः । उक्तञ्च तन्त्रान्तरे "दशभिर्दशभिः शश्वत् पिप्पलीभिस्तु वर्द्धयेद्" इति । अतश्चोनविंशतिदिनैः वृद्धिहानिक्रमेण एकेनैव सहस्रं पूर्णं भवति । पयसा सार्द्धमित्यनेन पयसोऽपि यथाक्रमं वृद्धिरित्याहुः । केचित् चूर्णीकृता इत्यत्र शीतीकृता इति पठित्वा शीतकषायीकृता इति व्याचक्षते । ९८—१००

तद्वच्च छागदुग्धेन द्वे सहस्रे प्रयोजयेत् ।
एभिः प्रयोगैः पिप्पल्यः कास-श्वास-गलग्रहान् ॥ १०१ ॥
यक्ष्म-मेह-ग्रहण्यर्शः पाण्डुत्व-विषमज्वरान् ।
घ्नन्ति शोफं वमिं हिक्कां प्लीहानं वातशोणितम् ॥ १०२ ॥

तद्वदित्यादि । तद्वदिति पूर्वोक्तरीत्या । उक्तपिप्पलीरसायनस्य गुणमाह एभिरित्यादि । १०१।१०२

बिल्वार्द्धमात्रेण च पिप्पलीनां पात्रं प्रलिम्पेदयसो निशायाम् ।
प्रातः पिबेत् तत् सलिलाञ्जलिभ्यां वर्षं यथेष्टाशन-पानचेष्टः ॥१०३॥

बिल्वार्द्धेत्यादि । बिल्वार्द्धमात्रेणेति पलार्द्धमानेनेत्यर्थः । अयसः पात्रमिति कान्तादि लौहपात्रम् । सलिलाञ्जलिभ्यामिति जलकुडवाभ्याम् । अयं योगस्तु पूर्वोक्तयोग समानगुण एवेति ज्ञेयम् । १०३

शुण्ठी-विडङ्ग-त्रिफला-गुडूची-यष्टी-हरिद्रातिबला-बलाश्च ।
मुस्ता-सुराह्वागुरु-चित्रकाश्च सौगन्धिकं पङ्कजमुत्पलानि ॥ १०४ ॥
धवाश्वकर्णासनबालपत्रसारास्तथा पिप्पलिवत् प्रयोज्याः ।
लोहोपलिप्ताः पृथगेव जीवेत्समाः शतं व्याधिजराविमुक्तः ॥ १०५ ॥

शुण्ठीत्यादि । बालपत्राणि पल्लवाः । पिप्पलीवत् लोहोपलिप्तान् पृथगेव प्रयोज्या इत्यन्वयः । १०४।१०५

क्षीराञ्जलिभ्याञ्च रसायनानि युक्तान्यमून्यायसलेपनानि ।
कुर्वन्ति पूर्वोक्तगुणप्रकर्षमायुः प्रकर्षं द्विगुणं ततश्च ॥ १०६ ॥

उक्तेषु लोहोपलेपन रसायनेषु क्षीराञ्जलिभ्यां पानेन गुणविशेषं दर्शयति क्षीराञ्जलिभ्यामित्यादि । १०६

असनखदिरयूषैर्भावितां सोमराजीं
मधुघृतशिखिपथ्यालोहचूर्णैरुपेताम् ।
शरदमवलिहान: पारिणामान् विकारां-
स्त्यजति मितहिताशी तद्वदाहारजातान् ॥ १०७ ॥

(असनेत्यादि) असनः स्वनामख्यातः, यूषः क्वाथः । लोहचूर्णमत्र जारितपुटितं ग्राह्यम् । शरदमवलिहान इति वत्सरमेकं व्याप्य अवलेहं कुर्वन् । पारिणामान् इति परिणामो जरा तद्भवान् विकारान् पलितादीन् । १०७

तीव्रेण कुष्ठेन परीतमूर्तिर्यः सोमराजीं नियमेन खादेत् ।
संवत्सरं कृष्णतिलद्वितीयां स सोमराजीं वपुषाऽतिशेते ॥ १०८ ॥

तीव्रेणेत्यादि । नियमेनेत्यनेन प्रात्याहिकत्वं पथ्याशित्वञ्च गमयति । सोमराजीकृष्णतिलयोस्तु प्रत्येकं माषकत्रयं चतुष्टयं वा व्यवहरन्ति । सोमराजीमिति चन्द्रश्रेणीम् । १०८

ये सोमराज्या वितुषीकृताया श्चूर्णैरुपेतात्पयसः सुजातान् ।
उद्धृत्य सारं मधुना लिहन्ति तक्रं तदेवानुपिबन्ति चान्ते ॥१०९॥

कुष्ठिनः कृष्यमाणाङ्गास्ते जातांगुलिनासिकाः ।
भान्ति वृक्षा इव पुनः प्ररूढ़नवपल्लवाः (१) ॥ ११० ॥

ये सोमराज्या इत्यादौ सारमिति नवनीतम् । कृष्यमानाङ्गा इति शीर्य्यमाणशरीरावयवाः । कुष्यमानाङ्गा इत्यपि पाठः । १०९।११०

ग्रीष्मेऽर्कतप्ता गिरयो जतुतुल्यं वमन्ति यत् ।
हेमादिधातुसम्भूतं प्रोच्यते तच्छिलाजतु (२) ॥ १११ ॥

इदानीं शिलाजतुरसायनं दर्शयितुं शिलाजतूत्पत्तिप्रकार माह ग्रीष्म इत्यादि । हेमादिधातुसम्भूतमिति आदि शब्दाद् रजतताम्रकृष्णायसादीनां ग्रहणम् । उक्तंहि हारीते—"सुवर्णरूप्यत्रपुसीसताम्र लोहादिकञ्चैव मनःशिला च" इत्यादि । १११

सर्वञ्च तिक्तकटुकं नात्युष्णाशीतवीर्य्यतः । (३)
छेदनञ्च

शिलाजतुगुणमाह सर्व्वञ्चेत्यादि । अत्र चरके ताम्रभवस्यैव शिलाजतुनः उष्णत्व मुक्तम् सुवर्णादि भवानान्तु शीतत्वमेवोक्तम् । यथा—

"मधुरञ्च सतिक्तञ्च जपापुष्पनिभञ्च यत् ।
विपाके कटुशीतञ्च तत् सुवर्णस्य निस्रवः ॥
राजतं कटुकं श्वेतं शीतं स्वादु विपच्यते ।
ताम्रस्य वर्हिकण्ठाभं तिक्तोष्णं पच्यते कटु ॥
यत्तु गुग्गुलुसङ्काशं सतिक्तं लवणान्वितम् ।
विपाके कटुशीतञ्च सर्व्वश्रेष्ठं तदायसम् ॥" इति (चि १ अ)

तेन नात्युष्णशीतवीर्य्यतायाः सामान्यगुणोक्ताया अवकाशो नास्तीति केचिच्चोदयन्ति । तन्न युक्तं, यतो नात्युष्णशीतपदेनात्र नानुष्णाशीतत्वं विधीयते किन्तु शीतोष्णयो र्बलवत्त्वमात्रं निषिध्यते, तेन किञ्चिच्छिलाजतु शीतं किञ्चिच्च शिलाजतु उष्णं भवतीत्यर्थः । ११२—

(१) इतः परस्मात् सर्वेषु मुद्रितपुस्तकेषु रसोनकल्पमुपलभ्यते । शिवदासस्तु तं कल्पं शिलाजतुविधानादनन्तरमाह ।

(२) हेमादि षड् धातुरसमिति वा पाठः ।

(३) नात्युष्णं कटु पाकत इति वा पाठः ।

विशेषेण लौहं तत्र प्रशस्यते ॥ ११२ ॥

उक्तेषु शिलाजतुषु लौहसम्भवस्य शिलाजतुनो विशेषेण रसायन प्रयोगे प्रशस्ततामाह विशेषेणेत्यादि । — ११२

गोमूत्रगन्धि कृष्णं गुग्गुल्वाभं विशर्करं मृत्स्नम् ।
स्निग्धमनम्लकषायं मृदु गुरु च शिलाजतु श्रेष्ठम् ॥ ११३ ॥

श्रेष्ठस्य शिलाजतुनो लक्षणमाह गोमूत्रेत्यादि । ११३

व्याधि-व्याधित-सात्म्यं समनुस्मरन् भावयेदयःपात्रे ।
प्राक् केवलजलधौतं शुष्कं क्वाथैस्ततो भाव्यम् ॥ ११४ ॥

शिलाजतुरसायन माह व्याधीत्यादि । शिलाजतु यस्मिन् व्याधौ यस्मिंश्च व्याधिते सात्म्यं सुखजनकं भवति तदनुस्मरन् जानन् प्राक् प्रथमं केवलजलेन धौत मनन्तर मातपे शुष्कं कृत्वा अनन्तरं तद्दोषहरैः क्वाथैर्भाव्यम् । ११४

समगिरिजमष्टगुणिते निःक्वाथ्यं भावनौषधं तोये ।
तच्चाष्टांशे पूतोष्णे प्रक्षिपेद् गिरिजम् ॥ ११५ ॥
तत्समरसतां यातं संशुष्कं प्रक्षिपेद्रसे भूयः ।
स्वैः स्वैरेवं क्वाथैर्भाव्यं वारान् भवेत् सप्त ॥ ११६ ॥

इदानी शिलाजतुभावनार्थं द्रव्यमानादिकमाह समगिरिज मित्यादि । समं तुल्यं गिरिजं शिलाजतु यस्य दशमूलादि भावनौषधस्य तत्तथा । अन्यत्राप्युक्तम् 'भाव्यद्रव्यसमं क्वाथ्यम्' इति । अष्टांशइति अष्टमभागावशेषः । तत्समरसतां यातमिति तच्छिलाजतुदशमूलादिक्वाथेन समरसता मित्यालोड़नेनैकीभूय तुल्यरसतां गतमित्यर्थः । स्वैः स्वैरित्यादि । एवमुक्तरीत्या कृतैः स्वैः स्वैस्तत्तद्दोषप्रत्यनीकैः क्वाथैस्तच्छिलाजतु सप्तवारान् भाव्यं भवेत् । ११५।११६

अथ स्निग्धस्य शुद्धस्य घृतं तिक्तकसाधितम् ।
त्र्यहं युञ्जीत गिरिजमेकैकेन तथा त्र्यहम् ॥ ११७ ॥
फलत्रयस्य यूषेण पटोल्या मधुकस्य च ।
योगयोग्यं ततस्तस्य कालापेक्षी प्रयोजयेत् ॥ ११८ ॥

(अथेत्यादि) अथानन्तरं स्निग्धस्य तथा वमनादिना शुद्धस्य तिक्तकेन रसभेदीयोक्ततिक्तकगणेन साधितं घृतं त्र्यहं युञ्जीत । ततोऽनन्तरं गिरिजं

शिलाजतु फलत्रयादीनामेकैकेन क्वाथेन सार्धं भुञ्जीत । भोगमोक्षे सिद्धि यावत्-प्रमाणं शिलाजतु प्रयोज्यं वीर्यं भवति । कालादिश्चात्र काल इत्युपलक्षणं तेन बलादिकमपि बोध्यम् । ११६–११८

शिलाह्वमिदं देहस्य अवस्था-गुणकारकम् ।

गुणान् स्वभावान् कुरुते स्वरसा व्यापदं न च ॥ ११९ ॥

एवमुक्त प्रकारेणोपयुक्तस्य शिलाजतुनः फलमाह शिलाह्वमिदमित्यादि । ११९

एकत्रिंशत्सहस्राह कर्षं प्रदीयते फलम् ।

हीनमध्योत्तमा योगाः शिलाजस्य प्रमाणतः ॥ १२० ॥

कालभेदेन मात्राभेदेन च शिलाजतुप्रयोगस्य त्रैविध्यमाह एकेत्यादि । चरकेऽप्युक्तम्—

"प्रयोगः सप्तसप्ताहास्त्रयश्चैकश्च सप्तकः ।

निर्दिष्टस्त्रिविधस्तस्य परो मध्योऽवरस्तथा ॥

मात्रापलमर्धपलं स्यात् कर्षस्तु कनीयसी ॥" (१) इति (चि १ अ) १२०

संस्कृतं संस्कृते देहे प्रयुक्तं गिरिजाह्वयम् ।

युक्तं व्यस्तैः समस्तैर्वा मात्रायोगान्न्वये यदि ॥ १२१ ॥

क्षीरमांसोदितं कुर्यात्तथैव रसायनं परम् ।

शुद्धेन शिलाजतु यथा शीघ्रं फलदं भवति तदाह संस्कृतमित्यादि । १२१।१२२ –

कुलत्थान् काकमाचीं च कपोतांश्च सदा त्यजेत् ॥ १२२ ॥

शिलाजतुप्रयोगे क्रियमाणे यद् यद् वर्जनीयं तदाह कुलत्थानित्यादि । –१२२

न सोऽस्ति रोगो भुवि साध्यरूपो जत्वश्मजं यं न जयेत् प्रसह्य ।

तत्कालयोगैर्विधिवत् प्रयुक्तं स्वस्थस्य चोर्जां विपुलां ददाति ॥१२३॥

शिलाजतु प्रयोगं जीर्णे न सोऽस्तीत्यादि । तत्कालयोगैरिति तत्कालोचित-योगैः । अत्रान्ते बहव उक्तास्तेषां शिलाजतुप्रकारः कश्चित् कश्चिदुक्तः । ते च तत्रविधिव्याकरणेषु न दृश्यन्ते टीकाकृद्भिरप्युपेक्षिता इति कृत्वा अस्माभि-रुपेक्षिता इति । १२३

(१) "सप्तकेऽस्य कनीयसी तस्य विधा मता ।" इति पाठोऽपि वर्तते चरके दृश्यते ।

शीत-वात-हिमस्पर्शनम्रं स्वच्छमुष्णमुष्णकालविचारकालाम् ।

मेघजस्य पयसोऽपहृतानां वत्सरे विविधरोगान् जयतस्य ॥ १२४ ॥

रसोदकमूलसर्पिषा भुक्त्वा पतिता सकाम् ।

अमृतस्य कला भूमौ ते रसोनत्वमागताः ॥ १२५ ॥

द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।

साक्षादमृतसम्भूतेर्ग्रामणीः स रसायनम् ॥ १२६ ॥

शीतोष्णेष्वशुभं भ्रमि वसन्तेऽपि कफोल्बणः ।

वर्षास्वपि वातार्तः सदा वा शीतमारुतः ॥ १२७ ॥

स्निग्धशुद्धतनुः शीतमधुरैरल्पकल्पनाशनः ।

तद्गुणस्याश्रयत्वाभ्यां वञ्चितानुचराशनः ॥ १२८ ॥

तस्य कन्दान् शरत्काले हिमवच्चाहृताञ्छुभान् ।

अपनीतत्वचो रात्रौ सीधुमद्यादिवासितान् ॥ १२९ ॥

तत्कल्काक्षमात्रं प्रातः शुचिकल्पसर्पिर्हितम् ।

सन्दिग्धाः सुखदायिविधानेन सर्वान्वितम् ॥ १३० ॥

मद्यस्याम्लस्य तैलस्य मस्तुनः काञ्जिकस्य वा ।

तत्काल एव वा युक्तं गुडमार्क्षीरस्य सात्म्यया ॥ १३१ ॥

तैल-सर्पिर्वसा मज्जा-क्षीरमांसरसैः पृथक् ।

काथेन वा यथाव्याधि रसं केवलमेव वा ॥ १३२ ॥

पिबेद्दिवसमुपवासं प्रागभक्तमार्द्रविशुद्धये ।

प्रसर्पे स्वेदनतापु वेदनायां प्रशस्यते ॥ १३३ ॥

शीताम्बुसिक्तः सहसा सर्षपचूर्णवर्षणं च ।

क्षीरं पिबेत् क्रमादस्य विरसत्वं गत श्वासिते ॥ १३४ ॥

विदाहपरिहाराय पर्व शीताम्बुसेचनम् ।

आर्जवेन् स्वाम्बुकणिका शुक्ताः कर्पूररञ्जिताः ॥ १३५ ॥

कुड्यादीनस्य यत्र मात्रा सर्वदा केवलस्य तु ।

एवं पिबस्य तत्सकः रसनं प्राक् च शीतलेन ॥ १३६ ॥

जीर्णशाल्योदनं जीर्णे शङ्ख-कुन्देन्दु-पाण्डुरम् ।
भुञ्जीत यूषैः पयसा रसैर्वा धन्वचारिणाम् ॥ १३७ ॥
मद्यमेकं पिबेत् तत्र तृट्प्रबन्धे जलान्वितम् ।
अमद्यपस्त्वारनालं फलाम्बुपरिसिक्थकाम् ॥ १३८ ॥
तत् कल्कं वा समघृतं घृतपात्रे खजाहतम् ।
स्थितं दशाहादश्नीयात् तद्वद्वा वसया समम् ॥ १३९ ॥
विकङ्कुकप्राज्यरसोन गर्भान् सशल्यमांसान् विविधोपदंशान् ।
विमर्दकान् वा घृतशुक्तयुक्तान् प्रकाममद्यालघु तुच्छमश्नन् ॥ १४० ॥
पित्तरक्त-बिनिर्मुक्तसमस्तावरणावृते ।
शुद्धे वा विद्यते वायौ न द्रव्यं लशुनात् परम् ॥ १४१ ॥
प्रियाम्बुगुडदुग्धस्य मांसमद्याम्लविद्विषः ।
अतितिक्ष्णोरजीर्णश्च रसोनो व्यापदेद्ध्रुवम् ॥ १४२ ॥
पित्तकोपभयादन्ते युञ्ज्यान्मृदु विरेचनम् ।
रसायनगुणानेवं परिपूर्णान् समश्नुते ॥ १४३ ॥

दैत्याधिपस्यामृतपान हेतो (१) रित्यादिनोक्तो रसोनकल्पः सुगम एव । १२४—१४३

कुटीप्रवेशः क्षणिनां परिच्छदवतां हितः ।
अतोऽन्यथा तु ये तेषां सौर्य्यमारुतिको विधिः ॥ १४४ ॥
वातातपसहा योगा वक्ष्यन्तेऽतो विशेषतः ।
सुखोपचारा भ्रंशेऽपि ये न देहस्य बाधकाः ॥ १४५ ॥

इदानीं कुटीप्रावेशिक रसायन वातातपिक रसायन विषयान् पुरुषानाह कुटीप्रवेश इत्यादि । क्षणिनामित्युत्साहयुक्तानाम् अन्ये तु कृतक्षणानामित्याहुः । परिच्छदवतामित्युपकरणवताम् । सौर्य्यमारुतिक इति सूर्य्यमारुतसेवयाऽपि क्रियते यः । १४४।१४५

शीतोदकं पयः क्षौद्रं घृतमेकैकशो द्विशः ।
त्रिशः समस्तमथवा प्राक् पीतं स्थापयेद्वयः ॥ १४६ ॥

(१) भावर्ल एतादृशः कश्चित् श्लोकः संग्रहे हृदये वोपलभ्यते ।

गुडेन मधुना शुण्ठ्या कृष्णया लवणेन वा ।
द्वे द्वे खादन् सदा पथ्ये जीवेद्वर्षशतं सुखी ॥ १४७ ॥

गुडेनेत्यादि स्पष्टम् । १४६।१४७

हरीतकीं सर्पिषि सम्प्रताप्य समश्नतस्तत् पिबतो घृतञ्च ।
भवेच्चिरस्थायि बलं शरीरे सकृत् कृतं साधु यथा कृतज्ञे ॥ १४८ ॥

हरीतकी मित्यादौ सम्प्रताप्येति भृष्ट्वा । १४८

धात्रीरस-क्षौद्र-सिता-घृतानि हिताशनानां लिहतां नराणाम् ।
प्रणाशमायान्ति जरा-विकारा ग्रन्था विशाला इव दुर्गृहीताः ॥१४९॥
धात्रीकृमिघ्नासनसारचूर्णं सतैलसर्पिर्मधुलोहरेणुः ।
निषेवमाणस्य भवेन्नरस्य तारुण्य-लावण्य-मविप्रणष्टम् ॥१५०॥

धात्रीरस मित्यादि अविप्रणष्ट मित्यन्तं स्पष्टम् । १४९।१५०

लौहं रजो वेल्लभवञ्च सर्पिः क्षौद्रद्रुतं स्थापितमब्दमात्रम् ।
समुद्गके बीजकसारकॢप्ते लिहन् बली जीवति कृष्णकेशः ॥ १५१ ॥
विडङ्ग-भल्लातक-नागराणि येऽश्नन्ति सर्पिर्मधुसंयुतानि ।
जरानदीं रोगतरङ्गिणीं ते लावण्ययुक्ताः पुरुषास्तरन्ति ॥१५२॥
खदिरासनयूषभावितायास्त्रिफलाया घृतमाक्षिकप्लुतायाः ।
नियमेन नरा निषेवितारो यदि जीवन्त्यरुजः किमत्र चित्रम् ॥१५३॥

लौहं रज इत्यादौ वेल्लो विडङ्गः तद्भवं चूर्णम् । वल्लभवमिति पाठे तु वल्लः शिम्बीधान्यभेदः । बीजकः पीतशालः, तस्य सारभागेन क्लृप्ते रचिते समुद्गके सम्पुटके । (रोगतरङ्गिणीमिति) रोग एव तरङ्गसुयुक्ताम् । खदिरसारस्य असन सारस्य च यूषः क्वाथः । १५१—१५३

बीजकस्य रसमंगुलिहार्य्यं शर्करामधुघृतं त्रिफलाञ्च ।
शीलयत्सु पुरुषेषु जरता स्वागतापि विनिवर्त्तत एव ॥१५४॥

बीजकस्येत्यादि । बीजकः पीतशालः । अङ्गुलिहार्य्यमिति घन मित्यर्थः । एतत् शीलयत्सु पुरुषेषु सुष्ठु अतिशयेन आगता अपि जरता वृद्धता विनिवर्त्तत एवेत्यर्थः । जरतोभावः जरता । १५४

पुनर्नवस्याऽर्धपलं मधुना पिष्टं पिबेत् पयसाऽर्धमात्रम् ।
प्रातस्तुरं तण्डुलवर्ग्यां वा क्षीणोऽपि पुष्टः स पुनर्नवः स्यात् ॥१५५॥

पुनर्नवस्येत्यादि । पुनर्नवस्येति पुनर्नवायाः ... प्रत्यग्रम । तण्डुल- क्षिति तद्भागद्वयमित्र द्विगुणं पलप्रमाणात् इत्यर्थः । १५५

मूर्वा-बृहत्यंशुमती-बलानागबला-पाठासम-सारिवाणाम् ।
काथानुसाराऽगुरुकल्कबाला वदन्ति पीतं नवमेव कल्पम् ॥ १५६ ॥

तत्र पुनर्नवा कल्पना पूर्वोक्तेष्वपि कार्येष्वाह मूर्वेत्यादि अंशुमती शाल- पर्णी, काथानुसारेण कल्पादिका । पीतमेतं कल्पमिति पुनर्नवायाः या कल्पना तत्र वा पूर्वोक्तामत्यर्थः । १५६

प्रत्यक्षोकालककर्णावि ते सर्पिरश्नन्ति सितादिमिश्रम् ।
तान् क्षीणिताऽभावमिति प्रत्यक्षन् न विग्रहमुपयान्ति विकारयोगाः ॥१५७॥

प्रत्यक्षेत्यादौ सितादयः प्रकर्षविदिता तेन कल्कपानं सितया इत्यर्थः । "तेन कल्कपानम्" इति वचनात् । क्षीणितमक्षिप्यात् न विग्रहमपि नीरोगस्तुमित्यर्थः । १५७

पीताम्बुपान्या पयसाऽर्धमात्रं घृतेन तैलेन सुखाम्बुना वा ।
हस्तस्य पुष्टिं बहुधा विदधे कालस्य तस्यस्य यथा सुवृष्टिः ॥१५८॥

पीतेत्यादि स्पष्टम् । १५८

दिने दिने कृष्णतिलप्रकुञ्चं समश्नतां शीतजलानुपानम् ।
पोषः शरीरस्य भवत्यपारो दृढीभवन्त्यामरणाच्च दन्ताः ॥ १५९ ॥

दिने दिने इत्यादौ प्रकुञ्चं पलम् । १५९

चूर्णं त्वगेलामलकायुतानां विधाय स सर्पिषा गुडानामिश्रम् ।
वृष्यं धियः सान्द्रविकारदुःखाः स्वपताः शतं जीवति कृष्णकेशाः ॥१६०॥

चूर्णमित्यादौ वृष इत्यर्थोऽनुक्रमात् । १६०

सार्द्धं तिलैरामलकानि चूर्णोकृतानि सह भृङ्ग हरीतकीनाम् ।
तेऽत्युद्धरा इव ते मनुष्या वर्षं परिणाम मदात् ब्रुवन्ति ॥ १६१ ॥

सार्द्धमित्यादि । नवानीति विशेषणमिति । अर्थैति मतीषु । मधुरा दृष्टेति मधुरगन्धमनीषेया मतमित्यर्थः । पलितमेतेति वर- पलितम् । १६१

तिलाश्च मधु-क्षौद्र-विडङ्ग-सर्पिर्लोहामया-पारद-ताम्रमध्यः ।
आयुःप्रदं दुर्बलदेहधातुविकारजराविनाशं यथा स्यात् ॥ १६२ ॥

तिलार्धमित्यादि । लोहादिकञ्च कान्तिपुष्टिं प्रवदन्ति । ताम्रं सर्व- मथितम् । १६२

ये प्रातरेव स्वरसं पिबन्ति दिने दिने मण्डूकपर्ण्याः समूलम् ।
श्रेयांसि तस्ये बलवर्णयुक्ताः समाः शतं जीवितमाप्नुवन्ति ॥१६३॥

ये प्रातरित्यादि स्पष्टम् । १६३

प्रातं वचाकल्कयुतं पयसा क्षीरेण तैलेन घृतेन वापि ।
भवन्ति स्वर्गोपमरूपभाजः मेधाविनो विश्रुतपुण्यवाचः ॥१६४॥

प्रातं वचामित्यादौ मूत्रवाक्या इति मधुरवचनाः । १६४

प्रयद्वयस्थोऽपि मनस्वी मुखं घृते मासमेव नराः ।
जीवन्ति कालं विपुलं प्रकाशमानाः सततं सुमेधसः ॥१६५॥

प्रयद्वयस्थी मित्यादौ मासमेव इति मासं ध्यात्वा न क्लमजः अनवधिरित्यर्थः । १६५

त्रयोदशी-विमला-क्षीर-पलाशाङ्कुराश्रयम् ।
मार्कण्डेयस्य पश्यन्ति शुचिकानां शतत्रयम् ॥ १६६ ॥

क्रमविवृद्धौ शुचिकार्धमात्रं पूर्वं समश्नन्नपि तां क्रमेण ।
महौषधिकः समस्त्र प्राह पीतं विशेषैः रससर्वरसैः ॥ १६७ ॥

सर्पिः क्षिप्रं प्रातरेव सयत्ना प्रत्यहं सदैव स्ववृद्धि ।
दर्शं समाप्य सर्वकालं स्वर्णाभं ... ॥१६८॥

भवति विगतरोगाः पीऽप्यमृतात्मवर्णाः
प्रबलतुरगवेगाः जीवने पीऽपि वृद्धः ।

उपचितपृथुगात्रश्रोत्रनेत्रादियुक्त
स्तरुण इव समानां पञ्च जीवेच्छतानि ॥ १६६ ॥

गायत्री-शिखि-शिंशपासन-शिवा-वेल्लान्तकारुष्करात्
पिष्टाष्टादशसंगुणेऽम्भसि धृतान् खण्डैः सहायोमयैः ।
पात्रे लोहभवे त्र्यहं रविकरैरालोडयन् पाचये-
दग्नौ चानुमृदौ सलोहशकलं पादस्थितं तत् पचेत् ॥ १७० ॥

पूतस्यांशः क्षीरतोंऽशस्तथांशो
भार्ग्या क्षियोसाद् द्वौ वरायास्त्रयोंऽशाः ।
अंशाश्चत्वारश्चेह हैयङ्गवीना-
देकीकृत्यैतत् साधयेत् कृष्णलौहैः ॥ १७१ ॥

विमलखण्डसितामधुभिः पृथग्युतमयुक्तमिदं यदि वा घृतम् ।
स्वरुचिभोजनपानविचेष्टितो भवति ना पलशः परिशीलयन् ॥१७२॥

श्रीमान् निर्धूतपाप्मः वनमहिषबलो वाजिवेगः स्थिराङ्गः
केशैर्भृङ्गाङ्गनीलैर्मधुसुरभिमुखो नैकयोषिन्निषेवी ।
वाङ्मेधाधीसमृद्धः सपटुहुतवहो मासमात्रोपयोगाद्
धत्तेऽसौ नारसिंहं वपुरनलशिखातप्तचामीकराभम् ॥ १७३ ॥

अत्तारं नारसिंहस्य व्याधयो न स्पृशन्त्यपि ।
चक्रोज्ज्वलभुजं भीता नारसिंहमिवासुराः ॥ १७४ ॥

भृङ्गप्रवालानमुनैवभृष्टान् घृतेन यः खादति यन्त्रितात्मा ।
विशुद्धकोष्ठोऽसनसारसिद्धदुग्धानुपस्तत् कृतभोजनार्थः ॥ १७५ ॥

मासोपयोगात् स सुखी जीवत्यब्दशतद्वयम् ।
गृह्णाति सकृदप्युक्तमविलुप्तस्मृतीन्द्रियः ॥ १७६ ॥

अनेनैव च कल्पेन यस्तैलमुपयोजयेत् ।
तानेवाप्नोति स गुणान् कृष्णकेशश्च जायते ॥ १७७ ॥

लाङ्गलीत्यादि । लाङ्गल्यादीनां पञ्चानां मिलित्वा पञ्चाशत् पलानि । षष्ठादिति षष्ठ्यधिकात् गुटिकाशतत्रयादित्यर्थः । तदधिकमित्यर्थे डः । पूर्व्वं गुडिकार्द्ध मद्यादित्यन्वयः । क्रमेण ताः समस्ता अपि गुडिकाः षष्ट्यधिकशतत्रयपरिमिता-

द्यात् । सर्पिषा स्निग्धं सर्पिःस्निग्ध मिति रसौदन विशेषणम् । मासात्पूर्व्वन्तु स्वैरवृत्तिरिति यथेष्टाहाराचारः स्यात् । अजीर्णमित्यजीर्णजनकम् । (१) १६६ – १७७

उक्तानि शक्यानि फलान्वितानि युगानुरूपाणि रसायनानि ।
महार्थशंसीन्यपि चापराणि प्राप्त्यादिकष्टानि न कीर्तितानि ॥१७८॥

ननु चरकसुश्रुताद्युक्तानि दिव्यरसायनानि कथमत्र नोक्तानीत्याह उक्तानीत्यादि । शक्यानीति ज्ञातुं प्रयोक्तुञ्च शक्याणीत्यर्थः । अपराणि रसायनानि महार्थशंसीनि महाफलान्यपि नोक्तानि । कुत इत्यत्र हेतुगर्भविशेषणमाह प्राप्त्यादिकष्टानीति । आदिशब्दाज् ज्ञातुं सोढुञ्च कष्टानीत्यर्थः । १७८

रसायनविधिभ्रंशाज्जायेरन् व्याधयो यदि ।
यथास्वमौषधं तेषां कार्यं मुक्त्वा रसायनम् ॥ १७९ ॥

रसायनविधि भ्रंशादित्यादि स्पष्टम् । १७९

सत्यवादिनमक्रोधमध्यात्मप्रवणेन्द्रियम् ।
शान्तं सद्वृत्तनिरतं विद्यान्नित्यरसायनम् ॥ १८० ॥

गुणैरेभिः समुदितः सेवते यो रसायनम् ।
स निवृत्तात्मा दीर्घायुः परत्रेह च मोदते ॥ १८१ ॥

सामान्येन रसायन पुरुषगुणानाह सत्यवादिनमित्यादि । एवम्भूतं पुरुषं नित्यरसायनं नित्यसेव्यरसायनं विद्यात् । १८०।१८१

शास्त्रानुसारिणी चर्या चित्तज्ञाः पार्श्ववर्त्तिनः ।
बुद्धिरस्खलितार्थेषु परिपूर्णं रसायनम् ॥ १८२ ॥

इति श्रीमद् वागभट विरचितायामष्टाङ्गहृदय संहितायामुत्तरे
तन्त्रे रसायनाख्य एकोनचत्वारिंशोऽध्यायः ।

इदानीं रसायनार्थसम्पादकान् भावानाह शास्त्रानुसारिणीत्यादि । अर्थेषु विषयेषु, परिपूर्णं रसायनमिति एतत्त्रयं सर्व्वरसायनश्रेष्ठमित्यर्थः । १८२

इति (श्रीशिवदास सेन विरचिते अष्टाङ्गहृदय तत्त्वबोधे)
उत्तरे तन्त्रे एकोनचत्वारिंशो रसायनाध्यायः ॥

(१) भवति विगतरोग इत्यादयः कृष्णकेशा इत्यन्ताः श्लोका न व्याख्याताः शिवदासेन ।

चत्वारिंशोऽध्यायः।

अथातो वाजीकरणाध्यायं व्याख्यास्यामः
इति हस्माहु रात्रेयादयो महर्षयः ॥
वाजीकरणमन्विच्छेत् सततं विषयी पुमान्।

पारिशेष्याद् वाजीकरणमुच्यते अथात इत्यादि। वाजीकरणाधिकारिपुरुषप्रदर्शनपूर्व्वकं वाजीकरणप्रयोजनमाह वाजीकरणमित्यादि। अन्विच्छेदिति अनुक्रमेणेच्छेन्न सहसा। सहसा शीलनेनासात्म्यज व्याधि प्रसङ्गात्। किंवा महाफलाद् रसायनाद् वाजीकरणं पश्चादिच्छेत्। सततमिति स्वाग्निना व्यवायेन च प्रत्यहं धातुक्षयभिया। पुमानिति पदेन तरुणपुरुषग्राहिणा बालवृद्धौ निषिद्धव्यवायौ निराकरोति। विषयीत्यनेन वीतरागस्य निरासः। १—

तुष्टिः पुष्टिरपत्यञ्च गुणवत् तत्र संश्रितम् ॥ १ ॥
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम्।

तुष्टिरित्यादि प्रयोजन प्रदर्शनम्। गुणवदित्यपत्यविशेषणम्। तत्र संश्रितमिति वाजीकरणाधीनम्। अपत्यसन्तान मपत्यपरम्परा तत्करम्। —१।२—

वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गनाः ॥ २ ॥
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते।
तद्वाजीकरणं तद्धि देहस्योर्जस्करं परम् ॥ ३ ॥

वाजीकरण शब्दार्थमाह (वाजीवेत्यादि) उपचीयत इति पुष्टिं प्राप्नोति तद्वाजीकरणमिति तेन अवाजी वाजीव क्रियते येन तद् वाजीकरणमित्यर्थः। —२।३

धर्म्यं यशस्यमायुष्यं लोकद्वयरसायनम्।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्मलम् ॥ ४ ॥

ननु ब्रह्मचर्य्यमेव धर्म्मादिहेतुत्वेनोपादेयं स्त्रीसेवा तु न तथा तत् किं तदुपायभूतेन वाजीकरणेनेत्याह धर्म्म्यमित्यादि। लोकद्वयेऽपि रसायनमिव वाजीकरणं हितमित्यर्थः। एकान्त निर्मलमिति सर्व्वप्रकारेण निर्मलमित्यर्थः। ४

अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ॥ ५ ॥

अल्पसत्त्वस्येत्यादि। अल्पसत्त्वगुणस्य क्लेशैरित्यविद्यादिभिः। तेन ब्रह्मचर्य्यं वीतरागैः सेवितुं शक्यते नतु रागिभिः। तेन तेषां स्त्रीसम्भोगेन शरीरक्षयः स्यादिति कृत्वा तद्रक्षार्थं वाजीकरण मुच्यते इत्यर्थः। ५

कल्पस्योदग्रवयसो वाजीकरणसेविनः।
सर्वेष्वृतुष्वहरहर्व्यवायो न निवार्यते ॥ ६ ॥

यै नित्यं स्त्री सेव्या तानाह कल्पस्येत्यादि। कल्पस्येति नीरोगस्य। उदग्रवयस इति यौवनस्थस्य। ६

अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान्।
घृत-तैल-रस-क्षीर-शर्कराक्षौद्रसंयुतान् ॥ ७ ॥
योगविद्योजयेत् पूर्वं क्षीरमांसरसाशिनम्।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥ ८ ॥

वाजीकरणं यथा सेव्यं तदाह अथेत्यादि। स्निग्धानां तथा वमनविरेकाभ्यां विशुद्धानां तथा क्षीरमांसरसाशिनां पूर्व्वं निरूहान् सानुवासनान् योजयेत्। ततोऽनन्तरं वाजीकरणान् योगान् योजयेदित्यर्थः। ७।८

अच्छायः पूतिकुसुमः फलेन रहितो द्रुमः।
यथैकश्चैकशाखश्च निरपत्यस्तथा नरः ॥ ९ ॥

इदानीं वाजीकरण साध्यस्यापत्यस्य उपादेयतां व्यतिरेकमुखेन दर्शयति अच्छायइत्यादि। पूतिकुसुम इत्यनेन निरपत्यजनसंसर्गोऽपि गर्हित इति दर्शयति। ९

स्खलद्गमनमव्यक्तवचनं धूलिधूसरम्।
अपि लालाविलमुखं हृदयाह्लादकारकम् ॥ १० ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु।
किं पुनर्यद्यशोधर्म-मान-श्री-कुलवर्द्धनम् ॥ ११ ॥
शुद्धकाये यथाशक्ति वृष्ययोगान् प्रयोजयेत्।

अपत्यस्य पदार्थान्तरापेक्षया उपादेयतां दर्शयति स्खलद् गमनमित्यादि।

ईदृशमपत्यं हृदयाह्लादकारणं अतस्तदपत्यं केन पदार्थेन तुल्यं स्यादपितु न केनापीत्यर्थः । १०—१२—

शरेक्षु-कुश-काशानां विदार्या वीरणस्य च ॥ १२ ॥
मूलानि कण्टकार्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ सूर्पपर्ण्यौ शतावरीम् ॥ १३ ॥
अश्वगन्धामतिबलामात्मगुप्तां पुनर्नवाम् ॥
वीरां पयस्यां जीवन्तीमृद्धिं राम्नां त्रिकण्टकम् ॥ १४ ॥
मधुकं शालिपर्णीञ्च भागांस्त्रिपलिकान् पृथक् ।
माषाणामाढकं चैतद् द्विद्रोणे साधयेदपाम् ॥ १५ ॥
रसेनाढ़कशेषेण पचेत् तेन घृताढकम् ।
दत्त्वा विदारी-धात्रीक्षुरसानामाढकाढकम् ॥ १६ ॥
घृताच्चतुर्गुणं क्षीरं पेष्याणीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फल्गूनि पिप्पलीम् ॥ १७ ॥
द्राक्षां विदारीं खर्जूरं मधुकानि शतावरीम् ।
तत् सिद्धपूत चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥ १८ ॥
शर्करायास्तुगायाश्च पिप्पल्याः कुडवेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥ १९ ॥
त्वगेलाकेशरैः श्लक्ष्णैः क्षौद्राद् द्विकुडवेन च ।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ॥ २० ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।

शरेत्यादि । सूर्पपर्ण्यौ मुद्गपर्णीमाषपर्ण्यौ, अतिबला पीतबला, वीरा पृश्निपर्णी पयस्या क्षीरविदारी, विदारी विदारीकन्दः । विदार्य्यादिस्वरसानां पृथक् पृथगाढकमेकम् । फल्गु गोष्ठोदुम्बरिकाफलं, मधूकं मधूकस्य पुष्पं सारो वा । पृथक् प्रस्थेनेति शर्करायास्तुगायाश्चेत्यनेन च सम्बध्यते । प्रकुञ्चः पलम् । आरोहतीति व्यवायार्थं नारीमारोहतीत्यर्थः । कुलिङ्ग इव हृष्यतीत्यनेन पुनः पुनर्मैथुनं कुरुत इति बोधयति । — १२—२१—

विदारी-पिप्पली-शालि-प्रियालेक्षुरकाद्रजः ॥ २१ ॥
पृथक् स्वगुप्तामूलाच्च कुडवांशं तथा मधु ।
तुलार्द्धं शर्कराचूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥ २२ ॥
सोऽक्षमात्रमतः खादेत् यस्य रामाशतं गृहे ।

विदारीत्यादि । शालीति शालितण्डुलाः । पियालेति पियालफलम् अस्थि-मज्जा वा । इक्षुरकः कोकिलाक्षः । पृथग् द्रवांशमित्यन्वयः । तथा मध्विति मधुच कुडवांशमित्यर्थः । —२१—२३—

सात्मगुप्ताफलान् क्षीरे गोधूमान् साधितान् हिमान् ॥ २३ ॥
माषान् वा सघृतक्षौद्रान् खादन् गृष्टिपयोऽनुपः ।
जागर्त्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥ २४ ॥

सात्मगुप्तेत्यादि । गोधूमानित्यत्र माषानित्यत्र च सर्व्वाण्येव विशेषणानि सम्बध्यन्ते । गृष्टिरेकवारप्रसुता धेनुः । —२३।२४

वस्ताण्डसिद्धे पयसि भावितान्बहुलं तिलान् । (१)
यः खादेत् ससितान् गच्छेत् स स्त्रीशतमपूर्व्ववत् ॥ २५ ॥

वस्ताण्डेत्यादि । वस्तस्य छागस्याण्डकोषः । पयसीति क्षीरे, बहुलं इति सप्तधा, ससितानिति शर्करा सहितान् । अपूर्व्ववदित्यनेनोत्कण्ठाधिक्यं बोधयति । २५

चूर्णं विदार्य्या बहुशः स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ॥ २६ ॥

चूर्णमित्यादौ स्वरसेनेति विदार्य्याः स्वरसेन । २६

कृष्णाधात्रीफलरजः स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लिढ्वा योऽनु पयः पिबेत् ॥ २७ ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।

कृष्णेत्यादि । स्वरसेनेति धात्रीफलस्वरसेन, कृष्णा पिप्पली, अन्ये तु कृष्णा-शब्देन वाराहीकन्दमाहुः । उक्तं हि—

"पुराह्येकार्णवे मग्नां पृथिवीं मधुसूदनः ।
वराह रूपमास्थाय स्वयमुद्धृतवान् महीम् ॥

(१) वसकादिति वा पाठः ।

तस्यगात्रात् परिभ्रष्टाः पृथिव्यां स्वेदबिन्दवः ।
पतिताः क्षीरसङ्काशा स्ताराइव नभस्तलात् ॥
अथ तेभ्यः समुत्पन्ना शुभा गुणसमन्विता ।
सा तु वीर्य्यवती पुण्या अमृतेति महौषधी ॥
वाराही गृष्टिका कृष्णा वनमालेतिचोच्यते ॥" इत्यादि

स्वरसेनेति तयोरेव स्वरसेन । पिप्पलीपक्षे आमलस्वरसेन । केचित्तु कृष्णास्थाने एवमिति पठन्ति । तन्मते आमलकचूर्णमात्रम् । २७।२८ —

कर्षं मधुकचूर्णस्य घृत-क्षौद्र-समन्वितम् ॥ २८ ॥
पयोऽनुपानं यो लिह्यान्नित्यवेगः स ना भवेत् ।

कर्षमित्यादौ मधुकं यष्टीमधु । नित्यवेग इति नित्योद्भूतशुक्रवेगः । स ना स पुरुषः । —२८।२९ —

कुलीरशृङ्ग्या यः कल्कमालोड्य पयसा पिबेत् ॥ २९ ॥
सिताघृतपयोऽन्नाशी स नारीषु वृषायते ।

कुलीरशृङ्ग्या इत्यादि । कुलीरशृङ्गी कर्कटशृङ्गी सिताघृतपयोन्नाशीति शर्करा-घृतक्षीरयुक्तान्नभुक् । —२९।३० —

यः पयस्यां पयःसिद्धां खादेन्मधु-घृतान्विताम् ॥ ३० ॥
पिबेद्बास्कयणश्चानु क्षीरं न क्षयमेति सः ।

यः पयस्यामित्यादि । पयस्या क्षीरविदारी क्षीरकाकोलीत्यन्ये । बास्कयनमिति बास्कयनी चिरप्रसूता धेनूस्तत्सम्भवम् । क्षयमिति प्रकृतत्वात् शुक्रस्य ।—३०।३१ —

स्वयङ्गुप्तेक्षुरकयोर्बीजचूर्णं सशर्करम् ॥ ३१ ॥
धारोष्णेन नरः पीत्वा पयसा रासभायते ।

स्वयंगुप्तेत्यादौ रासभायत इत्यत्र न क्षयं व्रजेदिति सुश्रुते पठ्यते ।—३१।३२—

उच्चटाचूर्णमप्येवं शतावर्याश्च योजयेत् ॥ ३२ ॥

उच्चटेत्यादि । एवमित्यनेन सशर्करं तथा धारोष्णेण पयसेति बोध्यते । —३२

चन्द्रशुभ्रं दधिसरं ससितं षष्टिकौदनम् ।
पटे सुमार्जितं भुक्त्वा वृद्धोऽपि तरुणायते ॥ ३३ ॥

चन्द्रशुभ्रमित्यादि । चन्द्रवत् शुभ्रं निर्म्मलं दधिसरं पटे वस्त्रे सुष्ठु मार्जितं

घृष्टम् अनन्तरं सिता षष्टिकोदनेन सहितं भुक्त्वेत्यर्थः । चरके पुनरस्मिन् योगे विशेषोऽस्ति यथा—

"दध्नः सरं शरच्चन्द्र निभं दोषविवर्जितम् ।
शर्करा क्षौद्रमरिचैस्तुगाक्षीर्य्या च बुद्धिमान् ॥
युक्त्यायुक्तं सुसूक्ष्मेलं नवेकुम्भेशुचौ पटे ।
मार्जितं प्रक्षिपेच्छीते घृताढ्ये षष्टिकौदने ॥
तमद्यादुपरिष्टाच्च रसानांमात्रयापिबेत् ।
वर्णस्वरबलोपेतः पुमांस्तेन वृषायते ॥" इति (चि २ अं) ३३

श्वदंष्ट्रेक्षुरमाषात्मगुप्तावीजशतावरीः ।
पिबन् क्षीरेण जीर्णोऽपि गच्छति प्रमदाशतम् ॥ ३४ ॥

श्वदंष्ट्रेत्यादि । इक्षुरः कोकिलाक्षः । जीर्णोऽपीति वृद्धोऽपीत्यर्थः । ३४

यत् किञ्चिन्मधुरं स्निग्धं बृंहणं बलवर्द्धनम् ।
मनसो हर्षणं यच्च तत् सर्वं वृष्यमुच्यते ॥ ३५ ॥
द्रव्यैरेवं विधैस्तस्माद्दर्पितः प्रमदां व्रजेत् ।
आत्मवेगेन चोद्दीर्णः स्त्रीगुणैश्च प्रहर्षितः ॥ ३६ ॥

अनुक्त वाजीकरण संग्रहार्थमाह यत्किञ्चिदित्यादि । दर्पित इति सञ्जातवेगः । भवति इत्यपि पाठः । आत्मवेगेनेति संकल्पजनितेनात्मवेगेन । ३५।३६

सेव्याः सर्वेन्द्रियसुखा धर्मकल्पद्रुमाङ्कुराः ।
विषयातिशयाः पञ्चशराः कुसुमधन्वनः ॥ ३७ ॥

मनसोहर्षणमित्युक्तमतो मनोहर्षजनकान् शब्दादीनपि सेव्यत्वेनाह सेव्या इत्यादि । विषयातिशया इति उत्कृष्टाः शब्दस्पर्शरूपरसगन्धाः । सर्व्वाणीन्द्रियाणि चक्षुरादीनि सुखयन्तीति सर्व्वेन्द्रियसुखाः । धर्म्म एव कल्पद्रुमः तस्याङ्कुराइव अङ्कुराः तज्जन्या इत्यर्थः । ३७

इष्टा ह्येकैकशोऽप्यर्था हर्षप्रीतिकराः परम् ।
किं पुनः स्त्रीशरीरे ये सङ्घातेन प्रतिष्ठिताः ॥ ३८ ॥

इदानीं तेष्वेव विषयेषु मध्ये स्त्रीगतानां शब्दानीनामुत्कर्षमाह इष्टा इत्यादि । अर्था इति शब्दादयः पञ्चेन्द्रियार्थाः । प्रीति रनुरागः, हर्ष आनन्दः । एकैकश-

इति शब्दादीनामेकतमोऽपीत्यर्थः। संघातेनेति समूहरूपेण। अत्र रूपस्पर्शौ प्रसिद्धावेव। शब्दोऽपि गीतादिरूपः। रसोऽप्यधररसः गन्धोऽपि पद्म गन्धादिः। ३८

नामापि यस्या हृदयोत्सवाय यां पश्यतां तृप्तिरनाप्तपूर्व्वा।
सर्वेन्द्रियाकर्षणपाशभूता कान्तानुवृत्तिव्रतदीक्षिता या ॥३९॥
कलाविलासाङ्गवयोविभूषा शुचिः सलज्जा रहसि प्रगल्भा।
प्रियंवदा तुल्यमनःशया या सा स्त्री वृषत्वाय परं नरस्य ॥४०॥

इदानीं यादृशी स्त्री वृष्यतमा भवति तामाह नामापीत्यादि। कान्तस्य पत्यु रनुवृत्तिः सेवा सैव व्रतं तत्र दीक्षिता पतिव्रतेत्यर्थः। कला चतुःषष्टिकलाः। विलासो लावण्यं तथा अङ्गं शरीरं वयो यौवनं एतान्येव विभूषा अलङ्कारो यस्याः। बहिः सलज्जेति जनानां सन्निधौ लज्जावतीत्यर्थः। रहसीति निर्जने सुरत इत्यर्थः तत्र प्रगल्भा प्रौढा। तुल्यमनःशयेति भर्त्रा सह तुल्यो अनुरूपो मनःशयः कामो यस्याः। परमित्यवधारणे। सैव स्त्री वृषत्वाय भवतीत्यर्थः। ३९।४०

आचरेच्च सकलां रतिचर्य्यां कामशास्त्रविहितामनवद्याम्।
देश-काल-बल-शक्त्यनुरोधाद्वैद्यतन्त्रसमयात्त्वविरुद्धाम् ॥४१॥

यादृशं सुरतं सेव्यं तदाह आचरेदित्यादि। कामसूत्रविहितामिति कामशास्त्र विहितामित्यर्थः। बलमिति स्वाभाविकं बलम्। शक्तिः कृत्रिमं बलम्। वैद्यतन्त्र-समयो वैद्यशास्त्रसिद्धान्तः। ४१

अभ्यञ्जनोद्वर्त्तनसेकगन्धस्रक्पत्रवस्त्राभरणप्रकाराः।
गान्धर्वकाव्यादिकथाप्रयोगाः समस्वभावा वशगा वयस्याः ॥४२॥
दीर्घिका स्वभवनान्तनिविष्टा पद्मरेणुमधुमत्तविहङ्गा।
नीलसानुगिरिकूटनितम्बे काननानि पुरकण्ठगतानि ॥४३॥
दृष्टिसुखा विविधा तरुजातिः श्रोत्रसुखः कलकोकिलनादः।
अङ्गसुखर्त्तुवशेन विभूषा चित्तसुखः सकलः परिवारः ॥४४॥

अपरानपि वाजीकरान् भावानाह अभ्यञ्जनेत्यादि। अभ्यञ्जादयो वाजीकरा-इति वक्ष्यमाणेन सम्बन्धः। सेको जलसेकः स्नानमित्यर्थः। गन्ध इति गन्ध-द्रव्यम्। गान्धर्वं गीतादि। पद्मस्य रेणुः परागः तथा पद्मस्य मधु च ताभ्यां

मत्ता विहङ्गा यस्याम्। नीलवर्णं सानुर्यस्य ईदृशो यो गिरिः तस्य कूटे शृङ्गे नितम्बे कटके च यानि काननानि। पुरकण्ठगतानीति पुरोपकण्ठगतान्युपवनानि इत्यर्थः। अङ्गसुखर्त्तुवशेन विभूषा इति ऋतुवशेन ग्रीष्मादि ऋत्वनुरोधेन अङ्गसुखा या विभूषा अलङ्कारः। परिवारः परिजनः। ४२।४४

ताम्बुलमच्छमदिरा कान्ता कान्ता निशा शशाङ्काङ्का।
यद्यच्च किञ्चिदिष्टं मनसो वाजीकरं तत् तत् ॥ ४५ ॥

ताम्बुलमित्यादि। अच्छमदिरेति निर्म्मलमदिरा। कान्ताकान्तानिशा इति कान्तावत् कान्ता मनोहरा निशाः। शशाङ्काङ्का इति शशाङ्कचिह्ना। कान्तापक्षे शशाङ्कः कर्पूरं तच्चिह्ना। ४५

मधुमुखमिव सोत्पलं प्रियायाः कणरणाना (१) परिवादिनी प्रियेव।
कुसुमचयमनोरमा च शय्या किसलयिनी लतिकेव पुष्पिताग्रा ॥४६॥

मनसो यद् यद् इष्टं तदाह मध्वित्यादि सर्व्वंत्र वाजीकरमिति सम्बध्यते। मधु मद्यं वाजीकरं प्रियायामुखमिव। साम्य प्रतिपादकं विशेषणमाह सोत्पलमिति। परिवादिनी वीणा वाजीकरी कणो रणनं ध्वनिर्यस्याः अतएव प्रियासदृशी। शय्या च वाजीकरी किंविशिष्टा कुसुमचयेन मनोहरा तथा किशलयः पल्लवस्तद्युक्ता। अतएव पुष्पिताग्रा लतेव। अत्र पुष्पिताग्रेति छन्दसोऽपि नामोक्तः। ४६

देशे शरीरे च न काचिदर्त्तिरर्थेषु नाल्पोऽपि मनोविघातः।
वाजीकराः सन्निहिताश्च योगाः कामस्य कामं परिपूरयन्ति ॥४७॥

अपरानपि वाजीकरान् भावानाह देश इत्यादि। एते पदार्थां कामस्य कामं परिपूरयन्ति काममुत्पादयन्तीत्यर्थः। ४७

मुस्तापर्प्पटकं ज्वरे तृषि जलं मृद्भृष्टलोष्टोद्भवं
लाजाश्छर्दिषु बस्तिजेषु गिरिजं मेहेषु धात्रीनिशे।
पाण्डौ श्रेष्ठमयोऽभयाऽनिलकफे प्लीहामये पिप्पली
सन्धाने कृमिजा विषे शुकतरुर्मेदोऽनिले-गुग्गुलुः ॥ ४८ ॥
वृषोऽस्रपित्ते कुटजोऽतिसारे भल्लातकोऽर्शःसु गरेषु हेम।
स्थूलेषु तार्क्ष्यं कृमिषु कृमिघ्नं शोषे सुराच्छागपयोऽनु मांसम् ॥४९॥

(१) कलरणतेति पाठः।

अक्ष्यामयेषु त्रिफला गुडूची वातास्ररोगे मथितं ग्रहण्याम् ।
कुष्ठेषु सेव्यः खदिरस्य सारः सर्व्वेषु रोगेषु शिलाह्वयञ्च ॥५०॥

सम्प्रति वाजीकरणं समाप्य चिकित्सोपयोगितया अग्र्याणि संगृह्णाति मुस्तेत्यादि । मृद्भृष्टलोष्टोद्भवमिति भृष्टं पक्वं पुर्पटीसम्बन्धिजलमित्यर्थः । वस्तिजेषु मूत्रकृच्छ्रादिषु गिरिजं शिलाजतु । यद्यपि सर्व्वेष्वेव रोगेषु शिलाजत्विति वक्ष्यति तथापि वस्तिजेष्वतिशयेन श्रेष्ठमित्यर्थः । सन्धान इति भग्नसन्धाने क्रिमिजा लाक्षा । विषे शुकतरुरिति शिरीषः । स्थूलेषु तार्क्ष्यमिति रसाञ्जनम् । क्रिमिषु क्रिमिघ्नमिति विडङ्गं । मथितं तक्रम् । ४८—५०

उन्मादं घृतमनवं शोकं मद्यं विसंस्मृतिं ब्राह्मी ।
निद्रानाशं क्षीरं जयति रसाला प्रतिश्यायम् ॥ ५१ ॥
मांसं कार्श्यं लशुनः प्रभञ्जनं स्तब्धगात्रतां स्वेदः ।
गुडमञ्जर्य्याः खपुरानस्यात् स्कन्धांस बाहुरुजम् ॥५२॥
नवनीतखण्डमर्दितमौष्ट्रं मूत्रं पयश्च हन्त्युदरम् ।
नस्यं मूर्द्धविकारान् विद्रधिमचिरोत्थमस्रविस्रावः ॥५३॥
नस्यं कवलं मुखजां नस्याञ्जनतर्पणानि नेत्ररुजः ।
वृद्धत्वं क्षीरघृते मूर्च्छां शीताम्बुमारुतच्छायाः ॥ ५४ ॥

उन्मादमित्यादौ जयतीति सर्व्वत्र सम्बध्यते । अनवमिति पुराणम् । विसंस्मृतिमित्यपस्मृतिम् । गुडमञ्जर्य्याः खपुर इति गुडमञ्जरी मधूकवृक्षः तस्याः खपुर इति निर्य्यासः । अन्येतु गुडमञ्जरी शाल्मलीत्याहुः । नवनीतखण्डमिति नवनीतयुक्तं खण्डमर्दितं हन्ति । एवैव हन्तीति क्रिया नस्यं मूर्धविकारानित्यादिषु छाया इत्यन्तेषु सम्बध्यते । अस्रविस्रावः शोणितमोक्षः । ५१—५४

श्रमशुक्ताद्रकमात्रा मन्दे बह्नौ श्रमे सुरा स्नानम् ।
दुःखसहत्वे स्थैर्य्ये व्यायामो गोक्षुरर्हितः कृच्छ्रे ॥ ५५ ॥
कासे निदिग्धिका पार्श्वशूले पुष्करजा जटा ।
वयसः स्थापने धात्री त्रिफला गुग्गुलुर्व्रणे ॥ ५६ ॥

श्रमेत्यादौ मन्दे वह्नौ श्रमशुक्तार्द्रकमात्रा हिता इति वक्ष्यमाणेनान्वयः । श्रमो व्यायामः शुक्तं सन्धानविशेषः तत्र प्रक्षिप्तमार्द्रकम् किंवा आर्द्रकमपि

भिन्नमेव । मात्रा अनपायिपरिमाणम् । दुःखसहत्वे तथा स्थैर्य्ये इति शरीरस्य निविडत्वे कर्त्तव्ये व्यायामो हितः । ५५।५६

वस्तिर्वातविकारान् पैत्तान् रेकः कफोद्भवान् वमनम् ।
क्षौद्रं जयति बलासं सर्पिः पित्तं समीरणं तैलम् ॥५७॥

वस्तिरित्यादौ रेक इति विरेचनम् । ५७

इत्यग्र्यं यत् प्रोक्तं रोगाणामौषधं शमायालम् ।
तद्देशकालबलतो विकल्पनीयं यथायोगम् ॥ ५८ ॥

उपसंहरति इत्यग्र्यमित्यादि । अग्र्यमिति तद्विकार प्रशमने श्रेष्ठम् । रोगाणामिति सर्व्वव्याधीनां प्रशमाय अलं समर्थम् । तदौषधं देशकालबलानुसारेण विकल्पनीयमिति योजनीयम् । यथायोगमिति यद् यस्य युज्यते । ५८

इत्यात्रेयादागमस्यार्थसूत्रं तत् सूक्तानां पेशलानामतृप्तः ।
भेडादीनां सम्मतो भक्तिनम्रः पप्रच्छेदं संशयानोऽग्निवेशः ॥ ५९ ॥

नन्विदं शास्त्रं तदैव सार्थकं स्यात् यदि चिकित्सितमारोग्यसाधनं भवेत् तच्च नोपपद्यते अन्वयव्यतिरेकव्यभिचारादित्याशङ्कां निराकर्त्तुमात्रेयाग्निवेशसंवादरूपं पुरावृत्तमुपन्यस्यति इतीत्यादि । आगमस्येति अधीत्य । अर्थसूत्रमित्यायुर्व्वेदशास्त्रम् । तत्सूक्तानामित्यायुर्व्वेदसूक्तानामिति करणे षष्ठी । तृप्तिराकाङ्क्षा निवृत्तिः तद्रहितः साकाङ्क्ष इत्यर्थः । भेडादीनां सम्मतमित्यनेन तेषामपि सम्मतिमादाय पप्रच्छेत्यर्थः । संशयान इति आरोग्यचिकित्सयोः कार्य्यकारण भावे सन्दिहान इत्यर्थः । ५९

दृश्यन्ते भगवन् केचिदात्मवन्तोऽपि रोगिणः ।
द्रव्योपस्थातृसम्पन्ना वृद्धवैद्यमतानुगाः ॥ ६० ॥
क्षीयमाणामयप्राणा विपरीतास्तथापरे ।
हिताहितविभागस्य फलं तस्मादनिश्चितम् ॥ ६१ ॥
किं शास्ति शास्त्रमस्मिन्निति कल्पयतोऽग्निवेशमुख्यस्य ।
शिष्यगणस्य पुनर्वसुराचख्यौ कात्स्न्र्यं तस्तत्त्वम् ॥ ६२ ॥

तत्र प्रथममन्वयव्यभिचारं दर्शयति दृश्यन्त इत्यादि । आत्मवन्त इति जितेन्द्रियाः । द्रव्यं भेषजादिकमुपकरणम् । उपस्थाता परिचारकः तयोः सम्पद्

गुणवद् द्रव्यादिशालित्वम् तद् युक्ताः। विद्वद्वैद्याः पण्डितवैद्याः। तेषां मतमनुगच्छन्त्यनुसरन्तीति विद्वद्वैद्यमतानुगा इति। विद्वदिति विशेषणेन वैद्यस्य तथा तन्मतानुयायित्वेनातुरस्य च गुणो दर्शितः। एतेच भेषजपरिचारक-वैद्यातुराणां षोड़शगुणाः सूत्रस्थाने वोक्ताः। क्षीयमाणामयप्राणा इति एवम्भूता रोगिणः कदाचित क्षीयमाणामयाः कदाचित् क्षीयमाणप्राणाः दृश्यन्ते। अन्वय व्यभिचारं दर्शयित्वा व्यतिरेक व्यभिचारञ्च दर्शयति विपरीतास्तथाऽपरे इति। अनात्मवन्तोऽनुपकरणाः परिचारकशून्या अज्ञवैद्यमतानुगाश्च कदाचित् क्षीयमाणामयाः कदाचित् क्षीयमाणप्राणा दृश्यन्ते इत्यर्थः। हिताहितविभागस्य फलं तस्मादनिश्चितमिति। यस्मात् सत्यपि चिकित्सिते आरोग्यं मरणञ्च तथा असत्यपि चिकित्सिते आरोग्यं मरणञ्च तस्माद्धिताहितविभागस्य फलम् आरोग्य-मरणरूपम् अनिश्चितम्। किं शास्ति शास्त्रमिति शास्त्रं हि हितोपादान महित परिहारञ्च शास्ति शिक्षयति तच्चाप्रयोजकं हिताहितयो स्तुल्यफलत्वादित्यर्थः।

अस्मिन्नित्यादि। इति पूर्व्वोक्तं पूर्व्वपक्षं कल्पयतः शिष्यागणस्य पुनर्व्वसु-रात्रेय स्तत्त्वं सिद्धान्तमाचख्यौ उक्तवान्। अग्निवेशोमुख्यो यस्मिन् तस्य। ६०—६२

न चिकित्साऽचिकित्सा च तुल्या भवितुमर्हति।

न चिकित्सेत्यादि। तुल्येति तुल्यफला। ६३—

विनापि क्रिययाऽस्वास्थ्यं गच्छतां षोड़शांशया ॥ ६३ ॥
आतङ्कपङ्कमग्नानां हस्तालम्बो भिषग्जितम्।

विनेत्यादि। षोड़शांशयेति षोड़शकलया। हस्तालम्बइव हस्तालम्बः। एतेन यथा पङ्कमग्नान् पुरुषान् हस्तालम्बः शीघ्रम् अक्लेशेनोत्थापयति एवं चिकित्सा-मन्तरेणारोग्यं लभमानान् पुरुषान् प्रति यदि चिकित्सा सहकारिणी स्यात् तदा शीघ्रमक्लेशेनारोग्यं स्यादित्यर्थः। चरकेऽप्युक्तम्—

"येह्यातुराः केवलाद्भेषजादृते समुत्तिष्ठन्ते न तेषां सम्पूर्णभेषजोपपन्नानां नोत्थानविशेषोऽस्ति। यथाहि पतितं पुरुषं समर्थमुत्थानाय उत्थापयन् पुरुषो बलमस्योपादध्यात्, स क्षिप्रतरमक्लिष्ट एवोत्तिष्ठेत् सम्पूर्णभेषजो-पलम्भादातुराः॥" इति (सू॑ १० अ॑) एतेन यद्यपि भेषजरहिता-रोग्यस्थलेऽदृष्टमेवोत्थाने कारणं तथापि यदि दृष्टमपि भेषजं तत्र सहकारि स्यात्तदा दृष्टादृष्टोभयबलाच्छीघ्रमेवारोग्यं स्यादिति सिद्धम्। ननु तथापि

व्यतिरेक व्यभिचारस्य विद्यमानत्वात् कथं कारणताग्रह इति चेद् ब्रूमः, भेषजं तावदाहाराचाररूपं यस्य दोषस्य विकारस्य वा विपरीतं तदसति प्रतिबन्धके तं शमयतीति दृष्टम्। यथा कटुकेन श्लेष्मक्षयोऽग्निना शीतप्रशमः आहारेण क्षुधापगमः पानीयेन तृषापगम इति सर्व्वेषामेवाबाधितप्रत्यक्षेण तथा आरोग्य-भेषजयोः कार्य्यकारणभावाभावे आरोग्यार्थिनां भेषजे निष्कम्पा प्रवृत्तिरेव न स्यादित्यन्यथानुपपत्तिमूलया अर्थापत्त्या च, तथा ज्वरहरणकामो दशमूलीं पिवेदित्यागमसहस्रैश्च कार्य्यकारणभावेऽवधृते यत्रापाततः सर्व्वजनप्रसिद्धभेषज-मदृष्ट्वैव भेषजव्यतिरेकाभिमानो भवतस्तत्रापि बलवता जीवनादृष्टेनोपनीतस्य दोषादिविपरीतदेशकालाहाराचारादे र्भेषजस्य कारणत्वं केन वार्य्यते? नचैवमावश्यकत्वात् लाघवाच्चादृष्टमेव तत्रापि कारणतया कल्प्यतां किमन्तर्गडुना भेषजेनेति वाच्यम् दृष्टकारणमात्रोच्छेदापत्तेः। तथादृष्टकारणानभ्युपगमेऽ-दृष्टस्याप्यनुत्पत्ति प्रसङ्गात् तस्यापि दृष्टयोगादिजन्यत्वात्। अयमर्थश्चरकतत्त्व-प्रदीपिकाया मेवास्माभिः प्रपञ्चित इति तत्रैवानुसन्धेयोऽभियुक्तैरिति। —६३।६४—

जीवितं म्रियमाणानां सर्व्वेषामेव नौषधात् ॥ ६४ ॥
न ह्युपायमपेक्षन्ते सर्व्वे रोगा न चान्यथा।
उपायसाध्याः सिध्यन्ति नाहेतुर्हेतुमान् यतः ॥ ६५ ॥

नन्वेवं भेषजसत्वेऽप्यारोग्यं कुतो न स्यादित्यत आह जीवितमित्यादि। भेषजमन्तरेणेति शेषः। भेषजमन्तरेण म्रियमाणानां सर्व्वेषामिति साध्यव्याधीना-मसाध्यव्याधीनाञ्च औषधाचिकित्सिताज् जीवितमिति न। कुत इत्याह नह्युपायमपेक्षन्ते सर्व्वे रोगा इति हि यतः सर्व्वे रोगाः साध्या असाध्याश्च उपायं नापेक्षन्ते स्वोपशमं प्रति इति शेषः। असाध्येषु व्याधिषु भेषजस्य निषिद्धत्वात् वैद्यस्यानभिज्ञत्वेन षोड़शगुणसम्पन्नस्य भेषजस्याभावाच्चेत्यर्थः। ये तु व्याधयः उपायेन चिकित्सितेनैव साध्याः ते अन्यथेति उपायमन्तरेण न सिध्यन्ति उपायेनैव सिध्यन्तीत्यर्थः। कुत इत्याह नाहेतुर्हेतुमान् यत इति। यतः हेतुमान् कारण-साध्यो यः सोऽहेतुरकारणको न स्यात्। —६४।६५

यदुक्तं सर्व्व सम्पत्तियुक्तयापि चिकित्सया।
मृत्युर्भवति तत्रैव नोपायेऽस्त्यनुपायता ॥ ६६ ॥

अन्वयव्यभिचारं परिहरति यदुक्तमित्यादि। सर्व्वसम्पत्तिः षोड़शगुण-

सम्पत्तिः। नोपायेऽस्त्यनुपायतेति यो यस्य उपायः स कदाचिदपि तस्यानुपायो न स्यात्। यथा घटस्य मृद्दण्डचक्रादि सामग्रीविशेषो न कदाचिदपि तस्यानुपायो न स्यात्। तस्माच्चतुष्पादविकित्सासाध्यस्य रोगस्य चिकित्सा उपाय एव नत्वनुपाय इत्यर्थः। ६६

अन्येष्वोपाययुक्तस्य धीमतो जातुचित् क्रिया।
न सिध्येद्दैववैगुण्यान्न त्वियं षोडशांशिका॥ ६७॥

बुद्धिमतः पुरुषस्य क्रियान्तरे कदाचिद् दैववैगुण्येनासिद्धिं दृष्ट्वा चिकित्सायाअपि असिद्धिभ्रमं माकार्षीदित्याह अन्येष्वोपाययुक्तस्येत्यादि। धीमतोऽपि पुरुषस्य उपाययुक्तस्यापि जातुचित् कदाचिदेव अपरा क्रिया कृषिराजसेवादिरूपा दैववैगुण्यान्न सिध्येत् षोडशांशिका षोडशगुणयुक्ता पुन रियं चिकित्सा न न सिध्येद् अपितु सिध्येद्देवेत्यर्थः। चरकेऽप्युक्तम् (सू॰ १० अ॰)

"साध्यासाध्य विभागज्ञोज्ञानपूर्वं चिकित्सकः।
काले चारभते कर्म्म यत्तत् साधयति ध्रुवम्॥" इति ६७

कस्यासिद्धोऽग्नितोयादिः स्वेदस्तम्भादिकर्मणि।
न प्रीणनं कर्शनं वा कस्य क्षीरगवेधुकम्॥ ६८॥
कस्य माषात्मगुप्तादौ वृष्यत्वे नास्ति निश्चयः।
विण्मूत्रकरणाक्षेपौ कस्य संशयितौ यवे॥ ६९॥
विषं कस्य जरां याति मन्त्र-तन्त्रविवर्जितम्।
कः प्राप्तः कल्यतां पथ्यादृते रोहिणिकादिषु॥ ७०॥

अयमर्थो वेदोक्तोऽर्थः सर्व्वजनसम्मत इत्याह कस्येत्यादि। स्वेदकर्म्मणि अग्न्यादिः स्तम्भनकर्म्मणि च तोयादिः कस्यासिद्धोऽसम्मतः अपितु सर्व्वस्यैवेत्यर्थः। न प्रीणनमित्यादावपि असिद्धपदं सम्बध्यते। क्षीरं प्रीणनमिति सन्तर्पणम् तथा गवेधुकं कर्शनमिति कस्यासम्मतम्। विण्मूत्रकरणाक्षेपाविति विट्करणमिति पुरीषवर्द्धनं मूत्राक्षेप इति मूत्रक्षयश्च यवे कस्य संशयितः (तौ)। रोहिणीका कण्ठरोगविशेषः पथ्यादृते इत्यौषधं विना। ६८—७०

अपि चाकालमरणं सर्व्वसिद्धान्तनिश्चितम्।
महतापि प्रयत्नेन वार्यतां कथमन्यथा॥ ७१॥

चन्दनाद्यपि दाहादौ रूढमागमपूर्वकम्।

अपिचेत्यादि। अन्यथेति चिकित्सितं विना। रूढमिति प्रसिद्धम्। ७१—७२—

शास्त्रादेव गतं सिद्धिं ज्वरे लङ्घनबृंहणम्॥ ७२॥

शास्त्रादेवेत्यादि। लङ्घनीये बृंहणीये च ज्वर इति शेषः लङ्घनं मुपवासादि बृंहणं क्षीरमांसादि। शास्त्रादेवेति शास्त्रद्वारेणैव। सिद्धिमिति प्रसिद्धं गतम् —७२

चतुष्पाद्गुणसम्पन्नं सम्यगालोच्य योजिते।
मा कृथा व्याधिनिर्घाते विचिकित्सां चिकित्सिते॥ ७३॥

चतुष्पादित्यादि। व्याधिनिर्घातनिमित्तं चिकित्सिते विचिकित्सामिति संशयं मा कृथाः। किं विशिष्टे चतुष्पाद्गुणसम्पन्न इति गुणवद् वैद्यादि चार चतुष्टयसम्पन्नं इत्यर्थः। सम्यगालोच्य कालदेशप्रकृत्यादिकमालोच्य प्रयोजिते। ७३

एतद्धि मृत्युपाशानामकाण्डे छेदनं दृढम्।
रोगोत्त्रासितभीतानां रक्षासूत्रममूत्रकम्॥ ७४॥

एतदित्यादि। एतच्चिकित्सितं अकाण्डे अकाले ये मृत्युपाशास्तेषां छेदनं दृढमिति निश्चितम् किंवा दृढमिति रक्षासूत्रविशेषणम्। तथा रोगोत्त्रस्तैः ज्वरादिभि रुत्त्रासितानां विह्वलितानां तथा अनुत्पन्नरोगेभ्य स्तत्समागमशङ्कया च भीतानां अमूत्रकमिति सूत्ररहितं रक्षासूत्रम्। तत्कार्य्यकर्त्त्वादित्यर्थः। ७४

एतत् तदमृतं साक्षाज्जगत्यायासवर्जितम्।
याति हालाहलत्वञ्च सद्योदुर्भाजनस्थितम्॥ ७५॥

इदानी मेतदेव चिकित्सितमज्ञवैद्यप्रयुक्तं सद् विषवत् मारकं भवति इत्याह एतदित्यादि। तदेतच्चिकित्सितं साक्षादमृतमिव किं विशिष्टं जगदायासवर्जितं पूर्व्वं यदमृतं तज्जगत सुरासुररूपस्य आयासेन क्षीरोदमन्थनरूपेण उत्थितम् इदं पुन स्तद्वर्जितम्। एवम्भूतमपि अमृतसदृशं चिकित्सितं दुर्भाजनस्थित मित्यसत्पात्रस्थितं सत् हालाहलत्वं याति। ७५

अज्ञातशास्त्रसद्भावान् शास्त्रमात्रपरायणान्।
त्यजेद्दूराद्भिषक्पाशान् पाशान् वैवस्वतानिव॥ ७६॥

तस्यैव दुर्भाजनस्य स्वरूपदर्शनपूर्व्वकं हेयतामाह अज्ञातेत्यादि। न ज्ञातः

शास्त्रस्यायुर्वेदस्य सद्भावः सदर्थो यैस्तान्। शास्त्रमात्रपरायणानिति प्रसिद्धग्रंथं यथाकथञ्चिच्छास्त्रमात्र परायणान्। भिषक्पाशानिति वैद्याधमान्। ७६

भिषजां साधुवृत्तानां भद्रमागमशालिनाम्।
अभ्यस्तकर्मणां भद्रं भद्रं भद्राभिलाषिणाम्॥ ७७॥

इदानीं सद्वैद्यानाशास्ते भिषजामित्यादि। सद्वृत्तानां वैद्यानां भद्रमिति कुशलमस्त्विति शेषः। आगमशालिनामिति सम्यगधीतायुर्वेदशास्त्राणाम्। अभ्यस्तकर्मणामिति अभ्यस्तं बहुधा कृतं कर्म चिकित्सितं यैस्तेषाम्। पुनः किं विशिष्टानां अत्र इहलोक अमुत्र परलोके च भद्राभिलाषिणां कुशलाकाङ्क्षिणाम्।७७

इति तन्त्रगुणैर्युक्तं तन्त्रदोषविवर्जितम्।
चिकित्साशास्त्रमखिलं व्याप्य परितः स्थितम्॥ ७८॥
विपुलामलविज्ञानमहामुनिमतानुगम्।
महासागरगम्भीरसंग्रहार्थोपलक्षणम्॥ ७९॥

इदानी मुपादेयतानिमित्त मिमं ग्रन्थं स्तौति इतीत्यादि। तन्त्रगुणाश्च रोगभिषग्जितीये "महद्यशस्विपुरुषसेवितम् अर्थबहुलम् आप्तजनपूजितं त्रिविधशिष्यबुद्धिहितम्" इत्यादिनोक्ता अनुसन्धेया स्तैर्युक्तम्। तन्त्रदोषाश्च पुनरुक्त कष्टोच्चार्य्य शब्द-प्रकरण-सङ्कुलत्वादयस्तै र्विवर्जितम्। चिकित्साशास्त्रमखिलं व्याप्य परितः स्थितमिति व्याससमासाभ्यां निखिल चिकित्साशास्त्रार्थाभिधायकत्वेनेति भावः। महासागरवद् गम्भीरो यः संग्रहो वृद्धवाभटः तदभिहितानामर्थानां उपलक्षणं सूचकम्। ७८।७९

अष्टाङ्गवैद्यकमहोदधिमन्थनेन योऽष्टाङ्गसंग्रहमहामृतराशिराप्तः॥
तस्मादनल्पफलमल्पसमुद्यमानां प्रीत्यर्थमेतदुदितं पृथगेवतन्त्रम्॥ ८०॥

इदानीमस्य स्वल्प-वाभट-तन्त्रस्य संग्रहाद् वृद्धवाभटाख्यात् पृथक् करणे प्रयोजनमाह अष्टाङ्गेत्यादि। अष्टाङ्गं वैद्यकमष्टाङ्ग आयुर्वेदः स एव महोदधिः। अष्टाङ्गसंग्रहो वृद्धवाभटः स एव महान् अमृतराशिः। तस्मादष्टाङ्गसंग्रहादिदं तन्त्रं पृथक् कृत्वा उदितमुक्तम्। किमर्थमित्याह अल्पसमुद्यमानां प्रीत्यर्थमिति समुद्यमस्यारम्भे उपकरणमिति यावत्। तच्च आयुर्मेधादि अनल्पफलमिति महाफलम् बह्वर्थमित्यर्थः। ८०

इदमागमसिद्धत्वात् प्रत्यक्षफलदर्शनात्।
मन्त्रवत् सम्प्रयोक्तव्यं न मीमांस्यं कथञ्चन॥ ८१॥

इदानी मेतत्तन्त्रोक्तेषु द्रव्येषु मध्ये यदि किञ्चिद्द्रव्यमचिन्त्यस्वभावं भवति तच्च मीमांस्यमित्याह इदमित्यादि। इद मचिन्त्यस्वभावं भेषजं यथा दन्ती चित्रकसमाऽपि विरेचयति यथा वा विषं विषं हन्ति, आकर्षकमणिः लोहमाकर्षति, यथा वा खदिर रसाञ्जन हरिद्रादीनि सर्व्वकुष्ठ मेहघ्नानि इत्यादि न मीमांस्यं न मीमांसया तर्केण परीक्ष्यम्। कुत इत्याह आगम सिद्धत्वात्। एतेन यानि द्रव्याणि चिन्त्यस्वभावानि तद्विषया मीमांसा कर्त्तव्यैवेति बोधयति। यथा "द्रव्याणां तत् समानानां तथावापो न दृष्यति" इति। यथा वा "स्वयमप्यत्र भिषजा तर्क्यं बुद्धिमता भवेत्" इत्यादि। यथा वा "योजनानेन मतिमान् कुर्य्याद्दश शतान्यपि" इत्यादि। नन्वागमेन तावत् तिक्तकषायरसत्वेन वातजनकस्यापि वातकुष्ठहरत्वं बोध्यते तदागम सिद्धमपि युक्तिविरोधात् कथं न मीमांस्यमित्याह प्रत्यक्षफलदर्शनादिभिः। आगमस्य प्रत्यक्षफलत्वेन युक्त्यपेक्षया बलीयस्त्वात्। युक्तिविरुद्धमपि न मीमांस्यमित्यर्थः। ८१

दीर्घं जीवितमारोग्यं धर्ममर्थं सुखं यशः।
पाठावबोधानुष्ठानैरधिगच्छत्यतो ध्रुवम्॥ ८२॥

इदानी मेतत्तन्त्राध्ययनादीनां फलमाह दीर्घं जीवितमित्यादि। अनुष्ठानमेतत् तन्त्राभिहितस्यार्थस्य विधानम्। ८२

एतत् पठन् संग्रहबोधशक्तः स्वभ्यस्तकर्मा भिषगप्रकम्प्यः।
आकम्पयत्यन्यविशालतन्त्रकृताभियोगान् यदि तन्न चित्रम्॥ ८३॥

इदानीं तन्त्रान्तराध्ययनापेक्षया एतत्तन्त्राध्ययनेन चरकादि निखिलतन्त्रज्ञानं भवतीति दर्शयति एतदित्यादि। संग्रहबोधशक्त इति संक्षेपेण चरकसुश्रुतादि-सर्व्वायुर्वेदार्थानां ग्रहः उपदान संग्रहः। एतत्तन्त्रं पठन् पुरुषः सर्व्वायुर्वेदार्थ बोधे शक्तः स्यात्। अस्य तन्त्रस्य चरकसुश्रुताद्यक्त निखिलार्थाभिधायकत्वादिति भावः। अप्रकम्प्य इति केनापि प्रकम्पयितुमशक्यः। एतेन निखिलतन्त्रार्थ-ज्ञानेन अस्य विशालतन्त्रकृताभियोगान् यत् कम्पयति इदं न चित्रम्। अन्यद् विशालतन्त्रं चरकसुश्रुतादीना मेकतमं तत्र कृतो अभियोगो यैस्तान्। एतेन

एतत्तन्त्रपाठेन सकलान्यतन्त्रार्थं ज्ञानं भवति। अन्यतन्त्र पाठेन तु तत्तन्त्रार्थमात्र-ज्ञानं भवतीति कृत्वा तन्त्रान्तरापेक्षया उत्कर्षो दर्शितः। ८३

यदि चरकमधीते तद्ध्रुवं सुश्रुतादि-
प्रणिगदितगदानां नाममात्रेऽपि बाह्यः।
अथ चरकविहीनः प्रक्रियायामखिन्नः
किमिह खलु करोतु व्याधितानां वराकः॥ ८४॥

एतदेवोपपादयन्नाह यदीत्यादि। बाह्य इति अनभिज्ञः सुश्रुतोक्तगदानां नाममात्रमपि न जानातीत्यर्थः। अथेत्यादि चरकविहीनः इत्यनधीतचरकः प्रक्रियायामखिन्न इति चरकोक्त चिकित्सा प्रक्रियाया मखिन्नो अकृतश्रमो वराकः व्याधितानां किमिव करोतु अपितु न किञ्चिदपीत्यर्थः। ८४

अभिनिवेशवशादभियुज्यते सुभणितेऽपि न यो दृढमूढकः।
पठतु यत्नपरः पुरुषायुषं स खलु वैद्यकमाद्यमनिर्विदा॥ ८५॥

अभिनिवेशवशादित्यादि। यो दृढ़मूढ़ो अतिशयितमूढ़ो ज्ञानशून्यः अभिनिवेशवशाद् अभिमानवशात् सुभणितेऽपि सूक्तेऽप्यस्मिन्न अभियुज्यते नाभियोगपरः स्यात् सः पुरुषायुषं व्याप्य यत्नपरो भूत्वा आद्यं वैद्यकशास्त्रं अनिर्व्विदा आलस्य राहित्येन पठन्तु। एतेन तत्पाठेन पुरुषायुषपर्य्यवसान मात्रमित्यर्थः। ८५

वाते पित्ते श्लेष्मशान्तौ च पथ्यं तैलं सर्पिर्माक्षिकञ्च क्रमेण।
एतद्ब्रह्मा भाषते ब्रह्मजो वा का निर्मन्त्रे वक्तृभेदोक्तिशक्तिः॥ ८६॥

अथ चरकादौ प्राचीनाः सर्व्वज्ञकल्पा मुनयो वक्तारः अत्र तु भवान् अर्व्वाचीनः इति कथं प्राचीनोक्तं तन्त्रं विहाय इदानीन्तनोक्तं ग्राह्यमित्याह वात इत्यादि। एतेन एतादृशे अर्थे वक्तभेदोऽकिञ्चित्करः इति भावः। ८६

अभिधातृवशात् किं वा द्रव्यशक्तिर्विशिष्यते।
अतो मत्सरमुत्सृज्य माध्यस्थमवलम्ब्यताम्॥ ८७॥

न च वक्तृविशेषवशात्तदभिहिते द्रव्येऽपि कश्चिच्छक्तिविशेषो भवतीत्याह अभिधातृवशादित्यादि। ८७

ऋषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ।
भेडाद्याः किं न पठ्यन्ते तस्माद्ग्राह्यं सुभाषितम्॥ ८८॥

ऋषि प्रणीत इत्यादि सुगमम्। ८८

हृदयमिव हृदयमेतत् सर्व्वायुर्वेदवाङ्मयपयोधेः।
दृष्ट्वा यच्छुभमाप्तं शुभमस्तु परं ततो जगतः॥ ८९॥

इति श्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायामुत्तरे तन्त्रे
वाजीकरणविधिर्नाम चत्वारिंशोऽध्यायः।

इदानीं ग्रन्थ समाप्तौ आशीर्व्वाद रूपं मङ्गलमाचरन्नाह हृदयमित्यादि। यथा हृदयं शरीरावयवेषु मध्ये षड़ङ्गाद्याश्रयत्वेन प्रधानम्। उक्तं हि

"षड़ङ्ग मङ्गं विज्ञानमिन्द्रियाण्यर्थपञ्चकम्।
आत्मा च सगुणश्चेतश्चिन्त्यञ्च हृदि संश्रितम्॥" इति (चं सू० ३० अ)

अष्टाङ्गायुर्व्वेदार्थाभिधायकत्वेन प्रधानभूतमित्यर्थः यच्छुभमाप्तमिति सुकृतरूपम्।

आसीत् सभायां शिखरेश्वरस्य लब्धप्रतिष्ठः हि स साँभसेनः (१)।
वाणीविलासं कविसार्व्वभौमं विजित्य यः प्राप यशोद्गुरापम्॥
काकुत्स्थसेनस्तनय स्ततोऽभूत् ततोऽपि लक्ष्मीधर सेन नामा।
तस्याप्यभूद्धरण स्तनुज स्तस्यादनन्तस्तनयोऽथ जज्ञे॥
योऽन्तरङ्गपदवीं दुरावापां छत्रमप्यतुलकीर्त्तिरवाप।
गौड़भूमिपतिवार्व्वक् साहात् तत सुतस्य कृतिनः कृतिरेषा॥
मालञ्चिकाग्राम निवासभूमे गौंड़ावनीपालभिषग्वरस्य।
अनन्त सेनस्य सुतोऽवधत्ते टीकामिमां श्रीशिवदास सेनः॥
इति श्रीशिवदास सेन कृतोऽष्टाङ्गहृदय तत्त्वबोधः समाप्तः॥

ॐनमो नारायणाय।

भग्नपृष्ट कटीग्रीवा स्तब्धदृष्टिरधोमुखः।
दुःखेन लिखितं ग्रन्थं पुत्त्रवत परिपालये (त)॥
श्रीजगन्नाथ शर्मणः स्वाक्षरमिदम्। शक १४४८

उत्तरतन्त्रं समाप्तम्।

---

(१) साङ्गसेन इति मुद्रितद्रव्यगुण टीकायां दृश्यते।

श्रीमत् स्वामी लक्ष्मीरामट्रष्ट द्वारा प्रकाशिता

श्रीमच्चक्रपाणिदत्तविरचित भानुमती टीकया समुल्लसिता

सुश्रुतसंहिता (सूत्रस्थानमात्रम्)

को नाम न जानाति टीकाकृत्सु गरिष्ठं चरकचतुराननं चक्रपाणिदत्त महोदयम्। को वा वैद्यवरस्तस्य चरकटीकायाः प्रशंसावादेन न मुखरयति कृत्स्नं जगत्।

सुश्रुतस्यापि तस्य टीका भानुमत्यभिधेया सर्वथा वैद्यजनानां श्रद्धां विशेषेणा-वहति। परन्त्वेतावत् कालं तस्या मुद्रितो ग्रन्थो दुर्लभ एवासीत्। स्वामी लक्ष्मी-रामट्रष्ट महोदयानां कृपया अद्यैव प्रकाशितः स वैद्यजनगणमनोविनोदाय भवति। ग्रन्थोऽयं सुप्रथित निर्णयसागराख्य मुद्रायन्त्रालयात् सुविदितसम्पादकः पण्डित यादवजी आचार्य्य महोदयैस्तथा जयपुर महाविद्यालयाध्यापक नन्दकिशोर शर्म्मभिः सम्पादितः जयपुर नगरात् प्रकाशितः। महामहोपाध्याय गणनाथ सेन-महोदयै रचित उद्घातांशश्चास्य परं वैशिष्ट्यम्। अयं खलु मुद्राचतुष्टय दक्षिणया लभ्यत इति परं नः प्रमोदावकाशः। प्राप्तिस्थानन्तु—

स्वामी जयराम दासजी भिषगाचार्य्यः। जयपुर सिटी (राजपुताना)

भिषगाचार्य्य-श्रीज्योतिषचन्द्र सरस्वती विरचितया

चरक प्रदीपिका नाम टीप्पन्या समलंकृतः

चरक संहितायाः शारीरस्थाने प्रथमोऽध्यायः।

ग्रन्थेनानेन विद्यमानास्वपि चक्रपाणि प्रभृतिभिर्विरचितासु चरकसंहितायाष्टीकासु विद्यत एव प्रयोजनं कस्याश्चिन्नूतनाया टीकाया इत्यवगच्छेयु रायुर्व्वेदमर्म्मविदः। प्रकृतिपुरुषादि पदसाम्येन प्राञ्चोहि व्याख्यातारो यथाकथञ्चिदत्रापीश्वरकृष्णसम्मत-मेव सांख्यदर्शनं लिखितमिति प्रतिपिपादयिषन्ति। न तु तत्तुतस्तत्तथेति प्रतिपादनमेवास्याष्टीप्पन्या विशेषः। उपोद्घातेऽपि सांख्यदर्शनानां मतालोचनं विस्तरशः कृतमिति परं वैशिष्ट्यम्। मूल्यं पादोनरूप्यकम्। प्राप्तिस्थानन्तु—

४०।२ए, ग्रे ष्ट्रीट, हाटखोला पोः कलिकाता टीप्पनकारालये।